tables *de novo.* We reckon our time not by days, but by *tithis*, which are the times when the moon's elongation is equal to 0°, 12°, 24°, 36°, 48°, &c. And as the moon's elongation enters into the formation of the arguments of most of the largest inequalities, I have been able by taking advantage of this circumstance, to group together in a single table of double entry the effects of the *evection*, the *variation*, the *equation of the centre* and two other lesser inequalities, all of which have for their arguments, the various combinations of the sun's distance from the moon's perigee, and the moon's eleongation. (Vide formula at page 379).

Tables of the Sun, Mercury, Venus and Mars.

My planetary tables are chiefly prepared from those of Leverrier. But here again, I had to follow a course quite different from his, for similar reason, *i. e.*, the unsuitability of his arguments to my system. He has expressed the mean anomaly in arc, while I had to express the same in days, after the manner of Hansen, to get rid of the tables of mean motions. By rejecting his arguments I had to reject his tables also in the form in which they are given. Instead of the equation of the centre, I have calculated for equal intervals of days the true anomaly, which when added to the longitude of the perihelion, gives at once the true heliocentric position. I have also added the *reduction*, as calculated from the present positions of the nodes, to the true anomaly, seeing that the error arising from their retrograde motion, will not amount to more than 2′, during the course of the next two thousand years. Secular changes in the true anomaly, as well as in the radius vector, for intervals of one thousand years, are also given in the tables, so that there is no fear of the tables becoming too rough for distant dates.

Tables of Jupiter, Saturn, Uranus, and Neptune.

My tables of Jupiter and Saturn are based on those of **Prof. Kero Luxman Chhatre**, with this difference that while he applies the long inequality and the other perturbations to the Heliocentric place calculated from a mean undisturbed anomaly, I have applied them to the mean anomaly itself. This change in the application prevents an error in the heliocentric place of these two planets, the maxi, mum of which is about 5′. My tables of Uranus and Neptune are prepared from those of **Prof. Simon Newcomb at whose request the Smithsonian Institution of Washington**, had the kindness to send me the said tables free of cost. The remarks on the points of difference noticed in the last paragraph apply also to these tables.

The position of fixed stars are derived from the English Nautical Almanac for the year 1881, and the data of Saturn's rings are from Herschel's Outlines of Astronomy. I heartily and sincerely acknowledge my indebtedness to all the above-mentioned authors without the aid of whose tables, I could have never produced the present work.

Having thus described my ways and means I now proceed to point out the advantages, which this book possesses over the Grahalāghava, which is the type of all the old astronomical works in India. My book embodies all the astronomical discoveries and researches made during the last four centuries. The elliptical forms of the orbits, the perturbations, the planets Uranus and Neptune, Saturn's rings, the Phases of Venus and Mars, the transits of Venus and Mercury across the sun's disk, the path of the Moon's penumbra across the surface of the earth during a solar eclipse, the effects of the refraction of light on the rising and setting of a heavenly body, these are the things which were either discovered or observed long after the Grahalāghava. The Mahāpāt or the problem of finding the time when the Sun and the Moon are equi. distant from the celestial equator, the heliacal rising and setting of the brilliant planets Jupiter and Venus, the occultations of some of the brighter stars by the moon, the eclipses and other phenomena, are here treated in a manner, never attempted in any of the old books on Astronomy. This book gives the places of the planets correct to a minute of arc, while those obtained from the Grahalāghava are often in error by several degrees. The signs plus and minus of corrections, especially when their number is large, are a source of much trouble and perplexity to the computer. This has been got rid of in this book. The corrections have been made always additive by the use of suitable constants after the manner of Hansen. The mental labour involved in the computations according to the methods of the Grahalāghava is immense, while this book enables the computer to work out the various results with great ease and precision.

Advantages over the Grahalāghava.

Two things, besides those described above, deserve special notice. The first is my contrivance for getting rid of trigonometrical formulæ and logarithms in the computation of the geocentric places. The duty of European astronomers ends with the completion of the heliocentric tables and the remaining work of calculating the geocentric places is left to the computers. But in India the case is different. The Jyotishis or computers know neither trigonometry nor logarithms. They can only work out the first four rules integral in arithmetic and the extraction of the square root. It is impossible then to expect such computers to work out the trigonometrical formulæ. Prof. Kero Laxman Chhatre imitated this course of the European astronomers and as a consequence, his tables are lying these thirty-eight years without being used by any of the Jyotishis. In India the aim of such works ought to be not only to secure accuracy but to reduce the mental labour of computation to its minimum even at the sacrifice of a little accuracy, in other words the methods ought to be as mechanical and practical as possible. Perhaps I may be blamed for holding this opinion, but those who are acquainted with the practical side of the question will agree with me.

The geocentric places.

I clearly saw that unless I did away with trigonometry and logarithms, the two great obstacles in the way of our Jyotishis, my tables would also share the same fate. I meditated long upon the possibility of finding a remedy and after making trials in various ways, I had the good fortune to discover one. It is this. I have prepared for each planet a table of mean elongations and mean distances from the earth with multipliers peculiar to each elongation. The algebraical sum of the excess or defect of a planet's radius vector over its mean value and the same of the earth reduced to the planet's radius vector by parallel lines, is to be multiplied by the multiplier and the product will be the correction, which, when applied to the mean elongation, gives its true value correct to 1′. I have not been so particular about the distance of a planet from the earth, for the reason that the angular change in the geocentric latitude due to a small error in it will not amount to more than 1′.

Trigonometry dispensed with.

The second is the problem of finding the path of the Moon's penumbra over the surface of the earth. **The method here adopted is entirely my own, and, I believe is the easiest, when we content ourselves with getting** results of moderate accuracy. I have prepared tables so as to suit this new method, but the task was so heavy that I had to resort to the graphic method in the construction of some of the tedious tables.

It is now necessary to place before the reader, the means of estimating the accuracy of my tables. Of course it is good for those who may be provided with astronomical instruments to test the accuracy by direct observations. But those who may not be so fortunate must take it on faith. The places of the planets given in the English Nautical Almanac are admitted to be as accurate as those obtained from actual observation with the finest instruments. I shall subjoin for the sake of comparison ** two tables containing side by side the places of the planets derived both from this book and the Nautical Almanac and will place along side also those available from the Almanac based on the Grahalāghava.

Accuracy and ease.

Table I.

31st March 1893 at 12 h. 51 m. Greenwich Mean Time.
1st April 1893 at mean Sunrise at Ujjain C. T.

Planets.	Heliocentric Longitude.		Heliocentric Latitude.	
	Nautical Almanac.	Jyotir-Ganit.	Nautical Almanac.	Jyotir-Ganit.
Mercury	191° 24′	191° 23′	N. 4° 4·6′	N. 4° 4·6′
Venus	352 10	352 10	S. 3 21·6	S. 3 22·3
Mars.............	91 27	91 27	N. 1 15·2	N, 1 15·3
Jupiter	35 28	35 28	S. 1 10·6	S. 1 10·9
Saturn...........	189 31	189 31	N. 2 25·5	N. 2 25·9
Uranus...........	218 21	218 19	N. 0 26·7	N. 0 26·7
Neptune	70 38	70 37	S. 1 32·4	S. 1 32·9

** The above table is for the year 1893. Another comparative table will be found on page 118. The two tables are separated by 35 years.

Table II.

Planets.	Geocentric Longitude.						Geocentric Latitude.			
	Nautical Almanac.		Jyotir-Ganit.		Graha-laghava.		Nautical Almanac		Jyotir-Ganit.	
Sun	11°	32′	11°	32′	12°	14′	0	0′·0	9°	0′·0
Moon	188	32	188	32	189	22	N. 1	49·0	N. 1	49·0
Mercury	11	37	11	38	15	11	N. 2	47·0	N. 2	46 8
Venus	3	25	3	25	6	41	S. 1	26·3	S. 1	26·2
Mars	62	9	62	9	63	38	N. 0	58·9	N. 0	59·1
Jupiter	31	31	31	31	31	23	S. 0	59·8	S. 0	59 8
Saturn	189	17	189	17	193	35	S. 2	42·0	S. 2	42·9
Uranus	219	46	219	46	...	...	N. 0	28·3	N. 0	28·1
Neptune	69	0	69	0	...	...	S. 1	30·4	S. 1	31·3

The above tables are sufficient to show that my tables are as accurate as can be expected in the present state of Hindu Astronomy. The case with which the results are arrived at can only be realized by actually going through the calculations. The use of logarithms is not insisted upon; but for the convenience of those who know their use, I have inserted the logarithms of differences for expediting interpolations in the heliocentric tables and if recourse be had to them, the ease will be still greater.

Compilation and the difficulties.

This book has absorbed nearly all my leisure for upwards of twenty years. At first it was composed in the Marathi language, after the system of Grahalāghava and had no tables. And consequently the labour of working out the rules was so great that I could not induce even myself to use the book. I therefore resolved to prepare tables to alleviate the trouble. But seeing that the Marathi language would only serve to limit their usefulness to a part of India I finally resolved to write it in Sanskrit in the present form so that it might be of use to every Jyotishi in India.

The mental labour involved in the preparation of a book of this nature might be better imagined than described especially when one man alone has to do everything in connection with it *viz.* thinking, computing, verifying, transcribing and comparing. The labour is heavy enough to turn the strongest head or to pull down the most robust constitution. M. Plana once remarked to Sir G. B. Airy. " Quelquefois, Monsieur, ces calculs me font presque perdre la tete " and I can assure the reader from my own experience that there is not the least exaggeration in his remark.

The last but not the least was the difficulty of publishing this book. My love of astronomy was proof against every obstacle in composing the book. But here I was quite powerless. The scientific nature of the book precluded the hope of its becoming attractive to the general readers. To publish it on my own responsibility was to plunge myself in debt. My duties as a school master prevented any activity on my part in securing pecuniary aid. After the failure of one or two efforts in this direction I had to content myself with the thought that I had discharged my duty towards my countrymen by writing the book. The manuscript then lay five years with me and appeared doomed to be a prey to the white ants. But at last as if by Divine Will Rao Bahadur Krishna Rao Ballal Deval happened to see it. After being convinced that the book would supply a want felt throughout India, he kindly undertook to arrange for its publication and the present edition is the fruit of his ceaseless efforts. The public justly owe him a debt of gratitude for this act of public usefulness.

Plan and Arrangement.

A few words about the plan and arrangement followed in this book may not be out of place. It is divided into two parts. The first part treats of the positions of the heavenly bodies and the second, of the phenomena. Each part is again subdivided into Chapters for the full treatment of different subjects. The order of treatment is as follows:- first the rules in Sanskrit; then an example to illustrate it and lastly the tables with their explanatory notes and the formulæ employed in their construction. The subjects treated of in each of the Chapters need no mention. The last chapter treats of the method of converting a Hindu date into its corresponding Christian one. Woodcuts and diagrams have been employed to illustrate the phenomena and a map of the stars in the zodiac is annexed at the end of the book. The map may be used as a means of learning the Hindu asterisms and of testing, though roughly, the accuracy of the places of the planets when other means are unavailable.

The place where our famous astronomer Bhâskarâchârya lived and wrote his immortal *Siddānta Siromani* in A. D. 1150 had long been forgotten, and was wrongly identified with many conjectural localities. I therefore thought it my duty and an honour to the venerable Achârya to fix the place of his residence from evidence derived from old inscriptions, historical facts, and his very words. The reader will find at the end of this book that the place was no other than the town of Bid in the west of the Nizam's territories.

It now remains for me to do the grateful duty of acknowledging my thanks to those gentlemen who morally or materially helped me in the publication of this work.

I beg to tender my grateful acknowledgments to the Hon'ble Mr. E. Giles, M. A., Director of Public Instruction, Bombay Presidency, for his liberal offer to purchase one hundred and twenty-five copies of this work.

My hearty thanks are due to Dr. Ramkrishna Gopal Bhândârkar, Ph. D. for his kindness in reading the book in manuscript and for making valuable suggestions and recommendations.

Lastly I thank Mr. Hari Narayan Apte, Superintendent of the Ānandâshrama Press, and the learned Shastris, for their hearty co-operation in carrying the book through the press.

And now I thank the great Disposer of all things that he has spared me to see the work of my life rendered secure and permanent and hope that He will also make it acceptable to those for whom it is intended.

V. B. KETAKAR.

P. S.

Attention to the subjoined " Supplement " is invited.

20th November 1928
Bijapur.

V. B. K.

Supplement

A SHORT ACCOUNT OF MY ACTIVITIES.

(1) The year 1928 marks the 54 th year of my **astronomical penance** replete with meditation, concentration, relaxation, repeated calculations, raptures, disappointments, sleepless nights, restless wanderings, fresh discoveries and ultimately permanent realization attended with remarkable triumph. All these long exertions in the sphere of Astronomy and Chronology are embodied in my **Astro-Mathematical** series composed in **Sanskrit, Marathi and English.**

(2) My Astro-Mathematical Series.

Sanskrit Works.	A. D.	Marathi Books.	A. D.
(1) Jyotirganitam ज्योतिर्गणितम्	1898	(7) Tables of the Sun, Moon & Planets. सोपपत्तिकग्रहगणित	1914
(2) Ketaki केतकी ग्रहगणितम्	1899	(8) Nakshatra Vijnana नक्षत्र विज्ञान	1916
(3) Vaijayanti वैजयन्ती पंचांगगणितम्	1900	(9) Problem of two Bodies गोलद्वयप्रश्नविमर्श	1918
(4) Ketaki Parishista केतकी परिशिष्टम्	1916	(10) Calendar Reform पंचांगसंशोधन नं. ३.	1923
(5) Bharat Bhu Mandal Ganitam भारतभूमण्डलसूर्यग्रहणम्	1921	(11) Problem of three Bodies (incomplete) गोलत्रयप्रश्नविमर्श	1924
		English.	
(6) Sauraryabrahma Tithiganitam सौरार्यब्राह्मतिथिगणितम्	1927	(12) Indian & Foreign Chronology	1923

(3) My Contribution to the Above Series.

(1) **A Sanskrit Commentary** (केतकीपरिमलवासनाभाष्यम्) with illucidation, demonstration based on modern higher Mathematics. (1930).

(2) **Shastra-Suddha Panchang-Ayanamsha Nirnaya (Sanskrit) 1929 शास्त्रशुद्धपंचांग अयनांश निर्णयः**

(3) **A brief life of Mr. V. B. Ketkar (Marathi)**-1934, illustrating the Astronomical aspect of his career, his contributions to the French Magazine, his discoveries and his all round scholarship.

(4) **Calendar Reform No. 1 & 2—1923.**

Nos. 1, 3, 6, 5, 9 were published by me in 1927, 1930 and 1934, 1937. (D. V. Ketkar.)

(4) All these original works composed by me have received full recognition and high appreciation throughout India, and England, Holland, France and America too. My books have removed the stagnation and introduced exactness and precision which were so lacking in the old Siddhantas such as Surya, Brahma-Sinddhant. My series has dealt with every branch of Astronomy and consequently raised the standard of Indian Astronomy and brought it to the level of the Western Astronomy. Lastly my series has greatly widened the sphere of Indian Astronomy by such theories as the Theory of Attraction.

(5) The Ketaki Panchangam started in the Shaka year 1821 has established its own reputation and has inspired seventeen others of its own type in the various parts of India and in some States too. Its publication depends on the disinterested generosity of the **Proprietor of the "Venkateshwar Steam Press, Bombay."**

(6) Such works cannot be written often.

Works like my Jyotirganitam cannot be written very often. Reasons are obvious. Instinctive insight, untiring energy, constant application, continuous meditation, perfect mastery over the subject, a command over various languages, Mathematical excellence, skillful arrangement, sound health, long life, self-resignation and self-sacrifice form the requisites of an author. One gifted with these merits alone can write books of the type of my Jyotirganitam. I harassed myself for full twenty years, day and night, to bring my Jyotirganitam, to a successful close. I am happy that it has now proved to be indispensable and established a Universal reputation throughout India and even outside.

(7) Duty of the Universities.**

Such Universal treatises, in my opinion, ought to receive decent financial help from the Universities. **I hereby leave a wish** that, in future, if the **Syndicates** are approached for help, with regard to my Jyotirganitam, they should comply with the request as far as possible. I stand far above begging and **I am not in favour of a free gift too.** A number of copies equal to the amount of the donation should be offered in return, so that the obligations may not be unwieldy.

(8) No distinction amongst Universities.†

My Jyotirganitam has captivated the minds of the learned Pandits of the whole of India and therefore, I make no distinction among the various Universities which grace the face of India.

** The University of Bombay has kindly contributed Rs. 600 towards the republication. (D. V. Ketkar.)

† I have sent detailed applications for help to all the other Universities too. Their responses are awaited. (D. V. Ketkar.)

(9) Purchase of 25 Copies.

In 1924, a learned Judge (retired) wrote to me :—

" I lately came to know about your books. I have carefully gone through them all. I really admire your intellectual abilities and your lofty powers. Your Astro-mathematical series has decorated every branch of Astronomy. India will remain indebted to you for all time to come. You intend publishing a Second Edition of your memorable Jyotirganitam, I fully agree with you. India has every reason to be proud of numerous full-fledged Universities. Your treatises bear a Universal aspect. I feel confident that, on application, each University will offer to purchase at least 25 copies."

(10) My last rightful desire.

The publication or republication of all my works will require not less than rupees 10,000 and therefore, cannot be undertaken without the kind and benevolent patronage. My last rightful desire is that :—

(*a*) Each University should offer to purchase books worth at least Rs. 300/-.

(*b*) The Ruling Princes in India ought to come to my help. just as Western Rulers support their Astronomers. Their sympathy for such sciences will give them immortal fame. All else is transient.

(*c*) All the Libraries throughout the whole of India should purchase one full set of my series.

(*d*) All the publication Societies should also purchase one set of my series.

(11) Earnest request to the Princes.

Though I am not in personal touch with the Princes, yet my treatises have been very widely used in their dominions. This gives me indirectly a rightful claim on their Princely Bounty. I request them to consider and do deserving justice to my claims by purchasing copies to the extent of Rs. 300.

(12) I have not been able to approach His Highness The Maharaja of Baroda, whose sympathetic attitude towards the uplift of such brilliant subjects is too well-known. I hope he will kindly take into consideration my age (75 years) and treat this as an application and offer a splendid donation or purchase a good number of copies.

(13) The fame of H. H. the Maharaja of Mysore as a staunch advocate of learning is heard far and wide. I hope he too will grace my series with a rich gift in the form of purchase of a good number of copies.

(14) Religious seats (Peethas)

In my humble opinion, it is the primary duty of the religious seats scattered over the face of India to run to help the spread of such works. * * *

(15) Noble response from the Chief of Jamkhandi.

For the purpose mentioned in art. 10, I feel highly delighted to announce that the present Chief of Jamkhandi (S. M. State) has been kind enough to offer a splendid donation of Rs. 500. I hope his action will prove exemplary.

(16) My son's Contribution to my Series.

(1) My son D. V. Ketkar, B. A., B. T., has combined numbers 2, 4 and supplemented them by an illuminating commentary in Sanskrit under the name of परिमल वासनाभाष्यम्, with full demonstration based on modern higher mathematics.

(2) शास्त्रशुद्धअयनांश निर्णयः in Sanskrit. Herein my son has given a masterly decision of the vexing question of Ayanamshas.

(3) My son has promised that he will take up the publication of the Second edition of Jyotirganitam. God bless him in his enterprise.

(4) Number 3 has been reprinted by my son.

(5) Numbers 5 and 6 have been lately published by my son.

Bijapur,
20th November 1928.

V. B. KETKAR,
Author of Jyotirganitam

---

* * * His Holiness Anandasrama Swamiji has kindly sent a gift of Rs. 50/-.
(D. V. Ketkar.)

श्रीगणेशो जयति ।

प्रस्तावना ।

प्राचीनज्योतिर्विदां वेधयन्त्राण्यत्यन्तं स्थूलान्यासन् इति तत्तद्ग्रंथत एव सिद्धम् । अतस्तेषां साहाय्येन संपादितेन ग्रहगतिस्थितिविषयकेण ज्ञानेनापि स्थूलेन भवितव्यम् । ग्रह-णादीनां स्वस्मिन्काले विसंवादं दृष्ट्वा तद्दोषदूरीकरणाय

प्राचीनग्रन्थाः

प्राग्ज्योतिर्विदो वारं वारं ग्रन्थान्पर्यशोधयन्, अथवा नव्यान्व्यरचयन् । परं ते सर्वे क्रमेणाचिराच्छिथिला बभूवुः ।

उक्तेऽस्मिन्विषये **श्रीमद्गणेशदैवज्ञोक्तिमुदाहरामः—**

“ ब्रह्माचार्यवसिष्ठकश्यपमुखैर्यत्खेटकर्मोदितं
तत्तत्कालजमेव तथ्यमथ तद्भूरिक्षणेऽभूत् श्लथम् ।
प्रापातोऽथ मयासुरः कृतयुगान्तेऽर्कात्स्फुटं तोषिता-
त्तच्चास्ति स्म कलौ तु सान्तरमथाभूच्चात्र पाराशरम ॥ १ ॥

तज्ज्ञात्वाऽऽर्यभटः खिलं बहुतिथे कालेऽकरोत्सस्फुटं
तत्त्रस्तं किल दुर्गसिंहमिहिराद्यैस्तान्निबद्धं स्फुटम् ॥
तच्चाभूच्छिथिलं तु जिष्णुतनयेनाकारि वेधात्स्फुटं
ब्रह्मोक्त्याऽऽश्रितमेतदप्यथ बहौ कालेऽभवत्सान्तरम ॥ २ ॥

श्रीकेशवः स्फुटतरं कृतवान्हि सौरार्यासन्नमेतदपि षष्टिमिते गताब्दे ॥
दृष्ट्वा श्लथं किमपि तत्तनयो गणेशः स्पष्टं यथा ह्यकृत दृग्गणितैक्यमत्र ॥ ३ ॥

कथमपि यदिदं चेद्भूरिकाले श्लथं स्यान्मुहुरपि परिलक्ष्येन्दुग्रहाद्दक्षयोगात् ॥
सदमलगुरुतुल्यप्राप्तबोधप्रकाशैः कथितसदुपपत्त्या शुद्धिकेन्द्रे प्रचाल्ये ॥ ४ ॥

श्रीमद्गणेशदैवज्ञैरात्मग्रंथविषयकं यद्भविष्यं पूर्वमेव तर्कितं तत्प्रतीतिकालः संप्रत्युपस्थितः । ग्रहलाघवे आरम्भवर्षम् १४४१ । तत्राऽऽरम्भ एव चन्द्रमन्दकेन्द्रं १°·८ अंशप्रमाणं न्यून-मासीत् । इयं न्यूनता संप्रति २°·७ प्रमिता समुपस्थिता । अतश्चन्द्रग्रहणावसरे स्पर्शादयः कालाः कदा कदा सार्ध-घटिकाप्रमाणं व्यभिचरन्ति । शा० वा० शकवर्षे १८०६

ग्रहलाघवं

चैत्रशुक्ल १५ मायां संभूतं ग्रस्तोदितं चन्द्रग्रहणमस्मिन्विषये लोकप्रसिद्धमुदाहरणम् । बुधादिग्रहाणां गणितमितोऽपि स्थूलतरम् । ग्रहयुतिकाले स्नानदानादिकार्याणामनुक्तत्वात्सामान्या जनास्तं कालं न निरीक्षन्ते । **पञ्चाङ्गेष्वपि** ग्रहयुतिकालनिर्देशो ग्रहस्पष्टशरश्च धूर्तैर्गणकैर्बहिष्कृताविति मे भाति । अतो **ग्रहलाघवीयं** ग्रहगणितं स्थूलतरं सदपि देशे सर्वत्र हाहाकारं नोत्पादयति । ग्रहगणितान्तर्गतं महान्तं विसंवादं विजानन्तोऽपि तत्संशोधनदौर्बल्याद्गणका अद्य यावन्मूकभाव-मुररीकुर्वन्ति स्म । परमिदं नैव साधु । अहं तु पञ्चदश वर्षाणि सततं **ग्रहलाघवीय**ग्रहगणित-प्रतीतिपरीक्षायै प्रयत्नं कृतवान् । तत्प्रयत्नफलमधः स्वल्पं प्रदर्शयामि ।

ग्रहयुतयः ।

ग्रहौ	शकवर्षे	ग्रहलाघवाद्युतिकालः	दृष्टो युतिकालः	अन्तरम्
भौमगुरू—	१८०१	वैशाखकृ. ६ रवौ	वैशाखकृ. ४ शुक्रे	+ २ दि.
शुक्रशनी—	१८०२	वैशाखकृ. ५ गुरौ	वैशाखकृ. ७ शनौ	− २ दि.
शुक्रभौमौ—	१८०२	श्रावणकृ. ३० शनौ	भाद्रपदशु. ३ भौमे	− ३ दि.
भौमगुरू—	१८०३	आषाढकृ. १४ रवौ	आषाढकृ. १२ शुक्रे	+ २ दि.
भौमशनी—	१८०४	अ.श्रा.कृ. १ सोमे	अ.श्रा.कृ. ३ बुधे.	− २ दि.
भौमगुरू—	१८०५	आश्वि.कृ. १२ शनौ	आश्वि.कृ. ४ शुक्रे	+ ८ दि.
बुधगुरू—	१८०९	मार्गशीर्षकृ. ९ शुक्रे	मार्गशीर्षकृ. ४ रवौ	+ ५ दि.
शुक्रभौमौ—	१८१०	पौषशुक्ल ६ सोमे	पौषशुक्ल १ बुधे	+ ५ दि.
भौमशनी—	१८११	आश्विनशु. ३ शुक्रे	भाद्र. कृ. १० गुरौ	− ७ दि.
भौमशनी—	१८१५	आश्वि.कृ. १४ भौमे	आश्वि.कृ. ७ भौमे	+ ७ दि.

न खलु श्रेयस्करं ग्रहलाघवानुसरणं भारतीयानां धर्मे व्यवहारे वेत्युपरितनैः प्रत्यक्षप्रमाणैः **सिद्धेऽपि ज्योतिर्विदां** दृढविश्वासार्थं प्रागर्वाग्ग्रन्थोक्तगणितमूलाङ्कानां तुलनाऽवश्यं करणीया। परमुभयविधग्रन्थयोर्नाक्षत्रवर्षदैर्ध्ययोभिन्नत्वात्सायनभोगैरेव मूलाङ्कतुलना प्रशस्ता। यतः सायनगणनारम्भस्थानमुभयोरेकमेव। विस्तरभयादियं तुलना नातिसूक्ष्माङ्कैः प्रदर्शिता। तत्र **ग्रहलाघवो**क्तपातोच्चानां स्थौल्याधिक्यात्सूक्ष्माङ्कतुलना निष्फलैव। अतोऽधस्तनी तुलना समीचीनेति गणितज्ञा अनुजानीयुः।

मूलाङ्कतुलना

मूलाङ्काः ।

ग्रहः	शा. श. १८०० चै.शु.१ सायनमध्यमभोगाः		उच्चानि सायनानि		पाताः सायनाः		परमं मन्दफलं		परमं मध्यमशीघ्रफलम्	
	ग्रहलाघवे	ज्योतिर्गणिते	ग्र.ला.	ज्यो.ग.	ग्र. ला.	ज्यो.ग	ग्र.ला.	ज्यो.ग.	ग्र.	ज्यो.
	अं. क.	अं. क.	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.
रविः	११ ४०	११ १३	१०१	१०१	–	–	२ २	१·९	...	...
चन्द्रः	१७ ५२	१७ २५	३५३	३४९	३२१	३२०	५·०	६·३	...	...
बुधः	८० ५४	७४ ३८	२३३	२५५	४३	४५	३·६	२३·७	२१·२	२२·८
शुक्रः	२२० २	२१७ ३६	११३	३१०	८३	१०१	१·५	०·८	४६·१	४६·३
भौमः	९१ ४४	९१ २०	१४३	१५४	६३	४८	१३·०	१०·७	४०·०	४१·०
गुरुः	३०० १४	२९७ ४८	२०३	१९२	१०३	९९	५·७	५·५	१०·८	११·१
शनिः	० ५०	० ३०	२६३	२७०	१२३	११२	९·३	६·४	५·७	६·०

मूलाङ्काः ।

ग्रहाः	दिनगतयः सायनाः		शराः		मध्यममानानि	मध्यममानम्	
	ग्रहलाघवे	ज्योतिर्गणिते	ग्र.ला.	ज्यो.ग.		ग्र.ला.	ज्यो.ग.
	वि.	वि.	अं.	अं.		क.	क.
रविः	३५४८·३३६२	३५४८·३३१७	...	...	रविबिम्बं	३२·२	३२·०
चन्द्रः	४७४३४·९३४४	४७४३५·०२८८	४·५	५·०	चन्द्रबिम्बं	३२·०	३१·२
बुधः	१४७३२·४९४७	१४७३२·५५८२	२·३	७·०	चं. लम्बनं	५३·०	५७·०
शुक्रः	५७६७·८२८२	५७६७·८०८९	२·३	३·४	भूभा	८०·८	८२·६
भौमः	१८८६·६४०७	१८८६·६५७७	१·८	१·८		अं.	अं.
गुरुः	२९९·२९९९	२९९·२६७५	१·३	१·३	र. क्रा.	२४·०	२३·५
शनिः	१२०·५५५२	१२०·६०३७	२·२	२·५	अयनांशाः	२२·६	२२·१

नाक्षत्रवर्ष-दैर्घ्यम् ।

		दि.	घ.	प.
ग्रहलाघवे	...	३६५	१५	३१·५२३३२८०
ज्योतिर्गणिते	...	३६५	१५	२२·९४७९०१२

ग्रहकक्षास्वरूपस्य मिथ्याकल्पनमेव **प्राचीनग्रन्थेषु** दृग्गणितविसंवादे प्रधानं कारणम् । ग्रहकक्षासु दीर्घवर्तुलरूपिणीषु सतीषु कथं वर्तुलोपन्यासासिद्धानि ग्रहस्थानानि दृक्तुल्यानि भवेयुः । मिथ्योपन्यासफलं मिथ्यैव । अतः **प्राचीनज्योतिर्विदां** ग्रहगणितं दृक्प्रत्ययावहं नैवाभवत् । यदि कदाचिद्भवत्तर्हि तत्काकतालीयन्यायेनैव । **श्रीभास्कराचार्या** अपीदं महदन्तरकारणमुपपादयितुं न शेकुः केवलं दृक्प्रतीत्यै कथं कथमपि ग्रहस्पष्टीकरणं प्रोच्यास्मिन्विषये फलवासनावैचित्र्यात्किमपि नाऽऽशङ्कनीयमित्या**चार्याः** शिष्यान्प्रति कथयन्ति ।

प्राचीनग्रहगणितं प्रतितीशून्यम्

" दलीकृताभ्यां प्रथमं फलाभ्यां ततोऽखिलाभ्यामसकृत्कुजस्तु ।
नाऽऽशङ्कनीयं न चले किमित्थं यतो विचित्रा फलवासनात्र ॥

इत्यादीनां पद्याना**माचार्योक्तटीका** वाचनीया विचक्षणैः ।

" प्राङ्मध्यमे चलफलस्य दलं प्रदद्या-
त्तस्माच्च मान्दमखिलं विदधीत मध्ये "

इति **ग्रहलाघवीय**ग्रहस्पष्टीकरणपद्धतिरप्युपपत्तिशून्या । तत्र प्रत्यक्षोपलब्धिरेवोपपत्तिरिति श्री**मल्लारिदैवज्ञा**नामुत्तरम् । एतत्स्पष्टीकरणपद्धतिविषये **" ब्रह्मगुप्तेन अन्येषां प्रतारण**परमिदमुक्तम् " इति चतुर्वेदोप्याह ।

उपरि प्राग्ग्रन्थकाराणां दोषा ये मया प्रकटीकृतास्ते शिष्यबोधाय न तु ग्रन्थकाराणां दूषणाय । पूर्वग्रन्थानां गुणदोषाणां यथार्थं प्रदर्शनं तत्तच्छास्त्रस्योत्कर्षाय कारणं भवति । अतो दोषाविष्करणानन्तरं गुणप्रशंसाप्यवश्या । ग्रहलाघवोक्तप्रकारात्साधिता मध्यमा तिथिंगतिर्वर्षसाहस्र्यां केवलं ३५ पलमात्रा न्यूनोपजायते । केन्द्रे व्यगुविधौ क्रमेण १५१′, ७९′ कलाप्रमाणा न्यूनता । रविचन्द्रयोर्मन्दफलं पूर्णिमामावास्यासमयेऽर्वाचीनज्योतिर्विदुपज्ञातफलपञ्चकस्य समं भवतीति परमाश्चर्यकरम् । (इदं साम्यं मयैवोपज्ञातम्) ।

गुणप्रशंसा

तद्वित्थम्— रविचन्द्रयोः स्पष्टीकरणेऽर्वाचीनसंस्कारपञ्चकम्—

		अं.	क.			
मध्यमरवेः संस्कारः	= −	१	५५	भु.	रविकेन्द्रं	(१)
मध्यमचन्द्रस्य ,,	= +	०	११	भु.	रविकेन्द्रं	(२)
	−	१	१४	भु.	२ तिथिः − चन्द्रकेन्द्रं	(३)
	−	६	१७	भु.	चन्द्रकेन्द्रं	(४)
	+	०	३६	भु.	२ तिथिः	(५)

उपरि चन्द्रे दीयमानो द्वितीयसंस्कारः (+ ०° ११′ भु. रविकेन्द्रं) उपकरणाभेदाच्चिह्नं व्यत्यस्य सूर्ये दत्तोऽपि तिथ्यन्तोऽविकृत एव । पर्वान्ते (२ तिथिः) अयं राशिः शून्यं भवति । अत एव तृतीयसंस्कारस्योपकरणं केवलं चन्द्रकेन्द्रमिति प्रकल्प्य तस्यर्णत्वपरिहारार्थं संस्कारचिह्नव्यत्यासे प्रत्यवायो नास्ति । पञ्चमसंस्कारस्योपकरणशून्यतायाः संस्कारोऽपि शून्यम् ।

अत एव पूर्वोक्तं फलपञ्चकं पर्वान्ते ईदृशं भवति ।

		अं.	क.		
मध्यमरवेः संस्कारौ =	−	१	५५	भु.	रविकेन्द्रं...(१)
	−	०	११	भु.	रविकेन्द्रं...(२)
मध्यमचन्द्रस्य संस्काराः =	+	१	१४	भु.	चन्द्रकेन्द्रं...(३)
	−	६	१७	भु.	चन्द्रकेन्द्रं...(४)
	+	०	०		...(५)

पञ्चकोः संस्कारकलापयोरैक्यं विधाय लब्धं पर्वान्ते—

			अं.	क.		
ज्योतिर्गणिते	रविमन्दफलम्	−	२	६	भु.	रविकेन्द्रं
	चन्द्रमन्दफलम्	−	५	३	भु.	चन्द्रकेन्द्रं
ग्रहलाघवे	रविमन्दफलम्	−	२	११	भु.	रविकेन्द्रं
	चन्द्रमन्दफलम्	−	५	२	भु.	चन्द्रकेन्द्रं

अस्य ज्योतिःशास्त्रस्य संप्रति पाश्चिमात्येषूत्कर्षः । तेषां गणितमाविकलप्रतीतिप्रदम् वेधविशारदाः प्रत्यहमुपमोपमेयैर्यन्त्रैः खचरान्विध्वा स्वस्वराजशासनरचितपञ्चाङ्गानां दृक्प्रतीतिं परीक्षन्ते । तैर्विगणिता ग्रहणादिचमत्काराणां काला एकं पलमपि न व्यभिचरन्ति । आकर्षणशास्त्रे तैः संपादितं नैपुण्यमेव तेषां ज्योतिःशास्त्रोत्कर्षे प्रधानं कारणम् । आकर्षणशास्त्रं ज्योतिःशास्त्रस्य रहस्यम् (मद्रचित गोलद्वयप्रश्नविमर्शः विलोक्यः) । तत्साहाय्येन समकालान्तरितवेधत्रितयाद्ग्रहगतिसर्वस्वं ज्ञातं भवति । कस्यचिद्धूमकेतोः प्रथमदर्शनादि-

ज्योतिःशास्त्रोत्कर्षः

त्रमासेषु तत्कक्षामूलाङ्कान्निश्चित्याग्रे तेनाऽऽक्रम्यमाणानि स्थानानि विगणयितुं शक्यन्ते। इन्द्र*-ग्रहस्योपज्ञानादेतावत्कालपर्यन्तं तेन स्वकक्षायास्तृतीयोंऽशोपि न क्रान्तः। परमस्य कक्षायाः **केन्द्रच्युतिः, मन्दकर्णः, पातः, नीचं, शरः, मध्यमगतिश्चैते** मूलाङ्का **आकर्षणशास्त्रज्ञैः** पूर्वमेव सूक्ष्मं विनिश्चिताः। केवलमाकर्षणशास्त्रबलादेवादृष्टपूर्वमिन्द्रग्रहं धीमन्तो **लवराचार्या** उपज्ञातवन्तः। तद्वृत्तमाश्चर्यपूर्णमपि विस्तरभयादिह कथयितुं न युज्यते। (केतकी वासना-भाष्ये ३१५ पृष्ठे ७ श्लोकव्याख्याने तस्य वर्णनं कृतम्)।

इदानींतने काले **लीवेरीयर-हानसेन-न्यूकम्ब**-प्रभृतिज्योतिर्विदां ग्रन्थाश्रयात्पाश्चिमात्याः स्वस्वराजकीयपञ्चाङ्गानि रचयन्ति। अतोऽपि तान्ग्रन्थानाश्रित्येदं स्वतंत्रं **ज्योतिर्गणितं** व्यरचयम्।

अस्मद्ग्रन्थाधारः

पाश्चिमात्यपौरस्त्यानां कालगणनापद्धत्योर्भिन्नत्वात्तेषां ग्रन्थात्केवलं प्रागुक्तं मूलाङ्कषट्कमादाय सर्वे कोष्ठका मयैव स्वधिया निर्मिताः। गणितश्रमं गणितज्ञ एव जानाति**। एवं सत्यपि येषां ग्रन्थाश्रयादिदं गणितं निर्मितं तैरुपकृतोऽस्मीत्यहं शुद्धात्मनाऽङ्गीकरोमि। इदं पाश्चिमात्यं परकीयं ज्ञानमिति नोपेक्षणीयं, ज्ञानं हि प्रकाशवत्परमं पवित्रम्। तच्च भिन्नजातीयपण्डितेभ्य उपलब्धमिति दोषार्हं न भवति। भारतीया ज्योतिर्विदः पूर्वस्मिन्काल आसुरान्ग्रन्थानङ्गीकृतवन्तः। **सूर्यसिद्धान्तो मयासुरप्रणीतः। रोमकसिद्धान्तस्तु यावनः। तथैव पौलिशः।** तथैव **होराशास्त्रम्**।

अत इदं प्रत्यक्षं प्रतीयमानं **ज्योतिःशास्त्रं** सुज्ञाः स्वीकुर्वीरन्नित्याशास्यास्मिन्विषये सादृश्यमुच्यते—

> " **स्वर्णं नैव विचारयन्ति चतुरा उत्पादितं केन वा**
> **कस्माद्देशत आगतं प्रथमतः काले कदा निर्मितम्।**
> **शुद्धिं श्यामलतां परीक्ष्य निकषे क्रीणन्ति निःशङ्किता-**
> **स्तद्वत् दृक्समतां परीक्ष्य चतुराः स्वीकुर्वतां मत्कृतिम्** " **इति**।

अथैतज्ज्योतिर्गणितविषये किंचित्प्रोच्येमां प्रस्तावनामुपसंहरामः। अस्मिन्परिच्छेद-द्वयं वर्तते। **प्रथमे** खचराणां स्थानगणितम्। **द्वितीये** ग्रहणादिचमत्कारगणितम्। परिच्छेद-

ज्योतिर्गणितस्था विषयाः

विभागा अध्यायाः कृताः। तत्रैकैकस्मिन्नध्याये रीतिः, उदाहरणं, कोष्ठकाः, कोष्ठकरचनेति*** विषयविवेचनक्रमः। अत्र व्याख्याता नानाविषया **अनुक्रमणिकायां द्रष्टव्याः**। **ज्योतिःशास्त्रकोविदा** एतं ग्रन्थं यथावकाशं पर्यालोच्यात्रत्यान्गुणदोषान्मह्यं निवेदयेयुरित्याशासे।

---

* नेपच्यून इति ख्यातः।

** कोष्ठकाम्भोधिरचनाप्रसंगे तातैरुपयुक्तसमीकरणैः स्वधीकल्पितानेकयुक्तिबहुलैरङ्कैः परिपूरितानि अनेकसहस्रावधिकानि पृष्ठानि मुद्रिततुल्याक्षरालंकृतानि अस्मद्गेहे शोभन्ते। स्थूल-लिखितानि तु असंख्यानि पृष्ठानि वर्तन्ते। एका ४८२ दीर्घपृष्ठात्मिका पुस्तिका सप्टेंबरमासस्य प्रथम तारिखायां प्रारब्धा नवंबरप्रथमतारिखायां नाम केवलमासद्वये एव समापिता यस्यां च **केवलांकावलिः** पिपीलिकासमुच्चयवत् निबिडाऽपि मुद्रितसदृशा **दूरादेव नयनान्याकर्षयति।** एकविंशतिवर्षसमये ज्योतिःशास्त्राभ्यासस्तैः प्रारब्धः। वर्षत्रयादनन्तरमेव तेषां स्वतंत्रधीविलासः **प्रकटो बभूव इति १०-५-१८७७ खिष्टाब्ददिने तैर्लिखितेन प्रथमोल्लेखेनैव स्पष्टं भवति। स च उल्लेखो यथा—**

" **ग्रहाणां मान्द्याङ्कानां कोष्ठकरचनार्थं मदुपज्ञाता रीतिरेवम्** " (१०-५-१८७७).

*** तात सूचनया कोष्ठकरचना अन्तिमभागे स्वतंत्रतया विहिता।

अस्मिन्ग्रन्थे प्राचीनग्रन्थेभ्यो ये विशेषास्तानेव कथयामः—

१ अत्र दशांशपद्धत्या गणितसौकर्यं साधितम् । कोष्ठकैर्गणिते लाघवं संपाद्य प्रमादभयमपि निवारितम् । तथा संस्काराणां बहुत्वे तेषां नित्यं धनत्वमुत्पाद्य गणकानां धनर्णचिन्ता दूरीकृता । " कोष्ठकलब्धसंस्काराङ्काः सदैव धनं यथा स्युस्तथैव कोष्ठकरचना प्रथमं प्राच्यैः कृतेति कौतुकास्पदमिदम् । एतज्ज्ञानानन्तरमस्माभिरपि सर्वैं प्राच्यपद्धतिरङ्गीकृता " इत्याह ज्योतिर्विद्ः बिन्स महाशयः ।

२ रविमध्यगणिते ग्रहाणां यद्रविमध्यदृश्यं स्थानं तस्य मन्दकेन्द्रपर्ययकालाश्रितत्वात्तमेव कालमुपकरणत्वेनाङ्गीकृत्य **वर्षगतिः, दिनगतिः, घटीगतिः, मन्दफलं, कक्षापरिणतिरिति** पञ्चविधो ग्रहस्थानभेद एकस्मिन्नेव कोष्ठके युगपत्साधितः । कक्षापरिणतेः स्थिरत्वेनाङ्गीकारादुत्पत्स्यमानः स्थानभेदो द्विसहस्रवर्षेषु द्वित्रिकलाभ्योऽधिको न स्यात् ।

३ भूमध्यगणिते लाघवार्थं ग्रहकक्षा वर्तुलाकारा इति प्राचीनं मतमङ्गीकृत्य तदनुसारं सूर्यात्प्रत्येकं ग्रहस्य चापाकाराणि सरलानि चान्तराणि मन्दकर्णाभ्यां विगणय्य कोष्ठकेषु पठितानि । पश्चादर्वाचीनमतानुसारं दीर्घवर्तुलाकारप्रयुक्तं ग्रहस्थानभेदमुत्पादयितुं समान्तरनामकोऽपूर्व उपायो योजितः ।

४ चन्द्रग्रहणे मान्द्यस्पर्शमोक्षौ । सूर्यग्रहणे खमध्यवलनं, भूमण्डलगणितं च । शनिवलयं, भौमशुक्रयोश्चकास्तिः । आकर्षणानि, * वरुणेन्द्रौ ग्रहौ, (यूरेनस् नेपच्यून् इति ख्यातौ) छायाप्रकाशः, किरणवक्रीभवनमित्येते विषयाः प्राचीनभारतीयज्योतिर्ग्रन्थेष्वप्रसिद्धा अत्र प्रकाशिताः ।

५ सूर्यग्रहणे स्पर्शादिकालानयनं, ग्रहाणां लोपदर्शनं (अस्तोदयाः), चन्द्रशृङ्गोन्नतिः, महापातः, त्रिप्रश्नाध्याये वेधगणितम् , इत्यादीन् विषयान् प्राचीनग्रन्थापेक्षया भिन्नरीत्या प्रोच्य तेषु गणितसूक्ष्मताधिक्यं साधितम् । भौमादीनां लोपदर्शनगणितं व्यवहारे प्रयोजनाभावादत्र स्थूलमुक्तम् । सूक्ष्मतामपेक्षमाणाः मद्रचितां च । इदानीमियं केतकी तातराचितोदाहरण समन्विता मया परिमलवासनाभाष्येण स्फुटीकृता मुद्रिता केतकीमधीयीरन् ।

६ मध्ये मध्ये तत्तद्विषयबोधार्थमाकृतयो भङ्ग्यश्च निवेशिताः । सर्वे ग्रहाः क्रान्तिवृत्ताच्चतुष्पञ्चांशप्रमिते शरान्तरे शश्वद्भ्रमन्ति । अतस्तत्प्रदेशवर्तिनक्षत्राणां विषये गणकानां ज्ञानार्थं नक्षत्राध्यायान्ते नक्षत्रपटोऽनुबद्धः । अस्य साहाय्यान्नक्षत्राणि विज्ञाय चन्द्रादयो ग्रहा गणितागते कालेऽभीष्टे स्थाने तिष्ठन्ति वा तत्स्थानात्पागग्रे व्यभिचरन्तीत्यस्य प्रत्ययं विचक्षणा लभेरन् ।

७ कोष्ठकन्यस्ताङ्केषु कस्यचिद्विषये संशयश्चेत्कोष्ठकरचनाप्रकरणे प्रदर्शितैः सूत्रैर्द्वित्रवारं गणितं विधाय संशयः परिहर्तव्यः ।

८ कोष्ठकेभ्योऽङ्कग्रहणसमये अभीष्टांकस्य गतगम्याङ्कद्वयेन सह सुसंगतिं वीक्ष्य अंको ग्राह्यः ।

उपपत्तिः सूत्राणामुपपत्तिकथनमसांप्रतमिति कोष्ठकसाधनोपपत्तिरस्मिन्ग्रन्थे न विचारिता । बीजगणितं भूमितिः, गोलीय सरला च, त्रिकोणमितिः, शङ्कुच्छिन्नं, यन्त्रशास्त्रं, दर्शनानुशासनं, बैजिका भूमितिः, चलनकलनम्, एवमादिषु शास्त्रेषु येषां पारंगतता त एवोपपत्तिग्रन्थाध्ययनेऽधिकारिणः । ईशेच्छयैवंविधाधिकारिवर्गे समुत्पन्ने सत्युपपत्तिग्रन्था अप्युत्पद्येरन् । अहर्निशं प्रयत्ना अपि " कर्मण्येवाधिकारस्ते " इति न्यायेन मया चालिता एव ।

अयं ग्रन्थः शा. शा. १८१५ वर्षे समाप्तिं गतोऽपि द्रव्यसाहाय्याभावादियन्तं कालं प्रकाशतां न गतः। श्री० रावबहादूर ' **कृष्णाजी बल्लाळ देवल** ' इत्येतैरस्य ग्रन्थस्यापूर्वतां महान्तमुपयोगं च दृष्ट्वा महता परिश्रमेण रा. रा. ' **हरि नारायण आपटे** ' इत्येतेषामानुकूल्यं संपाद्य **पुण्यपत्तन**-स्थानन्दाश्रमनाम्न्यां पुण्यसंस्थायां मुद्रापितः। अतः पूर्वोक्तौ सत्पुरुषावेव ग्रन्थप्रकाशनश्रेयोविभागिनौ।

ग्रन्थप्रकाशनम्

बागलकोटे शा. श. १८२०
आश्विनशुक्ल १० मी विजया } **केतकरोपाह्वो रामकृष्णसूनुर्वेङ्कटेशः**

पूरणिका

शालिवाहनशक १८२० वर्षे मुद्रितस्य ज्योतिर्गणितस्याद्ययावत् त्रिंशद्वर्षाणि व्यतीतानि। गतदशवर्षेषु भरतखण्डनिवासिविद्वज्जनैर्ज्योतिर्गणितविषये तीव्रपत्रमुखेन कृता सहृदयपृच्छा मम मनसि जागर्ति। तस्मादेतद्विषये यन्मया वक्तव्यं तदस्यां पूरणिकायां मया प्रतिपाद्यते। मद्वंश-संभवैर्मत्पुत्रादिकैर्ज्योतिर्गणितमग्रे समुचितकाले समुचितपरिस्थितौ पुनर्मुद्रापणीयम्। तस्मिन्नियं पुरणिका यथास्थिता निवेशनीया।

मदारब्धज्योतिषतपश्चर्यायाः सांप्रतं (श. १८५०) चतुःपंचाशत्तमं वर्षम्। मम वयश्च पंचसप्ततिमितम्। अत्रान्तरे ध्यानं, ऐकाग्र्यं, शैथिल्यं, पुनः पुनर्गणितं मोदस्फुरणं, उद्विग्नता, निर्निद्रारात्रयः, अश्रान्तभ्रमणं, नवोपज्ञाः, अन्ते च अपूर्वयशःसनाथः शाश्वतः साक्षात्कारश्चै-तैर्गतार्धशतकं संप्लुतमासीत्। मत्कृतपरिश्रमा ज्योतिर्गणितावलौ परिणताः। सा चेयं भवति।

ज्योतिर्गणितावलिः।

संस्कृतगिरा	इ. स.	स्वभाषया	इ. स.
* ज्योतिर्गणितम्	१८९८	ग्रहगणित	१९१४
* केतकीग्रहगणितम्	१८९९	नक्षत्रविज्ञान	१९१६
* वैजयन्ती	१९००	* गोलद्वयप्रश्नः	१९१८
* केतकी परिशिष्टं	१९१६	पंचांगसंशो. भा. ३	१९२३
* भूमण्डलगणितं	१९२१	गोलत्रयं (अपूर्ण)	१९२४
* सौरार्यतिथिः	१९२७	कोनालाजी (आंग्ला)	१९२३

(मत्कृतमालावर्धनम् –प्रकाशकः)

(१) संस्कृतं केतकीपरिमलभाष्यं वासनाप्रयुक्तम्।
(२) संस्कृतः शास्त्रशुद्धपंचांगायनांशनिर्णयः।
(३) (मराठी) केतकर चरित्रं भागत्रयात्मकम्।
(४) ,, पंचांगसंशोधनं भागौ १–२.

*** एते सप्त चरित्रं चेत्यष्टग्रन्था मया मुद्रिताः पुनर्मुद्रिता वा।**

ज्योतिःशास्त्रमहातरोर्निगदिताः शाखास्तु या या बुधैः।
ताः सर्वा अधिकृत्य दीर्घतपसा ग्रंथा निबद्धा मया।
ते ग्रन्था अधुनाऽखिले भरतभूप्रान्ते प्रतिष्ठां गताः।
वीक्ष्यैतन्मम मानसाम्बुधिरलं मोदोर्मिभिः पूरितः ॥ १ ॥

॥ ज्योतिर्गणितसदृशा ग्रन्था वारंवारं नोत्पद्यन्ते ॥

शके १८२६ वर्षे मुम्बापूर्यां पञ्चांगपरिषत्संवृत्ता। तत्र नूतनो ग्रन्थो रचनीय इति निर्णय आसीत्। अथ चतुर्विंशतिवर्षाणि गतानि। ग्रन्थस्य नामापि नास्ति। मम वाग्भिरहं महानाभिमानीति कल्पना स्यात्किन्तु सत्यनिष्ठयाऽहं कथये यत् नूतनग्रन्थनिबन्धनं नास्ति बाललीला। " विद्वानेव विजानाति विद्वज्जनपरिश्रमम्। न हि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम् "। नूतनग्रंथरचनं कियत्प्रमाणेन दुस्तरं भवतीत्यत्र मम यावाननुभवस्तावान्नान्यस्य कस्यापि। ग्रन्थरचनकर्मणि बहुविधदुर्घटभावानामेकस्मिन्नेव पुरुषे संघटनमपेक्ष्यते। आंग्लसंस्कृतफ्रेंचभाषात्रयज्ञानं, भारतीय–भारतीयेतरज्योतिःशास्त्र–मार्मिकाकलनं, बीजगणितं, समीकरणोपपत्तिः, भूमितिः, शंकुच्छिन्नं, त्रिकोणमितिः सरला गोलीया च, बैजिकभूमितिः, परमाणुगणितं, पिंडगणितं, परमाणुसमीकरणं, स्थितिगणितं, गतिगणितं, गुरुत्वाकर्षणं, चान्द्रीसमुपपत्तिः, खेचरीसमुपपत्तिः, गोलीयज्योतिषं, वेधीयज्योतिषं, दर्शनानुशासनं प्रिन्सिपिया, व्यस्तज्योतिःशास्त्रं चैतेषु विंशतिगणितशाखासु प्राविण्यं, युक्तिबाहुल्यं, दृढनिश्चयः, स्वार्थत्यागः, स्वदेशाभिमानः, शरीरसंपत्, चित्तस्वास्थ्यं, दीर्घायुष्यं चैते भावा यदैकस्मिन्नेव पुरुषे संघटिताः स्युस्तदैव नूतनग्रंथरचनं शक्यमन्यथा न शक्यमिति विज्ञेयम्।

॥ अथ विश्वविद्यालयानां कर्तव्यम् ॥

ज्योतिर्गणितपुनर्मुद्रणसाहाय्यार्थं मुम्बापुरी, मद्रास, लखनौ, पाटणा, डाका, कलकत्ता, म्हैसूर, बनारस, इत्यादि महापट्टणस्थविश्वविद्यालयस्थपण्डिताः प्रार्थनीयाः। भारतीयविद्वज्जनाकांक्षापूरणाय मत्पश्चात् तानि विश्वविद्यालयान्येव समर्थानि। मया मम ग्रंथलेखनकार्यं कृत्वा यावत्शक्यं मद्देशोद्धाराय स्वार्थत्यागपूर्वकं ग्रन्था अपि मुद्रिताः। मम सामर्थ्याभावे एतत् भारतीयं कार्यं तैर्विश्वविद्यालयैरवश्यं कर्तव्यम्। अनेनैव विश्वविद्यालयमिति नाम सार्थं भवति। तत्र पुनरन्वेषणकर्म (research) प्रचलति। तेन विश्वविद्यालयसीम्नां बाहिः प्रान्ते के के विश्वप्रियग्रन्था मुमूर्षुपरिस्थितौ सीदन्तीत्येतस्यैवादौ पुनरन्वेषणकर्मांगीकार्यमिति मम सूचनां तेषां नयनपथे नेष्यामि। आसेतुहिमाचलं मम सर्वे ग्रन्था आदृता एव। विश्वविद्यालयेष्वपि आदरो दर्शयितव्यः। यतः—

विद्याया उगमस्थलं बहुमतं संपन्नविद्यास्पदम्।
विद्याविस्तृतिरक्षणालयमिदं विद्वत्कुलैः संभृतम्।
विश्वाभीप्सितसंस्तुतप्रपटुसद्ग्रन्था अलभ्याश्च ये।
तान् द्रव्येण पुनश्च जीवयति यत्तत् विश्वविद्यालयम् ॥ ४ ॥

॥ मम न्याय्या मनीषा ॥

भरतखण्डानिष्ठाखिल विश्वविद्यालयचालकैर्मद्रचितग्रन्थानां पंचविंशतिपुस्तकानि क्रेतव्यानि। तेन कार्यभारः सुलभो भवेत्। मत्प्रवर्तितज्योतिर्गणितग्रन्थावलेर्विश्वजनीनत्वादखिलविश्वविद्यालयचालकैर्मत्कृतग्रन्थेषु निर्विशेषप्रेम क्रियते एव। यतो विश्वविद्यालयचालका उदारचरिताः। अयं निजः परो वेति गणना तु लघुचेतसां योग्येति।

यदि उपर्युक्तवृत्तांतो नैव फलति** चेत् यन्मम मनसि स्फुरति तद्भाविकालोपयोगाय स्पष्टतया निर्भीतमनसैव निर्दिशामि तद्यथा--

सर्वैर्भारतखण्डवासिविबुधैरुन्मुक्तकण्ठेन यत् ।
सज्ज्योतिर्गणिताख्यकस्य हि पुनर्मुद्रापणं वांछितम् ।
तस्यार्थेऽपि न दीयते यदि धनं तैर्विश्वविद्यालयैः ।
विद्याया न तदालयं भवति सद्विद्यालयः केवलः ॥

॥ **अथ संस्थानिकानां कर्तव्यम्** ॥

ग्रन्थलेखनं मम कर्तव्यं किंतु ग्रन्थरक्षणं तु विचक्षणसंस्थानिकानां कर्तव्यम् । विद्याभिरुचिप्रचुरा विद्यावर्धनशीला इति येषां कीर्तिः सर्वत्र जागर्ति तैस्तैः प्राज्ञसंस्थानिकैर्मद्रचितग्रन्थान् क्रीत्वा प्रजारक्षणवत् विद्यारक्षणतत्परत्वं प्रकटीकर्तव्यम् ।

ज्योतिःशास्त्रविमर्शमग्नगणका अर्हन्ति राजाश्रयम् ।
यं लब्ध्वा स्वमतिप्रकर्षबहुलग्रन्थावलिं तन्वते ।
शास्त्रोत्कर्षफलं द्रुतं भवति यत्पुष्णाति कीर्तिं तयोः ।
यावच्चन्द्रदिवाकरौ नृपविदौ स्यातां चिरंजीविनौ ॥ ५ ॥

स्वदेशाभिमानस्तथा स्वदेशस्थविद्वज्जनसमादरस्तथाच शास्त्राभिवृद्धिविवक्षा जागर्ति चेत् भरतखण्डस्य (लायब्ररी) पुस्तकसंग्रहवाचनालयाध्यक्षैरस्मद्रचितसर्वग्रन्थानामेकः संचयः वाचनालये संस्थापनीयः । अनेनैव तेषां शोभा परिचीयते ।

ये केऽपि उदारात्मानो द्रव्यवितरणं कुर्वन्ति चेत् द्रव्यसमः मुद्रितग्रन्थविनिमयः कार्यः । यावत् शक्यं निरपेक्षद्रव्यवितरणं न स्वीकार्यम् । ग्रन्थविनिमयो नापेक्षते चेन्नोपायः ।

विश्वविद्यालयेभ्यः संस्थानिकेभ्यो धर्मपीठेभ्यो वा धनिभ्यः प्राप्तं साहाय्यं मिलित्वा मुद्रणमूल्यस्य ½ भागतुल्यं भवति चेत् अस्य मूल्यं दशमुद्रं भवतु । नो चेत् अस्य मूल्यं गणितसंबद्धांग्लग्रंथमूल्यसममेव उच्चतरं भवतु ।

विशेषः । इदं सर्वं प्रार्थनादिकार्यं स्वाभिमानरक्षणपूर्वकमेव कार्यम् ।

अस्मद्रचितज्योतिर्गणितस्थकोष्ठकानामादानं कैरपीष्यते चेत् मद्वंशीयजनस्यानुज्ञामादौ गृहीत्वा पश्चात्कोष्ठकादानं कार्यम् ।

पुनर्मुद्रितज्योतिर्गणिते निम्ननिर्दिष्टानि संशोधनानि कार्याणि ।

(१) **पंचांगप्रकरणे**— " नक्षत्रचक्रारम्भे मेषादौ वा सूर्यसिद्धान्तोक्तः पौष्णान्तः एव मया अस्मिन् ज्योतिर्गणिते स्वीकृत पौष्णान्तं स्वीकृत्य सूर्यसिद्धान्तपठिता पौष्णान्तादारभ्य चित्रानक्षत्रस्य षड्भान्तरस्थितिरपि सम्यगुपपन्नत्वात्संगृहीता । "पौष्णान्ते भगणः स्मृतः" इत्यत्र "स्मृतः" इति पदेन चित्राभिमुखनिष्ठपौष्णान्तस्य सुचिरपरंपरा व्यक्तीकृता सूर्यसिद्धान्तकारेण । युज्यते चेदम् । यतः " शास्त्रमाद्यं तदेवेदं " इत्यनेन श्लोकेन निर्दिष्टे मूलसूर्यसिद्धान्तेऽपि तत्पूर्वपरंपरया चित्रानक्षत्रभोगः १८० अंशात्मक एव निर्दिष्टः । विस्तरस्तु अस्मत्तनयरचितकेतकीपरिमलभाष्ये द्रष्टव्यः । (मत्तनयारब्धे भाष्ये प्रथमपत्रेषु अयं विषयो मत्संमत्या सविस्तरं लिखितः) । शके १८०० वर्षे मेषारंभे वेधोपलब्धाः सूक्ष्मा अयनांशाः २२°।१८'।३३"·४ अंशाद्या आसन् ।

** मुम्बापुरीस्थ विश्वविद्यालस्थमण्डलेन षट्शतमुद्राः साहाय्यरूपेण प्रेषिताः । इतरविश्वविद्यालयेभ्योऽपि समानशीलानि प्रत्युत्तराण्यद्यापि अपेक्षितानि ।

एतावन्तोऽयनांशान् गणितारम्भे गृहीत्वा मया ध्रुवकाः साधिताः। अस्यैव ज्योतिर्गणितस्य प्रस्तावनापूरणिकाप्यवलोकनीया । वेदांगज्योतिषादप्ययमेव पौष्णान्तः सिध्यति " इति इदं स्थाप्यम् । एतत्संस्थापनेन सह यत्सुसंगतं तत्सर्वमग्रिमगणिते कोष्ठकेषु च कार्यम्।

(२) पंचांगाध्यायस्य सप्तमं कोष्ठकं द्विगुणितं कार्यम् । (३) अष्टमकोष्ठकस्योपकोष्ठकं पूरणीयम् । (४) त्रयोदशकोष्ठकस्थमुद्रणदोषा निराकरणीयाः । (५) चन्द्रसूर्याध्यायान्ते चन्द्र-सूर्यगणितस्य तुलनापुरस्कृतं सारं संयोज्यम् । (६) पौर्णिमान्तकालिकचन्द्ररवीणां तुलना देया। (७) तत्र तत्र न्यासाः विवरणं चावश्यं चेत् स्फुटतरं कार्यम् । (८) प्रथमावृत्तौ मया अस्फुटेनान्तरेण कार्यं निर्वाहितम् । द्वितीयमुद्रणे स्फुटेनान्तरं ग्राह्यम् । (९) बुधस्य भूमध्यस्पष्ट-दिनगतिः स्फुटतरं प्रतिपाद्या । (विलोक्य केतकीपंचांगं १८३४). (१०) ग्रहस्थानानां तुलना देया। (११) चन्द्रक्रान्तिविषुवांशाश्च चन्द्रोदयगणिते सविस्तरं देया। धनिष्ठायोगतारा धनिष्ठा-प्रयुक्तपौष्णांतश्च उपपादनीयः । (१२) कोष्ठकरचनाध्यायस्य स्वतंत्रनिबंधनं कार्यम् । (१३ अन्ते वंशवर्णनं मया संक्षेपतः कृतम् । शक्यं चेत् विस्तारणीयम् । (१४) भूस्पष्टाध्यायोऽ-स्मत्तातपादैर्विरचितस्तृतीयाध्यायान्ते सोदाहरणो देयः । (१५) चन्द्रोदयो विस्तरेण देयः । (१६) चन्द्रग्रहणाध्याये गोचरभूभा ग्राह्या । (१७) चन्द्रग्रहणकालानां तुलना कार्या । (१८) धनिष्ठायोगतारा धनिष्ठाप्रयुक्तपौष्णान्तश्चोपपादनीयः । (यथोक्तं मया कृतम्-प्रकाशकः)

शके १८०६ वर्षे भारतीययुद्धकालनिर्णयगणितव्यापृतचित्तेन मया प्रसंगवशाद्वेदांग-ज्योतिषं पुनः पुनर्विलोकितम् । तत्र " धनिष्ठादौ " " सार्पार्धे " इत्यादिनक्षत्रविभागदर्शक-पदानि वीक्ष्य वेदांगज्योतिषकाले एव तत्पूर्वपरंपरया धनिष्ठादिनक्षत्रचक्रविभागाः प्रचारगता आसन्निति मया प्रतीतम् । मुनिप्रणीतधनिष्ठादिगणनया शक १८०० वर्षे २२ अंशाः ९ कला अयनांशाः प्राप्ताः । ते च यथा—

		अं.	क.
शक १८०० वर्षे धनिष्ठादिसायनभोगः	...	३१५	२९
वेदांगज्योतिषसमये धनिष्ठादेर्भोगः	...	२७०	०
	अंतरं	४५	२९
वेदांगज्योतिषकाले ऋणायनांशाः	...	−२३	२०
शक १८०० वर्षे धनायनांशाः	...	२२	९
पृ. ६४ ज्योतिर्गणिते सूक्ष्माः	...	२२	८·५

धनिष्ठादिगणनाप्रयुक्तः पौष्णांतो धनिष्ठातोऽग्रे पूर्वस्यां पंचनक्षत्रान्तरे नाम ६६°।४०′ अन्तरे तिष्ठति । तथा च धनिष्ठातः पश्चिमस्यां दिशि ११३°।३३′ अंतरे चित्रानक्षत्रं चकास्ति तस्मात् चित्रानक्षत्रात् ६६°।४०′ + ११३°।३३′ = १८० भागान्तरे पौष्णान्तः । आद्यसूर्य-सिद्धान्ते तथा संप्रतिप्रसिद्धसूर्यसिद्धान्ते च दीर्घपरंपराप्राप्तमिममेव पौष्णान्तं स्वीकृत्य तन्नि-दर्शकचित्राया भोगोऽपि १८० भागात्मकः प्रदिष्टः। शके १८०० वर्षे चित्रासायनभोगः २०२°।९′ समः । अयं १८० भागै रहितः अयनांशाः २२°।९′ सिद्धाः । अतो मया २२°।९ अयनांशाः सूर्यसिद्धान्तोक्तचित्राभोगेन सह संयोजिताः । २२ अयनांशानां पुरस्कारेऽपि तथैव प्रदिष्टः ।

शके १८०७ वर्षे पंचांगत्रयमासीत् । २२ अयनांशघटितं सर्वजनस्वीकृतमेकं, अपरं नवीनं पटवर्धनीयपंचांगं १८ अयनांशघटितं, तृतीयं आंग्लतुल्यं सायनं श्रीदीक्षितप्रवर्तितमिति । मया

ग्रथ्यमानस्य ग्रंथस्य पंचांगत्रयोपयोगित्वसंपादनाय तदुचितक्षेपकादीन् संयोज्य हस्तलिखितो ग्रंथः समापितः। प्रकारत्रयस्थापनस्य हेतुरपि तत्रैव श्लोकैर्निर्दिष्टः। स यथा—

(१) अष्टादशायनांशविषयकाः श्लोकाः प्रथमावृत्तौ निर्दिष्टा एव। तेषामत्रपुनर्लेखनमनवश्यकत्वात् त्यक्तम्।

(२) २२ अयनांशपुरस्कारार्थं श्लोकौ यथा—

पारम्पर्येण सर्वो ह्यनुसरति जनश्चैत्रकं सौरपक्षम्।
तस्मात् तत्पक्षतुल्यानयनगतिलवांश्चाधिमासान् विधातुम्।
चित्रानक्षत्रभोगस्तदभिमत इहांगीकृतो राशिषट्कः।
चित्राधःक्रान्तिपातान्तरमयनलवाः स्वीकृतास्तन्मयाऽत्र॥

(३) सायनपक्षसाधनार्थं श्लोकाः।

यः कश्चित्सायनेच्छुः स्वमततिथिपटं खेटभोगं चिकीर्षेत्।
तर्हीष्टाब्दीयमेषक्रमणतिथिभवान् सुध्रुवान् पूर्वरीत्या।
कृत्वा पश्चात्तदीयायनगतिकलिका नागशत्या विभज्य।
लब्धं भेऽन्यत्र योगे द्विगुणितमिह संयोजयेत्सायनार्थम्॥

पश्चात्पूर्वोक्तरीत्या किल तिथिभयुजामानयेदन्तकालान्।
पञ्चांगस्यार्ककोष्ठादुदगयनभवान् संक्रमान् साधयेच्च।
एवं सङ्क्रान्त्यमाभिर्ह्यधिकक्षयगतान् वाऽपि सामान्यमासान्।
ज्ञात्वा पञ्चाङ्गपूर्तिं प्रकुरु मम सखे सायनं सायनार्थिन्॥

भूमध्यस्पष्टखेटान् शशितरणितमान् पूर्वरीत्या प्रसाध्य।
पश्चात्तत्कालजातैरयनगतिलवैस्ते युताः सायनाः स्युः।
सार्धैर्विश्वैस्तथा भैः क्रमत इह समः पातयोगः सदा स्यात्।
तस्मात् त्याज्यं त्रिनिघ्नायनमितिगणितं सायने तैथपत्रे॥

ग्रासः पिधानं वलयं शनेश्च।
शृंगोन्नतिर्दर्शनलोप आसाम्।
चमत्कृतीनां गणितं यथेष्टम्।
आर्क्षेण यद्वा कुरु सायनेन॥

(४-१२-१८८६).

किन्त्वग्रेऽल्पकाले एव सायनपंचांगं भारतीयपद्धतिभिन्नत्वात्प्रचारे नागतम्। अतः सायनपंचांगपद्धतिनिदर्शकश्लोकान् निष्कास्य केवलं पंचांगप्रकारद्वयमेव संस्थाप्य ज्योतिर्गणितस्य प्रथमं मुद्रणं कृतम्।

अष्टादशायनांशानां प्रचारोऽपि तेषां स्वतंत्रत्वात् नवीनत्वात् मुनिनिर्णीतनक्षत्रविभागविरुद्धत्वात् सुलभदृश्यवैषम्याच्च इदानीं क्रमेण लुप्तप्राया:।

तस्मात् परंपराशुद्धाः गणितशुद्धाः शास्त्रशुद्धा ये २२ अयनांशास्ते एवात्र मया आदृता रक्षिताश्च। सर्वैः पञ्चाङ्गकर्तृभिस्ते एव संग्राह्या इति।

विजापुरे शा. श. १८५०
आश्विनशुक्ल १० मी विजया } केतकरोपाह्वो रामकृष्णसूनुः वेंकटेशः।

॥ ज्योतिर्गणितकर्तॄणां संक्षिप्तं चरित्रम् ॥

ज्योतिर्गणितकर्तॄणां संक्षिप्तं चरितं मया । लिख्यते दत्तराजेन वेङ्कटेशस्य सूनुना ॥ १ ॥
शके १७७५ पञ्चाद्रिसप्तेन्दौ ज्योतिर्निष्ठतपस्विनः । श्रीयुता वेङ्कटेशाख्या नृगुन्दे जनिमाप्नुयुः ॥ २ ॥
बाल्ये वयसि विद्यायामर्भकाणां नियन्त्रणात् । मेधायाश्च शरीरस्य विकासः प्रतिहन्यते ॥ ३ ॥
इति कृत्वा रामकृष्णाश्चक्रुः क्रीडारतं सुतम् । वयसो द्वादशे चाब्दे योग्यो विद्यार्जनाय सः ॥ ४ ॥
नृगुन्दसदृशे ग्रामे विद्यार्जनमसंभवम् । मत्वा स्वतातसंमत्या वेणुग्रामं गतो द्रुतम् ॥ ५ ॥
ततश्चतुर्षु वर्षेषु पक्वमेधाबलान्वितैः । कर्णाटी च महाराष्ट्री विद्या प्राथमिका ऽर्जिता ॥ ६ ॥
आंग्लशालाप्रविष्टैस्तैः शिष्यवृत्तिपुरस्कृतैः । यत्कार्यं सप्तवर्षान्ते कृतमब्दचतुष्टये ॥ ७ ॥
म्याट्रीकाख्यपरीक्षायामुत्तरैर्गुणवत्तरैः । सहस्राधिकशिष्येषु तृतीयं पदमाप्तवान् ॥ ८ ॥
दारिद्र्येण सहोत्थेन द्वन्द्वयुद्धं विधाय सः । यशस्वी समभूदन्ते प्राप शिक्षकसत्पदम् ॥ ९ ॥
व्यब्दैर्बागलकोटं ते याताधैर्य शते शके । मूर्धन्यशिक्षकत्वेन तत्त्वाद्वानि स्थिताः स्थिराः ॥ १० ॥
१८०० २५

शालापरीक्षाधिकृतौ नियुक्ताः । ते धारवाडाख्यपुरं प्रजग्मुः ।
पश्चान्नवाद्वैः परदास्यमुक्ताः । स्वातन्त्र्यमालम्ब्य गृहं प्रयाताः ॥ ११ ॥

वर्षाणां विंशतिश्चान्ते नीता ज्योतिषलेखनैः । ग्रन्थानां मुद्रणैश्चापि कीर्तिमन्दिरमूर्धगैः ॥ १२ ॥
परराष्ट्रस्थितैर्वेधशालासंचालकैः सह । विचाराणां विनिमयैः ख्यातास्तत्रापि भासुरैः ॥ १३ ॥
विज्ञातधूमकेतूनां गतिदिग्गणितश्रमैः । अङ्करूपैराङ्ग्लविद्भिः स्वलब्धाङ्का विशोधिताः ॥ १४ ॥
इन्द्रकक्षाबहिर्भूतग्रहयोस्तातबुद्धयोः । मध्यमादिस्थितिः फ्रेंचमासिके प्रकटीकृता ॥ १५ ॥

ज्योतिषबीजारोपणम् ।

शके १७९० शून्याङ्कसप्तेन्दावासीत्सूर्याखिलग्रहः । तं वीक्ष्य ज्यौतिषं बीजं मूलं जग्राह मानसे ॥
निजतातकृता ग्रन्था ज्योतिःशास्त्रप्रकाशकाः । तेषां चित्तं क्रमेणाथ ज्यौतिषे पर्यवर्तयन् ॥१७॥
अन्तर्धिया च मोदेन पठितं ग्रहलाघवम् । तत्रोपपत्तयः काश्चिद्बबन्धुर्नैव मानसम् ॥ १८ ॥
ततः प्रवृत्तिः सञ्जाता शुद्धेऽस्मिन्नांग्लशास्त्रके । तदुच्चगणितज्ञानात्प्राप्यं वीक्ष्य दशाब्दिकैः ॥१९॥
अहर्निशसमुद्योगैर्ब्रह्मकांक्षितपस्विवत् । अमेरिकाखण्डवासिन्यूकम्बोक्तदिशा तथा ॥ २० ॥
फ्रेंचभाषास्थिताकर्षशास्त्राणां पठनैरपि । केरोपंतोपदेशाच्च संलभ्य गणितादिकम् ॥ २१ ॥
विंशतिशाखं विस्तृतमुच्चाख्यं गणितवृक्षमाधिरुह्य । चिक्षेप नेत्रयुगलं नीलाकाशे ततश्च **पञ्चाङ्गे** ॥
एवं पुनः पुनर्वीक्ष्य पञ्चाङ्गं च तथाम्बरम् । उभयोस्तु तयोर्भेदमभ्यजानात्सकारणम् ॥ २३ ॥
नूतनग्रन्थबन्धेन विना मार्गो न विद्यते । अनेन कर्मणैवस्यात्पञ्चांगं प्रकृतिस्थितम् ॥ २४ ॥
एवमेकत्रिंशदब्दे गणितोज्वलधीबलाः । चक्रुर्दृढा मतिस्ताता ज्योतिर्गणितकर्मणि ॥ २५ ॥

भारतवासीयानां विज्ञापना ।

प्राग्ज्योतिःशास्त्रशैथिल्यात्सर्वे भारतवासिनः । पुण्यकृत्कालशिक्षायै स्फुटशास्त्रं ययाचिरे ॥ २६ ॥

ज्योतिर्गणितावलिप्रवर्तनम् ।

तस्मात्प्रवर्तिता तातैः सा ज्योतिर्गणितावलिः । गिरा संस्कृतया पञ्च त्रीनाहुर्निजभाषया ॥ २७ ॥
आंग्लमेकं मिथः कालपरिणामप्रसाधकम् । विद्याकेन्द्रेषु सर्वत्र कोशवत्परिरक्षितम् ॥ २८ ॥

ग्रन्थमाहात्म्यम् ।

ग्रन्थैरमीभिः खलु भारतस्थं । ज्योतिर्विदां चक्रमभूत्प्रफुल्लम् ॥ २९ ॥

रराज विश्वं समवाप्तकामं । शीतांशुना रात्रिदिवोदितेन ॥ ३० ॥
दीव्यन्ते तेऽखिला ग्रन्था आसेतुहिमपर्वतम् । कंठीकृताश्च दृश्यन्ते गुरुभिः सहशिष्यकैः ॥ ३१ ॥

कोष्ठकरचनाचातुर्यम् ।

कोष्ठकरचना कार्या केतकरैरेव विमलमतिमद्भिः । इत्यखिलभरतखण्डप्रान्तस्थप्राज्ञजनगणैरुदितम् ॥

शास्त्रशुद्धपञ्चाङ्गप्रवर्तनम् ।

पञ्चांगं च कथं कार्यमिति ज्ञापनकांक्षया । पंचांगं केतकीसंज्ञं चालयामास स स्वयम् ॥ ३३ ॥
दृश्यन्ते तिथिपत्राणि तत्समान्यय षोडश । संशुद्धानीति सर्वत्र भुञ्जन्ति च समादरम् ॥ ३४ ॥

कुटुम्बविस्तारः ।

लक्ष्मीरमाभ्यां भार्याभ्यां सह संसारनौःस्थिताः । कालक्रमेण सञ्जाताश्चतुःकन्याः सुता नव ॥३५॥
वयं कुशलिनः सर्वे वियोपेताः सुखान्विताः । युक्ताशिक्षणसंपन्ना युक्ताचारे प्रतिष्ठिताः ॥ ३६ ॥

विविधवाचनप्रियता ।

वाल्मीकिकालिदासाख्यौ जयदेवश्च शंकराः । स्वस्ववाग्मीबलेनैव चकर्षुस्ताततमानसम् ॥ ३७ ॥
गिबन्बर्कादिकाश्चांग्लास्तातानां बहुशः प्रियाः । नेपोलीयन्चरित्रं तु फ्रेंचमासीन्मुखोद्गतम् ॥
पुरंदरतुकारामावीशभक्तशिरोमणी । तयोस्तथ्या कठोरा वाक् पस्पर्श हृदयं पितुः ॥ ३९ ॥

विविधकलाः ।

मृण्मयप्रतिमाकार्ये छायाचित्रबृहत्कृतौ । घटीयंत्रचिकित्सायामासीत्तेषां सुकौशलम् ॥ ४० ॥

विविधभाषाज्ञानम् ।

आंग्ला फ्रेंचा तथा चोर्दू कर्नाटी च मराठिका । वंगी हिंदी संस्कृता चेत्यष्टभाषासु संस्तवः ॥४१॥

अभ्यासः ।

अहोरात्रचतुर्थांशे निद्राऽऽहारादिकाः क्रियाः । शेषत्रयं व्यतीतं तैर्ज्योतिषाभ्यासचिन्तनैः ॥ ४२ ॥

शालीनता ।

क्वानन्तकोट्यो ग्रहमालिकानां । क्वैकमालागणितं मदीयम् ।
पिता यथा तुष्यति बाललीलां । दृष्ट्वा तथा तुष्यतु विश्वनाथः ॥ ४३ ॥
अहोरात्रश्रमोद्भूतज्ञानसंचयमात्मगम् । तृणीकृत्योपरि प्रोक्तात् स्फुटा शालीनता पितुः ॥ ४४ ॥

तेजस्विता ।

तेषां स्वभावस्तेजस्वी स्वातन्त्र्यप्रियतात्मकः । वृत्तिः शान्तगभीरा च कटुवाणीपराङ्मुखाः ॥४५॥
सदाचारो हि वेदान्तः स्ववृत्ते परिवर्तितः । अगर्वा निजविज्ञाने निस्पृहास्तत्त्वनिर्णये ॥ ४६ ॥
प्रवेशो नैव कर्तव्यो विषये वादसंकुले । कृतश्चेत्परिहर्तव्यः प्रतिस्पर्धी तु शाश्वतम् ॥ ४७ ॥
न यावत्स्तंभनं शत्रोर्न तावच्चित्तशान्तता । स्वभावोऽयं समर्थानां निसर्गेणाप्युदाहृतः ॥ ४८ ॥
सूर्ये तपति चाग्नेयो ग्रावा तेजो वमत्यसौ । उत्तरे रामचरिते वर्णितं भवभूतिना ॥ ४९ ॥

लेखनसौष्ठवम् ।

कल्पनानां यथोत्पत्तिस्तथैवश्लोकबन्धनम् । श्लोकेषु कर्णमाधुर्यं सारल्यं स्फुटता तथा ॥ ५० ॥
गीता भवन्ति ते श्लोका न गीता यान्ति गद्यताम् । सौष्ठवस्य प्रभावोऽयं प्रतिलेखेऽपि दृश्यते ॥५१॥
अभिधेयकथन-विवरण-सशास्त्रसम्बद्धताऽवहितता च ।
सामुग्रीसांनिध्यं चान्तिमहेतोः प्रकीर्तनं चायम् ॥ ५२ ॥

स्वतंत्रग्रन्थबन्धस्य प्राणभूतो गुणोच्चयः । सर्वग्रन्थेषु तातानां दृश्यते प्रतिबिम्बितः ॥ ५३ ॥
एतत्सदृशतेजस्वी हृत्स्पर्शी समकोटिकः । प्रमेयाणां पुरस्कारः कचिदन्यत्र लभ्यते ॥ ५४ ॥

संवादपटुत्वम् ।

संवादः प्रादुरासीदयनलवमितौ वावदूका असंख्याः ॥
ताता एकाकिनोऽपि प्रबलतमधियः पूर्णशास्त्रावबोधात् ॥
वादे कृत्वा प्रवेशं परकृतभणितीः शब्दशः खण्डयित्वा ॥
अन्ते लेखप्रभावैर्गुणगणखचितैरत्यतिष्ठन्नरातीन् ॥ ५५ ॥

ज्योतिषसंमेलनानि ।

सौरोक्तं शरदो मानं पलैः सार्धाष्टभिर्महत् । इति वेधप्रवीणानां मतं विन्यस्य पार्श्वतः ॥ ५६ ॥
संमेलने ज्यौतिषाख्ये प्रथमे बुधमण्डिते । धृत्वा दीर्घतरं मानं विधेयं करणं नवम् ॥ ५७ ॥
इति निर्णीतमासीत्तैः पण्डितैश्च दुराग्रहात् । तत् श्रुत्वा लिलिखुस्ताता एवं शब्दैस्तु संस्फुटैः ॥५८॥
मार्जारस्यगले घंटाबन्धनात्मकनिर्णयैः । यथा वृथा मूषकाणां सभा तद्वदियं सभा ॥ ५९ ॥
द्वितीयं मेलनं चासीत्पुण्यशाठ्यविमिश्रितम् । तृतीयं स्वार्थसमिश्रं वीक्ष्य तातैर्विगर्हितम् ॥६०॥

॥ स्वार्थस्तृणम् ॥

कनीयांसोऽपि सेवायां तातानां सहचारिणः । त्रिगुणं वेतनं प्रापुस्ताता आसन् यथास्थिताः ॥६१॥
ग्रन्थस्य लिख्यमानस्य समाप्तिर्जायते यदा । तदैवेदं पुरं मोक्ष्ये न तत्प्रागिति निश्चितम् ॥ ६२ ॥
नापेक्षे संक्रमं नापि याचे वर्धितवेतनम् । इति निर्णयमादृत्य स्ववरिष्ठान्यवेदयन् ॥ ६३ ॥
एवं बागलकोटे ते निन्युः पंचाब्दपंचकम् । संत्यक्तो लीलया स्वार्थः स्वार्थो हि महतां तृणम् ॥६४॥
संसारस्थाश्च निर्लिप्ताः संततोद्यमशालिनः । स्वोन्नतिं पार्श्वतस्त्यक्त्वा राष्ट्रज्ञानोन्नतौ रताः ॥६५॥
निर्ममा निरहंकारास्तटस्था हानिलाभयोः । मत्तातैः सदृशा धीरा नूनं वै विरला भुवि ॥ ६६ ॥

दैनिकं वर्तनम् ।

विहाय भोजनं मध्ये समुत्थानं तु नित्यशः । उष्णं त्यक्त्वा भ्रमात् शीतस्नानमेवं मुहुःक्रमः ॥
भिन्नपादे भिन्नपादत्राणं धृत्वा गतागतम् । मध्यरात्रे ज्वलद्दीपा मध्यान्हेऽपि प्रजज्वलुः ॥ ६८ ॥
प्रदीपे मन्दतां याते मध्यान्हे सत्यपि भ्रमात् । तैलदानक्रियामग्नान् तातान् मातान्यवारयत् ॥६९॥
अनाच्छादितशीर्षेण वपुषानावृतेन च । काचं धृत्वा करे रात्रौ वनान्ते भ्रमणं भृशम् ॥ ७० ॥
भार्याभ्यां भाष्यमाणोऽपि मग्नमङ्कावलौ मनः । दैनिकं वर्तनं तेषामेवमासीत् भ्रमाकुलम् ॥ ७१ ॥

भारतवासिनां कर्तव्यम् ।

मत्तातैः सुहृदा मुदाऽनवरतं पंचांगसंशोधनम्, ।
आयस्याब्दशतार्धकं भरतभूविद्वबुद्धिवृद्धयै कृतम् ।
तस्य प्रौढविमर्शनादिनिकषे कृत्वा परीक्षां बुधाः, ।
स्वीकुर्वंतु न कालहानिरधुना योग्येति संप्रार्थये ॥ ७२ ॥
भो भो भारतभूमिसेविविबुधा बद्धांजलिः प्रार्थये,
सज्ज्योतिर्गणितादि–सूक्ष्मकरणग्रंथोत्थसत्केतकी– ।
पंचांगाख्य–यशोध्वजः प्रतिगृहे श्रीवेंकटस्मारकः, ।
आगामिप्रतिवार्षिकप्रतिपदि स्फूर्त्या समारोप्यताम् ॥ इति ॥ ७३ ॥

पूर्वाचार्यैः किं कृतम् ।

ज्योतिषां गणितं श्रीमल्लगधैः संप्रवर्तितम् । गर्गैः पितामहैरग्रे चालितं लब्धशोधनैः ॥ ७४ ॥

श्रीविष्णुचन्द्रमिहिरार्यभटाभिधानाः । श्रीब्रह्मगुप्तलघुमानसकृत्पृथूदाः ॥
श्रीश्रीपतिस्तदनु भास्करकेशवाख्याः । श्रीमद्गणेशकृतिनः खलु तंत्रकाराः ॥ ७५ ॥

एते सिद्धांतकर्तारस्तैर्यथाकालशोधनैः । स्वस्ववेधैर्यथाशक्यं संभृतो ज्योतिषागमः ॥ ७६ ॥
तस्मात् कालादद्ययावत् यथापूर्वं स तिष्ठति । रामकृष्णैस्तथा केरोपंतैर्ग्रन्थाः कृता अपि ॥ ७७ ॥

तातैः किं कृतम् ।

वेदांगात् ग्रहलाघवान्तमनिशं शास्त्रं ग्रहाणामिदम् ।
प्रोत्कर्षोन्मुखमेव सन्ततमभूत्किन्त्वग्रतः स्तम्भितम् ॥
हत्वा स्तम्भनमात्मभव्यकरणै रत्नोज्ज्वलैः संस्थिरैः ।
प्रोत्कर्षस्य हि वेंकटेशकृतिभिः काष्ठा परा प्रापिता ॥ ७८ ॥

जीवितं शास्त्रसेवायां नीत्वा शास्त्रसमुन्नतिम् । कृत्वा ते विविशुः स्वर्गं रक्षितः कीर्तिचन्द्रमाः ॥

आधुनिका गणेशदैवज्ञाः ।

भट इव कटकानां वेङ्कटेशः पटीयान् । गणकगुरुगणेशो यो ऽयमन्यः सुमान्यः ॥ ८० ॥
(इति उज्जयिनीस्था वार्तिककाराः)

विद्वत्ताप्रचुरान् ग्रन्थान् लिखित्वा दशसंख्यकान् । ये श्रमा वेंकटेशेन ज्योतिःकर्मण्युरीकृताः ॥८१॥
नूनं तैर्वेङ्कटेशोऽयं ज्योतिषज्ञतपोनिधिः । ज्यौतिषे कवितानन्दं भुनक्तीति जगुर्बुधाः ॥ ८२ ॥

चरित्रस्य संक्षेपत्वे हेतुः ।

अग्रपूजनयोग्यानां शास्त्रज्ञानां महात्मनाम् । अल्पो जीवनवृत्तान्तश्चिरंजीवो भविष्यति ॥ ८३ ॥
लोकोत्तरत्वं वैचित्र्यमुदाहार्यं च यन्नृणाम् । भवेत्तस्यैव निर्देशैश्चरित्रं खलु शोभते ॥ ८४ ॥

तातानां कीर्तिकेतुः ।

सूक्ष्मः सौलभ्यपूर्णः प्रवचननिपुणः कोष्ठकालंकृतोऽयम् ।
भव्यः सद्ग्रन्थराजो ग्रहगणगणनाप्रौढविस्ताररम्यः ।
खण्डे ऽस्मिन् भारताख्ये निखिलबुधजनैरादृतः प्रव्हमूर्ध्ना ।
तातानां कीर्तिकेतुः स्फुरति दिशि दिशि स्वैरमुच्चैः प्रशास्ति ॥ ८५ ॥

मत्कृतमुद्रणानि । तातानां अंतिमेच्छापूरणं । पितृर्णमुक्तिसंपादनं च ।

सौरार्याजतिथिस्तृयुक्प्रगणितं सद्वैजयंती तथा । पंचांगायनभागनिर्णयकृतिः सत्केतकीभाष्यकम् ॥
पश्चाद्भारतमंडलीयगणितं गोलद्वयप्रश्नकः । संक्षिप्तं बुधवेंकटेशचरितं खंडत्रयालंकृतम् ॥ ८६ ॥
निःसाहाय्यपरिस्थितावृणभरैश्चिंताकरैश्चेतसः । सज्ज्योतिर्गणितस्य दुस्तरपुनर्मुद्रापणं स्वीकृतम् ॥
तातेच्छापरिपूरणाय सततं निःस्वार्थबुध्या मया । ग्रन्था अष्ट विमुद्रिता अधिगता पितृर्णमुक्तिर्भृशम् ॥

(ज्योतिर्गणितप्रकाशनदिवसः)

शाकाब्दे नवपंचधैर्यसदृशे सूर्ये मघासिंहगे । मासश्रावणशुक्लपक्षदशमीसंयुक्तसोमे दिने ॥
तातश्राद्धदिने तदीयतनयस्तातेच्छया प्रेरितः । सज्ज्योतिर्गणितप्रकाशनमिदं श्रीदत्तराजोऽव्यधात् ॥
श्रावणे मासि वयाख्ये तृतीयायां कुजे दिने । तातपादैरहं स्वप्ने दृढमालिंगितो मुहुः ॥ ८९ ॥

अथ ज्योतिर्गणितान्तर्गतविषयाणामनुक्रमणिका ।

प्रथमः परिच्छेदः । (१ - २१६)

तत्र पञ्चाङ्गाध्यायः प्रथमः । (१ – ७८)

चन्द्रसूर्याध्यायो द्वितीयः। (७९ – १००)

ग्रहगणिताध्यायस्तृतीयः। (१०१ – २०२)

नक्षत्राध्यायश्चतुर्थः । (२०३ – २१६)

द्वितीयः परिच्छेदः। (२१७ – ३७६)

चन्द्रग्रहणाध्यायः प्रथमः। (२१७ – २३४)

सूर्यग्रहणाध्यायो द्वितीयः। (२३५ – २७९)

पूर्वार्धम्—इष्टग्रामसंबन्धिगणितम्

उत्तरार्धम्—भूमण्डलसंबन्धिगणितम्

युत्यध्यायस्तृतीयः । (२८० – २९४)

लोपदर्शनाध्यायश्चतुर्थः । (२९५ – ३१३)

पाताध्यायः पञ्चमः । (३१४ – ३२९)

त्रिप्रश्नाध्यायः षष्ठः । (३३० – ३६८)

कालविपरिणामाध्यायः सप्तमः । (३६९ – ३७६)

कोष्ठकरचनाध्यायः । (३७७ – ४०३) (४०४–४०५)

इति ज्योतिर्गणितान्तर्गतविषयानुक्रमणिका समाप्ता ।

शुद्धिपत्रम् ।

पृष्ठं	स्थलनिर्देश	अशुद्धं	शुद्धं
२८	१८ पं.	चतुर्थन्यासे	तृतीयन्यासे
३४	उप. २९ ति. क.	३७६	२७६
,,	उप. ३७ ति. क.	२२४	१२५
३५	उप. २०६ ति. क.	९३	९४
३६	उप. ३२२ ति. क.	७३	७४
३९	दक्षिणपार्श्वे उप.	१८४	१७४
४१	उप. १०२, ति. २२	४०५	४५०
५२	हारः ७४३, भाज्यं २००	९५६	९५३
,,	हारः ७२४, भाज्यं ८०	४९२	३९२
५९	हारः ९३१ भाज्यं ५००	९९०३	१९०३
८७	१७ पं.	प्रागुक्तः गणिता इ.	प्रागुक्तः तृतीयाध्यायोक्तगणितागतरवौ ।
१०९	पं. ६ । स्पष्टकेन्द्राद्दिनगतिः सिद्धैव तिष्ठति इति पूरणीयम् ।		
११७	८३।८८।	स	सै
१२२	[illegible]. १६ मा ति. ११	·३७६	·३७७
१२४	वर्ष ७ ! उप. ३	२५२	३५२
१२८	उप. १०० । शने उप. ५	११·१२	११·२२
१८२	दक्षिणपार्श्वे	३६५	२६५
१९४	को· १७ उप. १३२। भौ. सितोत्क.	१·७७	१·७५
२०७	१४ पं. दक्षिणपार्श्वे	ति. १९।१६२	१९।४६२
२१९	प्रथम पंक्तिः	को. १	को. १६
२२०	४ पंक्तिः	४५′·५	५४′·५
२४०	३ पंक्तिः	तर्ति	तर्हि
२४२	१२ पंक्तिः दक्षिणपार्श्वे	− ४९	− ५१
२४८	आयमुपकरणं एकोनविंशम्	५८	४८
२५०	वामोपकरणोर्ध्वाधरपंक्तिः	कोष्ठस्थांकश्रेणीभिः समा कार्या	
२५०	नतांशाः− ६०, विश्ले. ३६, आभ्यां	१६	१९
२५०	नतांशाः− १२, विश्ले· ७२ आभ्यां	७८	७७
२५९	न्यासः १२, ५ मी पं.	६	९
२७२	दशमोर्ध्वाधरस्तंभे अधस्तनोक्त	+ १२९ +	− १२९ +
२७४	उपकरणांक	१७६	१८६
२७५	दशमोर्ध्वाधरस्तंभे २१ पं.	२८२·२	२८२·०
३०२	उप. वर्ष. ६	१४६·५७	१४६·४२
३०२	उप. वर्ष. ७	३६८·४२	३६८·५७

अश्विन्यारम्भः पौष्णान्तो वा । अयनांशाश्च ॥

पितरं वेङ्कटेशाख्यं ज्योतिःशास्त्रप्रवर्तकम् ।
साञ्जलिर्नमनं कृत्वा ब्रुवे तातमनोगतम् ॥

श्रीवेदांगपितामहादिगणिते ज्योतिर्धनिष्ठाख्यकम्
ज्योतिश्चक्रमुखस्थमित्यभिहितं तस्माद्धनिष्ठादितः ।
पञ्चर्क्षान्तरनिष्ठमश्विवदनं तैर्यत्क्रमाच्चिन्हितम् ।
तद्वेदांगपरंपराहततमं यत्कालसातत्यभृत् ॥ १ ॥

श्रीवेदांगज्योतिषोपक्रमे ज्योतिःशास्त्रकृतां संकेतमनुसृत्य क्रान्तिवृत्तनिष्ठं पञ्चसंवत्सर-युगारम्भस्थलं विशिष्टलक्षणलक्षितं निर्मलशब्दैरेव प्रतिपादितं तद्यथा— "**स्वराक्रमेते सोमार्कौ यदा साकं सवासवौ । स्यात्तदाऽऽदियुगं माघस्तपः शुक्लोऽयनं ह्युदक्** "— इति । अमावास्यान्ते प्रतिपदारम्भे वा रविचन्द्रौ कदम्बप्रोतयुतिसूत्रगतौ भवत इति प्रसिद्धमेव । वेदांगोक्तादियुगं माघशुक्लप्रतिपदारम्भे प्रवर्तते अर्थात्तदा "**सोमार्कौ यदा साकं**" इत्युक्त्या सोमार्कौ कदम्बप्रोतयुतिसूत्रगताविति प्रोक्तम् । किंनक्षत्रविशिष्टेयं प्रतिपदित्यत्राह "**सवासवौ**" इति । पूर्वोक्तकदम्बप्रोतरविचन्द्रयुतिसूत्रे **धनिष्ठातारासंपृक्ते** सति जायमाना प्रतिपदिति । अनेन स्थानगणितप्रवृत्तिरपि स्फुटा । सा च यथा । सूर्यचन्द्रधनिष्ठात्रयाधिष्ठितसूत्रस्य कदम्ब-प्रोतत्वाद्धनिष्ठाशरमूले क्रान्तिवृत्ते उदङ्मुखः सूर्यः । अस्मादेव स्थानगणितप्रवृत्तिः । एवं षष्ठे श्लोके दृश्यतारोपलक्षितमुदङ्मुखसूर्यस्थानं प्रोच्याग्रे सप्तमश्लोके तस्यैवोदङ्मुखसूर्यस्य विभागो-पलक्षितं क्रान्तिवृत्तीयं स्थानमाह—"**प्रपद्येते श्रविष्ठादौ** "— इति । नाम धनिष्ठाशरमूलस्थित उदङ्मुखः सूर्यो "**धनिष्ठादौ**" धनिष्ठाविभागारम्भे स्थित इत्युक्तं भवति । अनेन वेदांगज्योतिषे धनिष्ठाशरमूले धनिष्ठाविभागारम्भः सिध्यति । युज्यते चेदम् । धनिष्ठायोगतारा आदिर्यस्य स धनिष्ठादिविभागः । धनिष्ठादितो ये सप्तविंशतिनक्षत्रविभागास्ते धनिष्ठादिनक्षत्रविभागाः ।ताननुसृत्य या गणना सा धनिष्ठादिगणना इति । एतद्धनिष्ठादिगणनानुसारेणैवाग्रे "**सार्पार्धे**" दक्षिणायनमपि प्रोक्तम् । उपर्युक्तप्रतिपादनेन धनिष्ठादिज्योतिश्चक्रमुपपन्नम् । पितामहेऽपि अस्यैवानुवादः । स च अग्रे स्फुटो भविष्यति ।

एतस्माद्धनिष्ठादितः क्रमात्पञ्चनक्षत्रान्तरे तैर्मुनिभिर्यः पौष्णान्ताश्विन्हितः स एव वेदांग-परंपराहृतः स एव च कालसातत्यरक्षकः । अतोऽयमेव पौष्णान्तोऽश्विन्यादिर्वा सूर्यसिद्धान्त-द्वयेऽपि स्वीकृतः । अस्माभिरपि स एव संग्राह्य इत्यर्थः । तथा चाह भगवान् **गर्गः**— "**कालज्ञानं महत्पुण्यं कालश्चादित्य उच्यते । स च माघस्य शुक्लादौ सोमवासवयोः सह । सहोदयं श्रविष्ठाभिः प्रस्थायान्हामुदङ्मुखः** " – इति । अनेनायमर्थः । माघशुक्लप्रतिपदा-रम्भे स आदित्यः (सोमवासवयोः सह) धनिष्ठायोगताराचन्द्राभ्यां सह श्रविष्ठाविभागारम्भे (श्रविष्ठाभिः सह) उदेत्य उदङ्मुख उदगयनं कुरुते इति । अत्रैकस्मिन्नेव वाक्ये धनिष्ठा-शब्दस्य द्विः प्रयुक्तत्वाद्धनिष्ठायोगताराप्रयुक्तधनिष्ठारम्भः स्फुटतमः । त्रयाणां युतिस्तु व्यक्त-शब्दैरेव निर्दिष्टा । अनेन गर्गैरपि लगधमुनिचिन्हितः पौष्णान्त एव स्मारित इति ।

वेदांगोक्तयुगारंभः स्फुटं प्रोक्तः पितामहे ।
वराहेणास्य निर्देशः पञ्चसिद्धान्तके कृतः ॥ २ ॥

पितामहसिद्धान्तस्य संग्रहः पञ्चसिद्धान्तिकायां वराहेण कृतः। वेदांगज्योतिषगर्गकाला-नामनिश्चितत्वात्तदुक्तादियुगलक्षणस्य गणनारम्भस्थलस्य गणितपरीक्षणेन निर्णयो दुःसाध्य आसीत्। परं शालिवाहनशकादनन्तरं प्रथममेव पततो वेदांगज्योतिषपैतामहादियुगारम्भस्य स्थलं कालश्च श्रीवराहेण लक्षणसहित एव यस्मात्प्रतिपादितस्तस्मात्तदादियुगस्य परीक्षणमधुना कर्तुं शक्यते। तल्लक्षणं यथा। "**द्व्यूनं शकेन्द्रकालं पञ्चभिरुद्धृत्य शेषवर्षाणाम्। युगणं माघसिताद्यं कुर्यात् द्युगणं तदन्ह्युदयात्...... धनिष्ठाद्यम्**" इति। अस्यार्थः पैतामह २ शके माघशुक्लप्रतिपदारम्भे सूर्योदये धनिष्ठारविचन्द्राणां धनिष्ठारम्भे युतिघटना-विशिष्टः आदियुगारम्भोऽस्तीति वराह आह। माघादिगणनया २ गतशकः प्रोक्तः। तदग्रे मासद्वयेन चैत्रादिगणनया २ शकारम्भो भवति। अतः चैत्रादिगणनया स एव १ शकस्य माघो भवति। अर्थात् १ शकीयमाघशुक्लप्रतिपत्सूर्योदयकालिकगणितेन वराहोक्तयुतेः परीक्षणं कर्तव्यं भवति। अस्य गणितं केतकीपरिमलभाष्ये २३–२४। पृष्ठयोर्दर्शितम्। तद्यथा। इष्टदिने

सायनभोगाः।		अं॰ क॰	सायनभोगाः।		अं॰ क॰
१ सूर्यस्य	...	२८९।२४	ग–धनिष्ठायाः	...	२९१।११
२ चन्द्रस्य	...	२८९।२४	ड–धनिष्ठायाः	...	२९९। ०
३ धनिष्ठारंभस्य	...	२८९।२४	रविक्रान्तिः	–	२२। ०
४ अ–धनिष्ठायाः सिद्धांतोक्तायाः	...	२८९।२४	अक्षांशाः	+	३६। ०
			चरसंस्कारः	–	३, घटि.
५ ब–धनिष्ठायाः	...	२८८।९	पौषामान्तः		३, घ. ३२, घ.

तिथ्यन्तः ३ घ. ३२ प.। चरं – ३ घ.। तेन १ शकीयमाघारम्भः सूर्योदयानन्तरं केवल ३२ पलैरेव जात इति सूर्यसिद्धान्तगणितेन प्राप्यते। वराहसंगृहीतायसूर्यसिद्धान्तगणिते-नापि स्वल्पान्तरात्सूर्योदये एव अमान्तो लभ्यते। अथ च धनिष्ठाविभागारम्भः, रविः, चन्द्रः, अ–धनिष्ठातारा च, एतेषां चतुर्णां २८९°। २४ भोगसाम्यात् युतिर्निःसन्दिग्धा। अथेदानीं तुलना—

	वराहोक्तं पितामहादियुगलक्षणम्	अस्मद्गणित– परीक्षणागतं लक्षणम्।
१	माघशुक्लप्रतिपदारम्भः	माघशुक्लप्रतिपदारम्भः।
२	सूर्योदये अमान्तः	सूर्योदयादग्रे केवल ३२ पलैरमान्तः।
३	धनिष्ठारम्भे युतिः	धनिष्ठारम्भे युतिः
४	रविचन्द्रधनिष्ठातारााणां युतिः। एकसूत्रगतत्वात् भोगैक्यम् २८९°·४	रविचन्द्रधनिष्ठातारााणां युतिः। कदम्बसूत्रगतत्वात् भोगैक्यम् २८९°·४

फलितम्।

१ वेदांगपरंपराप्राप्तो धनिष्ठाविभागारंभो धनिष्ठायोगताराशरमूले एव तिष्ठति।

२ धनिष्ठापुञ्जे आल्फाधनिष्ठैव योगतारा। २१६ पृष्ठान्तिके प्रथमनक्षत्रपटे मध्यभागे धनिष्ठापुञ्जो निर्दिष्टः। तत्र a संज्ञातारा धनिष्ठायोगतारा ज्ञेया। a = आल्फा इति। सूर्य-सिद्धान्तेऽपि इयमेव निर्दिष्टेति २०९ पृष्ठे विस्तृतया वचनप्रामाण्येनैव प्रतिपादितम्। अनेन पैतामहोक्तादियुगारंभलक्षणेन वेदांगज्योतिषोक्तमादियुगलक्षणं विज्ञात भवति। तेनास्यैव तुल्यत्वात्। अनेन अ–धनिष्ठाप्रयुक्तपौष्णान्त एव ग्राह्य इति दृढतमं जातम्।

वेदांगज्योतिषात्पूर्वं मैत्र्याख्युपनिषद्यपि ।
गणितात्मकनिर्देशः कृतो गणनयाऽनया ॥ ३॥

" सूर्यो योनिः कालस्य । ... । **मघाद्यं श्रविष्ठार्धम्** । " (प्रपा. ६) इति मैत्र्युपनिषदुक्तौ "**आद्यं, अर्धं**" इति विभागशः अयनयोर्गणितात्मकनिर्देशः । एते विभागाश्च "**नक्षत्राणि वसवः**" (प्रपा. ६) इति तत्रत्येनैव निर्देशेन धनिष्ठादिविभागगणना वेदांगात्पूर्वमेव प्रचारगताऽऽसीत् या एव वेदांगेन केवलमनूदिता इति । गणनयाऽनया नाम धनिष्ठादिगणनयेति ।

ब्राह्मणे तैत्तिरीयेऽपि दृश्यर्क्षवलयं तथा ।
अग्रिमा कृत्तिका प्रोक्ता धनिष्ठाप्यग्रिमा मता ॥ ४॥

" यत्पुण्यं नक्षत्रं तत् बट्कुर्वीतोपव्युषम् । यदा वै सूर्य उदेति तदा नक्षत्रं नैति " (तै. ब्रा. १·५·१) इति मंत्रेण दृश्यनक्षत्राण्येव विवक्षितानि । एवमेव सप्तविंशतिदृश्यनक्षत्रचक्रं तत्र निर्दिष्टमस्ति । तथा च तैत्तिरीयब्राह्मणकाले अग्निदेवताकं दृश्यकृत्तिकानक्षत्रं यथा देवेषु अग्रिमं नक्षत्रमासीत्तथैव वसुदेवताकं धनिष्ठानक्षत्रमपि देवेषु अग्रिमं नक्षत्रं आसीदित्यत्रार्थे मंत्रो यथा। "**वसवो वा अकामयन्त । अग्रं देवतानां परियामेति । ... । ततो वै ते अग्रं देवतानां पर्यायन्**" (तै. ब्रा. कां. ३, प्र. १, अ. ५, ८ इति । अनेन दृश्य धनिष्ठाया अग्रिमत्वं **स्पष्टम्** ।

कृत्तिका कर्मणां शस्ता धनिष्ठा गणिते मता ।
सनातना व्यवस्थेयमिति प्रत्यक्षगर्गवाक् ॥ ५॥

पूर्वश्लोके दृश्यकृत्तिका दृश्यधनिष्ठा चैते अग्रिमत्वेन प्रोक्ते । तयोर्गणनयोः प्रयोजनमाह भगवान् गर्गः । तद्यथा । "**सकलकर्म सुकृत्तिकाः प्रथममाचक्षते, श्रविष्ठा तु संख्यायाः (प्रथममाचक्षते)**" इति वेदांगज्योतिषभाष्ये **सोमाकर** आह । अनेनायमर्थः । दृश्यकृत्तिका कर्मप्रवर्तका, दृश्यधनिष्ठा गणित (संख्या) प्रवर्तकेति । " आचक्षते " इति पदेन गर्गैः स्वसत्ताकालेऽपि तयोर्दीर्घपरम्परा व्यक्तीकृता । एवं धनिष्ठादिगणितप्रवर्तकाया गणनाया मूलं तैत्तिरीयब्राह्मणे एव निष्ठितम् । एनां तैत्तिरीयब्राह्मणोक्तदृश्यधनिष्ठां प्रथमबिन्दुं प्रकल्प्य क्रान्तिवृत्तस्य ये सप्तविंशतिविभागास्ते एव मैत्र्युपनिषदि वेदांगज्योतिषेऽपि पितामहे च स्वीकृता इत्यतीव स्पष्टम् ।

दृश्यपुञ्जाद्धनिष्ठादिस्तैत्तिरीये प्रकीर्तितः ।
ताराणामिष्टिमंत्रेषु धनिष्ठान्तोऽपि दर्शितः ॥ ६॥

वैदिककाले तैत्तिरीये ब्राह्मणे दृश्यधनिष्ठा नाम तत्रत्या योगतारैव गणितप्रवर्तक धनिष्ठादिगणनायाः प्रारम्भबिन्दुरिति गर्गैरेव (श्रविष्ठा तु संख्यायाः प्रथममाचक्षते इति भाष्येण) दृढीकृतम् । अग्रे च नक्षत्रेष्टिप्रकरणे (१) अष्टौ देवा वसवः सौम्यासः । चतस्रो देवीरजराः श्रविष्ठाः । ते **यज्ञ पान्तु** रजसः परस्तात् । **सवत्सरीणं अमृतं** स्वस्ति । (२) **यज्ञं नः पान्तु वसवः पुरस्तात् । दक्षिणतोऽभियन्तु श्रविष्ठाः । पुण्यं नक्षत्रं अभिसंविशाम ।** (तै. ब्रा. कां. ३ प्र. २, अनु. ६) इति मंत्रद्वये धनिष्ठाया अन्तो दर्शितः । तद्यथा । अष्टवसुदेवताः संवत्सरभाविनमस्माकं यज्ञं पूर्वस्यां दिशि पान्तु । श्रविष्ठाः पुनः पितृसंभवास्ततस्ता मघानक्षत्रं दक्षिणादिशि अभियन्तु । वसुदेवतासंरक्षितया पूर्वदिशा वयमपि पवित्रं **धनिष्ठानक्षत्रं** आभिमुख्येन प्रविशाम । एतन्मंत्रोच्चारणेन धनिष्ठानक्षत्रप्रवेशफलं प्राप्यते इत्यर्थः । **अथास्य** विवरणं यथा ।

यज्ञम्—" संवत्सरीण संवत्सरभाविनं अमृतं अमृतत्वं अविघ्नेन यथा भवति तथा **यज्ञं** पान्तु " इति श्रीभट्टभास्करव्याख्यायां तथा च "**संवत्सरः प्रजापतिः । प्रजापतिर्यज्ञः ।**

इति मंत्रेण च अयं नूतनसंवत्सरभावी यज्ञः इति सिध्यति। अत एवास्य संवत्सरसत्रमिति संज्ञा युज्यते।

संवत्सरसत्रारम्भो नूतनसंवत्सरोपक्रमे, नूतनसंवत्सरोपक्रमश्च उदङ्मुखे सूर्ये सतीति तदा प्रचारः। वेदांगज्योतिषेऽपि उदङ्मुखे सूर्ये सत्येव नूतनसंवत्सरारंभो विबुधानां परिचितः। अर्थादयं यज्ञः उदगयनद्योतक इति।

पान्तु—नो यज्ञं वसुदेवाः पान्तु। एतदभ्युदयिकयज्ञद्वारा धनिष्ठानक्षत्रप्रवेशश्चिकीर्षितः। अतो वसुदेवानां "पान्तु" इति प्रार्थना युक्ता।

पुरस्तात्—वसुदेवाः कस्यां दिशि पान्तु। पुरस्तात्। पूर्वस्यां दिशि इति सायनाचार्यवत् भट्टभास्करोऽप्याह। किमर्थं पूर्वस्यां दिशि। संवत्सरारम्भीययज्ञप्रवर्तकः उदगयनबिंदुस्तदा धनिष्ठातः पूर्वतः स्थितस्तस्मादिति। अयनचलनं सततं पूर्वतः पश्चिमस्यां दिशि प्रचलतीति गणितसिद्धम्। तदा उदगयनं पूर्वस्यां कस्मिन् बिन्दावासीत्। "पुण्यं नक्षत्रं अभिसंविशाम" नाम पूर्वतो धनिष्ठानक्षत्रप्रवेशस्थाने उदङ्मुखः सूर्य आसीदिति। पूर्वतो धनिष्ठानक्षत्रप्रवेशस्थानं नाम धनिष्ठाविभागस्य अन्तः। अस्मिन्धनिष्ठाविभागस्य अन्ते उदगयनबिन्दुरासीदिति। **अथान्यत्प्रमाणम्**। वेदांगज्योतिषे माघशुक्लप्रतिपदारम्भे, मैत्र्युपनिषदि माघशुक्लाष्टमीदिने, कृत्तिकाकाले च माघपौर्णिमायामुदगयनं भवति स्म।

उदगयनं	**उदगयनातिथिः**	**उदगयनस्थलम्**
वेदांगज्योतिषे	माघ शु. १	धनिष्ठारम्भे
मैत्र्युपनिषदि	माघ शु. ८	धनिष्ठार्धे
कृत्तिकाकाले	माघ शु. १५	धनिष्ठान्ते

अनेन न्यासेनापि संहिताकाले धनिष्ठान्ते उदगयनं सिध्यति। **अथ पुनरन्यत्प्रमाणम्**। पितामहोक्तयुतिगणिते २ शके धनिष्ठारम्भभोगः २८९°·५। वेदांगज्योतिषकाले धनिष्ठारम्भभोगः २७०°। तयोरन्तरं १९°·५ अंशाः। वेदांगज्योतिषकालात् २ शकपर्यंतं अयनचलनं १९·५ अंशमितं जातमिति। ७२ द्विसप्ततिवर्षैः एकोऽयनचलनभागः संपद्यते। तस्मात् १९·५ अंशानामयनचलनं १९·५ × ७२ = १४०४ वर्षैः लभ्यते। इमे १४०४ अब्दाः पैतामह २ शकेन हीनाः १४०२ शकपूर्ववर्षाणि वेदांगज्योतिषसमयः वराहनिर्देशेन सिध्यति। अन्यरीत्या च १४७० शकपूर्वशकः प्राप्यते। उभयोः स्वल्पान्तरमुपेक्षणीयम्।

सिद्धान्तोक्तकृत्तिकाभोगः ४४४ शके ३९ अंशमितः। इमे ७२ गुणिता २८०८ अब्दाः प्राप्यन्ते। एते ४४४ वर्षैः हीनाः २८०८ − ४४४ = २३६४ शकपूर्ववर्षाणि कृत्तिकाकालं निर्दिशन्ति। अन्यरीत्या २४३० लभ्यते। उभयोः स्वल्पान्तरमुपेक्षणीयम्।

कृत्तिकाकालः शकपूर्व २३६४ वर्षाणि। वेदांगज्योतिषकालः शकपूर्व १४०२ वर्षाणि। अनयोरन्तरं ९६२ वर्षाणि। अर्थात् कृत्तिकाकालात् वेदांगज्योतिषकालः ९६२ वर्षैः अन्तरितः इति। एतेषु ९६२ वर्षेषु (९६२ ÷ ७२) = १३°। २१′ मितं नाम एकनक्षत्रविभागतुल्यमयनचलनं जातमितिस्फुटम्। अर्थात् वेदांगज्योतिषोक्तधनिष्ठारम्भादग्रे १३°। २१′ मितान्तरे नाम धनिष्ठाविभागान्ते उदगयनमासीत्कृत्तिकाकाले इति वराहगणितासिद्धं वचनप्रमाणसिद्धं चेत्यलम्।

देवाः, वसवः, श्रविष्ठाः, नक्षत्रम्। उदगयनप्रचोदितसंवत्सरसत्रस्य रक्षणार्थं "देवाः" प्रार्थिताः। धनिष्ठाप्रवेशस्य चिकीर्षितत्वात् "वसवः" इत्युक्तम्। मघाभिमुख्यार्थं "श्रविष्ठाः" इति दृश्यताराानिर्देशः। ततश्च प्रवेशसंभवार्थं "नक्षत्रं" इति पदेन धनिष्ठानक्षत्रविभागः सूचितः।

फलितम् ।

मंत्रोक्तः प्रथमो निर्देशः। सूर्यस्योदगयनं धनिष्ठाविभागस्य अन्तर्बिन्दौ भवतीति ।

मंत्रोक्तो द्वितीयो निर्देशः। "कृत्तिकाः प्रथमं" इत्यनेन उदगयनप्रचोदिते संवत्सर सत्रारम्भे (यदेतत्कृत्तिकासंपातरूपं.........सायनाचार्याः) कृत्तिका (योग) ताराया वसंत-संपाते स्थितिरिति ।

मंत्रोक्तस्तृतीयो निर्देशः। "श्रविष्ठाः पुनः पितृसंभवाः ... ततस्तासां दक्षिणतोऽभियानं युक्तं" इति श्रीभट्टभास्करव्याख्यया दृश्यमघानक्षत्रे दक्षिणायनस्थलमिति । दृश्यकृत्तिका, दृश्यमघा, एतयोर्मध्ये समं ९० अंशमितमन्तरं भवतीति सांप्रतमपि स्फुटं दृश्यते। यतः सांप्रतं कृत्तिकासायनभोगः ५९° मितः। मघासायनभोगः १४९ अंशमितः। उभयोरन्तरे ९० अंशाः स्फुटाः। अतो युज्यते पूर्वप्रतिपादनं मंत्रदृष्ट्या गणितदृष्ट्याचैति ।

निर्देशत्रयस्य सारम् ।

वसन्तसंपाते कृत्तिकायोगतारा, दक्षिणायनबिन्दौ मघायोगतारा, धनिष्ठाविभागस्यान्ते उदगयनमिति ।

अस्य गणितेन परीक्षणम् ।

(नक्षत्रनाम्ना योगतारा ज्ञेया)

		अं.	क.
वसन्तसंपातात् उदगयनावधिकमन्तरं नाम कृत्तिकातः धनिष्ठान्तपर्यन्तमन्तरम्		९०	०
धनिष्ठान्तात् धनिष्ठारम्भपर्यंतं	...	१३	२०
कृत्तिकातो धनिष्ठारंभपर्यंतं	...	१०३	२०
कृत्तिकातो धनिष्ठायोगतारा (वेधात्)	...	१०३	

परीक्षणफलम् ।

धनिष्ठारम्भस्य धनिष्ठायोगतारायाश्च भोगसाम्यात् धनिष्ठारम्भे धनिष्ठायोगतारा, तथा च धनिष्ठापुञ्जे आल्फा = अ, धनिष्ठातारा एव योगतारेति स्फुटम्। अत इयमेव मैत्र्युपनिषदि, वेदांगज्योतिषे, पितामहे, सूर्यसिद्धान्ते, ज्योतिर्गणिते, केतकीकरणे च स्वीकृता ।

एवमुपरि दृश्यपुञ्जाद्धनिष्ठारम्भः, उदगयनस्थलनिर्देशरूपेण च धनिष्ठाया अन्तोऽपि तैत्तिरीयब्राह्मणे प्रदर्शित इत्युपपन्नम् ।

ब्राह्मणोक्तधनिष्ठादेरङ्किता ये भभागकाः।
मैत्रिणा स्वीकृताश्चैवं लगधैश्च पितामहैः ॥ ७॥

तैत्तिरीयब्राह्मणे गणितप्रवर्तका धनिष्ठायोगतारा धनिष्ठादिगणनायाः प्रथमबिन्दुः कल्पिता। तदारभ्य ये २७ भभागा लब्धास्ते एव मैत्रिणि लागधे पैतामहेऽपीत्युपपन्नम् ।

एवं सिद्धविभागकेषु च पुरा संख्या धनिष्ठादितः ।
आसीत्किन्वधुनाश्विनीमुखत इत्यन्यः क्रमः केवलः ।
एतस्याश्विमुखस्य तिष्ठति समं चित्रा सदा संमुखम् ।
इत्युक्तं प्रथमे तथैव च परे श्रीसूर्यसिद्धान्तयोः ॥ ८ ॥

एवं मैत्र्युपनिषत्पूर्वकालात्परम्परागता ये नक्षत्रविभागास्तेषु धनिष्ठादिगणनासीत् । किन्त्विदानीमश्विनीमुखतो गणना अस्तीति नक्षत्रक्रमे एव केवलो भेदः। एतस्य धनिष्ठादितः पञ्चनक्षत्रान्तरे ६६°।४०′ स्थितादश्विनीमुखादिदानीं गणना प्रचलति। एतस्याश्विनीमुखस्य संमुखं नाम १८० अंशान्तरे चित्रानक्षत्रं सदैव तिष्ठति इति सूर्यसिद्धान्तयोर्विगणितम्। तद्यथा।

	अं.	क.
तैत्तिरीयब्राह्मणमैत्र्युपनिषद्वेदांगज्योतिषोक्त्या धनिष्ठादितः प्राग्दिशि पौष्णान्तः	६६	४०
दृश्यधनिष्ठातः पश्चिमस्यां चित्रान्तरं	११३	३३
धनिष्ठाप्रयुक्तपौष्णान्तात् चित्रान्तरं	१८०	१३
आद्यसूर्यसिद्धान्ते	१८०	
सूर्यसिद्धान्ते	१८०	
ज्योतिर्गणिते	१८०	

गर्गोक्त्या पौष्णान्तान्वेषणम्

(केतकीपरिमलभाष्ये पृ. २०)

विवरणम्	अं.	क.
दृश्यधनिष्ठातो दृश्यचित्रान्तरं गर्गोक्तं	२४६	३०
धनिष्ठातः पौष्णान्तः	−६६	४०
गर्गोक्तपौष्णान्तात् चित्रान्तरं	१७९	५०
सूर्यसिद्धान्तयोः ,, ...	१८०	
ज्योतिर्गणिते ,, ...	१८०	

एवं न्यासद्वयेन श्लोकोक्तं सर्वमुपपन्नम्। यतः पौष्णान्तस्य अश्विनीमुखस्य वा चित्रासंमुखीभावो यः सूर्यसिद्धांतयोः स्वीकृतः स उपलब्धः। स एव च कालरक्षकोऽत एव स एव ज्योतिर्गणिते मया स्वीकृत इत्याहुः-

तस्मादेव मयाप्यत्र ज्योतिर्गणितकर्मणि ।
अयमेव हि पौष्णान्तः स्वीकृतः कालरक्षकः ॥

तैत्तिरीयब्राह्मणे कर्मार्थं दृश्यकृत्तिका गणितार्थं दृश्यधनिष्ठेति गर्गः। नक्षत्रविभागानां गणितोपयोगित्वात् गणितपुरस्कारिणी या दृश्यधनिष्ठा तां प्रथमबिन्दुं प्रकल्प्य ये सप्तविंशतिविभागाः कृता मुनिभिस्ते एव मैत्र्युपनिषदि वेदांगज्योतिषे पितामहेऽपि च परंपराशुद्धतया संगृहीताः। एतेषु सिद्धविभागेषु यः पौष्णान्तस्तस्यैव कालरक्षकत्वात् सूर्यसिद्धान्ताभ्यां स स्वीकृतः। स सिद्धपौष्णान्तश्च चित्रासंमुखे तिष्ठतीत्यप्यधिकं प्रोक्तं ताभ्याम्। तस्मान्मयाप्ययमेव पौष्णान्तस्तस्य कालसातत्यरक्षकत्वात् कालसातत्यरक्षणमाहात्म्यमभिज्ञाय सादरं स्वीकृतः। भाविविद्वज्जनैरपि स एव रक्षणीयः। अयनांशा अपि एतत्पौष्णान्तानुगुणा एव संग्राह्या इत्यलम् ॥

इति पौष्णान्तनिर्णयः ॥

अथेदानीं अयनांशाः ॥

ब्राह्मणे तैत्तिरीयाख्ये मैत्र्याख्युपनिषद्यपि
वेदांगज्योतिषे चैव सूर्यस्योदक्प्रवर्तनम् ॥
धनिष्ठान्ते धनिष्ठार्धे धनिष्ठादौ यथाक्रमम् ।
संकीर्तितं ततश्चाग्रे ज्योतिर्विद्वरभूषणः ॥
पञ्चसिद्धान्तिकाग्रन्थे वराहो निजकालिकम् ।
अयनं दक्षिणं प्राह पुनर्वसुदले स्थितम् ॥
पुनर्बृहत्संहितायां वेदांगनिजकालयोः ।
मध्यस्थं वेधनिर्णीतं समस्तमयनांतरम् ॥
सप्तविंशत्यंशतुल्यं परीक्ष्यैवाह वीक्षितम् ।
यस्य संज्ञा वराहेण विकार इति कीर्तिता ॥

तैत्तिरीयब्राह्मणे " धनिष्ठान्ते " उदगयनम् । " श्रविष्ठार्धं " इति मैत्र्युपनिषदि । " श्रविष्ठादौ " इति वेदांगज्योतिषे । ततश्चाग्रे पंचसिद्धान्तिकायां वराह आह—" आश्लेषार्धादासीद्यदा निवृत्तिः किलोष्णकिरणस्य । युक्तमयनं तदासीत् सांप्रतमयनं पुनर्वसुतः " इति । वेदांगज्योतिषे आश्लेषार्धात् निवृत्तिर्नाम दक्षिणायनम् । सांप्रतं " पुनर्वसुतः " । आश्लेषार्धादित्यनेन अनुवृत्तिबलात् पुनर्वसुतः इत्यस्य पुनर्वस्वर्धे इत्यर्थो लभ्यते । आश्लेषार्धात् पुनवस्वर्धं यावत् २६ अं. ४० क., स्वल्पान्तरात् २७ अंशा अयनचलनं भवतीति । पुनः स एव वेदांगज्योतिषात् स्वकालावधिकं समस्तमयनचलनं २७ अंशमितं स्वकृतप्रत्यक्षवेधनिर्णीतं स्वपरीक्षया व्यक्तं च बृहत्संहितायामपि ाह वराहः । तद्वाक्यं चाह भाष्यकारो नीलकण्ठसोमसुत्वा स्वकृतार्यभटीयवासनाभाष्ये—

" तत्र विप्रतिपन्नान्प्रति तत्समर्थनपरं वाक्यं वराहमिहिरोऽपि संहितायामाह—

" आश्लेषार्धाद्दक्षिणमुत्तरमयनं रवेर्धनिष्ठाद्यम् ।
नूनं कदाचिदासीद्येनोक्तं पूर्वशास्त्रेषु ।
सांप्रतमयनं सवितुः कर्कटकाद्यं मृगादितश्चान्यत् ।
उक्ताभांशैर्विकृतिः प्रत्यक्षपरीक्षणैर्व्यक्तिः ॥ इति ॥

तच्चलनपरिमाणस्य परीक्ष्य निर्णयः उपरितनेन ग्रन्थेन प्रदर्शितः ॥ इति ॥ "

वेदांगज्योतिषकालादद्यावधि सांप्रतं भांशैर्विकृतिरुक्ता यस्याश्च सांप्रतं प्रत्यक्षपरीक्षणैर्व्यक्तिः इति वराहः । नीलकण्ठवचनेनापि २७ अंशमितं **चलनपरिमाणं** प्रदर्शितम् ।

३८ पृष्ठे वेदाङ्गकालः, – १४७० वर्षाणि । वराहकालः, + ४५० वर्षाणि । अनयोरन्तरं १९२० वर्षाणि । अतः $१९२० \div ७२ = २६^{\circ}।४०' = २७^{\circ}$ । अर्थात् वेदाङ्गज्योतिषकालाद्वराहकालपर्यन्तमयनचलनं २७ अंशमितं भवति । अतो वराहोक्ता भांशविकृतिरुपपन्ना । **श्रीवराहेण** तथ्यमेव वीक्षितम् ।

वराहोक्तोऽयं " कर्कटादिः " सायनः । एतामेवार्यामधिकृत्याह मरीचिकारः । " अयनयोः कर्कमकरायोः सायनत्वेनाभिमते पुनर्वस्वंतिमचरणात् " इति । तेन सायनकर्कटादिरत्र निरयणपुनर्वस्वर्ध एव भवति । अत एव आश्लेषार्धात् पुनर्वस्वर्धावधिका " भांशमिता " विकृतिर्वराहेणोक्ता तथा च युज्यते ।

अत्रेदं ध्येयम् । वराहोक्तमिदं भांशमितचलनपरिमाणं स्थूलायनगत्या न साधितं भवति । नापि तत्स्थूलवर्षमानाश्रितम् । नापि स्थूलगतिजन्यशून्यायनांशवर्षाश्रितं तत् भवति । न च सिद्धान्तोक्तनक्षत्रभोगेभ्यः साधितम् । वराहैः स्वकृतप्रत्यक्षवेधेन साधितं, परीक्ष्य निर्णीतं च पूर्वोक्तमयनचलनं २७ भागमितमिति स्ववचनेनैव प्रदिष्टम् ।

विवरणम्	अं.	क.
वेदांगज्योतिषात् वराहकालावधि चलनं	२६	४०
·वेदांगकाले ऋणायनांशाः	– २३	२०
वराहकाले धनायनांशाः	३	२०

" तत् कथं ब्रह्मगुप्तादिभिर्निपुणैरपि नोक्त इति चेत् तदा स्वल्पत्वात् तैर्नोपलब्ध " इति भास्करोक्त्या ३°।२०′ अंशकलात्मकमयनचलनं तैर्नोपलब्धम् तस्याल्पत्वात्। सप्तविंशत्यंश-मितायनचलनस्य बहुत्वाल्लब्धम्।

उपलब्धमपि अयनचलनसंज्ञया तदा न ज्ञातमासीत् किंतु " विकृति " नाम्ना ज्ञात-मासीत्। अत एव वराहेण वेदांगज्योतिषकालादारभ्य स्वकालपर्यंतं जाता २७ अंशमिता-**विकृतिरिति** प्रोक्तम्।

वराहोक्त्या अयनांशानयम्			अं.	क.
श. ४५० वराहकालेऽयनांशाः	...	...	३	२०
१३५० वर्षेषु अयनगतिः	...	...	१८	४९
१८०० शकवर्षे अयनांशाः	...	...	२२	९
ज्योतिर्गणिते अयनांशाः	...	...	२२	९

पैतामहोक्त्या अयनांशाः।

१८०० शके धनिष्ठारम्भसायनभोगः		...		३१५।२९
१ शके " "		...		२८९।२४
अंतरं		...		२६।५
पितामहोक्तधनिष्ठारम्भः	२८९।२४	– २३।२०		
वेदांगोक्तधनिष्ठारम्भः	२७०।०	+ १९।२४		
अयनचलनं	१९।२४	– ३।५६	...	– ३।५६
१८०० वर्षे अयनांशाः		...		२२।९

अत एवाहुः–

तस्मात्खखाष्टभू १८०० शाके द्वाविंशत्ययनांशकाः।
कलाभिर्नवभिर्युक्ताः सिद्धास्ते स्वीकृता मया॥

एवं शके १८०० वर्षे शास्त्रशुद्धाः, गणितशुद्धाः, कालसातत्यभृतः अयनांशाः २२°।९′ यस्मात् लब्धाः तस्मात् ते एव मया स्वीकृता इति।

उपसंहारः

शकपूर्व २४०० कृत्तिकाकालादारभ्य अद्य यावत् नक्षत्रचक्रविभागा ये दीर्घकालप्राप्तास्ता-ननुसृत्य शके १८५९ वर्षे २३ अयनांशाः लभ्यन्ते। एते च २४०० + १८५९ = ४२५९ नाम ते अयनांशाः ४००० वर्षात्मकपरंपराशुद्धाः, गणितशुद्धाः, शास्त्रशुद्धाश्चेत्यलमतिविस्तरेण।

ध्यात्वाऽलं गरिमाणं प्रस्तुतविषयस्य सांप्रतं सम्यक्।
सुचिरश्रमभरमुद्रा लिखितमिदं वहतु साफल्यम्॥
केतकरोपाव्हेन श्रीवेंकटसूनुदत्तराजेन।
लिखितं यथामतीह प्रभवतु संशीतिनाशाय॥

॥ इति श्रीयोगेश्वरी प्रसीदतु॥

तिथ्यादिविषयकम् ।

शुद्धं प्रतीतिकृत्सत्यं यद्भवेत्तस्य कीर्तनम् ।
यत्करोति हि तच्छास्त्रं तद्विरुद्धं त्वशास्त्रकम् ॥

तिथ्यादिकानि स्थूलान्येव कर्मार्थं ग्राह्याणीति शास्त्राज्ञां केचित्प्रतिपादयन्ति । किन्त्विदं मन्दम् । अनेनास्मन्मुनीनां शास्त्राणां च वैगुण्यमेव प्रदर्शितं भवति । तस्मान्नेयं शास्त्राज्ञा । तिथ्यादिसाधने चन्द्रे बीजं न देयमित्यस्यार्थो तैर्न बुद्धः । " गणितागतस्य ग्रहस्य यन्त्रोपलब्धस्य प्रत्यक्षग्रहस्य च यदंतरं तद्बीजमित्युक्तम् " **इत्यामराजेन** खण्डखाद्यवासनाभाष्ये प्रोक्तम् । अनेन बीजस्य उपपत्तिर्नास्ति । अतस्तस्य साधनमशक्यं अनियतत्वात् । कस्यां तिथौ कियन्मितं बीजं देयामिति न निश्चितं भवति । अतो बीजस्य हेयत्वं युज्यते । किं तु संस्कारो न देय इति कुत्रापि नोक्तं तस्योपपत्तिमत्त्वात् । यथा देशान्तरसंस्कारः उदयान्तरसंस्कारः मंदफलसंस्कारो वा । अस्मज्ज्योतिर्गणिते कुत्रापि बीजं न समुपात्तम् । सर्वत्र संस्कारा एव प्रदिष्टाः । संस्कारास्तु शास्त्रसंमता मुनिसंमताश्च । अनेन स्थूलतिथिग्रहणवादिनः खण्डिताः ।

ग्रहणसदृशप्रत्यक्षदृश्यविषये गर्गादिभिर्यन्निर्दिष्टं तस्य दूषणमाह संहितायां **वराहः**—

पञ्चग्रहसंयोगान्न किल ग्रहणस्य संभवो भवति ।
तैलं च जलेऽष्टम्यां न विचिन्त्यमिदं विपश्चिद्भिः ॥

अस्मिन्पद्ये वराहेण " तत्राष्टम्यां जले तैलं क्षिप्त्वा स्थानं विनिर्दिशेत् " इति **गर्गवचनं** दूषितं भवति । अन्ते चाह वराहः " **विपश्चिद्भिरिदं नाङ्गीकार्यमिति** " । प्रत्यक्षदृश्यविषये यदि गर्गादिकानां मतं नाङ्गीकार्यं भवति तर्हि तिथ्यादिकृच्छ्रदृश्यविषये बाणवृद्धिरसक्षयाख्या कल्पना कैमुतिकन्यायेनैव नाङ्गीकार्येति सिध्यति । तस्मात् बाणवृद्धिरसक्षयाख्या कल्पना विपश्चिद्भिस्त्याज्येति ।

अन्ये पुनास्तिथेः स्थूला सूक्ष्मा चैति द्वैविध्यं प्रतिपादयन्ति । तदपि मंदतरम् । तिथिस्त्वेका या च प्रत्यक्षसूर्यचन्द्रदृश्या प्रत्यक्षसूर्यचन्द्रकृता च । स्थूला तिथिस्तिथिरेव भवितुं नार्हति । तस्मात् आतिथौ कृतं कर्म फलं कथमावहेत् ।

स्थूलतिथिर्ग्राह्येति किमर्थं प्रोक्तमित्यत्र कारणमाहुर्मुनी**श्वराचार्याः** । तद्यथा । " एतत्प्रकारेण सूक्ष्मतिथीनां साधनं कर्तव्यमपि स्वल्पान्तरात् प्रयासाधिकत्वात् च अन्यतिथिसाधनस्य स्थूलमार्गेणापि...इ० मरीचिटीकायाम् ।

तातप्रदर्शितचन्द्रस्पष्टीकरणं न मनागपि प्रयासकरमतः सूक्ष्मतिथिसाधनमेव कर्तव्यमिति सिध्यति ।

बाणवृद्धिरसक्षयः । सप्तवृद्धिः दशक्षयः ।

	चन्द्र-परममंदफलं अंशाः	चन्द्र-लघुगतिः कलाः	चन्द्र-परमगतिः कलाः	तिथिमानं घटिकाः
सिद्धान्तेषु	५	७२०	८६०	(५४-६५)
सूक्ष्मगणितेन	६°।१८′	६९०′	९२०′	(५०-६७)

एवं मानभेदे सति तदागताः तिथ्यादयः सूर्यचन्द्रसाक्षिकाः न भवन्ति । " प्रत्यक्षं ज्योतिषं शास्त्रं चंद्रार्कौ यत्र साक्षिणौ " इत्ययं नियमः सर्वत्र उपादेयः । तथा चाह **भगवान्**

वसिष्ठः—

" यस्मिन्पक्षे यत्र काले येन दृग्गणितैक्यकम् ।
दृश्यते तेन पक्षेण कुर्यात्तिथ्यादिनिर्णयम् "—इति ।

भगवतो गर्गस्य वचनमनुलक्ष्यैव सांप्रतोपलब्ध्यनुसारेण यः पक्षः स एव सत्पक्ष इति श्रीभास्करस्तथा च सौरभाष्ये नृसिंहोऽप्याह। तस्मादेव हेतोः सिद्धान्तकारैः चन्द्रक्षेपकेषु मध्यमग्रह(चंद्र)साधनोपकरणेषु च बीजकर्म प्रोक्तम् । यदि ब्रह्मगुप्तश्रीपतिभास्कराद्यैः चन्द्रस्य बीजं प्रोक्तं उपयुक्तं च तर्हि " अबीजचन्द्रो " ग्राह्य इति वचनं निर्मूलं भवति वशिष्ठवचनं चोच्चैः प्रशास्ति । तस्मात् दृक्समतिथ्यादीनामेव ग्राह्यत्वं गले पतति वशिष्ठमुनिशासनेनेत्यलम् । द्रष्टव्यः शास्त्रशुद्धपंचांगायनांशनिर्णयः, पृ. ७–१८। एतत्पठनेन सर्वं स्फुटं भवेदिति ।

तथा चाह वराहः पञ्चसिद्धान्तिकायाम्-

" स्फुटतिथिविच्छेदसमं युक्तमिदं प्राहुराचार्याः ॥ "
(पं. सि. अ. १५।२९)

अत्राहुः सुधाकराः पञ्चसिद्धान्तिकाप्रकाशिकायाम् । अथाऽऽचार्या इदं यत् गणित स्फुटतिथिविच्छेदसमं स्फुटतिथ्यादिविचारेण समं तुल्यं भवेत्तदेव गणितं युक्तं समीचीनं प्राहुः । अर्थात् येन गणितेन ग्रहा दृक्तुल्यतां यान्ति तदेव गणितं समीचीनं ज्ञेयमिति ।

एतन्मितमेव विवेचनं विदुषामलं भवेदिति कृत्वाऽत्रैव विरम्यतेऽस्माभिः । गणितवेधयोर्विषये विवादस्य वैय्यर्थ्यं स्फुटमेवेत्यलं वृथा विस्तरेण ।

१९ सप्तेंबर १९३७ }
विजापुरं }

केतकरोपाह्वो वेङ्कटेशसुतो दत्तराजः।
ज्योतिर्गणितप्रकाशकः।

॥ श्रीगणेशो जयति ॥

ज्योतिर्गणितम् ।

प्रथमः परिच्छेदः ।

तत्र पञ्चाङ्गाध्यायः प्रथमः ।

प्रणम्य परमात्मानं कृत्वा श्रीपितृवन्दनम् ।
ज्योतिषां गणितं वक्ष्ये धर्मकालनियामकम् ॥ १ ॥

तत्राऽऽदौ परिभाषा ।

उज्जयिन्या मध्यरेखां शालिवाहनभूपतेः ।
शकवर्षाणि चाऽऽश्रित्य रच्यन्ते कोष्ठका इह ॥ २ ॥

कोष्ठकेभ्यः फलप्राप्तिर्येन स्यात्करणं च तत् ।
उपकारश्चोपकृतिः साधनं चेति वा स्मृतम् ॥ ३ ॥

पदमायतनं स्थानं पर्यायाः कोष्ठवाचिनः ।
फलस्यापरपर्यायौ संस्कारः संस्कृतिः स्मृतौ ॥ ४ ॥

संख्यापूरणशब्दानां विभक्त्या च तृतीयया ।
करणं सर्वदा ज्ञेयं पञ्चम्या कोष्ठ एव हि ॥ ५ ॥

योगे तथा संस्करणे चिह्नवत्कृतिमाचरेत् ।
वियोगे शोध्यमानं तु चिह्नं व्यत्यस्य योजयेत् ॥ ६ ॥

अस्मिन्ग्रन्थे यस्य साहाय्येन कोष्ठकेभ्यः फलप्राप्तिर्भवति तत्**करण**मित्युक्तम् । उपकारः, उपकृतिः, साधनम्, उपकरणम्, उपक्रिया, इति करणार्थपराः शब्दाः । करणं तिथ्यर्धसममिति तद्गणित एव बोध्यं न च संस्कारग्रहणप्रसङ्गे ॥ पदम्, आयतनं, स्थानं, इति त्रयः कोष्ठशब्दस्य पर्यायाः। संस्कारः, संस्कृतिः, इति द्वौ फलस्य ॥ संख्यापूरणशब्दानां तृतीयया विभक्त्या तद्विशेष्याभावे तत्तत्संज्ञकानि करणानीति ज्ञेयम् । पञ्चम्या विभक्त्या तु तत्संज्ञकः कोष्ठ एव विज्ञेयः। तद्यथा पञ्चाङ्गगणिते षष्ठे श्लोके—"**तथा द्वितीयेन तृतीयकेन**" इत्यत्र द्वितीयेन करणेन तृतीयेन करणेनेति बोध्यम् । तत्रैव च—"**क्रमात्पञ्चमषष्ठकाभ्याम्**" इत्यनेन पञ्चमषष्ठकोष्ठकाभ्यामित्यवगन्तव्यम् ॥ यत्र योगः कर्तव्यः, संस्कारः कार्यः, इत्युक्तं स्यात्तत्र कोष्ठकादुद्धृतस्य फलस्य यादृशं चिह्नं स्यात्तादृशी कृतिः कार्या। फलस्य धनचिह्नत्वे फलं संयोजयेत्, ऋणचिह्नत्वे तु फलं विशोधयेत्, इति सुगमम् । परं तु यत्र वियोगः कार्यः, नाम व्यवकलनं कार्यमिति यत्रोक्तं स्यात्तत्र फलस्य चिह्नं व्यत्यस्य नाम ऋणचिह्नं धनचिह्नं मत्वा धनचिह्नमृणचिह्नं मत्वा लब्धचिह्नसदृशी क्रिया कार्या । यथा + २०, – १५, अनयोर्योगः + ५, भवति, परं प्रथमराशेर्द्वितीये शोध्यमाने द्वितीयस्य चिह्नं व्यत्यस्य संकलने कृते जातो

वियोगः + २० + १५ = + ३५ । अत्र संकलनादिगणितकर्मणां सम्यग्बोधार्थं **श्रीभास्करीयबीजोक्तानि करणसूत्राण्युदाहरामि । तान्येतं ग्रन्थं पिपठिषुरादौ सम्यग्जानीयात् ।**

योगे युतिः स्यात्क्षययोः स्वयोर्वा धनर्णयोरन्तरमेव योगः ।
संशोध्यमानं स्वमृणत्वमेति स्वत्वं क्षयस्तद्युतिरुक्तवच्च ॥ ७ ॥

स्वयोरस्वयोः स्वं वधः स्वर्णघाते ।
क्षयो भागहारेऽपि चैवं निरुक्तम् ।
कृतिः स्वर्णयोः स्वं स्वमूले धनर्णे ।
न मूलं क्षयस्यास्ति तस्याकृतित्वात् ॥ ८ ॥

अथ चिह्नपरिभाषा ।

राशिमूर्धगतं शून्यं विदिग्रेखा च तद्द्वयम् ।
भागलिप्ताविलिप्तानां संज्ञार्थं कल्पितानि हि ॥ ९ ॥

तिर्यगूर्ध्वाधरारेखासंपातो धनचिह्नकम् ।
केवलैका तिरश्चीना रेखा स्यादृणचिह्नकम् ॥ १० ॥

धनचिह्नं विदिक्संस्थं गुणचिह्नं च तद्भवेत् ।
पार्श्वद्वये बिन्दुयुक्तं यदृणं भाजकं च तत् ॥ ११ ॥

अधःशिरस्ककोणस्य सव्याग्रमृणचिह्नयुक् ।
स्वाधःस्थापितसंख्याया वर्गमूलं च भावयेत् ॥ १२ ॥

चापमध्यस्थसंख्यानां चिह्नवद्गणितं च यत् ।
तदेकत्वेन गृह्णीयाद्बाह्यचिह्नं तु तस्य वै ॥ १३ ॥

संख्याया दक्षिणस्कन्धे सूक्ष्माङ्का लिखितास्तु ये ।
स्वाधःस्थापितसंख्यायास्तत्तद्घातं प्रचक्षते ॥ १४ ॥

धनर्णगुणचिह्नैश्चासंबद्धा राशयो मिथः ।
संनिकृष्टाश्च विज्ञेयाः परस्परगुणा इति ॥ १५ ॥

रेखाद्वयं तिरश्चीनं समपक्षौ समादिशेत् ।
चिह्नाभावे तु राशीनां धनत्वं कल्पयेत्सदा ॥ १६ ॥

स्पष्टोऽर्थः । अत्र ज्ञापकानि । १२° ३६′ ५०″ इत्यस्मिन्द्वादश अंशाः, षट्त्रिंशत्कलाः, पञ्चाशद्विकलाः, इति पठनीयम् । धनचिह्नम् +, ऋणचिह्नं −, गुणकचिह्नं ×, भाजकचिह्नं ÷, वर्गमूलचिह्नम् $\sqrt{\quad}$, एकत्वचिह्नं ( ), राशिघातचिह्नं १२^२, समत्वचिह्नम् =, ज्ञेयम् ।

३ + ४ अत्र त्रयाणां चतुर्णां च योगः कर्तव्य इति बोध्यम् ।
४ − ३ ,, चतुर्भ्यस्त्रीन्विशोधयेदिति ।
३ × ४ ,, त्रयाणां चतुर्णां च गुणकारः कार्य इति ।
३ ÷ ४ वा ३/४ ,, त्रींश्चतुर्भिर्विभजेदिति ।
$\sqrt{१४४}$,, चतुश्चत्वारिंशदधिकशतस्य वर्गमूलमिति ज्ञेयम् ।
−(१५ + १७ − २) अत्र चापमध्यस्थसंख्यानां चिह्नवद्गणितं कृतेन त्रिंशल्लभ्यते । अत एव, −(१५ + १७ − २) इत्यनेन त्रिंशद्रूपाणि ऋणमित्युक्तं भवति = − ३०
१५^३ अनेन पंचदशानां घनः, अथवा त्रिघातो ग्राह्य इति ।

प फ १२ विषुवती ५४ अक्षज्या २५ लंबज्या	इत्यत्र पफ-राश्योः परमसंनिकर्षात्तयोर्घात इति ज्ञेयम् । परं तु कोष्ठक-रचनासूत्रेषु, भुजज्याचापयोः संनिकर्षेऽपि तयोर्घातो न वाच्यः, तस्यासंभवात् । यथा तत्र ' भुजज्यारविकेन्द्रम् ' इत्यनेन रविकेन्द्रस्य भुजज्येति ज्ञेयम् । तथा च कोटिज्यारविकेंद्रं = रविकेंद्रस्य कोटिज्या ।
३ + ४ = ७	इत्यत्र त्रयाणां चतुर्णां च योगः सप्तभिः सम इत्यभिप्रायः । अत्राऽऽद्यराशेः ३, चिह्नाभावो विद्यतेऽतस्त्रीणि धनं मन्तव्यानि ।

अथ दशांशगणितम् ।

गणनाया लाघवार्थं दशांशाह्वयपद्धतिम् ।
आश्रित्य गणितं सर्वमस्मिन्ग्रन्थे निगद्यते ॥ १७ ॥

दशांशपद्धतिर्नोक्ता लीलावत्यादिषु क्वचित् ।
अतो बालावबोधार्थं मूलकर्माणि चक्ष्महे ॥ १८ ॥

राश्योर्मध्यस्थितो बिन्दुर्दशांशाह्वयपद्धतेः ।
चिह्नं तयोर्यः प्रथमः पूर्णानङ्कान्व्यनक्ति सः ॥ १९ ॥

द्वितीयोंऽशान्व्यनक्त्यस्मिन्याऽङ्कसंख्या च तन्मितः ।
दशघातो भवेच्छेदो ह्यतो गणितलाघवम् ॥ २० ॥

दशांशगणिते राश्योर्मध्यस्थितो बिन्दुर्दशांशचिह्नमित्युच्यते । तयोरादिमः पूर्णाङ्कान्द्योतयति । अपरोंऽशान् । अपरराशेराद्याङ्को दशांशान्दर्शयति, द्वितीयः शतांशान्, तृतीयः सहस्रांशान्, एवमग्रेऽपि । भिन्नगणिते छेदस्थाने काऽपि संख्या तिष्ठेत् । परं तु दशांशगणिते दशशतसहस्रादिभिर्दशगुणोत्तरसंख्याभिरेव च्छेदैर्भवितव्यं नान्याभिरिति नियतत्वात्पूर्णाङ्कवदंशानां यथास्थानं योगान्तरे कर्तुं शक्येते ।

अत्रोद्देशकः—

पञ्चाद्रिशून्यरसबिन्दुषडष्ट ८६ · ६०७५ तुल्यां
संख्यां दशांशसरणौ च विलिख्य तस्याः ।
अग्रे प्रदर्शयत तत्समभिन्नराशिं*
येनोभयोर्गणितयोः समता प्रसिध्येत् ॥ २१ ॥

(* अत्र भिन्नराशिर्नामांशच्छेदनिबद्धो राशिः, यथा $\frac{3}{4}$, इयं परिभाषा लीलावत्यामुक्तैव ।)

उद्दिष्टसंख्यायां ८६·६०७५ द्वयो राश्योर्मध्ये यो बिन्दुस्तद्दशांशसरणेश्चिह्नम् । तयोराद्यमिता ८६ पूर्णाङ्का, अपरमिता ६०७५ अंशाः । अत्रांशस्थानानि चत्वारि, बिन्दुस्थानं पञ्चममतोऽत्रायुतमितश्छेदोऽस्तीत्युक्तं भवति ।

उदाहरणानि—

$$८६·६०७५ = ८६\frac{६०७५}{१००००} = ८६\frac{२४३}{४००}$$

$$८०·००७५१ = ८०\frac{७५१}{१०००००}$$

$$०·००००२५ = \frac{२५}{१००००००} = \frac{१}{४००००}$$

उपरितनानां प्रथमोदाहरणे दशांशचिह्नात्सव्यतः प्रदर्शितेष्वंशेषु षड्दशांशाः, शून्यं शतांशाः, सप्त सहस्रांशाः, पञ्चायुतांशाः, इति बोध्यम्। एते सर्वे एकयोक्त्या पञ्चसप्तत्यधिकानि षट्सहस्राण्ययुतांशा इत्यपि पठनीयम्। भिन्नराशिसंकलनरीत्याऽस्य प्रतीतिं शिष्यान्प्रति दर्शयेत्। यथा —, $\frac{६}{१०}+\frac{०}{१००}+\frac{७}{१०००}+\frac{५}{१००००}=\frac{६०७५}{१०००००}$ इति स्पष्टम्।

अथ दशांशपद्धत्या संकलनव्यवकलनयोः करणसूत्रम्।

ऊर्ध्वाधरायां रेखायां यथा स्युर्बिन्दवस्तथा।
उद्दिष्टराशीन्विन्यस्य योगायोगौ सखे कुरु॥ २२॥

उद्दिष्टराशीनां दशांशचिह्नानि यथोर्ध्वाधरायां रेखायां भवेयुस्तथा सर्वानुद्दिष्टराशीनधोऽधो लिखित्वा पूर्णाङ्कवद्योगवियोगौ कार्यौ। दशांशचिह्नानामूर्ध्वाधररेखायां स्थापनेन सजातीया अंशा अप्यूर्ध्वाधरपङ्क्त्यां तिष्ठन्ति। तेन यथास्थानं योगोऽन्तरं वा पूर्णाङ्कवत्कर्तुं युज्यते

अत्रोद्देशकः—

पञ्चाद्रिशून्यरसबिन्दुषडष्टसूर्याः १२८६·६०७५
सप्ताष्टचिह्नतुरगा ७·८७ रसशून्यरामाः ३०६।
पञ्चाङ्गशून्यखखबिन्दव ·०००६५ इत्यमीषां।
योगं द्वयोर्वद वियोगमपि क्रमेण॥ २३॥

न्यासः। यथोक्तं राशीन्विलिख्य केषांचिदंशानामग्रे स्थानपूरणार्थं शून्यानि दत्त्वा योगवियोगाः कृताः।

योगः	वियोगः	वियोगः
१२८६·६०७५०	१२८६·६०७५	३०६·०००००
७·८७०००	७·८७००	०·०००६५
३०६·०००००	१२७८·७३७५	३०५·९९९३५
०·०००६५		
१६००·४७८१५		

इति संकलितव्यवकलिते।

अथ गुणनभागहारयोः करणसूत्रम्।

भाज्यभाजकयोर्गुण्यगुणयोरुक्तपद्धतेः।
चिह्नं नास्तीति संकल्प्य गुणनं भजनं कुरु॥ २४॥
गुणगुण्यांशांकसंख्यायोगेन तुलिते स्थले।
गुणकारस्यान्तिमाङ्काद्वामतः कुरु लक्षणम्॥ २५॥
भाज्यस्यांशांकसंख्यातो भाजकस्य विशोधयेत्।
शेषे स्वे तन्मिते स्थाने लब्ध्यन्तात्कुरु लक्षणम्॥ २६॥
अन्यथा सव्यतः शेषमितशून्यानि योजयेत्।
शून्यप्रयुक्ता लब्धिस्तु सदा पूर्णेति बुध्यताम्॥ २७॥

भाज्यभाजकयोर्गुण्यगुणकयोश्च दशांशचिह्नं नास्तीति मत्वा पूर्णाङ्कवद्गुणनं भजनं च कुर्यात्। अनन्तरं दशांशचिह्नं कुत्र देयमित्येतस्य विचारः, स यथा—, गुण्यगुणकयोरंशाङ्कसंख्ययोर्योगं कृत्वा तत्तुल्याङ्कान्गुणकारस्यान्त्याङ्काद्वामतो विगणय्य तत्र दशांशचिह्नं कार्यम्

गुणकारस्याङ्कसंख्या गुण्यगुणकयोरंशाङ्कसंख्यायोगाद्यदि न्यूना तदा न्यूनमितानि शून्यानि वामतो दत्त्वा स्थानपूरणं कृत्वा तत्र दशांशचिह्नं कार्यम् ।

भागहारे तु भाज्यस्यांशाङ्कसंख्यातो भाजकस्यांशाङ्कसंख्यां विशोध्य शेषे धनगते लब्धेरन्त्याङ्काद्वामतः शेषतुल्यस्थानानि विगणय्य तत्र बिन्दुं दद्यात् । भागहारेऽप्यङ्कानामल्पसंख्यात्वे गुणकारवद्वामतः शून्यानि दत्त्वा स्थानपूर्तिः कार्या ।

शेषस्यर्णत्वे शेषमितानि शून्यानि लब्धेरन्त्याङ्काद्दक्षिणतो देयानि । शून्यान्विता लब्धिः सर्वदा पूर्णा पूर्णाङ्का, इति बोध्यम् । भाज्यभाजकयोरंशाङ्कसंख्ययोः समत्वेऽपि लब्धिः पूर्णा स्यात् ।

अत्रोद्देशकाः—

षड्बिन्दुद्वादशान् १२·६ षड्भिः ६ षष्ट्या ६० षट्शून्यबिन्दुभिः ·०६ ।
षट्शत्या ६०० सप्तषष्ट्या ६७ च हत्वा भक्त्वा फलं वद ॥ २८ ॥

गुणकारोदाहरणानि ।	भागहारोदाहरणानि ।
१२·६ × ६ = ७५·६	१२·६ ÷ ६ = २·१
१२·६ × ६० = ७५६·०	१२·६ ÷ ६० = ·२१
१२·६ × ·०६ = ०·७५६	१२·६ ÷ ·०६ = २१०·
१२·६ × ६०० = ७५६०·०	१२·६ ÷ ६०० = ·०२१
१२·६ × ६७ = ८४४·२	१२·६ ÷ ६७ = ·१८८०५९ इत्या०

अत्र गुणकाराणां प्रथमोदाहरणे गुण्यगुणकयोर्दशांशचिह्नं नास्तीति मत्वा १२६, ६ एतौ राशी इति प्रकल्पनाज्जातो गुणकारः ७५६ । अथ दशांशबिंदुस्थाननिर्णयः । अत्र गुण्ये दशांशस्थानमेकमस्ति गुणके तु तदभावोऽतः स्थानयोगः १ । गुणकारान्त्याङ्कादेकमङ्कं विगणय्य तस्याग्रे चिह्नं कृतमतो जातो गुणकारः ७५·६ एवमन्येष्वपि । अत्र दशांशस्थानं नामांशाङ्कसंख्येति बोध्यम् ।

भागहारस्य प्रथमोदाहरण आदौ भाज्यभाजकौ पूर्णाङ्काविति १२६, ६ प्रकल्प्य भागहारे कृते जाता लब्धिः २१ । अत्र भाजकदशांशस्थानाद्भाज्यदशांशस्थानमेकेनाधिकमतो लब्धेरन्त्याङ्काद्वामतः प्रथमस्थाने चिह्ने कृते जाता लब्धिः २·१ । द्वितीयोदाहारणे भाज्यादग्र एकं शून्यं दत्त्वा भागहारं कृत्वा लब्धौ द्वितीयस्थाने चिह्ने कृते जाता लब्धिः ·२१ । तृतीयोदाहरणे भाज्ये भाजकापेक्षया स्थानन्यूनतैकमितातो लब्ध्यन्त एकस्मिञ्शून्ये दत्ते जाता लब्धिः २१० इयं पूर्णा । अस्या अग्रे (२१०· एवं) बिन्दुर्वर्तत इति कल्प्यम् ।

यदि भाज्यं निःशेषं न विभज्येत तदा किं कार्यमिति चेत्तदाह—

भाजकेन यदा भाज्यं निःशेषं न हृतं तदा ।
यतमस्थानपर्यन्तं सूक्ष्मता स्यादभीप्सिता ॥ २९ ॥
तावत्स्थानावधौ भाज्ये दत्त्वा शून्यानि चाऽऽहरेत् ।
अस्मिन्विधौ केचिदङ्का व्यावर्तेरन्पुनः पुनः ॥ ३० ॥
यथा न मूलदो राशिः स्थानवृद्धिं यथोक्तवत् ।
कृत्वाऽऽसन्नं वर्गमूलं साध्यं सद्गुणकैस्तदा ॥ ३१ ॥

स्पष्टोऽर्थः । असमापिनो भागहारस्योदाहरणं पूर्वस्मिन्न्यासोक्तं पञ्चमम् । तत्र भागहारः समाप्तिं नैव याति । अतस्तत्र लक्षांशावधि सूक्ष्मताया अपेक्षाऽस्तीति प्रकल्प्य भागहरणं समापितम् । शेषं सुगमम् । सांप्रतं दशांशगणितं सर्वत्र बाला अपि जानन्ति । अतो ये केचनास्मिन्गणितप्रकारेऽनधीताः स्युस्तेषामुपयोगार्थमेवैतत्सर्वं दशांशगणितं व्याख्यातम् ।

अथ घाताङ्कगणितम्* ।

(* व्यवहारे लाग्रतमिति प्रसिद्धम् । अत्रार्थे षष्ठत्रिप्रश्नाध्यायस्य सप्तमकोष्ठकं विलोक्यम् ।)

इदं सविस्तरं व्याख्यातुं न शक्यते । अतोऽस्य दिग्दर्शनमात्रमिह क्रियते । गुण्यगुणकयोर्घाताङ्कयोरैक्यं तयोर्घातस्य घाताङ्केन समं तिष्ठति । अतो गुण्यगुणकयोर्घाताङ्कान्कोष्ठकादुद्धृत्य तद्योगे कृते यो घाताङ्को निष्पद्यते तस्य संख्या कोष्ठकाद्ग्राह्या । सा गुण्यगुणकयोर्घातसमा स्यात् । एवं केवलेन संकलनेन गुणनं संपद्यते, व्यवकलनेन भागहरणं, द्व्यादिभिर्गुणनेन वर्गघनादिकं, भक्तेन वर्गघनमूलादिकम्, एवं सर्वत्राल्पप्रयासेन महती कार्यसिद्धिर्जायते । अतः प्राज्ञैर्गणकैर्घाताङ्कपद्धतौ परिचयः कार्यः ।

अस्मिन्ग्रन्थे सर्वं गणितं प्रायः संकलनव्यवकलनैः सर्वत्र सिध्यति । परं तु वेधगणिते ग्रहगणिते च गुणनभजनादिकं विना क्रिया न निर्वहति । अतस्तत्र घाताङ्कसाहाय्यं गृहीतं चेत्तत्रापि गणितायासो नैव भवेत् ।

कोष्ठके पठिता ये घाताङ्कास्तेंऽशाः । अंशाः पूर्णाङ्केन पूर्वं संयुताश्चेत्संपूर्णघाताङ्कः स्यात् । तत्र घातपूर्णाङ्कस्येयत्तैवं कार्या । संख्याया आद्याङ्कस्थानदर्शीनि यावन्ति शून्यानि तत्संख्याको घातपूर्णाङ्क इति ज्ञेयम् । संख्याया आद्याङ्के पूर्णे घातपूर्णाङ्का धनम्, आद्याङ्के दशांशरूपे घातपूर्णाङ्का ऋणं भवन्ति । घाताङ्कांशाः सर्वदा धनं वर्तन्ते । यथा ४३२ अस्य राशेर्घातांशाः ·६३५५ इति कोष्ठकाज्ज्ञायते । अथ पूर्णाङ्कानामियत्ता कर्तव्या । अस्मिन्राशावाद्याङ्कश्चतुःशतानि । शतसंख्यायां द्वे शून्ये वर्तेते अतोऽस्य राशेर्घातपूर्णाङ्कौ द्वौ । अत एव ४३२ उक्तराशेः संपूर्णघाताङ्कः २·६३५५ जातः । अत एवाग्रिमोदाहरणेषु—

४३२	अस्य संपूर्णघाताङ्कः		२ · ६३५५
४३·२	"	"	१ · ६३५५
४·३२	"	"	० · ६३५५
·४३२	"	"	$\bar{१}$ · ६३५५
·०४३२	"	"	$\bar{२}$ · ६३५५
इत्या०			इत्या०

अथ घाताङ्कस्योपयोगः । यदि ४३२ अस्य वर्गमूलमपेक्षितं तर्ह्यस्य घाताङ्कः २ · ६३५५ द्वाभ्यां भक्तः १ · ३१७७५, अस्माद्घाताङ्कात्कोष्ठकाल्लब्धा संख्या २० · ७८५, इदमेवाऽऽसन्नवर्गमूलम् । अत्र संख्यान्वेषणम् · ३१७७५ एतैः अंशैः एव करणीयं, कोष्ठकेषु पूर्णाङ्कानामभावात् । कोष्ठके ३१७७५ एतावता घातांशेन, २०७८५ इयं संख्या लभ्यते । परं तु घातपूर्णाङ्क एकमितो धनं वर्तते । अत एवाऽऽद्याङ्कद्वितयं पूर्णाङ्काः शेषमंशा इति सिद्धम् । (त्रिप्रश्नाध्याय ७ कोष्टकं).

अथ पञ्चाङ्गविवरणम् ।

अथ भगवानम्बरमणिराकाशे यस्मिन्वृत्ते ग्रहगत्या भ्रमतीति दृश्यते तत्क्रान्तिवृत्तमाहुः । क्रान्तिवृत्तस्याक्षाग्रे कदम्बावित्युच्येते । कदम्बद्वये कस्यांचित्तारायां च प्रोतत्वेन कल्प्यमानं वृत्तार्धं क्रान्तिवृत्तं यस्मिन्बिन्दौ छिनत्ति तदेव भोगगणनाया आरम्भस्थानम् । एतद्बिन्दुमारभ्य संपूर्णक्रान्तिवृत्तस्य समान्द्वादश विभागान्प्रकल्प्य तान्मेषवृषभादिराशिनामभिर्व्यपदिशन्ति । अंशानां त्रिंशतैको राशिः । कलानां षष्ट्यैकोंऽशः । इति परिभाषा गणकानां विदितैव ।

नक्षत्रचक्रारंभे मेषादौ वा, सूर्यसिद्धांतोक्तः पौष्णांत एव मया अस्मिन् ज्योतिर्गणिते स्वीकृतः। पौष्णांतं स्वीकृत्य, सूर्यसिद्धांतपठिता पौष्णांतादारभ्य चित्रानक्षत्रस्य षड्भांतरस्थातिरपि सम्यगुप- पन्नत्वान्मया संगृहीता । " पौष्णांते भगणः स्मृतः " इत्यत्र " स्मृतः " इति पदेन चित्राभिमुख- निष्ठपौष्णांतस्य सुचिरपरंपरा व्यक्तीकृता सूर्यसिद्धांतकारेण । युज्यते चैतत् । यतः " शास्त्र- माद्यं तदेवेद " इत्यनेन श्लोकेन निर्दिष्टे मूलसूर्यसिद्धांतेऽपि तत्पूर्वपरंपरया चित्रानक्षत्रभोगः १८० अंशात्मकः एव प्रदिष्टः । विस्तरस्तु अस्मत्तनयविरचितकेतकीपरिमलभाष्ये दृष्टव्यः । शके १८०० वर्षे मेषारंभे वेधोपलब्धाः सूक्ष्माः अयनांशाः २२° । ८' । ३३"·४ अंशाद्या आसन् । एतावंतोऽयनांशान् गणितारंभे अंगीकृत्य मया ध्रुवकाः साधिताः । अस्यैव ज्योतिर्गणि- तस्य प्रस्तावनापूरणिकाप्यवलोकनीया । वेदांगज्योतिषादप्ययमेव पौष्णांतः सिध्यति ।

सूर्याचन्द्रमसोरेकस्मात्संगमात्पुनरन्यसंगमावधिकालश्चान्द्रमासः, तस्य च मध्यमं मानं २९ दि० ३१ घ० ५०·११९ ३७४ पलानि । तथा च सूर्यो भासमानगत्या पृथ्वीपरितः क्रान्ति- वृत्ते भ्रमन्कस्मिंश्चिन्नक्षत्रे समागत्य पुनर्यावता कालेन तत्रैवाऽऽगच्छति तन्नाक्षत्रं वर्षम् । तस्य मध्यममानं सांप्रतं ३६५ दि०, १५ घ०, २२·९ पला० । तथैव सूर्यो यावता कालेनैक- राशिं पर्यटति स सौरमासः ।

यस्मिंश्चान्द्रमासे सूर्यो मेषराशौ प्रविशति स चैत्रः । तस्य शुक्लपक्षे प्रतिपदि शालिवाहन- शकवर्षस्याऽऽरम्भः । यस्मिन्मासे वृषभराशिं प्रविशति स वैशाखः । यस्मिन्मासे मिथुनराशिं प्रविशति स ज्येष्ठः । एवमग्रेऽपि ।

सूर्याचन्द्रमसोर्नीचोच्चवशाच्चान्द्रमासावधिर्न्यूनाधिको भवति । लघुतमचान्द्रमासः २९ दि० १८ घ०, महत्तमः २९ दि० ४६ घ० । एवमपि लघुतमं सौरमासमानं २९ दि० २७ घ०, महत्तमं ३१ दि० २७ घ० (पश्य कोष्ठ० १३) । यदा चान्द्रमासः सौरमासान्तःपाती भवति तदा स चान्द्रमासोऽधिक इत्युच्यते, तस्मिन्संक्रमणाभावात् । तथैव कदाचित्सौरमासोऽपि चान्द्रमासान्तःपाती भवति । तेन तन्मासस्य द्वे नामनी संपद्येते । तयोरादिमं स्वीकृत्य द्वितीयं निराकुर्वन्ति । एवं निराकृत मास एव क्षयमासः । तथा च भास्करः— " असंक्रान्तिमासोऽ- धिमासः स्फुटः स्यात्- । द्विसंक्रान्तिमासः क्षयाख्यः कदाचित् " इति ॥

क्रान्तिवृत्ताद्ग्रहपर्यन्तं कदम्बप्रोतवृत्ते यदन्तरं दाक्षिणोत्तरं स शरः । आरम्भस्थानीय- बिन्दोः सकाशात्क्रान्तिवृत्तस्य ग्रहशरवृत्तस्य च संपातावधि यत्तिर्यगन्तरं स तद्ग्रहस्य भोगः । स पूर्वतो गण्यते । यथा पौष्णांतादारभ्य पूर्वस्यां दिशि १८० अंशात्मकः सूर्यसिद्धांतोक्तः चित्रा- नक्षत्रभोगः । सूर्याचन्द्रमसोर्भोगान्तरस्य द्वादशभिः अंशैः एकैका तिथिर्भवति । चन्द्रभोगस्य ८०० कलामितमेकं नक्षत्रम् । तथा च तयोर्भोगैक्यस्य ८०० कलामात्र एको योगः, इति परिभाषा सर्वेषां विश्रुतैव ।

सूर्योदयकाले विद्यमानानि तिथिनक्षत्रयोगादीन्येव पञ्चाङ्गे लिख्यन्ते । तिथेरवधिः—, ५० घटीभ्यः ६७ घटीपर्यन्तं वर्धते । नक्षत्रावधिः— ५२ घटीभ्यः ६८ घटीपर्यन्तम्, योगावधिः—, ४९ घटीभ्यः ६३ घटीपर्यन्तं भिद्यते । अत एव कस्यांचित्तिथौ सूर्योदयद्वयव्या- पिन्यां सत्यां वारद्वयारम्भे सैव तिथिः पञ्चाङ्गे लिख्यते । इदमाधिमासवत्तिथिवृद्धिरित्युच्यते । सूर्योदयद्वयान्तर्वर्तिन्यां सत्यां क्षयमासवत्सा तिथिः स्थानाभावान्न लिख्यते अतस्तस्याः क्षयो जात इति वदन्ति । नक्षत्रयोगयोः क्षयवृद्धिनिर्णयस्तु तिथेरिवैव कार्यः ।

पञ्चाङ्गकोष्ठकेभ्यः साधितस्तिथ्यादीनां समाप्तिकाल उज्जयिनीरेखासंबंधी मध्यमो भवति न तु सावनः । सावनो नाम सूर्यस्योदयाद्याम्योत्तरलङ्घनाद्वा मीयमानः । परं त्वयं सावनः सूर्यस्य स्पष्टगतेरयनवलनस्य च न्यूनाधिक्यात्प्रत्यहं भिद्यते ।

ज्योतिषां सूक्ष्मवेधे तु प्रत्यहं भिद्यमानः सावनकालः सर्वथाऽनुपयुक्तः, भिद्यमानकालदर्शियंत्ररचनाया अशक्यत्वात्। अतो **मध्यमकालनामा**, एक उपायो ज्योतिर्विद्भिर्दृष्टः। स चैवम्--एको बिन्दुः सायनसूर्यस्य मध्यमगत्या सार्वकालं विषुववृत्ते भ्रमतीति प्रकल्प्यायं बिन्दुर्यस्मिन्क्षणे याम्योत्तरवृत्तं प्राप्नोति तदा मध्यमकालस्य घट्यः १५, पलानि ०, विपलानि ०, जातानीति **ज्योतिर्विदो** मन्यन्ते। परं तु कल्पितबिन्दोर्याम्योत्तरलङ्घनावलोकनमशक्यं, बिन्दोरपदार्थत्वात्। अतो भ्राजमानस्य सूर्यस्य याम्योत्तरलङ्घनात्प्रागग्रे कियता कालेनायं सायनमध्यमसूर्यस्वरूपी बिन्दुः प्रत्यहं याम्योत्तरं प्राप्नोति, तद्गणितेन विपलावधि सूक्ष्मं ज्ञात्वा कोष्ठकं रचयन्ति। इमं संस्कारं **कालभेदः, वेलासमीकरणम्, उदयान्तरं** वेति वदन्ति। (पश्य पंचाङ्गाध्यायस्य कोष्ठकम् १८)।

अथ पञ्चाङ्गगणितम्।

इदानीमभीष्टवर्षान्तःपातिनां सर्वेषां तिथ्यादिपञ्चाङ्गानां गणितमुच्यते। तत्राऽऽदौ वर्षाद्यमान्तीयं ध्रुवानयनम्--

खखाष्टभू १८०० म्यूनशकः समानां गणो भवेत्तेन लभेत चाऽऽद्यात्।
कोष्ठाद्गतीस्ता ध्रुवकेषु योज्या एवं ध्रुवाः काङ्क्षितवत्सरस्य॥ १॥
द्वितीयकोष्ठाच्छकवत्सरैश्च कालान्तराख्यानि फलानि लब्ध्वा।
तानि क्षिपेत्काङ्क्षितवर्षजेषु ध्रुवेषु ते तेन भवन्ति शुद्धाः॥ २॥
एवं हि लब्धेन तिथिध्रुवेण तृतीयकोष्ठात्प्रगतीः प्रसाध्य।
शुद्धध्रुवेभ्यो विकलय्य ताश्च वर्षाद्यमान्तध्रुवकाँल्लभेत॥ ३॥

अन्वयः--खखाष्टभूम्यूनशकः समानां गणो भवेत्। तेनाऽऽद्यात्कोष्ठाद्गतीर्लभेत। ता ध्रुवकेषु योज्याः। एवं काङ्क्षितवत्सरस्य ध्रुवाः स्युः॥ १॥ द्वितीयकोष्ठाच्छकवत्सरैः कालान्तराख्यानि फलानि लब्ध्वा तानि काङ्क्षितवर्षजेषु ध्रुवेषु क्षिपेत्। तेन ते शुद्धा भवन्ति॥ २॥ एवं लब्धेन तिथिध्रुवेण तृतीयकोष्ठात्प्रगतीः प्रसाध्य ताः शुद्धध्रुवेभ्यो विकलय्य वर्षाद्यमान्तध्रुवकाँल्लभेत॥ ३॥

विवरणम्--स्वाभीष्टशकवर्षेष्वष्टादशशतवर्जितेषु शेषं **वर्षगणः** स्यात्। अनेन वर्षगणोपकरणेन प्रथमकोष्ठकात्तिथिवारादीनां वर्षगणभवा गतीरानीय ताः प्रथमकोष्ठकस्य शिरसि लिखितेषु ध्रुवकेषु स्वस्वजातीयेषु संयोजयेत्। संकलितानि विवक्षितवर्षीया ध्रुवा भवन्ति॥ १॥ अनन्तरं द्वितीयकोष्ठकाच्छकवर्षोपकरणेन कालान्तरसंज्ञानि फलान्यानीय तानि काङ्क्षितवर्षीयध्रुवकेषु स्वस्वजातीयेषु क्षिपेत्! अनेन संस्कारेण ते काङ्क्षितवर्षीया ध्रुवाः शुद्धा भवन्ति॥ २॥ एवं साधितेन तिथिध्रुवेण तृतीयकोष्ठकाद्गतीरानीय ताः पूर्वानीतेभ्यः शुद्धध्रुवेभ्योऽपनयेत्। शेषा वर्षादौ याऽमावास्या तस्या अन्ते ध्रुवा भवन्ति॥३॥

पूर्वोक्तवृत्तत्रयस्याभिप्रायमधस्तनेन समीकरणरूपसूत्रेण प्रदर्शयामः--

वर्षाद्यमान्तध्रुवाः = प्रथमकोष्ठमूर्धस्था ध्रुवाः।
+ वर्षगणभवगतिः।
+ कालान्तरसंस्कारः।
− तिथिगणभवगतिः।

उदाहरणम्--शालिवाहनशकस्य १८१५ वर्षस्य चैत्रशुक्लादेः फाल्गुनकृष्णामावास्यावधि सर्वेषां तिथिवारनक्षत्रयोगकरणानां गणितं कुरु। अत्राभीष्टशकवर्षाणि १८१५, एभ्यः १८०० वर्षाणि विशोध्य लब्धं शेषम् १५, अयमेव वर्षगणः।

न्यासः १ ।

विवरणम्	ति.	वारः	उप० १	उप० २	उप० ३	मा० ति०	नक्षत्रम्	योगः
कोष्ठ. १	ति.	वा. घ. प.	०	०	०	ति० क०	न० क०	यो० क०
ध्रु. १८००	१०	६ २० ४·०	२७९·५९	२९·८८	१८१·१६	९ ६३·०	८ १४०·२	७ ७३७·५
गतिः { १०	२०	४ ५६ ५७·७	३५९·३६	३१२·६९	७२·९२	२० ०·०	१७ ७६३·७	१७ ७२७·३
गतिः { ५	२५	५ ५८ २८·९	३५९·६८	१५६·३५	३६·४६	२५ ०·०	२२ ३८१·८	२२ ३६३·७
१८१५	२५	३ १५ ३०·६	२७८·६३	१३८·९२	२९०·५४	२४ ६३·०	२१ ४८५·७	२१ २२८·५
को.२ कालां	०	— ० १·०	०·००	+०·०१	—०·००	०·०	०·०	०·०
अ. =	२५	३ १५ २९·६	२७८·६३	१३८·९३	२९०·५४	२४ ६३·०	२१ ४८५·७	२१ २२८·५
को.३उप. {	२०	५ ४१ १३·४	१९·४०	१७·२१	२६०·४५	२० ०·०	१९ ३६४·२	२० ७२८·४
	५	४ ५५ १८·३	४·८५	४·३०	६५·११	५ ०·०	४ ६९१·१	५ १८२·१
इ. =	२५	३ ३६ ३१·७	२४·२५	२१·५१	३२५·५६	२५ ०·०	२४ २५५·३	२६ ११०·५
(अ—इ) } १८१५ }	०	६ ३८ ५७·९	२५४·३८	११७·४२	३२४·९८	२९ ६३·०	२४ २३०·४	२२ ११८·०

अत्र प्रथमं तावत्प्रथमकोष्ठकस्य मूर्धनि प्रदर्शितान्ध्रुवकान्, शकवर्षाणि १८००, ति. १०। वा. ६ २० ४·०, इत्यादीन्पंक्तिरूपान्विलिख्य तेषामधो वर्षगणस्य खण्डद्वयेन १०।५, प्रथम-कोष्ठकात्पंक्तिरूपं गतिद्वयमानीय सर्वे पृथक्संकलिताः सन्तो जाता इष्टवर्षे **मध्यमध्रुवाः** यथा—, शकव. १८१५। ति. २५। वा. ३ १५ ३०·६, इत्या० ॥ १ ॥ अनन्तरमिष्टशकवर्षाणि १८१५, एभिर्द्वितीयकोष्ठकाद्वारस्योपकरणत्रयस्य च धनर्णानि कालान्तराण्यानीय तानि स्वस्वस्थाने लिखित्वोपरितनेषु मध्यमध्रुवेषु संयोज्य लब्धा इष्टवर्षीयाः **शुद्धमध्यमध्रुवाः** यथा—, शकवर्ष. १८१५। ति. २५। वा. ३ १५ २९·६। इत्या० ॥ २ ॥ अ संज्ञका पंक्तिर्विलोक्या।

इदानीं शके १८१४ फाल्गुनकृष्णामान्तकालिका ध्रुवकाः साध्यन्ते। तद्यथा—पूर्वोक्तरीत्या लब्ध १८१५ इष्टवर्षे तिथिध्रुवः २५, अस्य खण्डद्वयेन २०।५, तृतीयकोष्ठकात्पंक्तिरूपं गति-द्वयमादाय पंक्त्योर्योगे कृते जाता गतिः, ति. २५। वा. ३ ३६ ३१·७, इत्यादि० (इ.)। एतां पूर्वसिद्धेभ्य इष्टवर्षशुद्धमध्यमध्रुवेभ्यः—ति. २५। वा. ३ १५ २९·६, इत्यादिकेभ्यो विशोध्य जनिता (अ—इ) वर्षीयमान्तध्रुवाः यथा—, ति. ०। वा. ६ ३८ ५७·९, इत्यादयः ॥ ३ ॥

इदानीं वर्षमध्ये प्रतिमासध्रुवानयनं, मासमध्ये प्रतितिथिध्रुवानयनं चोच्यते—

वर्षाद्यमान्तध्रुवकानधोऽधः प्रचाल्य सर्वान्खलु मासगत्या।
यावत्समान्तध्रुवका भवेयुस्ततः परीक्ष्येत विशुद्धिरेषाम् ॥ ४ ॥

तथैव मासध्रुवकानधोऽधः प्रचालयेदेकतिथिप्रगत्या।
मासान्तिमास्ते प्रभवन्ति यावत्स्फुटध्रुवाणां कथयेऽथ सिद्धिम् ॥ ५ ॥

अन्वयः—सर्वान्वर्षीयमान्तध्रुवान्मासगत्या यावत् (ते) समान्तध्रुवका भवेयुः (तावत्) अधोऽधः प्रचाल्य तत एषां विशुद्धिः परीक्ष्येत ॥ ४ ॥ तथैव मासध्रुवकान्यावत्ते मासान्तिमा भवन्ति तावदेकतिथिप्रगत्याऽधोऽधः प्रचालयेत् । अथ स्फुटध्रुवाणां सिद्धिं कथये ॥ ५ ॥

विवरणम्—अत्रैतद्गणितारम्भादावभीष्टवर्षे क्षयाधिमासज्ञानमवश्यम् । तच्च १३ कोष्ठकस्य पूर्वार्धमुत्तरार्धं वा विलोक्य संपद्यते । कोष्ठकेऽनुक्ते शककाले क्षयाधिमासज्ञानमिष्टं चेद्दशमकोष्ठकालुब्धया तिथिशुध्द्या क्षयाधिमासयोः संभवं ज्ञात्वा, एकादशकोष्ठकात्सर्वान्संक्रमणकालान्प्रसाध्य वक्ष्यमाणरीत्या साधितैः स्फुटामान्तकालैः क्षयाधिमासान्निर्णयेत् ।

इष्टवर्षे क्षयाधिमासज्ञानोत्तरं तृतीयकोष्ठकात्त्रिंशत्तिथीनां पंक्तिरूपां गतिमादाय तयाऽभीष्टवर्षे यावन्तो मासास्तावत्कृत्वः प्राग्लब्धान्वर्षीयमान्तध्रुवकानधोऽधश्चालयेत् । एवं वर्षमध्ये प्रातिमासिकान्ध्रुवकानुत्पाद्य तेषां विशुद्धिं परीक्ष्येत । तद्यथा—वर्षीयमान्तध्रुवकान्पृथग्विन्यस्य, तृतीयकोष्ठकाद्वर्षतिथीनां गतिमुद्धृत्य तेषु क्षिपेत् । एवं सकृत्संकलनरीत्या वर्षस्यान्तिमान्ध्रुवकानुत्पाद्य तैः सह यदि पूर्वेषां ध्रुवाणां साम्यं स्वल्पान्तरं वा स्यात्तर्ह्यधोऽधश्चालनं प्रमादरहितमिति ज्ञेयम् । अन्यथा विसंगतौ पुनर्गणयेदिति स्पष्टमेव ॥ ४ ॥ (पृ. १५, न्यासः २.)

अनयैव रीत्या (पृ.१६,न्यासः३) तृतीयकोष्ठगतया पंक्तिरूपयैकतिथिगत्या प्रातिमासिकध्रुवकान्प्राक्सिद्धांस्त्रिंशत्कृत्वोऽधोऽधः प्रचाल्य मासमध्ये प्रतितिथिभवान्ध्रुवकानुत्पादयेत्परीक्षेत च ॥५॥

अत्रोदाहरणम्—पृ.१५ द्वितीयं न्यासं पश्य। अत्रेष्टशकवर्षे १८१५, आषाढोऽधिकोस्तीति १३ कोष्ठकाज्ज्ञायते । अतोऽस्मिन्वर्षे त्रयोदश मासा अथवा नवत्यधिकशतत्रयं तिथयः सन्ति । अनन्तरं प्रथमन्यासोत्पन्नान्वर्षीयमान्तध्रुवकान्—, ति. ०. वा. ६ ३८ ५७·९ । २५४·३८ । इत्यादीन्द्वितीयन्यासस्याऽऽदौ विलिख्य तेषु तृतीयकोष्ठगतां त्रिंशत्तिथिगतिं पंक्तिरूपां ति. ३० । वा. १ ३१ ५०·१ । २९°·११ । इत्या॰ प्रक्षिप्य चैत्रवद्यमान्तकालिका ध्रुवाः—, ति. ३० । वा. १ १० ४८·० । २८३°·४९, इत्यादयो जनिताः । एवमपि वैशाखामान्तकालिका ध्रुवाः साधिताः । एवं त्रयोदशवारमधोधश्चालनेन शके १८१५ फाल्गुनवद्दि ३० कालिका ध्रुवाः—, ति॰ ३९० । वा॰ ५ ३२ ४९·२, इत्यादय उपलब्धाः ।

अथैतेषां शुद्धिपरीक्षा । वर्षीयमान्ते वारध्रुवः ६ ३८ ५७·९, अस्मिंस्तृतीयकोष्ठकात् ३९० तिथीनां गतिं, वा. ५ ५३ ५१·५ प्रक्षिप्य लब्धो वर्षस्यान्तिमो वारध्रुवः ५ ३२ ४९·४ अयं पूर्वसाधितात् वा. ५ ३२ ४९·२, एकपलस्य द्वाभ्यां दशमभागाभ्यामाधिको जातः, मासगतौ पलानां शतांशानां त्यागात् । अत एव वर्षान्तं वारगणितं निरवद्यम् । एवमन्येषामपि ध्रुवाणां शुद्धिपरीक्षा कार्या ॥ ४ ॥ (पृ. १५, द्वितीयन्यासे अधोभागे शुद्धिपरीक्षा विलोक्या.)

अथ प्रतितिथि ध्रुवगणितम् पृ. १६. तृतीयं न्यासं पश्य, अत्र द्वितीयन्यासाद्वर्षीयमान्तीयध्रुवकान्—, ति. ०। वा. ६ ३८ ५७·९ । २५४°·३८ इत्यादीनादौ विलिख्य तेषामधस्तृतीयकोष्ठस्थामेकतिथिगतिम्, ति. १। वा. ० ५९ ३·७ इत्यादिकां विन्यस्य संकलने कृते जाताश्चैत्रशुक्लप्रतिपदो ध्रुवकाः—, ति. १। वा. ० ३८ १·६ । २५५°·३५ इत्यादयः । एवं सर्वासां मासिकतिथीनां ध्रुवाः प्रतिमासं साध्या इति दिक् ।

प्राग्लब्धाः सर्वे ध्रुवा मध्यमाः, तिथिनक्षत्रयोगानां मध्यमरविचन्द्राभ्यां साधितत्वात् । अतस्तेषां स्फुटीकरणमवश्यम् । यतो ग्रहणादिचमत्काराः स्पष्टरविचन्द्राभ्यामेव प्रतीयन्ते न तु मध्यमाभ्याम् ।

उक्तं च सिद्धांतशिरोमणौ—

" यात्राविवाहोत्सवजातकादौ खेटैः स्फुटैरेव फलस्फुटत्वम् ।
स्यात्प्रोच्यते तेन नभश्चराणां स्फुटक्रिया दृग्गणितैक्यकृया " इति ॥

अत एवाधो मध्यमध्रुवेभ्यः स्फुटध्रुवानयनप्रकार उच्यते—

आद्योपकारेण चतुर्थकोष्ठात्तथा द्वितीयेन तृतीयकेन ॥
लब्ध्वा क्रमात्पञ्चमषष्ठकाभ्यां फलानि पंक्तौ क्रमशो निबध्यात् ॥ ६ ॥
प्राक्सिद्धमध्यध्रुवलिप्तिकासु क्षिपेत्तिथेः स्वं त्रितयं फलस्य ॥
एवं तिथेः स्पष्टतमो ध्रुवः स्यान्नक्षत्रयोगस्फुटता तथैव ॥ ७ ॥

अन्वयः—आद्योपकरणेन चतुर्थकोष्ठात्, द्वितीयेन पञ्चमकोष्ठकात्, तृतीयोपकरणेन षष्ठकोष्ठकाच्च, फलानि लब्ध्वा तानि यथाक्रमं पंक्तौ न्यसेत् ॥६॥ तिथेः प्राक्सिद्धमध्यमध्रुवके याः कलास्तासु सर्वदा धनभूतं फलत्रितयं क्षिपेत् । एवं तिथेः स्पष्टतमध्रुवः स्यात्, नक्षत्रयोगस्फुटता (अपि) तथैव कार्या ॥ ७ ॥

विवरणम्—प्रथमद्वितीयतृतीयोपकरणैः क्रमेण चतुर्थपञ्चमषष्ठकोष्ठकेभ्यस्तिथिनक्षत्रसंबन्धिनः संस्कारानुद्धृत्य यथाक्रमं पंक्तौ विन्यसेत् ॥६॥ अनन्तरं तिथिसंबन्धीनि तत्तदुपकरणलब्धानि त्रीणि फलानि पूर्वानीते तिथेर्मध्यमध्रुवके योज्यानि, संकलितं तिथेः स्पष्टध्रुवो भवति। एवमपि नक्षत्रसंबन्धिनस्त्रीन्संस्कारान्नक्षत्रमध्यमध्रुवे प्रक्षिप्य नक्षत्रस्पष्टध्रुवः साध्यः । योगसंबन्धिनस्त्रीन्संस्कारान्योगमध्यमध्रुवे संयोज्य योगस्पष्टध्रुवः साध्यः ॥ ७ ॥

उदाहरणम्—पृ. १७ चतुर्थं न्यासं पश्य । चतुर्थादिन्यासानां प्रथमगृहे मध्यमा मासिकतिथय ऊर्ध्वाधरं लिखिताः, तासां पूर्वगणितसंबन्धदर्शनादन्यत्प्रयोजनं नास्तीति बोध्यम् ।

अथ सस्कारानयनं **स्पष्टीकरणं च** । तृतीयन्यासे **चैत्रशुक्लप्रतिपत्संबन्धि प्रथमोपकरणम्** २५५° एतावन्मितम् । अनेन चतुर्थकोष्ठकात् यथासंख्यं तिथिनक्षत्रयोगसंबन्धिनः संस्कारान्क्रमेण २७,′ ३९,′ २५१,′ लब्ध्वा पंक्तौ लिखिताः । द्वितीयोपकरणम् ११८°·३, तथा मासिकी तिथिः १, आभ्यां पञ्चमकोष्ठकात् २९०′ लभ्यन्ते । एताः २९०′ तिथ्यादित्रयाणां साधारणाः । तृ. उ. ३३८°, अनेन षष्ठकोष्ठकात् १२′ लभ्यन्ते, एता १२′ अपि त्रयाणां स्पष्टीकरणे समाना एव । अनन्तरं तिथिसंबन्धिनां त्रयाणां संस्काराणां २७′, २९०′, १२′ ऐक्यं ३२९′ विधाय एतत्तृतीयन्यासे ककारोपलक्षितायां सावयवमध्यमतिथौ ३० ६३′ संयोज्य लब्धा स्पष्टतिथिः सावयवा ३० ३९२′, चतुर्थे न्यासे **स्पष्टतिथिगृहे** निवेशिता । **अथ नक्षत्रस्पष्टीकरणम्** । तृतीयन्यासे खकारोपलक्षितगृहे नक्षत्रस्य मध्यमध्रुवः सावयवः २५ २०८′·६, किंचिन्न्यूनपूर्णः २५ २०९′, अयं स्वीयेन संस्कारत्रयेण ३९′, + २९०′, + १२′ = ३४१′ युक्तो जातो नक्षत्रस्पष्टध्रुवः २५, ५५०′, चतुर्थन्यासे **स्पष्टनक्षत्रगृहे** लिखितः । **अथ योगस्पष्टीकरणम्** । तृतीयन्यासे गकारोपलक्षितगृहे योगध्रुवो न्यूनपूर्णः २३। १५४′ अयं स्वकीयसंस्कारत्रयैक्येन २५१′ + २९०′ + १२′ = ५५३′ अनेन युतो जातो योगस्पष्टध्रुवः २३ ७०७′, अयं चतुर्थे न्यासे **स्पष्टयोगगृहे** लिखितः । एवं तिथ्यादिकानां सर्वे मध्यमध्रुवाः स्पष्टीकृताः ।

अत्रैका तिथिः ७२० कलात्मिका, नक्षत्रयोगौ प्रत्येकं ८०० कलात्मकौ । गणितगौरवभयात्स्वल्पान्तरत्वाच्च पञ्चाङ्गगणिते कलानामर्धाल्पावयवः सर्वत्रोपेक्षितः । अर्धाधिकावयवस्यैकाधिकत्वेन ग्रहणं सांप्रदायिकम् । रङ्गनाथकृते सूर्यसिद्धान्तटिप्पणे ज्यासाधनं पश्यत ।

स्पष्टध्रुवेषु सिद्धेष्विदानीं पराख्यानयनार्थमिष्टस्पष्टध्रुवसंबन्धिनौ गतगम्यौ भाज्यहरौ साध्यौ, तद्यथा—

स्फुटध्रुवाग्रस्थकलाः प्रयाता भाज्याः स्युरेभ्यो गणयेच्च भोग्यान्।
इष्टध्रुवात्प्रागपरस्थयोश्चान्तरे क्रमात्तौ गतगम्यहारौ ॥ ८ ॥

अन्वयः–स्फुटध्रुवाग्रस्थाः कलाः प्रयाता भाज्याः स्युः। एभ्यो भोग्यान् (भाज्यान्) गणयेत्। इष्टध्रुवात्प्रागपरस्थयोः (ध्रुवयोः) च (ये) अन्तरे तौ (इष्टध्रुवस्य) क्रमेण गतगम्यहारौ भवतः।

विवरणम् —स्फुटध्रुवाणामग्रस्था अवयवीभूता याः कलास्तासां **गतभाज्य** इति संज्ञा। गतभाज्यकलास्वेकामितध्रुवस्य कलाभ्योऽपनीतासु शेषं **भोग्यभाज्यो** भवति। **अथ हारानयनम्**। अभीष्टध्रुवस्य पूर्वगामिध्रुवेण सह यदन्तरं स **गतहारः**, अग्रिमध्रुवेण सह यदन्तरं स **भोग्यहारः**, इति हारस्य गतैष्यत्वे विवेकः।

उदाहरणम्—चतुर्थन्यासे स्पष्टतिथिध्रुवाणामवयवीभूताः कलाः ३२७′, ३९२′, ४६९′ इत्यादयस्तत्तत्तिथिध्रुवाणां **गतभाज्याः** सन्ति। **अथ भोग्यभाज्यानयनम्**। तत्र तिथिध्रुवः २९ ३२७′, अस्य गतभाज्यकलाः ३२७′ एकमिततिथि ७२०° कलाभ्यः अपास्य, जनितं शेषं ३९३′, तस्यैव तिथिध्रुवस्य **भोग्यभाज्यो** जातः। परंतु गतभाज्येभ्य एव प्रायः सर्वे पराख्याः सिध्यन्ति। एष्यभाज्यानयनप्रसङ्गो विरलः। अत एव वक्ष्यमाणरीत्या प्रसङ्गे प्राप्त एव भोग्यभाज्यः साध्यो नान्यत्र। एवमपि नक्षत्रयोगानां भाज्यानां गतैष्यत्वे विवेकः।

अथ हारानयनम्। स्फुटध्रुवानुत्क्रमतो नामोत्तरस्मात्पूर्वं विशोध्य क्रमेण हाराः लभ्यंते। **तद्यथा**। ७२० कलाभिर्युक्तादुत्तरस्मात्पूर्वं विशोध्य लब्धास्तिथिहाराः ७८५′, ७९७′, ८०१′, **इत्या०**। ८०० कलाभिर्युक्तादुत्तरस्मात्पूर्वं विशोध्य लब्धौ नक्षत्रयोगहारौ भवतः। लुप्ततिथिध्रुवप्रसंगे १४४० कलाभिर्युक्तात् लुप्तोत्तरस्मात् लुप्तपूर्वं विशोध्य हारः साध्यः। लुप्तनक्षत्रयोगध्रुवप्रसंगे १६०० कलाभिर्युक्तात् लुप्तोत्तरस्मात् लुप्तपूर्वं विशोध्य हारौ साध्यौ। अथैतेषां **गतगम्यत्वमुच्यते**—यदीष्टतिथिध्रुवः ति. ३० ३९२′ तर्ह्यस्मात्पूर्वमन्तरं ७८५′ गतहारः, उत्तरमन्तरं ७९७′ भोग्यहारः। तथैवाग्रिमतिथिध्रुवः, १ ४६९ अस्मात्पूर्वमन्तरं ७९७′ गतहारः, उत्तरमन्तरं ८०१′ भोग्यहारः, इत्यपि सुगमम्। एवमितरेषां तिथिनक्षत्रयोगानां हारानयनं तेषां गतगम्यत्वं च सुगणकैर्ज्ञेयम्। (पृ. १७, न्यासः ४, विलोकनीयः).

इदानीं पराख्यानयनमुच्यते। अत्र पराख्यशब्दो मध्यमतिथ्यन्तकालात्स्पष्टानां तिथिनक्षत्रयोगाणामवसानपर्यन्तं योऽवधिस्तं बोधयति। (पृ. १८, न्यासः ५, विलोकनीयः)।

स्फुटध्रुवाणां हरभाज्ययुग्मैः प्रायो गतैः सप्तमकोष्ठकस्थाः।
साध्याः पराख्या हि कदाचिदेष्यद्वंद्वेन चक्षे तमिह प्रसङ्गम् ॥ ९ ॥
पूर्णध्रुवाणां क्रमशः स्थितानां यदा भवेदेकतमस्य लोपः।
तदा तु पूर्वध्रुवकस्य भोग्यद्वयेन साध्यः स परो धनं स्यात् ॥ १० ॥
द्विः स्पष्टमानं ध्रुवकस्य सिध्येत्तदाऽऽद्यमानस्य गतद्वयेन।
साध्यः पराख्यः स ऋणं तु नित्यमथ त्रयाणामवसानकालाः ॥ ११ ॥

अन्वयः—स्फुटध्रुवाणां यातैर्हरभाज्ययुग्मैः सप्तमकोष्ठकस्थाः पराख्याः साध्याः। कदाचिदेष्यद्वंद्वेन (साध्याः) तत्प्रसङ्गमिह चक्षे ॥ ९ ॥ क्रमशः स्थितानां पूर्णध्रुवाणां यदैकतमस्य लोपो भवेत्तदा तु पूर्वध्रुवकस्य गम्यद्वयेन परः साध्यः स परो धनं स्यात् ॥१०॥ यदि (कस्यचित्) ध्रुवकस्य द्विः स्पष्टमानं सिध्येत्तदाऽऽद्यमानस्य गतद्वयेन पराख्यः साध्यः स नित्यमृणम्। अथ (आगामिनि श्लोके) त्रयाणामवसानकालाः (उच्यन्ते) ॥ ११ ॥

विवरणम्—प्राक्सिद्धानां स्फुटध्रुवाणामेकैकस्य प्रायो गतेनैव भाज्यहरयुगुलेन सप्तम-कोष्ठकादृणगतानि पराख्यपलानि गृह्णीयात् । कदाचिद्भोग्येन भाज्यहरद्वंद्वेन पराख्यग्रहणमवश्यं भवति तत्प्रसङ्गोऽग्रिमे श्लोके उच्यते ॥ ९ ॥ एकद्वित्र्यादिक्रमेणाधोऽधो न्यस्तेषु स्पष्टध्रुवेषु पूर्णेषु यदि कस्यचिदेकस्यादर्शनं स्यात्तदा लुप्तध्रुवस्य यः पूर्वगामी ध्रुवस्तस्य भोग्येन भाज्यहरद्वंद्वेन सप्तमकोष्ठकात्पराख्यपलानि गृह्णीयात् । परं त्वेतानि भाज्यहरयोर्भोग्यत्वाद्धनगतानि भवन्ति ॥ १० ॥ ननु कदाचिदेकस्यैव ध्रुवस्य द्विवारं स्पष्टमानं लब्धं चेत्तदा कतरस्य भाज्यहराभ्यां पराख्यानयनं कार्यमिति चेत्तदुच्यते—**द्विः स्पष्टमानमिति** । ईदृशप्रसङ्गे द्वितीयं स्पष्टमानमुपेक्ष्य प्रथमस्यैव गताभ्यां भाज्यहराभ्यां पराख्यः साध्यः । अत्र भाज्यहरयोर्गतत्वात्तत्साधितः पराख्यो-ऽप्यृणं भवति । अथ तिथिनक्षत्रयोगानां समाप्तिकालानयनम् ॥ ११ ॥

उदाहरणम्—चतुर्थन्यासे स्पष्टतिथिगृहमधिष्ठिताया अमाया गतभाज्यहराभ्याम् ३९२′, ७८५′ आभ्यामुपकरणभ्यां सप्तमकोष्ठके –२९ घ० ३१ पलमितः पराख्यो लभ्यते । स यथा—

			पलानि
पार्श्वस्थस्य ७८५′ हारोपकरणस्य संमुखम् } मूर्धस्थभाज्योपकरणात्	३००′	कलानामधश्च	–१३५५
” ... ... ” ...	९०	” ...	– ४०७
” ... ... ” ...	२	” ...	– ९
ऐक्यम् ... ” ...	३९२	”	–१७७१ = – २९ घ० ३१ प०

एवं पञ्चमन्यासस्थाः प्रायशः सर्वे पराख्या यातैरेव भाज्यहरद्वंद्वैः साधिताः । अथ भोग्या-भ्यां भाज्यहराभ्यां पराख्यानयनस्योदाहरणम्—चतुर्थन्यासे स्पष्टतिथिगृहे पञ्चम्या लोपो दृश्यते । अतः पूर्वतिथिर्या चतुर्थी तस्या गतभाज्यः ७०५′, एता एकतिथिकलाभ्योऽपास्य ७२०′–७०५′ =१५′ जनितं शेषं भोग्यभाज्यो जातः । स च चतुर्थन्यासे अधः प्रदर्शितः । अनेन भोग्येन हारेण च १५′, ७८७′, सप्तमकोष्ठे + ६७ प० पराख्यो लभ्यते । सोऽपि पंचमन्यासे अधोभागे १ घ. ७ प. इति प्रदर्शितः । अत्र हरभाज्ययोर्भोग्यत्वात्पराख्यो धनम् ॥ ९ ॥ १० ॥

द्विः स्पष्टमानमित्येतस्योदाहरणम्—चतुर्थन्यासे तिथिगृहे षोडश्यास्तिथेर्द्विविधं स्पष्ट-मानमुपलब्धं, तयोर्द्वितीयमुपेक्ष्य प्रथमस्य गतभाज्यहराभ्यां ४४′, ६६३′ सप्तमकोष्ठकात्पराख्यः – ३ घ० ५४ प० साधितः पंचमन्यासे विलोक्यः । अत्र भाज्यहरयोर्गतत्वात्पराख्य ऋणगतः ।

इदानीं तिथिनक्षत्रयोगानां समाप्तिकालानयनं करणकालानयनं चोच्यते—

पराख्यैः स्ववारे पृथक्संस्कृते स्युः । पराशप्रपूर्णध्रुवाणां च कालाः ।
तिथिद्वंद्वकालैक्यखण्डं किल स्यात् । परस्यास्तिथेराद्यखण्डस्य कालः ॥ १२ ॥

अन्वयः—पराख्यैः स्ववारे पृथक्संस्कृते पराशप्रपूर्णध्रुवाणां कालाः स्युः । तिथिद्वंद्वकालै-क्यखण्डं किल परस्यास्तिथेराद्यखण्डस्य कालः स्यात् ॥ १२ ॥

विवरणम्—यस्मिन्वारादिमध्यमकाले तिथिनक्षत्रयोगत्रयस्य मध्यमध्रुवाः, स्पष्टध्रुवाः, भाज्यहरद्वंद्वानि, पराख्याश्चाऽऽनीयन्ते स तेषां वारः । तं वारं सावयवं पृ. १४, कोष्ठके दर्शितवत् स्थानत्रये विलिख्य, एकत्र तिथिपराख्येण, अन्यत्र नक्षत्रपराख्येण, अपरत्र योगपराख्येण च युतश्चेत्तिथिनक्षत्रयोगानां समाप्तिकाला भवन्ति । अत्र पराख्येण वारे संस्कृते यः कालः प्रजायते स कीदृशस्य पूर्णध्रुवस्य, गतस्योत गम्यस्येति चेत् । अत्रोच्यते— **पराशप्रपूर्णध्रुवाणामिति ।** पराख्यस्य यादृशं चिह्नं स्यात्तादृशपूर्णध्रुवस्य काल इति ज्ञेयम् । पराख्यस्यर्णत्वे गतपूर्णध्रुवस्य

कालो भवति। धनत्वे भोग्यपूर्णध्रुवस्य कालो भवति। गतत्वमृणरूपं, भोग्यत्वं धनरूपमिति ज्ञेयम्। प्रपूर्णाश्च ये ध्रुवास्ते प्रपूर्णध्रुवाः, परस्याऽऽशेवाऽऽशा येषां ते पराशाः, पराशाश्च ते प्रपूर्णध्रुवाश्च पराशप्रपूर्णध्रुवाः, तेषां पराशप्रपूर्णध्रुवाणामिति समासः। अत्र आशा नाम चिह्नम्, परो नाम पराख्यः, पूर्णो नाम निरवयवः, इति ज्ञेयम्।

अथ करणकालानयनम्—अत्र करणं तिथिदलपरम्। तिथेर्यः समाप्तिकालः स एव तस्या उत्तरार्धस्यापि भवति। अत एव तिथेः पूर्वार्धस्य समाप्तिकालज्ञानार्थमेव गणितमवश्यम्। तदर्थमुच्यते—**तिथिद्वंद्वेति**। क्रमशः स्थितानां तिथीनां द्वयोर्द्वयोः कालयोरैक्यं कृत्वा तदर्धितं चेदुत्तरतिथेः पूर्वार्धसमाप्तिकालो भवति। एवं सर्वासां तिथीनां पूर्वार्धसमापनकालानानयेत्। कोष्टके ९, सर्वेषां नक्षत्रयोगकरणानां नामानि पठितानि तानि तिथिपत्रके यथाक्रमं यथासंभवं च निर्दिशेत्।

उदाहरणम्—पञ्चमन्यासे लिखिता ये वारास्ते तृतीयन्यासस्य तृतीयगृहादुद्धृताः। तेषामग्रिमे पकाराङ्किते लघुगृहे चतुर्थन्यासे सिद्धांस्तिथिस्पष्टध्रुवान्विगतकलान्विलिख्य महागृहे चतुर्थन्याससिद्धभाज्यहरद्वंद्वेन सप्तमकोष्टकलब्धास्तिथिपराख्याः प्रदर्शिताः। एवं फबकाराङ्कितयोर्गृहयोर्नक्षत्रयोगयोः पूर्णस्पष्टध्रुवाः पराख्याश्च लिखिताः। अत्रोदाहरणार्थं चैत्रशुक्लप्रतिपदि तिथ्यादिकानां स्पष्टकालानधः प्रसाधयामः। तृतीयन्यासे चैत्रशुक्लद्वितीयाया मध्यमाया अवसान समयः—वा. १।३७।५, अस्मिन्काले चतुर्थन्यासे स्पष्टरविचन्द्राभ्यां सिद्धा स्पष्टतिथिः १ ४६९′ अतोऽयमेव चैत्रशुक्लस्पष्टप्रतिपदो वारः। अयं त्रिः संस्थाप्य स्वस्वपराख्यैः संस्कृत्य—

	ति०			स्प०	न०			स्प०	यो०		
ति० १	वा०	घ०	प०	न०	वा०	घ०	प०	यो०	वा०	घ०	प०
	१	३७	५	२६	१	३७	५	२५	१	३७	५
	—	३४	४६		—	४१	४८.		—	१	२५
प्र०	र. १	२	१९	उ.भा.	श.०	५५	१७	ब्र०	र.१	३५	४०
ति. २	वा.	घ.	प.	न०	वा०	घ०	प०	यो.	वा.	घ.	प.
	२	३६	९	२७	२	३६	९	२६	२	३६	९
	—	४०	३३		—	४५	४१		—	८	५९
द्वि.	र. १	५५	३६	रे. २७	र.१	५०	२८	ऐं.	चं.२	२७	१०

जनितास्तिथ्यादित्रयाणामवसानकालाः।

अथ **लुप्ततिथ्यादित्रयाणां** कालानयनम्। तच्च लुप्तात्पूर्वध्रुवस्य धनपराख्येण वारे संस्कृते सिध्यति। चतुर्थन्यासे पञ्चम्या लोपोऽस्ति, अत एव चतुर्थी पूर्वतिथिः। अस्या वारः, ४ ३४ १६ स्वकीयेन पञ्चमन्यासतलस्थेन धनपराख्येण + १ घ० ७ प० युतो जातो लुप्तपञ्चम्या अवसानकालः, वा. ४ ३५ २३। अथ **द्विरुपलब्धध्रुवस्य** कालानयनम्। चतुर्थन्यासे स्पष्टषोडश्या द्विविधं मानं प्राप्तम्। अनयोः प्रथमस्य ऋणपराख्यं,—३ घ० ५४ प० वारे १ २३ ५७, संयोज्य कालः—वा. १ २० ३ आनीतः। एवमेव नक्षत्रयोगयोरुदाहरणानि पंचमन्यासतले लिखितानि।

अथ करणकालानयनम्—अस्योदाहरणानि पञ्चमन्यासस्योत्तरार्धे बहूनि सन्ति। तानि दृष्टमात्राणि ज्ञायन्ते।

इति पञ्चाङ्गगणितम्।

न्यासः २

शके १८१५ प्रत्यमान्तं मध्यमध्रुवानयनम् ।

अमान्तः	व.ति.	वारः	उप. १	उप. २	उप. ३	मा. ति.	नक्षत्रम्	योगः
शके.	ति०	वा. घ. प.	०	०	०	ति. क.	न. क.	यो. क.
१८१५	०	६ ३८ ५७·९	२५४·३८	११७·४२	३२४·९८	२९ ६३·०	२४ २३०·४	२२ ११८·०
	३०	१ ३१ ५०·१	२९·११	२५·८२	३०·६७	० ०·०	२ १४६·३	४ २९२·७
चै० ३०	३०	१ १० ४८·०	२८३·४९	१४३·२४	३५५·६५	२९ ६३·०	२६ ३७६·७	२६ ४१०·७
	३०	१ ३१ ५०·१	२९·११	२५·८२	३०·६७	० ०·०	२ १४६·३	४ २९२·७
वै० ३०	६०	२ ४२ ३८·१	३१२·६०	१६९·०६	२६·३२	२९ ६३·०	१ ५२३·०	३ ७०३·४
	३०	१ ३१ ५०·१	२९·११	२५·८२	३०·६७	० ०·०	२ १४६·३	४ २९२·७
ज्ये० ३०	९०	४ १४ २८·२	३४१·७१	१९४·८८	५६·९९	२९ ६३·०	३ ६६९·३	८ १९६·१
	३०	१ ३१ ५०·१	२९·११	२५·८२	३०·६७	० ०·०	२ १४६·३	४ २९२·७
अ. आ. ३०	१२०	५ ४६ १८·३	१०·८२	२२०·७०	८७·६६	२९ ६३·०	६ १५·६	१२ ४८८·८
	३०	१ ३१ ५०·१	२९·११	२५·८२	३०·६७	० ०·०	२ १४६·३	४ २९२·७
आ० ३०	१५०	० १८ ८·४	३९·९३	२४६·५२	११८·३३	२९ ६३·०	८ १६१·९	१६ ७८१·५
	३०	१ ३१ ५०·१	२९·११	२५·८२	३०·६७	० ०·०	२ १४६·३	४ २९२·७
श्रा० ३०	१८०	१ ४९ ५८·५	६९·०४	२७२·३४	१४९·००	२९ ६३·०	१० ३०८·२	२१ २७४·२
	३०	१ ३१ ५०·१	२९·११	२५·८२	३०·६७	० ०·०	२ १४६·३	४ २९२·७
भा० ३०	२१०	३ २१ ४८·६	९८·१५	२९८·१६	१७९·६७	२९ ६३·०	१२ ४५४·५	२५ ५६६·९
	३०	१ ३१ ५०·१	२९·११	२५·८२	३०·६७	० ०·०	२ १४६·३	४ २९२·७
आ० ३०	२४०	४ ५३ ३८·७	१२७·२६	३२३·९८	२१०·३४	२९ ६३·०	१४ ६००·८	३ ५९·६
	३०	१ ३१ ५०·१	२९·११	२५·८२	३०·६७	० ०·०	२ १४६·३	४ २९२·७
का० ३०	२७०	६ २५ २८·८	१५६·३७	३४९·८०	२४१·०१	२९ ६३·०	१६ ७४७·१	७ ३५२·३
	३०	१ ३१ ५०·१	२९·११	२५·८२	३०·६७	० ०·०	२ १४६·३	४ २९२·७
मा० ३०	३००	० ५७ १८·९	१८५·४८	१५·६२	२७१·६८	२९ ६३·०	१९ ९३·४	११ ६४५·०
	३०	१ ३१ ५०·१	२९·११	२५·८२	३०·६७	० ०·०	२ १४६·३	४ २९२·७
पौ० ३०	३३०	२ २९ ९·०	२१४·५९	४१·४४	३०२·३५	२९ ६३·०	२१ २३९·७	१६ १३७·७
	३०	१ ३१ ५०·१	२९·११	२५·८२	३०·६७	० ०·०	२ १४६·३	४ २९२·७
मा० ३०	३६०	४ ० ५९·१	२४३·७०	६७·२६	३३३·०२	२९ ६३·०	२३ ३८६·०	२० ४३०·४
	३०	१ ३१ ५०·१	२९·११	२५·८२	३०·६७	० ·००	२ १४६·३	४ २९२·७
फा० ३०	३९०	५ ३२ ४९·२	२७२·८१	९३·०८	३·६९	२९ ६३·०	२५ ५३२·३	२४ ७२३·१

उपरितनस्य गणितस्य शुद्धिपरीक्षा

१८१५	०	६ ३८ ५७·९	२५४·३८	११७·४२	३२४·९८	२९ ६३·०	२४ २३०·४	२२ ११८·०
	३००	१ १८ २१·२	२९१·०६	२५८·१७	३०६·७०	० ०·०	२१ ६६३·४	१६ ५२६·७
	९०	४ ३५ ३०·३	८७·३२	७७·४५	९२·०१	० ०·०	६ ४३९·०	१३ ७८·०
फा. ३०	३९०	५ ३२ ४९·४	२७२·७६	९३·०४	३·६९	२९ ६३·०	२५ ५३२·८	२४ ७२२·७

न्यासः ३

शके १८१५ चैत्रमासे प्रतितिथिमध्यमध्रुवानयनम् ।

म. तिथिः	तिं.	वारः			उ १	उ. २	उ ३	तिथिः (क)		नक्ष. (ख)		योगः (ग)	
शके	ति.	वा.	घ.	प.	०	०	०	ति.	क.	न.	क.	यो.	क.
१८१५	०	६	३८	५७.९	२५४.३८	११७.४२	३२४.९८	२९	६३.०	२४	२३०.४	२२	११८.०
	१	०	५९	३.७	०.९७	०.८६	१३.०२	१	०.०	०	७७८.२	१	३६.४
चै. शु. १	१	०	३८	१.६	२५५.३५	११८.२८	३३८.००	०	६३.०	२५	२०८.६	२३	१५४.४
	१	०	५९	३.७	०.९७	०.८६	१३.०२	१	०.०	०	७७८.२	१	३६.४
चै. शु. २	२	१	३७	५.३	२५६.३२	११९.१४	३५१.०२	१	६३.०	२६	१८६.८	२४	१९०.८
	१	०	५९	३.७	०.९७	०.८६	१३.०२	१	०.०	०	७७८.२	१	३६.४
चै. शु. ३	३	२	३६	९.०	२५७.२९	१२०.००	४.०४	२	६३.०	०	१६५.०	२५	२२७.२
चै. शु. ४	४	३	३५	१२.७	२५८.२६	१२०.८६	१७.०६	३	६३.०	१	१४३.२	२६	२६३.६
,, ,, ५	५	४	३४	१६.४	२५९.२३	१२१.७२	३०.०८	४	६३.०	२	१२१.४	०	३००.०
,, ,, ६	६	५	३३	२०.१	२६०.२०	१२२.५८	४३.१०	५	६३.०	३	९९.६	१	३३६.४
,, ,, ७	७	६	३२	२३.८	२६१.१७	१२३.४४	५६.१२	६	६३.०	४	७७.८	२	३७२.८
,, ,, ८	८	०	३१	२७.५	२६२.१४	१२४.३०	६९.१४	७	६३.०	५	५६.०	३	४०९.२
,, ,, ९	९	१	३०	३१.२	२६३.११	१२५.१६	८२.१६	८	६३.०	६	३४.२	४	४४५.६
,, ,, १०	१०	२	२९	३४.९	२६४.०८	१२६.०२	९५.१८	९	६३.०	७	१२.४	५	४८२.०
,, ,, ११	११	३	२८	३८.६	२६५.०५	१२६.८८	१०८.२०	१०	६३.०	७	७९०.६	६	५१८.४
,, ,, १२	१२	४	२७	४२.३	२६६.०२	१२७.७४	१२१.२२	११	६३.०	८	७६८.८	७	५५४.८
,, ,, १३	१३	५	२६	४६.०	२६६.९९	१२८.६०	१३४.२४	१२	६३.०	९	७४७.०	८	५९१.२
,, ,, १४	१४	६	२५	४९.७	२६७.९६	१२९.४६	१४७.२६	१३	६३.०	१०	७२५.२	९	६२७.६
,, ,, १५	१५	०	२४	५३.४	२६८.९३	१३०.३२	१६०.२८	१४	६३.०	११	७०३.४	१०	६६४.०
चै. कृ. १	१६	१	२३	५७.१	२६९.९०	१३१.१८	१७३.३०	१५	६३.०	१२	६८१.६	११	७००.४
,, ,, २	१७	२	२३	०.८	२७०.८७	१३२.०४	१८६.३२	१६	६३.०	१३	६५९.८	१२	७३६.८
,, ,, ३	१८	३	२२	४.५	२७१.८४	१३२.९०	१९९.३४	१७	६३.०	१४	६३८.०	१३	७७३.२
,, ,, ४	१९	४	२१	८.२	२७२.८१	१३३.७६	२१२.३६	१८	६३.०	१५	६१६.२	१५	९.६
,, ,, ५	२०	५	२०	११.९	२७३.७८	१३४.६२	२२५.३८	१९	६३.०	१६	५९४.४	१६	४६.०
,, ,, ६	२१	६	१९	१५.६	२७४.७५	१३५.४८	२३८.४०	२०	६३.०	१७	५७२.६	१७	८२.४
,, ,, ७	२२	०	१८	१९.३	२७५.७२	१३६.३४	२५१.४२	२१	६३.०	१८	५५०.८	१८	११८.८
,, ,, ८	२३	१	१७	२३.०	२७६.६९	१३७.२०	२६४.४४	२२	६३.०	१९	५२९.०	१९	१५५.२
,, ,, ९	२४	२	१६	२६.७	२७७.६६	१३८.०६	२७७.४६	२३	६३.०	२०	५०७.२	२०	१९१.६
,, ,, १०	२५	३	१५	३०.४	२७८.६३	१३८.९२	२९०.४८	२४	६३.०	२१	४८५.४	२१	२२८.०
,, ,, ११	२६	४	१४	३४.१	२७९.६०	१३९.७८	३०३.५०	२५	६३.०	२२	४६३.६	२२	२६४.४
,, ,, १२	२७	५	१३	३७.८	२८०.५७	१४०.६४	३१६.५२	२६	६३.०	२३	४४१.८	२३	३००.८
,, ,, १३	२८	६	१२	४१.५	२८१.५४	१४१.५०	३२९.५४	२७	६३.०	२४	४२०.०	२४	३३७.२
,, ,, १४	२९	०	११	४५.२	२८२.५१	१४२.३६	३४२.५६	२८	६३.०	२५	३९८.२	२५	३७३.६
,, ,, १५	३०	१	१०	४८.९	२८३.४८	१४३.२२	३५५.५८	२९	६३.०	२६	३७६.४	२६	४१०.०
वै. शु. १	३१	२	९	५२.६	२८४.४५	१४४.०८	८.६०	०	६३.०	०	३५४.६	०	४४६.४
,, ,, २	३२	३	८	५६.३	२८५.४२	१४४.९४	२१.६२	१	६३.०	१	३३२.८	१	४८२.८

मध्यममासतिथिः	तिथ्यादित्रयाणां संस्काराः कोष्ठकः ४ उप० १ तिथेः	नक्षत्रस्य	योगस्य	को. ५ उप. २ त्रयाणाम्	को. ६ उप. ३ त्रयाणाम्	मध्यमतिथ्यन्तकाले तिथ्यादित्रयाणां स्फुटध्रुवाः (भोगः) स्पष्टा तिथिः (क+अ+ए+ओ) पूर्णतिथिः	भाज्याः	हाराः	स्पष्टं नक्षत्रम् (ख+इ+ए+ओ) पू. न.	भाज्याः	हाराः	स्पष्टो योगः (ग+उ+ए+ओ) पू. यो.	भाज्याः	हाराः
	अ	इ	उ	ए	ओ									
	क.	क.	क.	क.	क.	ति.	क.	क.	न.	क.	क.	यो	क.	क.
०	२८	३९	२५१	२२३	१३	२९	३२७	७८५	२४	५०५	८४५	२२	६०५	९०२
१	२७	३९	२५१	२९०	१२	३०	३९२	७९७	२५	५५०	८५५	२३	७०७	९१५
२	२७	३९	२५२	३७०	९	१	४६९	८०१	२६	६०५	८६०	२५	२२	९१८
३	२६	३९	२५२	४५५	६	२	५५०	८००	०	६६५	८५८	२६	१४०	९१८
४	२६	३९	२५३	५३८	३	३	६३०	७९५	१	७२३	८५४	०	२५८	९१२
५	२५	३९	२५३	६१६	१	*४	७०५	७८७	*२	७७७	८४६	१	३७०	९०३
६	२५	३९	२५३	६८४	०	६	५२	७७७	४	२३	८३५	२	४७३	८९४
७	२५	३९	२५३	७४०	१	७	१०९	७६३	५	५८	८२२	३	५६७	८८१
८	२४	३९	२५४	७८३	२	८	१५२	७५२	६	८०	८१०	४	६४८	८६९
९	२४	३९	२५४	८१२	५	९	१८४	७३८	७	९०	७९६	५	७१७	८५४
१०	२४	३९	२५४	८२७	८	१०	२०२	७२६	८	८६	७८५	*६	७७१	८४२
११	२४	३९	२५४	८३०	११	११	२०८	७१२	९	७१	७७०	८	११	८२९
१२	२४	३९	२५४	८२०	१३	१२	२००	७००	१०	४१	७५८	९	४२	८१६
१३	२४	३९	२५४	७९९	१४	१३	१८०	६८७	१०	७९९	७४५	१०	५८	८०४
१४	२४	३९	२५४	७६७	१३	१४	१४७	६७४	११	७४४	७३२	११	६२	७९०
१५	२४	३९	२५४	७२३	११	१५	१०९	६६३	१२	६७६	७२२	१२	५२	७७९
१६	२४	३९	२५४	६६८	९	१६	४४	६५३	१३	५९८	७११	१३	३१	७७०
१७	२४	३९	२५४	६०४	६	१६	६९७	६४५	१४	५०९	७०३	१४	१	७६१
१८	२४	३९	२५४	५३२	३	१७	६२२	६४०	१५	४१२	६९८	१४	७६२	७५७
१९	२४	३९	२५४	४५४	१	१८	५४२	६४०	१६	३१०	६९८	१५	७१९	७५६
२०	२४	३९	२५४	३७५	०	१९	४६२	६४२	१७	२०८	७०१	१६	६७५	७५८
२१	२४	३९	२५४	२९६	१	२०	३८४	६४९	१८	१०९	७०६	१७	६३३	७६५
२२	२५	३९	२५४	२२२	३	२१	३१३	६६०	१९	१५	७१८	१८	५९८	७७५
२३	२५	३९	२५३	१५९	६	२२	२५३	६७५	१९	७३३	७३३	१९	५७३	७९२
२४	२५	३९	२५३	१११	९	२३	२०८	६९५	२०	६६६	७५२	२०	५६५	८१०
२५	२६	३९	२५३	८३	११	२४	१८३	७१६	२१	६१८	७७५	२१	५७५	८३२
२६	२६	३९	२५३	७७	१३	२५	१७९	७४३	२२	५९३	८०१	२२	६०७	८५९
२७	२६	३९	२५२	९९	१४	२६	२०२	७६६	२३	५९४	८२३	२३	६६६	८८१
२८	२७	३९	२५२	१४५	१३	२७	२४८	७९१	२४	६१७	८४९	२४*	७४७	९०७
२९	२७	३९	२५१	२१८	११	२८	३१९	८०८	२५	६६६	८६६	२६	५४	९२४
३०	२७	३९	२५१	३०९	८	२९	४०७	८२२	*२६	७३२	८७९	२७	१७८	९३७
१	२८	३९	२५१	४१३	५	३०	५०९	८२९	१	११	८८७	१	३१५	९४४
२	२९	३९	२५०	५२४	२	१	६१८		२	९८		२	४५९	
* इत्यंकितानां लुप्ततिथिनक्षत्रयोगध्रुवाणां हारसाधनं अत्र प्रदर्शितम् ... ... →						*४	७०५ / १५	७८७	*२	७७७ / २३	८४६	*६	७७१ / २९	८४२
									*२६	७३२ / ६८	८७९	*२४	७४७ / ५३	९०७

न्यासः ५। तिथ्यादित्रयाणां पराख्यसिद्धिः स्पष्टपूर्णतिथीनां समाप्तिकालाश्च।

शके १८१५ चैत्रमासे।

मध्यमतिथिः	मध्यमतिथेः समाप्तिकालः व			पूर्णतिथिः	तिथिपराख्यः प		पूर्णनक्षत्रम्	नक्षत्रपराख्यः फ		पूर्णयोगः	योगपराख्यः ब		स्प० पू० तिथिः	स्पष्टपूर्णतिथेः समाप्तिकालः व + प		
	वा.	घ.	प.		घ.	प.		घ.	प.		घ.	प		वा.	घ.	प.
०	६	३८	५८	२९			२४			२२						
१	०	३८	२	३०	-२९	३१	२५	-३८	२६	२३	-४६	१७	३०	श. ०	८	३१
२	१	३७	५	१	३४	४६	२६	४१	४८	२५	१	२५	१	र. १	२	१९
३	२	३६	९	२	४०	३३	२७	४५	४१	२६	८	५९	२	र. १	५५	३६
४	३	३५	१३	३	४६	३१	१	४९	४७	२७	१६	३६	३	चं. २	४८	४२
५	४	३४	१६	*४	५२	२२	*२	५३	४४	१	२३	५७	४	मं. ३	४१	५४
६	५	३३	२०	६	३	५४	४	१	३७	२	३०	५६	*६	*गु. ५	२९	२६
७	६	३२	२४	७	८	१७	५	४	६	३	३७	२८	७	शु. ६	२४	७
८	०	३१	२७	८	११	४५	६	५	४५	४	४३	२५	८	श. ०	१९	४३
९	१	३०	३१	९	१४	२७	७	६	३४	५	४८	४३	९	र. १	१६	४
१०	२	२९	३५	१०	१६	११	८	६	२३	*६	५३	१९	१०	चं. २	१३	२४
११	३	२८	३९	११	१६	५५	९	५	२०	८	०	५५	११	मं. ३	११	४४
१२	४	२७	४२	१२	१६	३५	१०	३	९	९	३	०	१२	बु. ४	११	७
१३	५	२६	४६	१३	१५	११	*	*	*	१०	४	१२	१३	गु. ५	११	३५
१४	६	२५	५०	१४	१२	३८	११	५९	०	११	४	३३	१४	शु. ६	१३	१२
१५	०	२४	५३	१५	- ८	५०	१२	५४	३२	१२	३	५३	१५	श. ०	१६	३
१६	१	२३	५७	१६	- ३	५४	१३	४८	५५	१३	२	२०	१६	र. १	२०	३
१७	२	२३	१	*	*	*	१४	४२	१७	१४	०	४	*	*	*	*
१८	३	२२	४	१७	५६	५८	१५	३४	३६	१४	*	*	१७	चं. २	२५	६
१९	४	२१	८	१८	५०	०	१६	२६	१४	१५	५६	६	१८	मं. ३	३१	८
२०	५	२०	१२	१९	४२	३८	१७	१७	३६	१६	५२	४४	१९	बु. ४	३७	३४
२१	६	१९	१६	२०	३५	१९	१८	९	११	१७	४९	१९	२०	गु. ५	४३	५७
२२	०	१८	१९	२१	२८	२९	१९	१	१५	१८	४६	१०	२१	शु. ६	४९	५०
२३	१	१७	२३	२२	२२	४०	*	*	*	१९	४३	४०	२२	श. ०	५४	४३
२४	२	१६	२७	२३	१८	१२	२०	५३	३९	२०	४२	७	२३	र. १	५८	१५
२५	३	१५	३०	२४	१५	३२	२१	४८	३३	२१	४१	५५	२४	चं. २	५९	५८
२६	४	१४	३४	२५	१४	४६	२२	४५	११	२२	४३	६	२५	मं. ३	५९	४८
२७	५	१३	३८	२६	१६	३	२३	४३	४८	२३	४५	४८	२६	बु. ४	५७	३५
२८	६	१२	४१	२७	१९	७	२४	४४	१७	२४	५०	५	२७	गु. ५	५३	३४
२९	०	११	४५	२८	२३	४९	२५	४६	१९	२६	३	३१	२८	शु. ६	४७	५६
३०	१	१०	४९	-२९	२९	४५	२६	४९	५५	२७	११	२२	२९	श. ०	४१	४
१	२	९	५३	३०	-३६	३५	१	०	४४	१	१९	५२	३०	र. १	३३	१८
२	३	८	५६	१	४४	२	२	६	३१	२	२८	४४	१	चं. २	२४	५४
लुप्ततिथिनक्षत्रयोगानां पराख्याः अत्र साधिताः →				*४	+१	७	*२	+ १	३७	६*	+ २	२	*५	*बु. ४	३५	२३
							२६	+ ४	३४	२४	+ ३	२७				

न्यासः ५ अवशिष्टः ।

शके १८१५ चैत्रमासे । स्पष्टपूर्णानां नक्षत्रयोगकरणानां समाप्तिकालाः ।

मध्यमतिथिः	स्प. पू. नक्षत्रम्	स्प. पू. नक्षत्रस्य समाप्तिकालः व + फ			स्प. पू. योगः	स्प. पू. योगस्य समाप्तिकालः व + ब			करणकालगणितम् स्प. तिथिः	उत्तरकरणम्	तिथिकालः, उत्तरकरणस्य		तिथिद्वंद्वकालैक्यम् म		खण्डम् पूर्वकरणकालः ½ म		पूर्वकरणम्
		वा०	घ०	प०		वा०	घ०	प०			वा.	घ.	वा.	घ.	वा.	घ.	
१	२५	६	५९	३६	२३	६	५१	४५	१	२	१	२	२	५८	१	२९	३
२	२६	०	५५	१७	२५	१	३५	४०	२	४	१	५६	४	४५	२	२२	५
३	२७	१	५०	२८	२६	२	२७	१०	३	६	२	४९	६	३१	३	१५	७
४	१	२	४५	२६	२७	३	१८	३७	४	८	३	४२	८	१७	४	८	९
५	२	३	४०	३२	१	४	१०	१९	५	१०	४	३५	१०	४	५	२	११
६	*४	५*	३१	४३	२	५	२	२४	६	१२	५	२९	११	५३	५	५६	१३
७	५	६	२८	१८	३	५	५४	५६	७	१४	६	२४	१३	४४	६	५२	१५
८	६	०	२५	४२	४	६	४८	२	८	१६	०	२०	१	३६	०	४८	१७
९	७	१	२३	५७	५	०	४१	४८	९	१८	१	१६	३	२९	१	४४	१९
१०	८	२	२३	१२	६	१	३६	१६	१०	२०	२	१३	५	२४	२	४२	२१
११	९	३	२३	१८	*८	३*	२७	४३	११	२२	३	१२	७	२२	३	४१	२३
१२	१०	४	२४	३३	९	४	२४	४२	१२	२४	४	११	९	२३	४	४१	२५
१३	*	*	*	*	१०	५	२२	३४	१३	२६	५	१२	११	२५	५	४२	२७
१४	११	५	२६	४९	११	६	२१	१६	१४	२८	६	१३	१३	२९	६	४४	२९
१५	१२	६	३०	२१	१२	०	२१	०	१५	३०	०	१६					
													१	३६	०	४८	३१
१६	१३	०	३५	२	१३	१	२१	३७	१६	३२	१	२०	३	४५	१	५२	३३
१७	१४	१	४०	४३	१४	२	२२	५६	१७	३४	२	२५	५	५६	२	५८	३५
१८	१५	२	४७	२८	*	*	*	*	१८	३६	३	३१	८	९	४	४	३७
१९	१६	३	५४	५४	१५	३	२५	२	१९	३८	४	३८	१०	२२	५	११	३९
२०	१७	५	२	३५	१६	४	२७	२७	२०	४०	५	४४	१२	३४	६	१७	४१
२१	१८	६	१०	५	१७	५	२९	५६	२१	४२	६	५०	१४	४५	०	२२	४३
२२	१९	०	७	४	१८	६	३२	९	२२	४४	०	५५	२	५३	१	२६	४५
२३	*	*	*	*	१९	०	३३	४१	२३	४६	१	५८	४	५८	२	२९	४७
२४	२०	१	२२	४७	२०	१	३४	१९	२४	४८	२	६०	७	०	३	३०	४९
२५	२१	२	२६	५७	२१	२	३३	३५	२५	५०	३	६०	८	५८	४	२९	५१
२६	२२	३	२९	२२	२२	३	३१	२७	२६	५२	४	५८	१०	५२	५	२६	५३
२७	२३	४	२९	५०	२३	४	२७	४९	२७	५४	५	५४	१२	४२	६	२१	५५
२८	२४	५	२८	२४	२४	५	२२	३६	२८	५६	६	४८	१४	२९	०	१४	५७
२९	२५	६	२५	२५	*२६	०*	८	१३	२९	५८	०	४१	२	१४	१	७	५९
३०	२६	०	२०	५४	२७	०	५९	२६	३०	६०	१	३३					
	*												३	५८	१	५९	१
१	१	२	१०	३७	१	१	५०	१	१	२	२	२५	...	...	...	...	...
२	२	३	२	२५	२	२	४०	१२	२	४	...	...	...	...	...	...	...
...	* ३	४*	३५	५३	* ७	२*	३१	३७	...	...	...	...	...	...	...	...	...
...	*२७	१	१५	२३	*२५	६*	१६	८	...	...	...	...	...	...	...	...	...

पंचमन्यासावलंबेने पंचांगलेखनप्रदर्शनम्

श्रीशके १८१५ चैत्रशुक्लपक्षः

ति.	वा.	घ.	प.	न.	घ.	प.	यो.	घ.	प.	क.	घ.
१	र	२/५५	१९/३६	रे	५०	२८	ब्र	३५	४०	ब	२
३	चं	४८	४२	अ	४५	२६	ऐं	२७	१०	तै	२२
४	मं	४१	५४	भ	४०	३२	वै	१८	३७	व	१५
५	बु	*३५	२३	कृ	*३५	५३	वि	१०	१९	ब	८
६	गु	२९	२६	रो	३१	४३	प्री	२/५४	२४/५६	कौ	२
७	शु	२४	७	मृ	२८	१८	सौ	४८	२	व	२४
८	श	१९	४३	आ	२५	४२	शो	४१	४८	ब	२०
९	र	१६	४	पु	२३	५७	अ	३६	१६	कौ	१६
१०	चं	१३	२४	पु	२३	१२	सु	३१	३७	ग	१३
११	मं	११	४४	आ	२३	१८	धृ	२७	४३	वि	१२
१२	बु	११	७	म	२४	३३	शू	२४	४२	बा	११
१३	गु	११	३५	पू	२६	४९	गं	२२	३४	तै	१२
१४	शु	१३	१२	उ	३०	२१	वृ	२१	१६	व	१३
१५	श	१६	३	ह	३५	२	ध्रु	२१	०	ब	१६

*पंचमन्यासतले साधिता ।

श्रीशके १८१५ चैत्रकृष्णपक्षः

ति.	वा.	घ.	प.	न.	घ.	प.	यो.	घ.	प.	क.	घ.
१	र	२०	३	चि	४०	४३	व्या	२१	३७	कौ	२०
२	चं	२५	६	स्वा	४७	२८	ह	२२	५६	ग	२५
३	मं	३१	८	वि	५४	५४	व	२५	२	वि	३१
४	बु	३७	३४	अ	६०	०	सि	२७	२७	ब	४
५	गु	४३	५७	अ	२	३५	व्य	२९	५६	कौ	११
६	शु	४९	५०	ज्ये	१०	५	व	३२	९	ग	१७
७	श	५४	४३	मू	१७	४	प	३३	४१	वि	२२
८	र	५८	१५	पू	२२	४७	शि	३४	१९	बा	२६
९	चं	५९	५८	उ	२६	५७	सि	३३	३५	तै	२९
१०	मं	५९	४८	श्र	२९	२२	सा	३१	२७	व	३०
११	बु	५७	३५	ध	२९	५०	शू	२७	४९	ब	२९
१२	गु	५३	३४	श	२८	५४	शू	२२	३६	कौ	२६
१३	शु	४७	५६	पू	२५	२५	ब्र	१६	८	ग	२१
१४	श	४१	४	उ	२०	५४	ऐं	८/५९	१३/२६	वि	१४
३०	र	३३	१८	रे	*१५	२३	वि	५०	१	च	७

*पंचमन्यासतले साधिता ।

अथाभीष्टशकवर्षे विवक्षिततिथौ तिथिनक्षत्रयोगानां कालानयनम् ।

अभीष्टा शरत्खाभ्रधृत्युन्मिताब्दात् १८०० परा चेद्धनं पूर्विका चेदृणं स्यात् ।
गतिर्वर्षसंघप्रजातेति मत्वा प्रसाध्या अभीष्टाब्दशुद्धध्रुवाश्च ॥ १३ ॥

प्रयाताश्च चैत्रादयश्चान्द्रमासाः खरामा ३० हताः शेषतिथ्यौघयुक्ताः ।
तिथेरिष्टवर्षध्रुवेणोनिताः स्यात्तिथीनां गगहतेन कोष्ठात् तृतीयात् ॥ १४ ॥

गृहीतप्रगत्या युताः पूर्वशुद्धध्रुवास्ते भवन्तीष्टतिथ्यन्तकाले ।
यथोक्तं त्रयाणां च संस्कारलिप्ताः समानीय ताभिर्युतास्ते स्फुटाः स्युः ॥ १५ ॥

तथा चाष्टमादोषधीशद्युभुक्तिस्तदग्रस्थितात्सूर्यभुक्तिः प्रसाध्या ।
तयोर्योगविश्लेषकौ योगतिथ्योर्हरौ चन्द्रभुक्तिस्तु नक्षत्रहारः ॥ १६ ॥

समीपेष्टपूर्णाच्च्युता बीजरीत्या ध्रुवाः षष्टिनिघ्ना स्वहारेण भक्ताः ।
फलैर्वासरः संस्कृतश्चेत् घटीषु पृथक्पूर्तिकालाः स्युरिष्टध्रुवाणाम् ॥ १७ ॥

अन्वयः—अभीष्टा शरत् खाभ्रधृत्युन्मिताब्दात् १८०० परा चेत् वर्षसंघप्रजाता गतिर्धनम्, पूर्विका चेदृणम्, इति मत्वाऽभीष्टशकाब्दशुद्धध्रुवाः प्रसाध्याः ॥ १३ ॥ प्रयाताश्च चैत्रादयश्चान्द्रमासाः खरामाहताः शेषतिथ्यौघयुक्ता इष्टवर्षस्य तिथेः ध्रुवेण हीनाः (सन्तः) तिथीनां

गणः स्यात् तेन तृतीयात्कोष्ठात् ॥१४॥ गृहीतप्रगत्या युताः पूर्वशुद्धध्रुवाः (चेत्) ते इष्टतिथ्यन्तकाले भवन्ति । यथोक्तं त्रयाणां संस्कारलिप्ताः समानीय ताभिर्युतास्ते (इष्टतिथ्यन्तकालिका ध्रुवाः) स्फुटाः स्युः ॥ १५ ॥ तथा च, अष्टमादोषधीशद्युभुक्तिस्तदग्रस्थितात् (नाम नवमकोष्ठकात्) सूर्यभुक्तिश्च प्रसाध्या, तयोर्योगविश्लेषकौ (क्रमात्) योगतिथ्योर्हारौ (स्यातां) चन्द्रभुक्तिस्तु नक्षत्रहारः (स्यात्) ॥ १६ ॥ बीजरीत्या समीपेष्टपूर्णाच्च्युताः (स्पष्टाः) ध्रुवाः षष्टिनिघ्नाः स्वहारेण भक्ताः (लब्धैः) फलैर्वासरो घटीषु पृथक्संस्कृतश्चेत्समीपेष्टपूर्णध्रुवाणां पूर्तिकालाः स्युः ॥ १७ ॥

विवरणम्—इष्टशकवर्षमष्टादशशततमवर्षादधिकं चेद्वर्षगणजनितगतिर्धनम्, ऊनं चेदृणमिति मत्वा प्रागुक्तवदभीष्टशकवर्षस्य शुद्धध्रुवाः साध्याः ॥ १३ ॥ **प्रयातश्चेति** । निजचैत्रमासमारभ्येष्टमासपर्यन्तं यावन्तो मासा अतीतास्तावन्तस्त्रिंशद्गुणा इष्टमासस्यावशिष्टतिथिसंख्यया युता इष्टवर्षस्य ध्रुवेण च रहिताः सन्तो यच्छेषं स एव **तिथिगणः** स्यात् । तिथिगणो नाम मेषसंक्रमणसमीपस्थतिथितो विवक्षिततिथिपर्यन्तं तिथीनां संख्या । तिथिगणमुपकरणं प्रकल्प्य तेन तृतीयकोष्ठकात्पंक्तिरूपां गतिमादाय तां पूर्वानीतेष्विष्टशकवर्षीयशुद्धध्रुवेषु क्षिपेत् । संकलितानि इष्टतिथ्यन्तकालिकाः शुद्धमध्यमध्रुवा भवन्ति । अनन्तरं पूर्वोक्तवत् त्रिभिरुपकरणैः क्रमाच्चतुर्थपञ्चमषष्ठकोष्ठकेभ्यस्तिथ्यादित्रयाणां संस्कारलिप्ताः समानीय ताभिरिष्टतिथ्यन्तकालिकशुद्धमध्यमध्रुवा यथाक्रमं युताश्चेत् ते एव स्पष्टा भवन्ति ॥ १४ ॥ १५ ॥ **अथ हारानयनम्**—अष्टमकोष्ठकाच्चन्द्रदिनस्पष्टगतिं नवमकोष्ठकाच्च रविस्पष्टगतिं प्रसाध्य तयोर्गत्योर्योगान्तरे क्रमाद्योगतिथ्योर्हारौ भवतः । चन्द्रगतिरेव नक्षत्रहारो भवति ॥ १६ ॥ **अथ तिथ्यादित्रयाणामवसानकालानयनमुच्यते—समीपेष्टेति** । पूर्वानीता ये सावयवस्पष्टध्रुवास्तान्समीपेष्ट्य इष्टपूर्णध्रुवेभ्यः 'संशोध्यमानं स्वमृणत्वमेति' इति बीजरीत्या संशोध्य ये शेषा लभ्यन्ते ते षष्टिगुणाः स्वस्वहारेण भक्ताः फलानि घटिकादिपराख्याः शेषचिह्ना भवन्ति । एतैः पराख्यैः पूर्वानीतो वासरः स्थानत्रये संस्कृतश्चेत् तिथ्यादित्रयाणामिष्टानां पूर्णध्रुवाणां समाप्तिकालाः सिध्यन्ति । अत्र नक्षत्रयोगयोः पूर्णध्रुवः सावयवध्रुवात्पूर्व उत्तरो वा, तथा ग्राह्यो यथा स इष्टतिथिवासरे पतेत् ॥ १७ ॥

उदाहरणम्—शालिवाहनशके त्रयोदशाधिकाष्टादशशततमे १८१३ वर्षे श्रावणकृष्णाष्टम्यां तिथिनक्षत्रयोगा मध्यमार्कोदयात्कियता कालेन समाप्तिमुपायान्तीति प्रश्ने षष्ठन्यासावसरः । अस्मिन्नुदाहरणे इष्टशकवर्षम् १८१३, इदं गणितारम्भ १८०० शकवर्षात् अधिकमस्ति । तस्मादत्राऽऽगतो वर्षगणः (१८१३−१८००=१३)। तत्साधिता गतिश्च धनम् । प्रागुक्तवत्सर्वं विगणय्य लब्धा इष्टशकवर्षीयाः शुद्धमध्यमध्रुवाः—ति. ३ । वा. ० ५२ ७ । २७८° ·७६ इत्यादयः । अथ ते इष्टतिथ्यन्तकालिकाः कार्याः । तत्राऽऽदौ तिथिगणः साध्यते । चैत्रादितः श्रावणमासपर्यन्तं गतमासाश्चत्वारः । परं मध्ये त्रयोदशकोष्ठकस्योत्तरार्धदर्शनेन अधिकमासो लभ्यते चेत् गतमासाः एकेन अधिकाः कार्याः । प्रस्तुतशके १८१३ वर्षे अधिकमासो नास्ति । अतो गतमासाः चत्वारः, ते त्रिंशद्गुणास्तिथयः १२०, श्रावणस्य कृष्णाष्टमीपर्यन्तं शेषतिथयः २३, आभिर्युताश्चेज्जाताश्चैत्रादेः श्रावणवद्याष्टमीसमाप्तिपर्यन्तं समस्ततिथिसंख्या १४३ । अस्यां तिथिध्रुवेण ३ वर्जितायां जातस्तिथिगणः १४० । तृतीयकोष्ठात् १००+४० इति द्वाभ्यां खंडाभ्यां पंक्तिरूपं गतिद्वयमादाय तच्च पूर्वानीतेषु शुद्धमध्यमध्रुवेषु क्षिप्त्वा जनिताः श्रावणवद्यष्टम्यां मध्यमध्रुवाः ति. १४३ । वा. ५ ४० ४०·९ । ५४° ·५९ इत्या० ।

अथ स्पष्टीकरणम्—उपकरणशतांशेषु किंचित्प्रक्षिप्य, आदशांशं शुद्धैस्त्रिभिरुपकरणैः ५४°·६ । ३४०°·९ । ११°·१ चतुर्थपञ्चमषष्ठकोष्ठेभ्यः संस्कारानुद्धृत्य तैः स्वस्वमध्यमध्रुवा युताः

न्यासः ६ ।

शकः	व. ति.	वारः	प्र. उ.	द्वि. उ.	तृ. उ.	मा. ति.	नक्षत्रम्	योगः
		वा. घ. प.	°	°	°	ति. क.	न. क.	यो. क.
ध्रु. १८००	१०	६ २० ४·०	२७९·५९	२९·८८	१८१·१६	९ ६३·०	८ १४·२	७ ७३७·५
गतिः { १०	२०	४ ५६ ५७·७	३५९·३६	३१२·६९	७२·९२	२० ०·०	१७ ७६३·७	१७ ७२७·३
को.१ (३	३	३ ३५ ५·३	३५९·८१	२३७·८१	९३·८८	३ ०·०	२ ५४९·१	२ ५३८·२
१८१३	३	० ५२ ७·०	२७८·७६	२२०·३८	३४७·९६	२ ६३·०	१ ६५३·०	१ ४०३·०
को .कालां	·	− ० ०·०	०·००	+ ०·०१	०·००		· ·	· ·
श. १८१३	३	० ५२ ७·०	२७८·७६	२२०·३९	३४७·९६	२ ६३·०	१ ६५३·०	१ ४०३·०
को. ३ {	१००	० २६ ७·१	९७·०२	८६·०६	२२२·२३	१० ०·०	१६ २२१·१	२३ ४४२·२
(	४०	४ २२ २६·८	३८·८१	३४·४२	१६०·८९	१० ०·०	११ ७२८·४	१४ ६५६·९
ध्रु.श्रा.व.८	१४३	५ ४० ४०·९	५४·५९	३४०·८७	११·०८	२२ ६३·०	३ २·५	१२ ७०२·१
को. ४. प्रथममुपकरणम्...५४°·६ अनेन लब्धः संस्कारः ...						२५२·०	५९·७	६५·०
को. ५. द्वितीयमुपकरणम् ३४०·९ ,, ,, ,, ...						९३३·०	९३३·०	९३३·०
को. ६. तृतीयमुपकरणम्...११·१ ,, ,, ,, ...						४·०	४·०	४·०
श्रावणकृष्ण अष्टम्यां ८ स्पष्टध्रुवः ... .अ...						२३ ५३२·०	४ १९८·५	१४ १०४·१
समीपेष्टपूर्णमानानि ....इ...						२३ ०·०	४ ०·०	१५ ०·०
समीपेष्टपूर्णमानेभ्यश्युताः स्पष्टध्रुवाः ...भाज्यानि..(इ − अ)...						− ५३२·०	− १९८·५	+ ६९५·९
को.८.उप.द्वि.३४१°; इष्टतिथिः२२।२३गतगम्यभाज्ययोः चं.ग.						७९२·०	७९२·०	७७४·०
को. ९. उपकरणम् प्रथमम् ५५° (=५४°·५९) रविगतिः...						− ५८·०	०·०	+ ५८·०
अग्रिमपृष्ठस्थहारसाधनानुसारं लब्धाः, हाराः						७३४	७९२	८३२·०
						वा. घ. प.	वा. घ. प.	वा. घ. प.
पराख्याः = (भाज्यः × ६०) ÷ स्वहारः						− ४३ २९	− १५ २	+ ५० १२
मध्यमतिथ्यंते वासरः						५ ४० ४१	५ ४० ४१	५ ४० ४१
तिथिः २३, नक्षत्रं ४, योगः १५ एतेषां समाप्तिकालाः						४ ५७ १२	५ २५ ३९	६ ३० ५३

सन्तो जाता स्पष्टातिथिः २३, ५३२′ नक्षत्रं ४, १९८′·५ योगः १४, १०४′। एतानि निजनिजेभ्यः समीपस्थेभ्य इष्टपूर्णध्रुवेभ्यः ति. २३, न. ४, यो. १५, विशोध्य लब्धास्तिथिभाज्यकलाः ५३२′। अत्रेष्टपूर्णतिथिः २३ अस्याः स्पष्टतिथ्यपेक्षया २३, ५३२′ अल्पतरत्वाद्बीजरीत्या विपरीतशोधने कृते शेषकलाः ५३२′ ऋणम् । एवमपि नक्षत्रभाज्य १९८ कलानामृणत्वमुपलब्धम् । योगस्येष्टपूर्णध्रुवस्य १५, स्पष्टध्रुवात् १४ १०४′, महत्तरत्वाच्छेषकलाः ६९६′, अधिका (धनं) जाताः। अत्र समीपेष्टमानेषु ति. २४, न. ५, यो. १४ कल्पितेषु तेषां समाप्तिकाला अपि सिध्येयुः।

अथ हारसाधनम्—तच्च चन्द्रसूर्ययोर्गतिभ्यां भवति । भाज्यस्यर्णत्वेऽष्टमकोष्ठकादेकोनया मासिकतिथ्या, एकोनेन द्वितीयोपकरणेन च चन्द्रगतिः साध्या, तयोः पूर्वदिनसंबन्धित्वात् । धनत्वे तु उभाभ्यां वर्तमानाभ्यां चन्द्रगतिः साध्येति स्पष्टमेव । एवमृणभाज्ये सति द्वि.उ. ३४१° − १° = ३४०° । मा. ति. २३ − १ = २२ आभ्यामष्टमकोष्ठके पूर्वदिनचन्द्रगतिः ७९२′ लभ्यते । धनभाज्ये सति द्वि. उ. ३४१, मा. ति. २३, इति वर्तमानोपकरणाभ्यां अष्टम-

कोष्ठके ७७४′ चन्द्रगतिर्लभ्यते । न्याससिद्धेन प्रथमोपकरणेन ईषन्न्यूनपूर्णेन ५५° अनेन नवम-**कोष्ठकाद्रविगतिः** ५८′ कला लभ्यते । इयं पूर्वापरदिवसयोः समाना, रविगतिफलाल्पत्वात् । एवं **सिद्धयोश्चन्द्रसूर्यगत्योरन्तरं** ७३४′ तिथिहारः, ऐक्यं ८३२′ योगहारः, एकाकिनी यथास्थिता **चन्द्रगतिः** ७९२′ नक्षत्रहारः, इति स्पष्टमेव ।

अथसमाप्तिकालार्थं पराख्यगणितम्। तिथिभाज्यः –५३२′ षष्ट्या गुणितः –३१९२०′ **स्वहारेण** ७३४ भक्तो, जातः पराख्यः –४३ घ. २९ प. । भाज्यस्यर्णत्वात्पराख्योऽप्यृणम् । **अनेन** मध्यमवासरे ५, ४०, ४१ संस्कृते जातः तिथ्यन्तो बुधवासरे मध्यमार्कस्योदयात् ५७ घ. १२ प. इति ।

एवमपि नक्षत्रभाज्यः, –१९८·५ × ६० = –११९१०, स्वहारेण ७९२, भक्तो जातः पराख्यः, –१५ घ. २ प., भाज्यस्य ऋणत्वात् पराख्योऽपि ऋणम् । अनेन मध्यमवासरे ५, ४०, ४१, संस्कृते जातो (४, नाम रोहिणी) नक्षत्रसमाप्तिकालः, गुरुवासरे मध्यमार्कस्योदयात्, २५ घ. ३९ प. । तथैव योगभाज्यः, + ६९६ × ६० = + ४१७६०, स्वहारेण ८३२ भक्तो, जातः पराख्यः, + ५० घ. १२ प. । भाज्यस्य धनत्वात् पराख्योऽपि धनम् । अनेन मध्यमवासरे ५, ४०, ४१, संस्कृते जातो (१५ नाम वज्र) योगसमाप्तिकालः,शुक्रवासरे मध्यमार्कस्योदयात्, ३० घ. ५३ प. इति सर्वं स्फुटम् ।

अथ षष्ठे न्यासे समीपेष्टपूर्णयोगः १४ कल्पितश्चेत् तस्य स्पष्टयोगापेक्षया १४ १०४′, अल्पतरत्वात् बीजरीत्या विपरीतशोधने कृते शेषकलाः १०४′ ऋणम् । भाज्यस्य १०४ ऋणत्वात् एकोनया मासिकतिथ्या २२, एकोनेन द्वितीयोपकरणेन ३४०, अष्टमकोष्ठकात् पूर्वदिनचंद्रगतिः ७९२′ लभ्यते । रविगतिस्तु प्रथमोपकरणेन ५५°, नवमकोष्ठकात् '५८′ उपरि साधिता । चंद्र-सूर्यगत्योरैक्यं ७९२+५८=८५० प्रस्तुत १४ योगस्य हारः । अत्र योगभाज्यः,–१०४ × ६० = –६२४० स्वहारेण ८५० भक्तो, जातः पराख्यः, –७ घ. २० प., भाज्यस्य ऋणत्वात् **पराख्योऽपि, ऋणम् ।** अनेन मध्यमवासरे ५, ४०, ४१ संस्कृते जातो प्रस्तुत (१४ नाम हर्षण) **योगसमाप्तिकालः** गुरुवासरे मध्यमार्कस्योदयात्, ३३ घ. २१ प. जात इत्यलम् ।

अथान्यदुदाहरणम्—शालिवाहनशके ४०६ तमे वर्षे आषाढशुक्ल १२ द्वादशी, सुरगुरु-वासरे बभूव इति **ईरणग्रामे** बुधगुप्तराज्ञः शिलालेखो विद्यते । ईरणग्रामे रेखातर्न्तरं पूर्वं २° ३२′ **अक्षांशाः** उ० २४° ५′ । तत्रेयं तिथिर्गुरुवासरे पपात न वा इत्यस्य निर्णयं कुरु । अत्रेष्टशके ४०६ अष्टादशशतैर्विपरीतं शोधिते जात ऋणगतो वर्षगणः –१३९४, अनेन साधितया गत्या अपि ऋणेन भवितव्यम् । अत्र सप्तमे न्यासे प्रथमं गणितारम्भध्रुवकान्विलिख्य तेषामधस्तिर्यग्रेखां कृत्वा तस्या अधः प्रथमकोष्ठकाद्वर्षगणस्य खण्डचतुष्केण गतिचतुष्कमादाय तस्मिन्नेकीकृते जाता + १३९४ वर्षाणां गतिः ति., + २९ । वा. + ६ २४ ४३·८ । प्र. उ. + ३५३° · ६९ इत्या० । अस्यां गणितारम्भध्रुवेभ्योऽपनीतायां सत्यां शेषा इष्टवर्षस्य ४०६ ध्रुवाः । तिथिः ११ । वा. ६ ५५ २०·२ इत्या० । अत्र तिथिध्रुवः ११ । अतोऽस्मिन्वर्षेऽधिमासो नास्तीति त्रयोदशकोष्ठस्य पूर्वार्धावलोकनाज्ज्ञायते ।

अनन्तरं द्वितीयकोष्ठकात् शके –४०६ वर्षस्य कालान्तरं गृहीत्वा तेन –३ घ० ११·४ प० इत्यादिना वर्षध्रुवेषु संस्कृतेषु जाता इष्टवर्षे शुद्धमध्यमध्रुवः, वा० ६ ५२ ८·८ इत्यादयः ।

अथ तिथिगणः साध्यः । इष्टवर्षेऽधिमासो नास्तीति चैत्रादित आषाढशुक्ल १२ पर्यन्तं तिथयः १०२ । आभ्यस्तिथिध्रुवे ११ अपास्ते शेषं तिथिगणः ९१, अनेन तृतीयकोष्ठकाद्गतिं गृहीत्वा लब्धा आषाढशुक्ल १२ इयां ध्रुवाः– ति० १०२ । वा० ५ २६ ४२·८ इत्या० । शेषं पराख्यपर्यन्तं सर्वं गणितं पूर्वोक्तवत्कृत्वा लब्धः स्पष्टतिथ्यन्तकालः— वा० ५ ५३ २८·२ इति । अतः शकवर्षे ४०६ आषाढशुक्ल १२ द्वादशी तिथिः सुरगुरुवासरे पपात इति सत्यम् ।

न्यासः ७ ।

शकवर्षाणि	ति.	वा.	घ.	प.	प्र. उप.	द्वि. उप.	तृ. उप.	मासातिथिः	
ध्रुवाः (अ) १८००	१०	६	२०	४.०	२७९.५९	२९.८८	१८१.१६	९	६३.०
कोष्ठकः १ { १०००	२२	२	५८	०.८	३५६.४६	२.३९	१७९.३९	२२	०.०
३००	१८	५	११	५८.०	३५८.३६	३६.२०	२६२.००	१८	०.०
९०	५	०	२७	५७.९	३५९.१२	२९८.५२	१.३९	५	०.०
४	१४	४	४६	४७.१	३५९.७५	१९७.०८	२४५.१७	१४	०.०
(इ) १३९४	२९	६	२४	४३.८	३५३.६९	१७४.१९	३२७.९५	२९	०.०
(अ − इ) = ४०६	११	६	५५	२०.२	२८५.९०	२१५.६९	२१३.२१	१०	६३.०
को. २ कालांतरं ...	०	−	३	११.४	− .२४	+१.९३	− ०.३८	०	०.०
शुद्धमध्यमध्रुवाः ...	११	६	५२	८.८	२८५.६६	२१७.६२	२१२.८३	१०	६३.०
	९०	४	३५	३०.३	८७.३२	७७.४५	९२.०१	८	०.०
	१	०	५९	३.७	०.९७	०.८६	१३.०२	१	०.०
आषाढशुक्ल १२	१०२	५	२६	४२.८	१३.९५	२९५.९३	३१७.८६	११	६३.०
उ.प्र. उ. द्वि. उ.तृ. १३.९५; २९५.९३; ३१७.९ एभिरुपकरणैः संस्काराः	....				उप.को. ४, उ.को. ५, उ.को.६ ...१८०′ + १३३′ + १४′=				३२७.०
स्पष्टतिथिध्रुवः	....				... ...			११	३९०.०
सूर्यचंद्रयोः दिनगतिः					सू. ५७′; चं. ७९७′; अंतरं७४०′				
परात्ययः	+	२६	४५.४		=}(३३०′×६०) ÷ ७४०′)};			भो.०	३३०.०
स्पष्टतिथ्यंतः	५	५३	२८.२				स्पष्टतिथिः	१२	०.०

इत्यभीष्टतिथिप्रकरणम् ।

अथ संक्रमणमहानक्षत्रायनविषुवानां कालानयनम् ।

वस्तुतः प्रत्यब्दं तात्कालिकस्पष्टसूर्यात् एव संक्रमणादिकानां कालानयनमुचितम् । परं तु सूर्यस्योच्चस्य परमफलस्य च अल्पगतित्वात् तेषां सकृत्साधिताः काला वर्षगत्या चालयितुं शक्यन्ते । तथाऽपि महता कालेन महदन्तरं मा भूदिति मयाऽत्र वारविकार उत्पादितः । अनेन संस्कृता वर्षगतिचालितकाला अतीतागामिषु वर्षसहस्रेष्वपि निरन्तराः स्युः ।

इदानीं संक्रमणसूर्यर्क्षकालानयनम्—

> **अद्धपशुद्धी दशमाद्यानीयाभीष्टवर्षजौ च तयोः ॥**
> **एकादशपदकस्थान्संक्रमसूर्यर्क्षभेदकान् युक्त्वा ॥ १७ ॥**
>
> **वर्षं च यथाविकारान्वारे प्रक्षिप्य लब्धकाले स्युः ॥**
> **लब्धतिथीनां निकटे ततस्सूर्यर्क्षसंक्रमारम्भाः ॥ १८ ॥**

प्रथमं वर्षगणेन दशमकोष्ठकादभीष्टशकवर्षीयौ अब्दपस्तिथिशुद्धिश्च साध्यौ । अनन्तरं यावन्ति संक्रमसूर्यनक्षत्राणि तावत्कृत्वस्तौ पंक्तौ पृथक्पृथग्विलिख्य तेषामध एकादशकोष्ठकस्थान्संक्रमणानां सूर्यनक्षत्राणां च भेदान्न्यसेत् । तदध एकादशकोष्ठकस्थान्वारविकारान्वर्षगणेन संगुण्य लब्धानि पलानि स्वस्वस्थानेषु पंक्तौ लिखेत् । एवं पंक्तित्रयस्य ऐक्ये कृते लब्धतिथीनां निकटे लब्धवारादिकालेषु पृथक्पृथक्संक्रमणानां महानक्षत्राणां च आरम्भाः स्युः ।

उदाहरणम्—शके १८१५ वर्षीयाणां केषांचित्संक्रमणमहानक्षत्राणां प्रारम्भकाला आनीयन्ते । अत्र साहचर्यादयनांशानपि साधयामः । तेषां प्रयोजनमग्रे रविक्रान्तिगणिते प्रकटीभवेत्. ।

अब्दपतिथिशुद्ध्यानयनार्थं न्यासः (८) ।

विवरणम्	शक	अब्दपः			ति. शु.	अयनांशाः		
	व.	वा.	घ.	प.	ति.	अं.	क.	वि.
को. १० ध्रुवाः	१८००	६	९	२८	९·८२	२२	८	३३
” गतिः	१०	५	३३	४९	२०·६२	०	८	२२
” ”	५	६	१६	५५	२५·३१	०	४	११
मेषसंक्रांतौ	१८१५	४	०	१२	२५·७५	२२	२१	६

अस्मात्सिद्धं शके १८१५ वर्षे मेषसंक्रमणं षड्विंशतितिथिसांनिधौ नाम चैत्रकृष्ण ११ श्याः समीपस्थे बुधवासरे गतघट्यः ०, प. १२, एतत्परिमिते काले स्यादिति । परं त्वयं कालः शके १८०० वर्षस्य सूर्यपरमफलोच्चानुसारी । स वारविकारेण युतश्चेदिष्टवर्षे सूर्यफलोच्चानुसारी भवति । स वारविकारः अधस्तने न्यासे दर्शितः ।

अथ संक्रमणमहानक्षत्रार्थं न्यासः (९) ।

विवरणम्	मेषसंक्र.				वृषभसंक्र.				मिथुनसंक्र.				आर्द्रानक्ष.			
	वा.	घ.	प.	ति.	वा.	घ.	प.	ति.	वा.	घ.	प.	ति.	वा.	घ.	प.	ति.
शके १८१५	४	०	१२	२६	४	०	१२	२६	४	०	१२	२६	४	०	१२	२६
को. ११. भेदः	·	·	·	·	२	५२	३९	३१	६	९	४०	६३	६	८	३५	७०
को.११.वारविकारः	+	·	२	·	−	·	१	·	−	·	४	·	−	·	५	·
	४	०	१४	२६	६	५२	५०	५७	३	९	४८	८९	३	८	४२	९६

अस्मिन्न्यासे प्रथमपंक्तौ मेषसंक्रमणवारस्तिथिश्चासकृल्लिखितौ । तेषामध एकादशकोष्ठकस्था भेदाः, तेषामधो वारविकाराः । एवं प्रतिसंक्रमणं प्रतिनक्षत्रं च संख्यात्रयमेकीकृत्य पृथक्कालास्तत्समीपस्थतिथयश्चोत्पादिताः । अत्र मेषसंक्रमणगणिते ये (+२) द्वे पले दृश्येते तयोर्गणितमेवम् । ११ कोष्ठकात् मेषस्य पलात्मको वारविकारः +०·१३६ व. लब्धः । अत्र वकारो वर्षगणोपलक्षणत्वात् प्रस्तुतोदाहरणे सः १५ तुल्यः । अतो वर्षविकारं +०·१३६ पञ्चदशभिः संगुण्य +२·४ पले लभ्येते । एवमन्येषामपि वारविकारा गणनीयाः इति । एवमेव सर्वाणि संक्रमणानि साध्यानि । तथा च अग्रे सूर्यनक्षत्रविषये फलितं यत्—शके १८१५ वर्षे अधिकाषाढशुक्लषष्ठ्याः संनिहिते भौमवासरे गतघ. ८ प. ४२ एतस्मिन्क्षणे रवेरार्द्रानक्षत्रे प्रवेशः

स्यादिति। परं त्विमे काला उज्जयिनीरेखासंबन्धिनः। अतो रेखान्तरेण युताश्चेद्रेखान्तरस्थ-ग्रामसंबन्धिनो भवेयुः।

इदानीं विषुवायनर्तूनां गणितमुच्यते—

द्वादशकोष्ठध्रुवगतिसंयुक्तौ वर्षपस्तथा शुद्धिः॥
अयनांशयुक्तभानोरुदगयनारम्भकालिकौ स्याताम्॥ १९॥

उदगयनकालतिथ्योर्द्वादशकोष्ठोत्तरार्धगतभेदाः॥
वर्षगणघ्नविकारा युक्ताश्चेदयनविषुवकालाः स्युः॥ २०॥

आदौ इष्टशकवर्षस्य यौ वर्षपः तिथिशुद्धिश्च तयोर्द्वादशकोष्ठकस्थं ध्रुवं वर्षगणगतिं च संयोज्य सायनसूर्यस्य उदगयनारम्भकालिकौ वारस्तिथिश्च साध्यौ। अनन्तरमेतयोर्द्वादशकोष्ठ-स्यापरदलस्थान्भेदान्वर्षगणघ्नविकारांश्च पृथक्पृथग्युक्त्वाऽन्येषां विषुवायनादीनां कालाः साध्याः।

न्यासः (१०)

	अब्दपः			शुद्धिः
	वा.	घ.	प.	ति.
शके १८१५ वर्षे, (८, न्यासे)…………	४	०	१२	२५·७५
को. १२ पूर्वार्धं, शके १८०० उदगयनध्रुवः	१	४४	४७	२५७·७५
” ” १० वर्षगतिः……	६	५१	३०	− ०·१४
” ” ५ वर्षगतिः……	६	५५	४५	− ०·०७
१८१५……………	५	३२	१४	२८३·२९
सायनसूर्यस्य उदगयने……………	कालः	…	…	तिथिः

अयमुदगयनकालः स्वकीयेन वर्षगणनिघ्नविकारेण पृथग्युतश्चेत्सूक्ष्मतमः स्यात्। द्वादश-कोष्ठकस्यापरदले उदगयनस्य विकारः प० + १·९२७ व, एतावानस्ति। अस्य वर्षगणेन गुण-नाज्जातानि विकारपलानि + १·९२७ × १५ = + २८·९। एभिः पूर्वसिद्धकाले संयोजिते जातः सूक्ष्मकालः, वा. ५ ३२ ४३। अतः सिद्धं यत्—शके १८१५ वर्षे २८३ तिथिसमीपे नाम मध्यवर्तिन्यधिकाषाढे संख्यायमाने मार्गशीर्षमासे शुक्लत्रयोदश्याः समीपे यो गुरुवारस्तद्दिने उज्ज-यिन्यां गतघट्यः ३२ प० ४३, एतस्मिन्काले रवेरुदगयनं स्यादिति।

अथ विषुवादिकानां गणितदर्शनार्थं को. १२ उत्तरार्धप्रयुक्तः न्यासः (११) विलोक्यः। अत्राविकृतोदगयनकालो १० न्यासलब्धः, वा. ५, घ. ३२, प. १४ ग्राह्यः, विषुवादीनां विकारभिन्नत्वात्।

न्यास (११)

विवरणम्	वसन्तविषुवम्				दक्षिणायनम्				शरद्विषुवम्				द्वि. व. विषुवम्			
	वा.	घ.	प.	ति.	वा.	घ.	प.	ति.	वा.	घ.	प.	ति.	वा.	घ.	प.	ति.
श.१८१५ उदगयने	५	३२	१४	२८४	५	३२	१४	२८४	५	३२	१४	२८४	५	३२	१४	२८४
वारभेदः	३	४७	५९	−२८१	५	३८	३९	−१८६	१	१४	४८	− ९१	५	२	५	+९०
विकारः	+०	०	१२	०	−	०	२८	०	−	०	१३	०	+	०	१२	०
श.१८१५	२	२०	२५	३	४	१०	२५	९८	६	४६	४९	१९३	३	३४	३१	३७४

उपरितनान्यासात्सिद्धं यत्—शके १८१५ चैत्रशुक्ल ३ यायाः समीपस्थे सोमवासरे घ० २० प० २५ परिमिते काले वसन्तविषुवं, तथा—आषाढशु० ८ म्याः समीपे बुधवासरे घ० १० प० २५ काले दक्षिणायनं च भवेदिति। एवमन्येमाषामपि। अत्र पलानामग्रे स्थितास्तिथयो वर्षारम्भाद्गता इति बोध्यम्। अत एव दक्षिणायनकालिका ९८ तमी तिथिराषाढशु० ८ मी भवति। एते काला आवन्ताः, इष्टग्रामीयाणामपेक्षायां रेखान्तरेण संस्कार्या इति पूर्वं कथितमेव।

इति सूर्यसंक्रमणप्रकरणम्।

अथ पञ्चाङ्गगणिताच्चन्द्रसूर्यानयनम्।

तत्र आदौ मध्यमभोगगणितम्—

सप्तेषुपञ्च ५५७ कलिकान्वितमध्यमभध्रुवो* भवेच्चन्द्रः।
स तृतीयकरणहीनो राहुः स्यात्तिथिविवर्जितः सूर्यः॥ २१॥
प्रथमोपकरणहीनः सूर्यः स्वोच्चं द्वितीयकरणेन।
हीनश्चेद्विधुतुङ्गं मध्यान्येतानि मध्यतिथ्यन्ते॥ २२॥

(* ध्रुवशब्दो भोगार्थपर इति सर्वत्र ज्ञेयम्।)

मध्यमतिथ्यन्ते यो मध्यमनक्षत्रध्रुवः स अंशादिषु परिणामितः सप्तपञ्चाशदधिकपञ्चशतकलाभिः, सप्तदशकलाधिकैर्नवांशैः (९°।१७′) वा सहितश्चेदंशादिर्मध्यमचन्द्रो भवति। मध्यमचन्द्रो द्विः स्थापितः सन् एकत्र तृतीयकरणेन रहितो राहुर्भवति, अन्यत्र द्वादशगुणितमासिकतिथिमितैरंशैर्वर्जितो मध्यमरविः स्यात्। एवं लब्धरविं द्विः संस्थाप्य स एकत्र प्रथमोपकरणेन अन्यत्रद्वितीयोपकरणेन, रहितश्चेत्क्रमेण रविचन्द्रयोरुच्चभोगौ भवतः। इमानि सर्वाणि मध्यममानानि मध्यमतिथ्यन्तकालिकानीति ध्येयम्।

उदाहरणम्—पूर्वस्मिन् पञ्चाङ्गगणिते तृतीयन्यासे मध्यमपूर्णिमान्तः उज्जयिन्यां शनिवासरे २४ घ. ५३ पलेष्वभवदिति सिद्धम्। तर्हि तावदेतत्कालिकानां चन्द्रादिकानां **मध्यमभोगा**न्प्रचक्ष्व। निर्दिष्टकाले—मध्यमनक्षत्रध्रुवः तृतीयन्यासे ११ न.। ७०३·४ क. साधितः। नक्षत्रं =१३°।२०′। अनेन प्रमाणेन ११ न.।७०३·४=१५८°। २३′·४ अंशात्मकः मध्यमनक्षत्रध्रुवः। तथा च प्र० उ० २६८°·९३, द्वि० उ० १३०°.३२, तृ० उ० १६०°. २८, एतन्मितानि सन्ति। अत्र प्रथमोपकरणस्याग्रे त्रिनवतिः, द्वितीयोपकरणस्याग्रे ३२, तृतीयोपकरणस्याग्रे २८, शतांशाः संति। ते षष्टिगुणिताः ५५८०। १९२०। १६८०, शतभक्ताः क्रमेण ५५′·८। १९′·२। १६′·८, कला भवन्तीति गाणितिका जानन्त्येव। तेन प्र० उप० = २६८°।५५′·८। द्वि० उप०=१३०°। १९′·२। तृ० उप० १६०°।१६′·८, इति स्फुटम्। पूर्णिमा पञ्चदशी मासिकी तिथिः। अस्या द्वादशाभिर्गुणनाज्जाताः १८० अंशाः, इदं मध्यमपूर्णमास्यन्ते मध्यमचन्द्रसूर्ययोरन्तरम्।

न्यासः। (१२)

अ.

म. नक्षत्रध्रुवः	१५८°	२३′·४
सप्तेषुपंचकलाः	+९	१७·०
म. चन्द्रः	१६७	४०·४

ब.

म. चंद्रः	१६७°	४०′·४
तृ. करणेन	−१६०	१६·८
म. राहुः	७	२३·६

क.

म. चंद्रः	१६७	४०′·४
−(१५×१२°)=	−१८०	०·०
म. रविः	३४७	४०·४

ड.

म. रविः	३४७°	४०′·४
प्र. उप.	−२६८	५५·८
रव्युच्चम्.	७८	४४·६

ई.

म. रविः	३४७°	४०′·४
द्वि. उप.	−१३०	१९·२
चंद्रोच्चम्	२१७	२१·२

इदानीं पञ्चानां मध्यमदिनगतिकला उच्यन्ते—

राहोर्गुणा ३ विधूच्चस्य रसा ६ रवितुङ्गकस्य खं ० भानोः ।
एकोनषष्टि ५९ कलिकाः ककुनगा ७९१ दिनगतिस्तु चन्द्रमसः ॥ २३ ॥

स्पष्टोऽर्थः । इदानीं चन्द्रसूर्ययोः स्पष्टभोगानयनं कथ्यते—

स्पष्टा भमितिश्चन्द्रः स्फुटतिथिहीनः स्फुटो भवत्यर्कः ।
अष्टमनवमपदाभ्यां सिध्यति चन्द्रार्कयोः क्रमाद्द्युगतिः ॥ २४ ॥

राहूनस्फुटशशिना चतुर्दशाद्विधुशरं समानीय ।
पञ्चदशस्थफलेन च यदि युक्तः कर्षणस्फुटः स स्यात् ॥ २५ ॥

नवमपदादिनबिम्बं विधुगत्या षोडशाच्च विधुबिम्बम् ।
भूभा क्षितिजविलम्बनलिप्ताः साध्या विधुग्रहावसरे ॥ २६ ॥

लवीकृतः स्पष्टनक्षत्रध्रुव एव स्पष्टचन्द्रः, अयं स्पष्टतिथिध्रुवेण अंशात्मकेन रहितः सन् स्पष्टो रविः स्यात् । अथ **चन्द्रशरानयनम्** । स्पष्टचन्द्राद्राहुमपास्य शेषेण चतुर्दशकोष्ठकाच्चन्द्रशरमानीय स पृथक्स्थाप्यः । ततोऽस्याऽऽकर्षणसंस्कारसिद्ध्यर्थं पञ्चदशकोष्ठकस्योपकरणं साध्यम् । तद्यथा–पूर्वसिद्धः अंशात्मकस्पष्टतिथिध्रुवो द्विगुण श्चतुर्दशकोष्ठकस्य करणेन रहितः सन् पञ्चदशकोष्ठकस्य करणं भवति । अनेन विधुशरस्य कर्षणसंस्कारमादाय तेन पृथक्स्थापितश्चन्द्रशरः संस्कृतः सन् स्फुटतरः स्यात् । विधुग्रहप्रसक्तौ षोडशकोष्ठकाच्चन्द्रदिनस्पष्टगत्या विधुबिम्बं, भूभा, परमलम्बनं, मानैक्यमानान्तरमान्यखण्डानि च ग्राह्याणि ।

उदाहरणम्—पञ्चाङ्गगणितस्य चतुर्थन्यासे शके १८१५ चैत्रशु. १५ यां शनिवासरे उज्जयिन्यां गतासु २४ घ. ५३ पलेषु च सिद्धः स्पष्टनक्षत्रध्रुवः १२, ६७६′, स्पष्टतिथिः १५ १०१′ तथैव मध्यमगणिते राहुः ७° । २३′·६, एभिः स्पष्टान् चन्द्रसूर्यचन्द्रशरादीनानय ।

स्पष्टनक्षत्रध्रुवः १२ न. । ६७६′ अयमंशेषु परिणामितः (१२×८००′ + ६७६′) ÷ ६०′= जातः **स्पष्टचन्द्रः** १७१° १६′ । स्पष्टतिथिं १५, १०१′, अंशेषु परिणाम्य (१५ × १२°) + १°।४१′= लब्धं चन्द्रसूर्ययोरन्तरम् १८१°।४१′ । अनेन स्पष्टचन्द्रे रहिते जातः **स्पष्टरविः** ३४९° ३५′, अस्मान्मध्यमरविं ३४७°।४०′·४ विशोध्य लब्धं **रविमंदफलं** धनं १°।५४′·६ ।

	९	३२०·४६		९	३३३·४८		९	३४६·५०		९	३५९·५२	
अध्या.२ को. ६	९,	३३४·३६	१२·३	९,	३४६·४८	१०·१	९,	३५८·५०	७·३	९,	१०·४२	४·६
		सकलसं.	८४६·३		सकलसं.	७९२·९		सकलसं.	७३०·९		सकलसं.	६६१·०
	क=	अंशात्मं=	१४° ६′·३	ख=	अंशात्मं=	१३° १२′·९	ग=	अंशात्मं=	१२° १०′·९	घ=	अंशात्मं=	११° १′·०

न्यासः ३। स्पष्टचन्द्रगणितम्।

निर्देशः	चै. वा. घ. प. १२. ३. ३३. ३·६	चै. वा. घ. प. १४. ४. ३२. ७·३	चै. वा. घ. प. १५. ५. ३१. ११·०	चै. वा. घ. प. १६. ६. ३०. १४·७
न्यासः १ न्यासः २ अन्ते.	अं. क. मध्यमचंद्रः १४१।३०·८ क=सक.सं.= १४। ६·३	अं. क. १५४।२९·० ख= १३।१२·९	अं. क. १६७।२७·२ ग= १२।१०·९	अं. क. १८०।२५·४ घ= ११। १·०
	स्पष्टचंद्रः १५५।३७·१	१६७।४१·९	१७९।३८·१	१९१।२६·४

इदानीं चन्द्रशरगणितमाह—

मध्यमतिथ्यन्ताविधोः शरगणितप्रक्रियोच्यते सूक्ष्मा।
संस्कृतनवमेन हरेत्सप्तमकोष्ठस्थिताः कदम्बकलाः॥ ५॥
मासतिथिर्जिन २४ निघ्ना मध्यमनवमेन नव ९ लवैश्चोना।
शेषेणाष्टमकोष्ठाद्गृह्णीयात्प्रथममब्जविशिखफलम्॥ ६॥
द्वादशकरणयुताभ्यां पञ्चमतुर्योपसाधनाभ्यां च।
द्वादशकरणविहीनैरेकादशदशमषष्ठसप्तमकैः॥ ७॥
द्वादशकेनैकेन च नवमात्फलसप्तकं लभेत सुधीः।
सफलाः कदम्बलिप्ताः खखयुगपञ्चोनिता ५४०० भवेद्बाणः॥ ८॥
अवशेषदिक्च स स्याद्धनचिह्ने तूत्तरोऽन्यथा याम्यः।
स्पष्टाष्टमेन विधुगतिमनया विधुबिम्बलम्बनादि हरेत्॥ ९॥

स्पष्टचन्द्रानयनावसरे द्वितीयन्यासे यन्नवमोपकरणं स्फुटीकृतं नाम फलाष्टकस्यांशरूपेण युक्तं (९,) एतच्चिह्नांकितं तेन सप्तमकोष्ठकाच्चन्द्रस्य कलात्मकं **दक्षिणकदम्बा**दन्तरमादाय न्यासस्य शिरोभागे लेख्यम्। ततोऽष्टमकोष्ठकस्य करणं सिद्धं नास्ति। तदेवं साध्यम्। **अग्रे न्यासः ४,** शिरोभागः विलोक्यः। अभीष्टा मासिकी तिथिः चतुर्विंशतिगुणिता तथा च मध्यमनवमकरणेन तथा **च** (९°) **नवांशैश्च** विशोधिताऽष्टमकोष्ठकस्य करणं भवति। अनेनाष्टमकोष्ठकाच्चन्द्रशरस्य प्रथमसंस्कारं गृहीत्वा तं कदम्बान्तरस्याधो लिखेत्। (३१२° – ३२०°·४६ – ९° = ३४२°·५४ उप.)

अनन्तरं द्वादशकरणयुताभ्यां चतुर्थपञ्चमकरणाभ्यां नवमपदात्संस्कारद्वयं साध्यम्। ततो द्वादशकरणरहितैः षष्ठसप्तमदशमैकादशाभिः करणैस्तस्मादेव कोष्ठकात्संस्कारचतुष्कं ग्राह्यम्। अन्ते केवलेन द्वादशकरणेन संस्कारो ग्राह्यः। एवं नवमपदात्सप्त संस्कारानुद्धृत्य तान्प्रथमफलस्याधः क्रमेणोर्ध्वाधरं लिखेत्। कदम्बान्तरमधस्तनैर्नवसंस्कारैः संयुतं कृत्वा यल्लभ्यते तस्माच्चतुःशताधिकपञ्चसहस्रकला विशोधयेत्। शेषं **चन्द्रशरो** भवति। अस्य धनत्वे उत्तरा दिक्, ऋणत्वे दक्षिणा दिगिति ज्ञेयम्।

उदाहरणम्—शके १८०६ चैत्रशु० १२ त्रयोदश्यादिचतसृणां तिथीनामवसानकालिकान् चन्द्रशरान्गणय। अत्रार्थं **चतुर्थन्यासं पश्य**। तत्र आदौ अष्टमकोष्ठकस्य करणं साध्यम्। तच्च षष्ठश्लोकोक्तरीत्या सिध्यति। तद्यथा। चतुर्थन्यासशिरोभागे मध्यममासतिथिः १३, चतुर्विंशतिगुणा जाता अंशरूपा ३१२°, एभ्यो द्वितीयन्यासनिष्ठं मध्यमनवमकरणं ३२०°·४६ नव ९° भागांश्च विशोध्य जनितं उपरि दर्शितं ३४२°·५४। इदं अष्टमकोष्ठकस्य करणम्।

द्वितीयन्यासस्थेन स्फुटनवमेन ३३४°·३६ सप्तमकोष्ठकाद्दक्षिणकदम्बान्तरं ५२५४′·५३ तथाऽष्टमकोष्ठकात् ३४२°·५४ उपकरणेन लब्धः प्रथमसंस्कारश्च ६′·१५ लभ्यते।

अथ लघूपकरणैः संस्कारानयनम्—प्रथमन्यासे चतुर्थपञ्चमकरणे ६·३, ५९·८, इमे द्वादशकरणेन ८·६ युते जाते १४·९, ६८·४, आभ्यां नवमपदकात्क्रमात् ०′·७२, ०′·७६ संस्कारौ लभ्येते। पुनः षष्ठसप्तमदशमैकादशकरणानि २६·९, ९६·६, ८३, ८६·७, द्वादशेन ८·६ रहितानि जातानि १८·३, ८८, ७४·४, ७८·१, तथा, केवलं द्वादशं ८·६, एभिः पञ्चभिर्नवमात्क्रमेण ०′·०४, १′·१७, ०′·०, ०′·९९, ०′·१८, संस्कारा लभ्यन्ते। एवं सर्वसंस्कारैर्युतं दक्षिणकदम्बान्तरं जातम् ५२६४′·५४। अस्मात् ५४००′·० कला विशोध्य जनितश्चन्द्रशरः −१३५′·४६ कलाः। अयमृणत्वाद्दक्षिणः। एवमेव सर्वेऽपि बोध्याः।

न्यासः ४ । चन्द्रशरगणितम् ।

कोष्ठकः	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.
	१३ × २४ =	३१२	१४×२४ =	३३६	१५×२४ =	०	१६×२४ =	२४
	९ मं. उप. =	− ३२०·४६		− ३३३·४८		− ३४६·५०		− ३५९·५२
	नवांशाः	− ९		− ९		− ९		− ९
८	उपकरणं	३४२·५४		३५३·५२		४·५०		१५·४८
	उप.	संस्कार कलाः	उप.	संस्कार कलाः	उप.	संस्कार कलाः	उप.	संस्कार कलाः
७	द.कदं.उप. ३३४·३६	५२५४·५३	द.कदं.उप. ३४६·४८	५३१५·९०	द.कदं.उप. ३५८·५०	५३७९·९०	द.कदं.उप. १०·४२	५४४३·८२
८	३४२·५४	६·१५	३५३·५२	७·८५	४·५०	९·५०	१५·४८	११·१५
	६·३ + ८·६		९·६ + ८·६		१२·९ + ८·६		१६·२ + ८·६	
९च.	= १४·९०	·७२	= १८·२०	·७६	= २१·५०	·७९	= २४·८०	·८०
	५९·८ + ८·६		६३·६ + ८·६		६७·४ + ८·६		७१·२ + ८·६	
९छ.	= ६८·४०	·७६	= ७२·२०	·७९	= ७६·००	·८०	= ७९·८०	·७८
	२६·९ − ८·६		२९·७ − ८·६		३२·५ − ८·६		३५·३ − ८·६	
९ज.	= १८·३०	·०४	= २१·१०	·०१	= २३·९०	·००	= २६·७०	·०१
	९६·६ − ८·६		९७·२ − ८·६		९७·८ − ८·६		९८·४ − ८·६	
९झ.	= ८८·००	१·१७	= ८८·६०	१·१५	= ८९·२०	१·१३	= ८९·८०	१·११
	८३·० − ८·६		८६·६ − ८·६		९०·२ − ८·६		९३·८ − ८·६	
९ञ.	= ७४·४०	०·०	= ७८·००	·०१	= ८१·६०	·०३	= ८५·२०	·०८
	८६·७ − ८·६		९३·४ − ८·६		०·१ − ८·६		६·८ − ८·६	
९ट.	= ७८·१०	·९९	= ८४·८०	·९०	= ९१·५०	·७४	= ९८·२०	·५५
९ठ.	८·६०	·१८	८·६०	·१८	८·६०	·१८	८·६०	·१८
		५२६४·५४		५३२७·५५		५३९३·०७		५४५८·४८
	९० = −	५४००·००	−	५४००·००	−	५४००·००	−	५४००·००
	दक्षिणः	−१३५·४६	दक्षिणः	− ७२·४५	दक्षिणः	− ६·९३	उत्तरः	+ ५८·४८

अथ चन्द्रस्य लम्बनबिम्बादिगणितम्—एतदर्थे **न्यासः ६** विलोकनीयः। द्वितीयन्यासे स्पष्टाष्टमं १४२°·७९ अनेन, मासातिथिः १३ अनया च, पञ्चाङ्गगणितस्याष्टमकोष्ठकाल्लब्धा (पृ. ६१) चन्द्रस्य **दिनस्पष्टगतिः** ७३८′। २०″ । अनया **पञ्चाङ्गाध्यायस्य** (पृ. ७१) षोडशपदकाच्चन्द्रस्य **परमलम्बनं** ५५′·३४ **बिम्बं च** ३२′ कलाः लभ्यते।

इति चन्द्रगणितम् ।

इदानीं **सूर्यभोगगणितमाह**— पंचमन्यासे सर्वं स्फुटीकृतम् ।

प्रथमेन साधनेन च दशमपदान्मन्दफलमुपादाय ।
मध्यमसूर्ये योज्यं तेन स्पष्टो भवेत्सहस्रांशुः ॥ १० ॥

उदाहरणम्—प्रथमन्यासे शके १८०६ चैत्रशुक्ल १३ इयां प्रातःकालाद्गतघटीषु भौम (३) वासरे घ. ३३ प. ३·६ मध्यमरविः ३५५°।०′·८ तिष्ठति। तत्र प्रथमकरणं २७६°·३ अनेन पंचमन्यासे दशमपदाल्लब्धेन मन्दफलेन + १°।५४′·३ युतो जातः **स्पष्टरविः** ३५६°।५५′·१ ।

रविः सर्वदा क्रान्तिवृत्ते भ्रमति। अतस्तस्य शराभावः। चन्द्रशरवशेन रविरपि कदाचित्परमावधावेकविकलापरिमितो विक्षिप्यते, परं त्विदं विक्षेपणमत्यल्पमत उपेक्षणीयम्।

न्यासः ५ । स्पष्टसूर्यगणितम् ।

कोष्ठक-निर्देशः	चै. १३. वा. ३. घ. ३३. प. ३·६.	चै. १४. वा. ४. घ. ३२. प. ७·३	चै. १५. वा. ५. घ. ३१. प. ११·०	चै. १६. वा. ६. घ. ३०. प. १४·७
न्यासः १ मंदफलं को. १०	अं. क. म. रविः ३५५। ०·८ उपकर. २७६·३ } + १।५४·३	अं. क. ३५५।५९·० उपकर. २७७·३ } + १।५४·०	अं. क. ३५६।५७·२ उपकर. २७८·२ } + १।५३·८	अं. क. ३५७।५५·४ उपकर. २७९·२ } + १।५३·४
	स्पष्टरविः, ३५६।५५·१	३५७।५३·०	३५८।५१·०	३५९।४८·८

न्यासः ६ । चन्द्रसूर्यगणितस्य तुलनापुरस्कृतं सारम् । शके १८०६

(इ. स. १८८४ नाटिकल–ज्योतिर्गणितयोः तुलना)

ग्रामः	ग्रंथः	दिवसः	मध्यमकालः	स्पष्टचन्द्रः	शरः	बिंबं	लंबनं	स्पष्टरविः	बिंबं
			वा. घ. प.	अं. क. वि.	अं. क. वि.	क.	क.	अं. क. वि.	क.
उज्ज.	ज्यो०	चै. शु. १३	३ ३३ ४	१५५।३७।६	–२।१५।२८	३०·१६	५५।३४	३५६।५५।६	३१·९४
ग्रीनि.	नाटि०	एप्रिल ८	३ ५ २७	१५५।३६।५५	–२।१५।३६	३०·१५	५५।२४	३५६।५५।६	३१·९९
उज्ज.	ज्यो०	चै. शु. १४	४ ३२ ७	१६७।४१।५४	–१।१२।२७	२९·९७	५४·९४	३५७।५३।१	३१·९३
ग्रीनि.	नाटि०	एप्रिल ९	४ ४ ३०	१६७।४१।४६	–१।१२।२९	२९·९५	५४·८७	३५७।५३।१	३१·९८
उज्ज.	ज्यो०	चै. शु. १५	५ ३१ ११	१७९।३८।६	–०। ६।५६	२९·७९	५४·५९	३५८।५१।०	३१·९२
ग्रीनि.	नाटि०	एप्रिल १०	५ ३ ३४	१७९।३७।४०	–०। ६।५२	२९·८०	५४·५२	३५८।५०।५५	३१·९७
उज्ज.	ज्यो०	चै. व. १	६ ३० १५	१९१।२६।२४	+०।५८।२९	२९·६५	५४·३०	३५९।४८।४८	३१·९१
ग्रीनि.	नाटि०	एप्रिल ११	६ २ ३८	१९१।२६।४	+०।५८।२१	२९·६३	५४·३०	३५९।४८।४५	३१·९६

इति चन्द्रसूर्यगणितम् ।

अथान्तर्न्यासः ।

समकालान्तरितेभ्यो राशिभ्योऽर्धान्तरस्थराशीनाम् ।
कर्तुमियत्तां सूक्ष्मामन्तर्न्यासाख्यपद्धतिं चक्षे ॥ ११ ॥

चन्द्रस्य गतेः शीघ्रत्वादुच्चस्थानात्पततः पाषाणस्य गतिरिव चन्द्रगतिरनुक्षणं भिद्यते । अतश्चन्द्रस्य विकलावधिसौक्ष्म्ये साधितेऽप्येकयैव गत्या अस्य दीर्घकालचालनमयुक्तम् । यथा यथा चालनमल्पकालिकं भवति तथा तथा सूक्ष्मताधिक्यं संपद्यते ।

उक्तं च **श्रीभास्कराचार्यैः**—

" समीपतिथ्यन्तसमीपचालनं विधोस्तु तत्कालजयैव युज्यते ।
सुदूरसंचालनमाद्यया यतः प्रतिक्षणं सा न समा महत्त्वतः " इति ।

अतः सूक्ष्मतासिध्यर्थं प्रत्यहं चतुष्पञ्चकृत्वः स्पष्टचन्द्रः साध्यः । परं चन्द्रगणितगौरवात् असकृत्क्रिया दुःसाध्या । अस्यामापत्तौ **अन्तर्न्यास** एव सुलभोपायः । ५९ घटीगत्या चालितश्चन्द्रः परमावधौ ८ कलाः व्यभिचरति । २९·५ घटीगत्या चालितश्चन्द्रः परमावधिप्रसङ्गे वास्तवस्थानादेकां कलां व्यभिचरेत् । षष्ठन्यासे चै. १३।१४।१५।१६ तिथीनां द्विविधचंद्रयोर्मध्ये क्रमेण ११,८,२६,२० विकलात्मकं अंतरं दृश्यते । अग्रे चै. १७।१८।१९।२० तिथीनां चंद्रेषु तदनुषंगेन चंद्रशरेषु च, परमावधिप्रसंगे इतोप्यधिकतरं विकलात्मकं अंतरं भवेत् । किंतु परमावधिप्रसङ्गोऽपि विरलः । अद्यतनश्वस्तनदिनगत्योरन्तरं यदा द्वात्रिंशत्कलास्तदैव तस्य प्राप्तिः । अंतिमः **विशेषः** द्रष्टव्यः । अत एव सार्धैकोनत्रिंश(२९॥)द्घटीगत्या यच्चालनं तदेकोनषष्टिघटीगतिचालनादष्टगुणं सूक्ष्मतरं स्यात् । चन्द्रगणितात् ५९ घट्यन्तरिताश्चन्द्रभोगा उत्पद्यन्ते तेषां २९॥ घट्यन्तरे स्फुटीकरणार्थमन्तर्न्यासाख्यां सुगमां रीतिमधः कथयामः ।

ऊर्ध्वाधरं लिखेद्राशींस्त्रींस्तेषामन्तरे स्मृते ।
आद्ये तयोरन्तरयोरन्तरं परसंज्ञकम् ॥ १२ ॥
आद्यान्तरैक्यचरणे चाष्टमांशे परस्य च ।
क्षिप्ते मध्यगते राशौ स्यादधोऽर्धान्तरे स्थितः ॥ १३ ॥
पुनर्मध्यगतो राशिश्चाऽऽद्यसंस्कारवर्जितः ।
परसंस्कारसंयुक्तः स्यादूर्ध्वार्धान्तरे स्थितः ॥ १४ ॥

आदौ त्रीन् राशीनूर्ध्वाधरपंक्तौ विलिख्य द्वितीयराशेः प्रथमं, तृतीयात् द्वितीयं, एवं व्युत्क्रमेण विशोध्य द्वे अन्तरे **आद्येतिसंज्ञके** साध्ये । पुनरेतयोराद्याख्यान्तरयोर्द्वितीयात्प्रथमं विशोध्य **परेतिसंज्ञकमन्तरमानेतव्यम्** । अत्र संशोधनकर्मणि " संशोध्यमानं स्वमृणत्वमेति " इति बीजपद्धतिरनुसरणीया । अनन्तरं द्वितीयराशिः, आद्यान्तरयोगचतुर्थांशः, परान्तरस्याष्टमांशः, एतेषां त्रयाणां यो योगः सैव **द्वितीयतृतीयराश्योरर्धकालान्तरे** तिष्ठतो राशेः परिमितिः । पुनर्द्वितीया राशिः, परान्तरस्याष्टमांशः, एतयोर्योगादाद्यान्तरयोगचतुर्थांशमपास्य यदवशिष्यते सैव **प्रथमद्वितीयराश्योरर्ध**कालान्तरे तिष्ठतो राशेः परिमितिः स्यात् ।

उदाहरणम्—प्राक् (न्यासः ६) साधितेभ्यो मध्यमतिथ्यन्तकालिकेभ्यश्चन्द्रभोगेभ्यः तदर्धकालान्तरे स्थितान् नाम **मध्यमकरणकालिकान्** चन्द्रभोगान्विगणय । (न्या. ७ पश्य.)

न्यासः ७।

ति.	कालः			स्पष्टचंद्रः		आद्यांतरे		परांतरं	
	वा.	घ.	प.	अं.	कः	अं.	क.	अं.	क.
१३	३	३३	३·६	१५५	३७·१				
						१२	४·८		
१४	४	३२	७·३	१६७	४१·९			−०	८·६
						११	५६·२		
१५	५	३१	११·०	१७९	३८·१				
						२४	१·०	−०	८·६

अन्तर्न्यासप्रदर्शनम्

$$\text{अधोर्धान्तरस्थराशिः} = १६७^\circ।४१'\cdot९ + \frac{२४^\circ।१'}{४} - \frac{८'\cdot६}{८}$$

$$= १६७^\circ।४१'\cdot९ + ६^\circ।०'\cdot२५ - १'\cdot०८ = १७३^\circ।४१'\cdot०७$$

$$\text{ऊर्ध्वार्धान्तरस्थराशिः} = १६७^\circ।४१'\cdot९ - ६^\circ।०'\cdot२५ - १'\cdot०९ = १६१^\circ।४०'\cdot५६$$

अथ सूक्ष्मपर्वान्तकालाः।

अन्तर्न्यासोपलब्धौ अर्धान्तरस्थौ राशी स्वस्वस्थाने विन्यस्य, तेषामग्रे तत्तत्कालिकान्केवलाननुपातसिद्धरविभोगान्विलिख्य, चन्द्रसूर्ययोरन्तराणि प्रसाध्य, तेभ्यो ग्रहणगणितेऽपेक्षितं **सूक्ष्मपर्वान्तकालमानयेत्**। यथा—

न्यासः ८। * १३॥ = १३½; १४॥ = १४½

ति०	मध्य. कालः			स्पष्टचन्द्रः		स्पष्टरविः		(चं. − सू.)		अंतरम्	
म०	वा.	घ.	प.	अं.	क.	अं.	क.	अं	क.	अं.	क
१३	३	३३	३·६	१५५	३७·१	३५६	५५·१	१५८	४२·०	५	३४·६
१३॥*	४	२	३५·४	१६१	४०·६	३५७	२४·०	१६४	१६·६	५	३२·३
१४	४	३२	७·३	१६७	४१·९	३५७	५३·०	१६९	४८·९	५	३०·२
१४॥	५	१	३९·१	१७३	४१·१	३५८	२२·०	१७५	१९·१	५	२८·०
१५	५	३१	११·०	१७९	३८·१	३५८	५१·०	१८०	४७·१		

पौर्णमास्यन्ते चन्द्रसूर्ययोरन्तरं १८०° वर्तते, अमान्ते ३६०° अथवा ०। अत एव गुरुवासरे ३१ घ. ११·० प० एतत्कालात्प्राक्पूर्णिमान्तोऽभवदिति स्पष्टम्। तर्हि कस्मिन्क्षणे पुष्पवन्तौ षड्भान्तरितौ आस्तामित्येतस्य ज्ञानार्थं न्यासः नवमः—

न्यासः ९।

ति०	मध्यमकालः	अंतरम्	(चं. − सू.)		अंतरम्
	वा. घ. प.	घ. प.	अं.	क.	अं. क.
१४॥	५। १। ३९·१	२९। ३१·९	१७५	१९·१	५, २८·०
१५	५। ३१। ११·०		१८०	४७·१	

अतोऽनुपातः—यदि सूर्याचन्द्रमसोः इयति ५° २८′·० अन्तरह्रासे २९ घ० ३२ प० कालो गच्छति तर्हि ४७′·१ कलाह्रासे कियानिति अनुपाताल्लब्धः कालः ४ घ० १४·४ प० । पर्वान्तकालस्य प्राक्स्थितत्वादेनं मध्यमकालात्– वा० ५ । ३१ । ११ विशोध्य लब्धः स्पष्टतमः **पर्वान्तकालः** शके १८०६ चैत्रशुक्ल १५ गुरुवासरे उज्जयिन्यां मध्यममानेन २६ घ. ५६·६ प० ।

न्यासः १० । पौर्णिमांतकालिकचंद्रादीनां तुलनात्मकं प्रदर्शनम् ।

ग्रंथः	दिवसः	मध्यमकालः	स्पष्टचंद्रः	शरः	बिंबं	लंबनं	स्पष्टरविः	बिंबं.
		वा. घ. प.	अं. क. वि.	अं. क. वि.	क.	क. वि.	अं. क. वि.	क.
ज्यो.	चै.१५अंतः	५ २६ ५६·६	१७८।४६।५०	–०।११।२९	२९·८	५४।२८	३५८।४६।५०	३१·९
नाटि.	एप्रिल १०	५ २६ ५७·५	१७८।४६।४६	–०।११।२७	२९·८	५४।२४	३५८।४६।४६	३२·०

विशेषः— २९॥ घटिकान्तरे स्थितेभ्यो राशिभ्यः पुनः पूर्ववदन्तर्न्यासरीत्या १४॥। (= $१४\frac{३}{४}$ = १४ घ. ४५ प.) घटिकान्तरिता राशयः (चन्द्रभोगाः) आनीताः चेत् तदन्तरालेऽनुपातसिद्धे चन्द्रे परमावधौ ०′·१ (= ६ विकलाः) व्यभिचारः स्यात् ।

इति सूक्ष्मपर्वान्तकालानयनम् ।

उपयुक्ताः विशेषाः

(१) क्षितिजस्थरवेर्लंबनं ८·९५ विकलात्मकमिति गतशुक्रसंक्रमणेन निश्चितम् । रविबिंबं दशगुणितं षट्त्रिंशता भक्तं फलं विकलात्मकं लंबनं भवति । किरणपुरस्सरणसंस्कारस्तु २०·५ विकलासमः प्रागुक्तः गणितागतरवौ हीनः कार्यः । वेधविधौ एतत्संस्कारद्वयस्यापेक्षा ज्ञेया । (पृ. ६३, टिप्पणं विलोक्यम्). ।

(२) सूर्योदयकालः = ६० घ. – ५ प. + व्यस्तचरं + उदयांतरं ।
सूर्यास्तकालः = ३० घ. + ५ प. + चरं + उदयांतरं ।
अयं द्वितीयविशेषः ३० पृष्ठतले उपयुक्तत्वात् तत्र योजनीयः ।

(३) चंद्रस्य आकर्षण हेतोः क्रांतिपातबिंदुः पृष्ठतः पुरतो वा निःसरत्यतः संपातसंस्कारः उद्भवति । किंतु तस्याल्पत्वात् अत्रोक्तायनांशैरेव क्रांत्यादिसाधने न दोषः ।

कोष्ठकः १

अं. = अंशाः] ध्रुवकाः वर्षगतयश्च । [श. = शतांशाः

उपकरणं वर्षगणः ।

शा. श. ति.	वारः			उप. १	उप. २	उप. ३	उप. ४	उप. ५	उप. ६	उप. ७
व. ति.	वा.	घ.	प.	अं०	श.	श.	श.	श.	श.	श.
१८०० १०	६	२०	४.०	२७९.५९	८९.०	५९.०	६४.०	१९.३	४७.४	३४.०
उप०	वर्षगतिः									
१ ११	१	११	४१.८	३५९.९४	७३.३	५८.७	२५.४	२५.३	४८.०	१०.७
२ २२	२	२३	२३.५	३५९.८७	४६.७	१७.४	५०.७	५०.७	९६.०	२१.४
३ ३	३	३५	५.३	३५९.८१	२०.०	७६.१	७६.१	७६.०	४४.०	३२.१
४ १४	४	४६	४७.१	३५९.७५	९३.४	३४.८	१.५	१.३	९२.०	४२.९
५ २५	५	५८	२८.९	३५९.६८	६६.८	९३.५	२६.८	२६.७	४०.०	५३.६
६ ६	०	१०	१०.६	३५९.६२	४०.१	५२.२	५२.२	५२.०	८८.०	६४.३
७ १७	१	२१	५२.४	३५९.५५	१३.५	१०.९	७७.५	७७.३	३६.०	७५.०
८ २८	२	३३	३४.२	३५९.४९	८६.८	६९.६	३.०	२.७	८४.०	८५.७
९ ९	३	४५	१५.९	३५९.४३	६०.२	२८.३	२८.३	२८.०	३२.०	९६.५
१० २०	४	५६	५७.७	३५९.३६	३३.५	८७.०	५३.७	५३.३	८०.०	७.२
२० ११	३	५२	५९.१	३५९.७०	७३.४	७७.६	१०.७	१०.५	६२.८	१४.९
३० १	१	४९	५६.९	३५९.०६	६.९	६४.६	६४.४	६३.९	४२.८	२२.१
४० २२	०	४५	५८.३	३५९.३९	४६.८	५५.३	२१.४	२१.१	२५.६	२९.८
५० १३	६	४१	५९.७	३५९.७३	८६.७	४५.९	७८.४	७८.३	८.४	३७.६
६० ३	४	३८	५७.४	३५९.०९	२०.२	३२.९	३२.१	३१.६	८८.४	४४.८
७० २४	३	३४	५८.८	३५९.४२	६०.२	२३.५	८९.१	८८.८	७१.२	५२.५
८० १५	२	३१	०.२	३५९.७६	०.१	१४.२	४६.१	४६.०	५४.०	६०.३
९० ५	०	२७	५७.९	३५९.१२	३३.६	१.२	९९.८	९९.३	३४.०	६७.४
१०० २६	६	२३	५९.३	३५९.४५	७३.५	९१.८	५६.८	५६.५	१६.८	७५.२
२०० २२	५	४७	५८.७	३५८.९०	४७.०	८३.७	१३.७	१३.१	३३.६	५०.४
३०० १८	५	११	५८.०	३५८.३६	२०.५	७५.५	७०.५	६९.६	५०.४	२५.६
४०० १५	५	३५	१.०	३५८.७८	०.३	७१.०	३०.६	३०.०	७०.०	१.३
५०० ११	४	५९	०.४	३५८.२३	७३.८	६२.८	८७.५	८६.५	८६.८	७६.५
६०० ७	४	२२	५९.७	३५७.६८	४७.३	५४.७	४४.३	४३.०	३.६	५१.७
७०० ३	३	४६	५९.१	३५७.१३	२०.८	४६.५	१.२	९९.६	२०.४	२६.९
८०० ०	४	१०	२.१	३५७.५५	०.७	४२.०	६१.३	५९.९	४०.०	२.६
९०० २६	३	३४	१.४	३५७.०१	७४.२	३३.८	१८.१	१६.५	५६.८	७७.८
१००० २२	२	५८	०.८	३५६.४६	४७.६	२५.७	७५.०	७३.०	७३.६	५३.०
२००० १५	६	५५	५.२	३५३.८९	१.७	५५.०	५३.३	४९.९	५०.१	६.५
३००० ७	२	५३	६.०	३५०.३४	४९.३	८०.६	२८.२	२२.९	२३.८	५९.५
४००० ०	६	५०	१०.५	३४७.७७	३.४	९.९	६.५	९९.७	०.३	१३.१
५००० २२	२	४८	११.३	३४४.२३	५१.०	३५.६	८१.५	७२.८	७३.९	६६.१
१०००० १५	६	३५	२६.२	३२९.४३	८.५	७४.९	६६.३	४९.३	५८.६	३२.७

कोष्ठकः १। (द्वितीयार्धम्)

अं. = अंशाः] ध्रुवकाः वर्षगतयश्च। [श. = शतांशाः

उपकरणं = वर्षगणः।

उप. ८	उप. ९	चन्द्रः		रविः		उप.१०	उप.११	उप.१२	शा. श.
अं०	अं०	अं०	क०	अं०	क०	श.	श०	श०	व०
२८·८३	१७१·७८	१०८	४७·२	३५८	१७·२	४१·६	६६·७	८·७	१८००
वर्षगतिः									उप०
३१९·२७	१५१·२९	१३१	५६·४	३५९	५६·४	२५·३	७३·३	१६·७	१
२७८·५४	३०२·५८	२६३	५२·७	३५९	५२·७	५०·७	४६·७	३३·३	२
२३७·८१	९३·८८	३५	४९·१	३५९	४९·१	७६·१	२०·०	५०·०	३
१९७·०८	२४५·१७	१६७	४५·५	३५९	४५·५	१·४	९३·३	६६·७	४
१५६·३५	३६·४६	२९९	४१·८	३५९	४१·८	२६·८	६६·७	८३·४	५
११५·६१	१८७·७५	७१	३८·२	३५९	३८·२	५२·१	४०·०	०·०	६
७४·८८	३३९·०४	२०३	३४·६	३५९	३४·६	७७·५	१३·३	१६·७	७
३४·१५	१३०·३४	३३५	३०·९	३५९	३०·९	२·८	८६·७	३३·४	८
३५३·४२	२८१·६३	१०७	२७·३	३५९	२७·३	२८·२	६०·०	५०·०	९
३१२·६९	७२·९२	२३९	२३·७	३५९	२३·७	५३·५	३३·३	६६·७	१०
२६६·२४	१५८·८६	१३१	४५·५	३५९	४५·५	१०·६	७३·३	३३·५	२०
२१८·९३	२३१·७८	११	९·२	३५९	९·२	६४·१	६·७	०·२	३०
१७२·४८	३१७·७२	२६३	३१·१	३५९	३१·१	२१·२	४६·७	६७·०	४०
१२६·०३	४३·६७	१५५	५३·०	३५९	५३·०	७८·३	८६·७	३३·८	५०
७८·७२	११६·५९	३५	१६·६	३५९	१६·६	३१·९	२०·०	०·५	६०
३२·२७	२०२·५३	२८७	३८·५	३५९	३८·५	८९·०	६०·०	६७·३	७०
३४५·८३	२८८·४७	१८०	०·४	०	०·४	४६·१	०·०	३४·१	८०
२९८·५२	१·३९	५९	२४·१	३५९	२४·१	९९·६	३३·३	०·८	९०
२५२·०७	८७·३३	३११	४५·९	३५९	४५·९	५६·७	७३·३	६७·६	१००
१४४·१३	१७४·६७	२६३	३१·९	३५९	३१·९	१३·४	४६·७	३५·१	२००
३६·२०	२६२·००	२१५	१७·८	३५९	१७·८	७०·०	२०·०	२·७	३००
२८९·१३	२·३६	१८०	२·०	०	२·०	३०·३	०·०	७०·३	४००
१८१·२०	८९·७०	१३१	४७·९	३५९	४७·९	८७·०	७३·३	३७·९	५००
७३·२६	१७७·०३	८३	३३·९	३५९	३३·९	४३·७	४६·७	५·५	६००
३२५·३३	२६४·३६	३५	१९·८	३५९	१९·८	०·४	२०·०	७३·१	७००
२१८·२६	४·७२	०	४·०	०	४·०	६०·६	०·०	४०·७	८००
११०·३३	९२·०६	३११	५०·०	३५९	५०·०	१७·३	७३·३	८·३	९००
२·३९	१७९·३९	२६३	३५·९	३५९	३५·९	७४·०	४६·७	७५·८	१०००
५·६५	११·८०	१८०	१०·०	०	१०·०	५१·६	०·०	५१·७	२०००
८·०४	१९१·२०	८३	४५·९	३५९	४५·९	२५·६	४६·७	२७·५	३०००
११·३०	२३·६१	०	२०·०	०	२०·०	३·१	०·०	३·४	४०००
१३·६९	२०३·००	२६३	५५·९	३५९	५५·९	७७·१	४६·७	७९·२	५०००
२८·२४	५९·०२	१८०	५०·०	०	५०·०	५७·८	०·०	५८·५	१००००

*कोष्ठकः ३।

अं. = अंशाः] तिथिगतिः। [श. = शतांशाः

उपकरणं = तिथिगणः।

उपकरणम् तिथिगणः	वारः			उप० १	उप० २	उप० ३	उप० ४	उप० ५	उप० ६	उप० ७
ति०	वा०	घ०	प०	अं०	श०	श०	श०	श०	श०	श०
१	०	५९	३·७	०·९७	६·४	३·७	३·३	३·८	२·८	०·६
२	१	५८	७·३	१·९४	१२·८	७·३	६·६	७·७	५·६	१·१
३	२	५७	११·०	२·९१	१९·२	११·०	९·९	११·५	८·५	१·७
४	३	५६	१४·७	३·८८	२५·६	१४·६	१३·२	१५·४	११·३	२·३
५	४	५५	१८·३	४·८५	३२·०	१८·३	१६·५	१९·२	१४·१	२·८
६	५	५४	२२·०	५·८२	३८·४	२२·०	१९·८	२३·०	१६·९	३·४
७	६	५३	२५·७	६·७९	४४·८	२५·६	२३·१	२६·९	१९·८	४·०
८	०	५२	२९·४	७·७६	५१·२	२९·३	२६·४	३०·७	२२·६	४·५
९	१	५१	३३·०	८·७३	५७·६	३३·०	२९·७	३४·६	२५·४	५·१
१०	२	५०	३६·७	९·७०	६४·०	३६·६	३३·०	३८·४	२८·२	५·७
२०	५	४१	१३·४	१९·४०	२७·९	७३·२	६६·१	७६·८	५६·५	११·४
३०	१	३१	५०·१	२९·११	९१·९	९·९	९९·१	१५·३	८४·७	१७·१
४०	४	२२	२६·८	३८·८१	५५·९	४६·५	३२·१	५३·७	१३·०	२२·७
५०	०	१३	३·५	४८·५१	१९·९	८३·१	६५·१	९२·१	४१·२	२८·४
६०	३	३	४०·२	५८·२१	८३·८	१९·७	९८·२	३०·५	६९·५	३४·१
७०	५	५४	१६·९	६७·९१	४७·८	५६·४	३१·२	६८·९	९७·७	३९·८
८०	१	४४	५३·६	७७·६१	११·८	९३·०	६४·२	७·३	२६·०	४५·४
९०	४	३५	३०·३	८७·३२	७५·७	२९·६	९७·३	४५·८	५४·२	५१·१
१००	०	२६	७·१	९७·०२	३९·७	६६·२	३०·३	८४·२	८२·५	५६·८
२००	०	५२	१४·१	१९४·०४	७९·४	३२·४	६०·६	६८·४	६५·०	१३·६
३००	१	१८	२१·२	२९१·०६	१९·१	९८·७	९०·९	५२·६	४७·४	७०·४
१५	०	४५	५५·१	१४·५५	९६·०	५४·९	४९·५	५७·६	४२·४	८·५

* द्वितीयः कोष्ठकः ९२ तमे पृष्ठे वर्तते।

कोष्ठकः ३ ।

अं. = अंशाः] तिथिगतिः । [श. = शतांशाः

उपकरणं तिथिगणः ।

उप. ८	उप. ९	चन्द्रः		सूर्यः		उप. १०	उप. ११	उप. १२	तिथिगणः
अं.	अं.	अं.	क.	अं.	क.	श.	श.	श.	ति.
०·८६	१३·०२	१२	५८·२	०	५८·२	३·६	६·७	०·०	१
१·७२	२६·०४	२५	५६·४	१	५६·४	७·१	१३·३	०·१	२
२·५८	३९·०७	३८	५४·६	२	५४·६	१०·७	२०·०	०·१	३
३·४४	५२·०९	५१	५२·८	३	५२·८	१४·३	२६·७	०·२	४
४·३०	६५·११	६४	५१·१	४	५१·१	१७·९	३३·३	०·२	५
५·१६	७८·१३	७७	४९·३	५	४९·३	२१·४	४०·०	०·३	६
६·०२	९१·१६	९०	४७·५	६	४७·५	२५·०	४६·७	०·३	७
६·८८	१०४·१८	१०३	४५·७	७	४५·७	२८·६	५३·३	०·४	८
७·७४	११७·२०	११६	४३·९	८	४३·९	३२·१	६०·०	०·४	९
८·६१	१३०·२२	१२९	४२·१	९	४२·१	३५·७	६६·७	०·४	१०
१७·२१	२६०·४५	२५९	२४·२	१९	२४·२	७१·४	३३·३	०·९	२०
२५·८२	३०·६७	२९	६·३	२९	६·३	७·२	०·०	१·३	३०
३४·४२	१६०·८९	१५८	४८·४	३८	४८·४	४२·९	६६·७	१·८	४०
४३·०३	२९१·१२	२८८	३०·६	४८	३०.६	७८·६	३३·३	२·२	५०
५१·६३	६१·३४	५८	१२·७	५८	१२·७	१४·३	०·०	२·७	६०
६०·२४	१९१·५६	१८७	५४·८	६७	५४·८	५०·१	६६·७	३·१	७०
६८·८४	३२१·७९	३१७	३६·९	७७	३६·९	८५·८	३३·३	३·६	८०
७७·४५	९२·०१	८७	१९·०	८७	१९·०	२१·५	०·०	४·०	९०
८६·०६	२२२·२३	२१७	१·१	९७	१·१	५७·२	६६·७	४·५	१००
१७२·११	८४·४७	७४	२·२	१९४	२·२	१४·५	३३·३	९·०	२००
२५८·१७	३०६·७०	२९१	३·४	२९१	३·४	७१·७	०·०	१३·५	३००
१२·९१	१९५·३४	१९४	३३·२	१४	३३·२	५३·६	०·०	०·७	१५

कोष्ठकः २। कालान्तरम्। उपकरणं = शालिवाहनशकवर्षाणि।

शा. श.	वारः		उ.१	उ.२	उ.३	उ.४	उ.५	उ.६	उ.७	उ. ८	उ.९	उ१०	उ११	उ१२
	−		−	+	−	+	+	−	−	+	−	+	·	−
व.	घ.	प.	अं.	श.	श.	श.	श.	श.	श.	अं.	अं.	श.	श.	श.
−३१००	३७	५१·१	१·०	·३	९·२	६·७	६·१	६·१	२·८	२३·०९	४·४८	६·४	·	७·८
२४००	२८	२·२	·८	·२	६·८	४·९	४·५	४·५	२·०	१७·०८	३·३२	४·७	·	५·८
१७००	१९	३७·७	·५	·१	४·८	३·५	३·२	३·२	१·५	११·९५	२·३३	३·३	·	४·१
१०००	१२	३९·८	·३	·१	३·१	२·१	२·०	२·०	·९	७·७०	१·५०	२·१	·	२·६
३००	७	१०·३	·२	·०	१·७	१·३	१·२	१·२	·५	४·३६	·८५	१·२	·	१·५
२००	६	३१·१	·२	·०	१·६	१·१	१·१	१·१	·५	३·९६	·७८	१·१	·	१·४
− १००	५	५३·४	·२	·०	१·४	१·०	१·०	१·०	·४	३·५८	·७०	१.०	·	१·२
०	५	१७·६	·२	·०	१·३	·९	·९	·९	·४	३·२१	·६३	·९	·	१·१
+ १००	४	४३·६	·१	·०	१·२	·८	·८	·८	·४	२·८७	·५७	·८	·	१·०
२००	४	११·५	·१	·०	१·०	·७	·७	·७	·३	२·५४	·५०	·७	·	·९
३००	३	४१·३	·१	·०	०·९	·७	·६	·६	·३	२·२४	·४४	·६	·	·८
४००	३	१३·०	·१	·०	·८	·६	·५	·५	·२	१·९५	·३८	·५	·	·७
५००	२	४६·६	·१	·०	·७	·५	·४	·४	·२	१·६९	·३३	·५	·	·६
६००	२	२२·१	·१	·०	·६	·४	·४	·४	·२	१·४४	·२८	·४	·	·५
७००	१	५९·५	·०	·०	·५	·३	·३	·३	·१	१·२१	·२४	·३	·	·४
८००	१	३८·९	·०	·०	·४	·३	·३	·३	·१	१·००	·२०	·३	·	·३
९००	१	२०·२	·०	·०	·३	·२	·२	·२	·१	·८१	·१६	·२	·	·३
१०००	१	३·४	·०	·०	·३	·२	·२	·२	·१	·६४	·१३	·२	·	·२
११००	०	४८·६	·०	·०	·२	·१	·१	·१	·१	·४९	·१०	·१	·	·२
१२००	०	३५·८	·०	·०	·१	·१	·१	·१	·०	·३६	·०७	·१	·	·१
१३००	०	२४·८	·०	·०	·१	·१	·१	·१	·०	·२५	·०५	·१	·	·१
१४००	०	१५·३	·०	·०	·१	·०	·०	·०	·०	·१६	·०३	·०	·	·०
१५००	०	९·०	·०	·०	·१	·०	·०	·०	·०	·०९	·०२	·०	·	·०
१६००	०	४·०	·०	·०	·१	·०	·०	·०	·०	·०४	·०१	·०	·	·०
१७००	०	१·०	·०	·०	·०	·०	·०	·०	·०	·०१	·००	·०	·	·०
१८००	०	०·०	·०	·०	·०	·०	·०	·०	·०	·००	·००	·०	·	·०
१९००	०	१·०	·०	·०	·०	·०	·०	·०	·०	·०१	·००	·०	·	·०
२०००	०	४·०	·०	·०	·०	·०	·०	·०	·०	·०४	·०१	·०	·	·०
२१००	०	९·०	·०	·०	·०	·०	·०	·०	·०	·०९	·०२	·०	·	·०
२२००	०	१६·१	·०	·०	·०	·०	·०	·०	·०	·१६	·०३	·०	·	·०
२३००	०	२५·१	·०	·०	·०	·१	·१	·१	·०	·२५	·०५	·१	·	·१
२४००	०	३६·२	·०	·०	·०	·१	·१	·१	·०	·३६	·०७	·१	·	·१
२५००	०	४९·४	·०	·०	·०	·१	·१	·१	·१	·५०	·१०	·१	·	·२
२६००	१	४·६	·०	·०	·०	·२	·२	·२	·१	·६५	·१३	·२	·	·२
२७००	१	२१·८	·०	·०	·०	·२	·२	·२	·१	·८३	·१६	·२	·	·३
२८००	१	४१·१	·०	·०	·०	·३	·३	·३	·१	१·०२	·२०	·३	·	·३
२९००	२	२·५	·०	·०	·०	·३	·३	·३	·१	१·२४	·२४	·३	·	·४
३०००	२	२५·९	·०	·०	·०	·४	·४	·४	·१	१·४७	·२९	·४	·	·५
३१००	२	५१·४	·०	·०	·०	·४	·४	·४	·२	१·७३	·३४	·५	·	·६
+३२००	३	१९·०	·०	·०	·०	·५	·५	·५	·२	२·०१	·४०	·५	·	·७
	−		−	+	−	+	+	−	−	+	+	+	·	−

कोष्ठकः ४ ।

मध्यमचन्द्रस्य प्रथमसंस्कारः ।

प्रथममुपकरणम् ।

उप.	अं. ०	अं. ३०	अं. ६०	अं. ९०	अं. १२०	अं. १५०	अं. १८०	अं. २१०	अं. २४०	अं. २७०	अं. ३००	अं. ३३०
अं.	क.	क.	क.	क.	क.	क.	क.	क.	क.	क.	क.	क.
०	५०·०	५५·४	५९·४	६१·०	५९·६	५५·६	५०·०	४४·४	४०·४	३९·०	४०·६	४४·६
१	५०·२	५५·६	५९·५	६१·०	५९·५	५५·४	४९·८	४४·२	४०·३	३९·०	४०·७	४४·८
२	५०·४	५५·७	५९·६	६१·०	५९·४	५५·२	४९·६	४४·१	४०·२	३९·०	४०·८	४४·९
३	५०·६	५५·९	५९·७	६१·०	५९·३	५५·०	४९·४	४३·९	४०·१	३९·०	४०·९	४५·१
४	५०·८	५६·१	५९·८	६१·०	५९·२	५४·९	४९·२	४३·७	४०·१	३९·०	४१·०	४५·३
५	५०·९	५६·२	५९·९	६१·०	५९·१	५४·७	४९·०	४३·६	४०·०	३९·१	४१·१	४५·५
६	५१·१	५६·४	५९·९	६०·९	५९·०	५४·५	४८·८	४३·४	३९·९	३९·१	४१·३	४५·६
७	५१·३	५६·५	६०·०	६०·९	५८·९	५४·३	४८·६	४३·३	३९·८	३९·१	४१·४	४५·७
८	५१·५	५६·७	६०·१	६०·९	५८·८	५४·२	४८·४	४३·१	३९·७	३९·२	४१·५	४५·९
९	५१·७	५६·८	६०·२	६०·९	५८·७	५४·१	४८·२	४३·०	३९·७	३९·२	४१·६	४६·१
१०	५१·९	५७·०	६०·३	६०·९	५८·६	५३·९	४८·०	४२·८	३९·६	३९·२	४१·७	४६·३
११	५२·१	५७·१	६०·३	६०·८	५८·५	५३·७	४७·८	४२·७	३९·६	३९·२	४१·८	४६·४
१२	५२·३	५७·३	६०·४	६०·८	५८·३	५३·५	४७·६	४२·६	३९·५	३९·३	४२·०	४६·६
१३	५२·५	५७·४	६०·४	६०·८	५८·२	५३·३	४७·४	४२·४	३९·४	३९·३	४२·१	४६·८
१४	५२·६	५७·६	६०·५	६०·७	५८·०	५३·१	४७·२	४२·२	३९·४	३९·४	४२·२	४७·०
१५	५२·८	५७·७	६०·६	६०·६	५७·९	५२·९	४७·१	४२·१	३९·३	३९·४	४२·३	४७·२
१६	५३·०	५७·८	६०·६	६०·६	५७·८	५२·८	४६·९	४२·०	३९·३	३९·५	४२·४	४७·४
१७	५३·२	५७·९	६०·७	६०·६	५७·६	५२·६	४६·७	४१·८	३९·२	३९·६	४२·६	४७·५
१८	५३·४	५८·०	६०·७	६०·५	५७·४	५२·४	४६·५	४१·७	३९·२	३९·६	४२·७	४७·७
१९	५३·६	५८·२	६०·८	६०·५	५७·३	५२·२	४६·३	४१·५	३९·२	३९·७	४२·९	४७·९
२०	५३·७	५८·३	६०·८	६०·४	५७·२	५२·०	४६·१	४१·४	३९·१	३९·७	४३·०	४८·१
२१	५३·९	५८·४	६०·८	६०·३	५७·०	५१·८	४५·९	४१·३	३९·१	३९·८	४३·२	४८·३
२२	५४·१	५८·५	६०·८	६०·३	५६·९	५१·६	४५·८	४१·२	३९·१	३९·९	४३·३	४८·५
२३	५४·३	५८·६	६०·९	६०·२	५६·७	५१·४	४५·७	४१·१	३९·१	४०·०	४३·५	४८·७
२४	५४·४	५८·७	६०·९	६०·१	५६·६	५१·२	४५·५	४१·०	३९·१	४०·१	४३·६	४८·९
२५	५४·५	५८·९	६०·९	६०·०	५६·४	५१·०	४५·३	४०·९	३९·०	४०·१	४३·८	४९·१
२६	५४·७	५९·०	६१·०	५९·९	५६·३	५०·८	४५·१	४०·८	३९·०	४०·२	४३·९	४९·२
२७	५४·९	५९·१	६१·०	५९·९	५६·१	५०·६	४५·०	४०·७	३९·०	४०·३	४४·१	४९·४
२८	५५·१	५९·२	६१·०	५९·८	५५·९	५०·४	४४·८	४०·६	३९·०	४०·४	४४·३	४९·६
२९	५५·२	५९·३	६१·०	५९·७	५५·८	५०·२	४४·६	४०·५	३९·०	४०·५	४४·४	४९·८
३०	५५·४	५९·४	६१·०	५९·६	५५·६	५०·०	४४·४	४०·४	३९·०	४०·६	४४·६	५०·०

कोष्ठकः ५ ।

मध्यमचन्द्रस्य द्वितीयादिचतुर्थान्ताः संस्काराः ।

द्वितीयादिचतुर्थान्तान्युपकरणानि ।

उप. शतां.	०	१	२	३	४	५	६	७	८	९	उप. शतां.
	य			द्वितीयः संस्कारः				उप. २			
	क०	क०	क०	क०	क०	क०	क०	क०	क०	क०	
०	३·०	२·८	२·६	२·५	२·३	२·२	२·०	१·९	१·७	१·६	०
१०	१·५	१·३	१·२	१·१	१·०	·९	·८	·८	·७	·६	१०
२०	·५	·५	·५	·४	·४	·४	·४	·४	·४	·५	२०
३०	·५	·६	·७	·८	·८	·९	१·०	१·१	१·२	१·३	३०
४०	१·५	१·६	१·७	१·९	२·०	२·२	२·३	२·५	२·६	२·८	४०
५०	३·०	३·२	३·४	३·५	३·७	३·८	४·०	४·१	४·३	४·४	५०
६०	४·५	४·७	४·८	४·९	५·०	५·१	५·२	५·२	५·३	५·४	६०
७०	५·५	५·५	५·५	५·६	५·६	५·६	५·६	५·६	५·५	५·५	७०
८०	५·५	५·४	५·३	५·२	५·२	५·१	५·०	४·९	४·८	४·७	८०
९०	४·५	४·४	४·३	४·१	४·०	३·८	३·७	३·५	३·४	३·२	९०
	र			तृतीयः संस्कारः				उप. ३			
०	१·५	१·६	१·७	१·८	१·८	१·९	२·०	२·१	२·२	२·२	०
१०	२·३	२·४	२·४	२·५	२·६	२·६	२·७	२·७	२·८	२·८	१०
२०	२·८	२·९	२·९	२·९	२·९	२·९	२·९	२·९	२·९	२·९	२०
३०	२·८	२·८	२·८	२·७	२·७	२·६	२·६	२·५	२·४	२·४	३०
४०	२·३	२·२	२·२	२·१	२·०	१·९	१·८	१·८	१·७	१·६	४०
५०	१·५	१·४	१·३	१·२	१·२	१·१	१·०	·९	·८	·८	५०
६०	·७	·६	·६	·५	·४	·४	·३	·३	·२	·२	६०
७०	·२	·१	·१	·१	·१	·१	·१	·१	·१	·१	७०
८०	·२	·२	·२	·३	·३	·४	·४	·५	·६	·६	८०
९०	·७	·८	·८	·९	१·०	१·१	१·२	१·२	१·३	१·४	९०
	ल			चतुर्थः संस्कारः				उप. ४			
०	२·०	२·१	२·२	२·४	२·५	२·६	२·७	२·८	२·९	३·०	०
१०	३·१	३·२	३·३	३·४	३·५	३·५	३·६	३·७	३·७	३·८	१०
२०	३·८	३·८	३·९	३·९	३·९	३·९	३·९	३·९	३·९	३·८	२०
३०	३·८	३·८	३·७	३·७	३·६	३·५	३·५	३·४	३·३	३·२	३०
४०	३·१	३·०	२·९	२·८	२·७	२·६	२·५	२·४	२·२	२·१	४०
५०	२·०	१·९	१·८	१·६	१·५	१·४	१·३	१·२	१·१	१·०	५०
६०	·९	·८	·७	·६	·५	·५	·४	·३	·३	·२	६०
७०	·२	·२	·१	·१	·१	·१	·१	·१	·१	·२	७०
८०	·२	·२	·३	·३	·४	·५	·५	·६	·७	·८	८०
९०	·९	१·०	१·१	१·२	१·३	१·४	१·५	१·६	१·८	१·९	९०

कोष्ठकः ५ ।

मध्यमचन्द्रस्य पञ्चमादिसप्तमान्ताः संस्काराः ।

पञ्चमादिसप्तमान्तान्युपकरणानि ।

उप० शतां.	०	१	२	३	४	५	६	७	८	९	उप० शतां.
	व			पञ्चमः संस्कारः				उप. ५			
	क०	क०	क०	क०	क०	क०	क०	क०	क०	क०	
०	१·५	१·४	१·३	१·३	१·२	१·१	१·१	१·०	·९	·९	०
१०	·८	·७	·७	·६	·६	·५	·५	·५	·४	·४	१०
२०	·४	·३	·३	·३	·३	·३	·३	·३	·३	·३	२०
३०	·४	·४	·४	·५	·५	·५	·६	·६	·७	·७	३०
४०	·८	·९	·९	१·०	१·१	१·१	१·२	१·३	१·३	१·४	४०
५०	१·५	१·६	१·७	१·७	१·८	१·९	१·९	२·०	२·१	२·१	५०
६०	२·२	२·३	२·३	२·४	२·४	२·५	२·५	२·५	२·६	२·६	६०
७०	२·६	२·७	२·७	२·७	२·७	२·७	२·७	२·७	२·७	२·७	७०
८०	२·६	२·६	२·६	२·५	२·५	२·५	२·४	२·४	२·३	२·३	८०
९०	२·२	२·१	२·१	२·०	१·९	१·९	१·८	१·७	१·७	१·६	९०
	श			षष्ठः संस्कारः				उप. ६			
०	३·५	३·७	३·९	४·१	४·३	४·५	४·७	४·९	५·१	५·३	०
१०	५·४	५·६	५·८	५·९	६·०	६·२	६·३	६·४	६·५	६·६	१०
२०	६·७	६·७	६·८	६·८	६·८	६·८	६·८	६·८	६·८	६·७	२०
३०	६·७	६·६	६·५	६·४	६·३	६·२	६·०	५·९	५·८	५·६	३०
४०	५·४	५·३	५·१	४·९	४·७	४·५	४·३	४·१	३·९	३·७	४०
५०	३·५	३·३	३·१	२·९	२·७	२·५	२·३	२·१	१·९	१·७	५०
६०	१·६	१·४	१·२	१·१	१·०	·८	·७	·६	·५	·४	६०
७०	·३	·३	·२	·२	·२	·२	·२	·२	·२	·३	७०
८०	·३	·४	·५	·६	·७	·८	१·०	१·१	१·२	१·४	८०
९०	१·६	१·७	१·९	२·१	२·३	२·५	२·७	२·९	३·१	३·३	९०
	ष			सप्तमः संस्कारः				उप. ७			
०	१·५	१·४	१·३	१·२	१·२	१·१	१·०	·९	·८	·८	०
१०	·७	·६	·६	·५	·४	·४	·३	·३	·२	·२	१०
२०	·२	·१	·१	·१	·१	·१	·१	·१	·१	·१	२०
३०	·२	·२	·२	·३	·३	·४	·४	·५	·६	·६	३०
४०	·७	·८	·८	·९	१·०	१·१	१·२	१·२	१·३	१·४	४०
५०	१·५	१·६	१·७	१·८	१·८	१·९	२·०	२·१	२·२	२·२	५०
६०	२·३	२·४	२·४	२·५	२·६	२·६	२·७	२·७	२·८	२·८	६०
७०	२·८	२·९	२·९	२·९	२·९	२·९	२·९	२·९	२·९	२·९	७०
८०	२·८	२·८	२·८	२·७	२·७	२·६	२·६	२·५	२·४	२·४	८०
९०	२·३	२·२	२·२	२·१	२·०	१·९	१·८	१·८	१·७	१·६	९०

कोष्ठकः ६।

मध्यमचन्द्रस्य नवमः संस्कारः।

नवममुपकरणम्।

उप.	अं० ०	अं० ३०	अं० ६०	अं० ९०	अं० १२०	अं० १५०	अं० १८०	अं० २१०	अं० २४०	अं० २७०	अं० ३००	अं० ३३०	उप.
अं०	क०	क०	क०	क०	क०	क०	क०	क०	क०	क०	क०	क०	अं०
०	७·०	१·१	१·१	७·०	१२·९	१२·९	७·०	१·१	१·१	७·०	१२·९	१२·९	०
१	६·८	१·०	१·२	७·२	१३·०	१२·८	६·८	१·०	१·२	७·२	१३·०	१२·८	१
२	६·५	·९	१·४	७·५	१३·१	१२·६	६·५	·९	१·४	७·५	१३·१	१२·६	२
३	६·३	·८	१·५	७·७	१३·२	१२·५	६·३	·८	१·५	७·७	१३·२	१२·५	३
४	६·१	·७	१·७	७·९	१३·३	१२·३	६·१	·७	१·७	७·९	१३·३	१२·३	४
५.	५·८	·६	१·८	८·२	१३·४	१२·२	५·८	·६	१·८	८·२	१३·४	१२·२	५
६	५·६	·६	२·०	८·४	१३·४	१२·०	५·६	·६	२·०	८·४	१३·४	१२·०	६
७	५·४	·५	२·१	८·६	१३·५	११·९	५·४	·५	२·१	८·६	१३·५	११·९	७
८	५·१	·४	२·३	८·९	१३·६	११·७	५·१	·४	२·३	८·९	१३·६	११·७	८
९	४·९	·४	२·५	९·१	१३·६	११·५	४·९	·४	२·५	९·१	१३·६	११·५	९
१०	४·७	·३	२·६	९·३	१३·७	११·४	४·७	·३	२·६	९·३	१३·७	११·४	१०
११	४·५	·३	२·८	९·५	१३·७	११·२	४·५	·३	२·८	९·५	१३·७	११·२	११
१२	४·२	·३	३·०	९·८	१३·७	११·०	४·२	·३	३·०	९·८	१३·७	११·०	१२
१३	४·०	·२	३·२	१०·०	१३·७	१०·८	४·०	·२	३·२	१०·०	१३·७	१०·८	१३
१४	३·८	·२	३·४	१०·२	१३·८	१०·६	३·८	·२	३·४	१०·२	१३·८	१०·६	१४
१५	३·६	·२	३·६	१०·४	१३·८	१०·४	३·६	·२	३·६	१०·४	१३·८	१०·४	१५
१६	३·४	·२	३·८	१०·६	१३·८	१०·२	३·४	·२	३·८	१०·६	१३·८	१०·२	१६
१७	३·२	·२	४·०	१०·८	१३·८	१०·०	३·२	·२	४·०	१०·८	१३·८	१०·०	१७
१८	३·०	·३	४·२	११·०	१३·७	९·८	३·०	·३	४·२	११·०	१३·७	९·८	१८
१९	२·८	·३	४·५	११·२	१३·७	९·५	२·८	·३	४·५	११·२	१३·७	९·५	१९
२०	२·६	·३	४·७	११·४	१३·७	९·३	२·६	·३	४·७	११·४	१३·७	९·३	२०
२१	२·५	·४	४·९	११·५	१३·६	९·१	२·५	·४	४·९	११·५	१३·६	९·१	२१
२२	२·३	·४	५·१	११·७	१३·६	८·९	२·३	·४	५·१	११·७	१३·६	८·९	२२
२३	२·१	·५	५·४	११·९	१३·५	८·६	२·१	·५	५·४	११·९	१३·५	८·६	२३
२४	२·०	·६	५·६	१२·०	१३·४	८·४	२·०	·६	५·६	१२·०	१३·४	८-४	२४
२५	१·८	·६	५·८	१२·२	१३·४	८·२	१·८	·६	५·८	१२·२	१३·४	८·२	२५
२६	१·७	·७	६·१	१२·३	१३·३	७·९	१·७	·७	६·१	१२·३	१३·३	७·९	२६
२७	१·५	·८	६·३	१२·५	१३·२	७·७	१·५	·८	६·३	१२·५	१३·२	७·७	२७
२८	१·४	·९	६·५	१२·६	१३·१	७·५	१·४	·९	६·५	१२·६	१३·१	७·५	२८
२९	१·२	१·०	६·८	१२·८	१३·०	७·२	१·२	१·०	६·८	१२·८	१३·०	७·२	२९
३०	१·१	१·१	७·०	१२·९	१२·९	७·०	१·१	१·१	७·०	१२·९	१२·९	७·०	३०

कोष्ठकः ७ ।

दक्षिणकदम्बाच्चन्द्रस्यान्तरम् ।

संस्कृतं नवमोपकरणम् ।

उप०	२७० अं०	३०० अं०	३३० अं०	० अं०	३० अं०	६० अं०	उप०
अं०	क०	क०	क०	क०	क०	क०	अं०
०	५०७९·२	५१२०·७	५२३३·७	५३८८·०	५५४२·३	५६५५·३	३०
१	५०७९·३	५१२३·४	५२३८·४	५३९३·४	५५४६·९	५६५८·०	२९
२	५०७९·४	५१२६·२	५२४३·२	५३९८·८	५५५१·५	५६६०·६	२८
३	५०७९·७	५१२९·०	५२४८·०	५४०४·१	५५५६·०	५६६३·१	२७
४	५०८०·०	५१३२·१	५२५२·८	५४०९·५	५५६०·५	५६६५·५	२६
५	५०८०·५	५१३५·२	५२५७·६	५४१४·९	५५६५·०	५६६७·८	२५
६	५०८०·९	५१३८·३	५२६२·५	५४२०·२	५५६९·४	५६७०·०	२४
७	५०८१·५	५१४१·५	५२६७·५	५४२५·६	५५७३·७	५६७२·२	२३
८	५०८२·२	५१४४·७	५२७२·५	५४३०·९	५५७८·०	५६७४·३	२२
९	५०८३·०	५१४८·१	५२७७·५	५४३६·२	५५८२·२	५६७६·२	२१
१०	५०८३·९	५१५१·६	५२८२·५	५४४१·६	५५८६·३	५६७८·१	२०
११	५०८४·९	५१५५·१	५२८७·६	५४४६·९	५५९०·४	५६७९·९	१९
१२	५०८६·०	५१५८·७	५२९२·७	५४५२·१	५५९४·५	५६८१·६	१८
१३	५०८७·२	५१६२·३	५२९७·८	५४५७·४	५५९८·५	५६८३·२	१७
१४	५०८८·४	५१६६·०	५३०३·०	५४६२·६	५६०२·४	५६८४·८	१६
१५	५०८९·८	५१६९·८	५३०८·२	५४६७·८	५६०६·२	५६८६·२	१५
१६	५०९१·२	५१७३·६	५३१३·४	५४७३·०	५६१०·०	५६८७·६	१४
१७	५०९२·८	५१७७·५	५३१८·६	५४७८·२	५६१३·७	५६८८·८	१३
१८	५०९४·४	५१८१·५	५३२३·९	५४८३·३	५६१७·३	५६९०·०	१२
१९	५०९६·१	५१८५·६	५३२९·१	५४८८·४	५६२०·९	५६९१·१	११
२०	५०९७·९	५१८९·७	५३३४·४	५४९३·५	५६२४·४	५६९२·१	१०
२१	५०९९·८	५१९३·८	५३३९·८	५४९८·५	५६२७·९	५६९३·०	९
२२	५१०१·७	५१९८·०	५३४५·१	५५०३·५	५६३१·३	५६९३·८	८
२३	५१०३·८	५२०२·३	५३५०·४	५५०८·५	५६३४·५	५६९४·५	७
२४	५१०६·०	५२०६·६	५३५५·८	५५१३·५	५६३७·७	५६९५·१	६
२५	५१०८·२	५२११·०	५३६१·१	५५१८·४	५६४०·८	५६९५·६	५
२६	५११०·५	५२१५·५	५३६६·५	५५२३·२	५६४३·९	५६९६·०	४
२७	५११२·९	५२२०·०	५३७१·९	५५२८·०	५६४७·०	५६९६·३	३
२८	५११५·४	५२२४·५	५३७७·२	५५३२·८	५६४९·८	५६९६·६	२
२९	५११८·०	५२२९·१	५३८२·६	५५३७·६	५६५२·६	५६९६·७	१
३०	५१२०·७	५२३३·७	५३८८·०	५५४२·३	५६५५·३	५६९६·८	०
	२४० अं०	२१० अं०	१८० अं०	१५० अं०	१२० अं०	९० अं०	

कोष्ठकः ८।

चन्द्रशरस्य प्रथमसंस्कारः।

उपकरणं = २४ मासिकी तिथिः – मध्यमनवमोपकरणं – ९° अंशाः।

उप. अं०	२७० अं०	३०० अं०	३३० अं०	० अं०	३० अं०	६० अं०	उप. अं०
	क०	क०	क०	क०	क०	क०	
०	०·०	१·२	४·४	८·८	१३·२	१६·४	३०
१	०·०	१·२	४·५	८·९	१३·३	१६·५	२९
२	०·०	१·३	४·७	९·१	१३·४	१६·६	२८
३	०·०	१·४	४·८	९·३	१३·६	१६·७	२७
४	०·०	१·५	४·९	९·४	१३·७	१६·८	२६
५	०·०	१·६	५·१	९·६	१३·८	१६·९	२५
६	०·०	१·७	५·२	९·७	१३·९	१६·९	२४
७	०·१	१·८	५·४	९·८	१४·०	१७·०	२३
८	०·१	१·९	५·५	१०·०	१४·२	१७·०	२२
९	०·१	२·०	५·६	१०·२	१४·३	१७·१	२१
१०	०·१	२·१	५·८	१०·३	१४·४	१७·१	२०
११	०·२	२·२	५·९	१०·५	१४·५	१७·१	१९
१२	०·२	२·३	६·१	१०·६	१४·६	१७·२	१८
१३	०·२	२·४	६·२	१०·८	१४·७	१७·२	१७
१४	०·२	२·५	६·४	१०·९	१४·९	१७·३	१६
१५	०·३	२·६	६·५	११·१	१५·०	१७·३	१५
१६	०·३	२·७	६·७	११·२	१५·१	१७·४	१४
१७	०·४	२·८	६·८	११·४	१५·२	१७·४	१३
१८	०·४	२·९	७·०	११·५	१५·३	१७·४	१२
१९	०·५	३·०	७·१	११·७	१५·४	१७·४	११
२०	०·५	३·१	७·३	११·८	१५·५	१७·५	१०
२१	०·६	३·३	७·४	१२·०	१५·६	१७·५	९
२२	०·६	३·४	७·६	१२·१	१५·७	१७·५	८
२३	०·७	३·५	७·८	१२·२	१५·८	१७·५	७
[illegible]	०·७	३·६	७·९	१२·४	१५·९	१७·६	६
२५	[illegible]	३·८	८·०	१२·५	१६·०	१७·६	५
२६	०·९	३·९	८·२	१२·७	१६·१	१७·६	४
२७	०·९	४·०	८·३	१२·८	१६·२	१७·६	३
२८	१·०	४·१	८·५	१२·९	१६·३	१७·६	२
२९	१·१	४·३	८·७	१३·१	१६·४	१७·६	१
३०	१·२	४·४	८·८	१३·२	१६·४	१७·६	०
	२४० अं०	२१० अं०	१८० अं०	१५० अं०	१२० अं०	९० अं०	

कोष्ठकः ९ ।

चन्द्रशरस्य संस्काराः ।

उपकरणम्	द्वितीयः संस्कारः २	तृतीयः संस्कारः ३	चतुर्थः संस्कारः ४	पंचमः संस्कारः ५	षष्ठः संस्कारः ६	सप्तमः संस्कारः ७	अष्टमः संस्कारः ८	उपकरणम्
	च. द्वादशयुतं चतुर्थं उप.	छ. द्वादशयुतं पञ्चमं उप.	ज. द्वादशोनं षष्ठं उप.	झ. द्वादशोनं सप्तमं उप.	ञ. द्वादशोनं दशमं उप.	ट. द्वादशोन-मेकादशं उप.	ठ. द्वादशं उप.	
श.	क०	क०	क०	क०	क०	क०	क०	श.
७५	·००	·८०	·८०	१·४०	·००	१·००	·८०	७५
७७	·०१	·७९	·७९	१·४०	·०१	१·००	·७९	७३
७९	·०१	·७९	·७८	१·३८	·०१	·९८	·७९	७१
८१	·०३	·७७	·७७	१·३५	·०३	·९६	·७७	६९
८३	·०५	·७५	·७५	१·३०	·०५	·९४	·७५	६७
८५	·०८	·७२	·७२	१·२६	·०८	·९०	·७२	६५
८७	·११	·६९	·६९	१·२०	·११	·८६	·६९	६३
८९	·१४	·६६	·६६	१·१४	·१४	·८२	·६६	६१
९१	·१७	·६३	·६३	१·०७	·१७	·७६	·६३	५९
९३	·२२	·५८	·५८	१·००	·२२	·७१	·५८	५७
९५	·२७	·५३	·५३	·९२	·२७	·६४	·५३	५५
९७	·३२	·४८	·४८	·८३	·३२	·५८	·४८	५३
९९	·३७	·४३	·४३	·७४	·३७	·५३	·४३	५१
१	·४३	·३७	·३७	·६६	·४३	·४७	·३७	४९
३	·४८	·३२	·३२	·५७	·४८	·४२	·३२	४७
५	·५३	·२७	·२७	·४८	·५३	·३६	·२७	४५
७	·५८	·२२	·२२	·४०	·५८	·२९	·२२	४३
९	·६३	·१७	·१७	·३३	·६३	·२४	·१७	४१
११	·६६	·१४	·१४	·२६	·६६	·१८	·१४	३९
१३	·६९	·११	·११	·२०	·६९	·१४	·११	३७
१५	·७२	·०८	·०८	·१४	·७२	·१०	·०८	३५
१७	·७५	·०५	·०५	·१०	·७५	·०६	·०५	३३
१९	·७७	·०३	·०३	·०५	·७७	·०४	·०३	३१
२१	·७९	·०१	·०१	·०२	·७९	·०२	·०१	२९
२३	·७९	·०१	·०१	·००	·७९	·०१	·०१	२७
२५	·८०	·००	·००	·००	·८०	·००	·००	२५

कोष्ठकः १० ।

रविमन्दफलम् ।

प्रथमोपकरणम् ।

उप.	० अं०		३० अं०		६० अं०		९० अं०		१२० अं०		१५० अं०		उप.
अं०	क.	वि.	क.	वि.	क.	वि.	क.	वि.	क.	वि.	क.	वि.	अं०
०	०	०	५६	३७	९८	४९	११५	१७	१००	५४	५८	४३	३०
१	१	५८	५८	२०	९९	४९	११५	१९	९९	५४	५६	५७	२९
२	३	५६	६०	२	१००	४८	११५	१८	९८	५२	५५	९	२८
३	५	५५	६१	४३	१०१	४५	११५	१५	९७	४९	५३	२१	२७
४	७	५३	६३	२२	१०२	४१	११५	१०	९६	४३	५१	३१	२६
५	९	५१	६५	१	१०३	३४	११५	४	९५	३६	४९	४०	२५
६	११	४८	६६	३९	१०४	२६	११४	५४	९४	२६	४७	४९	२४
७	१३	४६	६८	१५	१०५	१६	११४	४३	९३	१५	४५	५६	२३
८	१५	४३	६९	५०	१०६	४	११४	३०	९२	२	४४	३	२२
९	१७	४०	७१	२४	१०६	५०	११४	१५	९०	४८	४२	९	२१
१०	१९	३७	७२	५६	१०७	३४	११३	५७	८९	३२	४०	१४	२०
११	२१	३३	७४	२८	१०८	१६	११३	३८	८८	१४	३८	१८	१९
१२	२३	२९	७५	५८	१०८	५६	११३	१६	८६	५४	३६	२१	१८
१३	२५	२५	७७	२७	१०९	३५	११२	५२	८५	३३	३४	२४	१७
१४	२७	२०	७८	५४	११०	११	११२	२६	८४	१०	३२	२६	१६
१५	२९	१५	८०	२०	११०	४६	१११	५८	८२	४५	३०	२८	१५
१६	३१	९	८१	४५	१११	१८	१११	२८	८१	१९	२८	२८	१४
१७	३३	३	८३	८	१११	४८	११०	५६	७९	५१	२६	२९	१३
१८	३४	५६	८४	३०	११२	१७	११०	२२	७८	२२	२४	२९	१२
१९	३६	४९	८५	५०	११२	४३	१०९	४५	७६	५२	२२	२८	११
२०	३८	४०	८७	९	११३	७	१०९	७	७५	१९	२०	२७	१०
२१	४०	३२	८८	२६	११३	३०	१०८	२७	७३	४६	१८	२५	९
२२	४२	२२	८९	४२	११३	५०	१०७	४४	७२	११	१६	२३	८
२३	४४	१२	९०	५६	११४	८	१०७	०	७०	३४	१४	२१	७
२४	४६	१	९२	८	११४	२४	१०६	१४	६८	५६	१२	१९	६
२५	४७	४९	९३	१९	११४	३८	१०५	२५	६७	१७	१०	१६	५
२६	४९	३७	९४	२९	११४	५०	१०४	३५	६५	३७	८	१३	४
२७	५१	२३	९५	३६	११५	०	१०३	४३	६३	५५	६	१०	३
२८	५३	९	९६	४२	११५	८	१०२	४८	६२	१२	४	७	२
२९	५४	५४	९७	४६	११५	१४	१०१	५२	६०	२८	२	३	१
३०	५६	३७	९८	४९	११५	१७	१००	५४	५८	४३	०	०	०
	+ ३३० अं०		+ ३०० अं०		+ २७० अं०		+ २४० अं०		+ २१० अं०		+ १८० अं०		

अथ ग्रहगणिताध्यायस्तृतीयः।

आदावहर्गणः।

अत्र पञ्चमकोष्ठकाद्यष्टमकोष्ठकान्तं गणिते कृते ये ध्रुवाः सिध्यन्ति तेऽभीष्टवर्षे उज्जयिन्यां मेषसंक्रमणकालिकाः भवंति। अतस्तान् मध्यवर्तिदिनानां गत्या प्रचाल्य तेऽभीष्टदिवसे प्रातःकालिकाः कार्याः। एतदर्थं मेषसंक्रमणात्प्रागग्रे वा इष्टः प्रातःकालः कियद्भिर्दिवसैः सावयवैरन्तरितः स्यादित्यादौ अवगन्तव्यम्। अतोऽहर्गणः साध्यः। अस्य गणितं आर्याचतुष्केणोच्यते—

आद्यपदादजसंक्रमकालिकमध्यध्रुवान्समानीय।
तिथिभोग्यांशं तिथ्यामुपसाधनयोरहर्गणे वारे॥ १॥

क्षिप्त्वा पूरिततिथ्या तिथिनिकरं विगणयेद्यथापूर्वम्।
तेन द्वितीयकोष्ठात्प्रगतीर्लब्ध्वा क्षिपेच्च सर्वेषु॥ २॥

रविचन्द्रसाधनाभ्यां लब्धफलाभ्यां तृतीयतुर्याभ्याम्।
वारद्युगणौ युक्तौ चेत्तौ तिथ्यन्तकालिकौ स्याताम्॥ ३॥

वाराग्रोनदिवागण औदयिकः स्यादवन्तिकापुर्याम्।
रेखान्तरेण हीनः स स्यादुदये विवक्षिते ग्रामे॥ ४॥

आद्यपदाद्वर्षगणकरणेनेष्टवर्षीयान्मेषसंक्रमणकालिकांस्तिथि-रविकरण-चन्द्रकरण-वाराहर्गणानां मध्यमध्रुवकान्विगणय्य, लब्धतिथेर्भोग्यांशं यथागतं न्यासः १, चतुर्थपंक्तौ दर्शितवत् तिथौ, रविकरणे, चन्द्रकरणे चेति त्रिषु ध्रुवेषु दत्त्वा, तथा च निजषष्टिलवोनितं तिथिभोग्यांशं वारध्रुवे अहर्गणध्रुवे च क्षिप्त्वा, ५ पंक्तिस्थां पूरिततिथिं तिथिध्रुवं मत्वा पश्चान्नगणितवत्तिथिगणं विगणयेत्। अनेन तिथिगणेन द्वितीयकोष्ठात्प्रगतीर्लब्ध्वा ताः सर्वेषु ध्रुवेषु क्षिपेत्। अनन्तरं रविचन्द्राख्याभ्यां साधनाभ्यां क्रमेण तृतीयचतुर्थाभ्यां कोष्ठकाभ्यां फले संपाद्य ताभ्यामुभाभ्यां पूर्वसिद्धौ मध्यमतिथ्यन्तकालिकौ वाराहर्गणौ युतौ चेत्तावुभौ स्पष्टतिथ्यन्तकालिकौ भवतः। एवं सिद्धो यो वारस्तस्य भुक्तांशेन नाम अग्रेण, सिद्धः अहर्गणो रहितश्चेच्छेषमुज्जयिन्यां विवक्षिते दिवसे औदयिकोऽहर्गणो भवति। पुरान्तरे औदयिकाहर्गणे साध्यमाने सति तद्रेखान्तरेणोज्जयिन्यौदयिकाहर्गणो हीनः कार्यः। अत्राहर्गणो मध्यमकालात्मकः इत्यवधेयम्। तथा च तिथिध्रुवादिष्टा तिथिः प्राक् स्थिता चेद्विपरीतशोधनेन तिथिगण ऋणं भवति। ऋणतिथिगणेन लब्धा गतिरपि ऋणम्।

उदाहरणम्— शालिवाहन शके १८५० वर्षे चैत्रशुक्ल १५ पूर्णिमायां गुरुवासरे **उज्जयिन्यां** (५ एप्रिल १९२८ इसवी) प्रातःकालिकमहर्गणानयनमग्रे १ न्यासे पूर्वार्धे दर्शितं तद्यथा—

अधस्तनात् (न्यासः १) पूर्वार्धात् १० पंक्तितः ज्ञायते यत्— **उज्जयिन्यां** च० शु० स्पष्ट १५ मान्ते ५·१०६ वासरो जात इति। अस्मिन्पूर्णांकस्थाने ५ संति, अतो जातः गुरुवारः। सूर्योदयात् ·१०६ दिनांशे नाम ·१०६ × ६० = ६·३६० घटीषु, १५ तिथिः, समाप्तिमगच्छत्। तथा च १२ पंक्तौ प्रातरहर्गणः – ७·९७७ आसीदिति स्फुटम्।

न्यासः १ । आदिमं पूर्वार्धम् । अधस्तनं उत्तरार्धं ज्ञेयम् ।

पंक्तिः	विवरणम्	शकः	तिथिः	रविकरणं	चंद्रकरणं	वारः	अहर्गणः
		व.	ति.	अंशाः	अंशाः	दि.	दिवसाः
१	को. १. ध्रुवाः ...	१८००	९.८२०	९९.४	२०९.६	६.१५८	०.०००
२	को. १. गतिः ...	५०	१३.१२१	३५९.८	१२६.१	६.८१९	०.०००
३	मेषसंक्रमकाले ...	१८५०	२२.९४१	९९.२	३३५.७	५.९७७	०.०००
४	तिथेः भोग्यांशः ...	०	.०५९	.१	.१	.०५८	.०५८
५	पूरिततिथिध्रुवः ...	१८५०	२३.०००	९९.३	३३५.८	६.०३५	+ ०.०५८
६	तिथिगणः(१५–२३) =–८, को. २,...		–८.०००	– ७.८	– ६.९	– ०.८७५	– ७.८७५
७			१५.०००	९१.५	३२८.९	+ ५.१६०	– ७.८१७
८	कोष्ठकः ३, रविकरणं ९१°.५					+ ०.१७३	+ ०.१७३
९	कोष्ठकः ४, चंद्रकरणं ३२८.९ मासिकी तिथिः १५, ...					– ०.२२७	– ०.२२७
१०	चैत्रशुद्ध १५, स्पष्टतिथ्यन्ते					५.१०६	– ७.८७१
११	वारस्य अग्रं नाम भुक्तांशः, शोधनार्थं ऋणम्					– .१०६	– ०.१०६
१२	**उज्जयिन्यां** प्रातःकाले शके १८५० चै.शु.१५ गुरुवासरे अहर्गणः						– ७.९७७
१३	**काश्या** रेखान्तरम् । (शोधनार्थं अस्य चिन्हं व्यत्यस्तम्) ...						– ०.०२०
१४	काश्यां प्रातःकाले अहर्गणः					५.०००	– ७.९९७
१५	पौर्णिमातिथ्यन्तः ५.१०६ = गुरुवासरे ६ घ. २२ प. । केतकीपंचांगे ६ घ. २२ प. ।						

अधस्तने **न्यासः १ उत्तरार्धे** अन्यदुदाहरणम्— शके १८५० आश्विन शु. १० बुधवारे प्रातःकालिकमहर्गणं गणय । चैत्रादेराश्विनशुक्ल १० पर्यन्तं मध्ये (को. १३ उत्तरार्धदर्शनेन) श्रावणस्याधिकत्वात् २२० तिथयः संभवंति । तस्माच्चैत्रशुद्ध १५ या अग्रे (२२० – १५ =) २०५ तिथीनां गत्या चालनमवश्यम् । प्र. न्यासे उत्तरार्धे १७ पंक्तौ तच्चालनं विन्यस्तम् । १९।२०।२१।२२ पंक्तयः सुलभज्ञेयाः ।.अन्ते च बुधवासरे प्रातःकालिकः अहर्गणः १९४.०२३ दिनात्मकः इति फलितम् ।

पंक्तिः	विवरणम्	शकः	तिथिः	रविकरणं	चंद्रकरणं	वारः	अहर्गणः
१६	चैत्र शुद्ध १५ मा	१८५०	१५	९१°.५	३२८°.९	५.१६०	– ७.८१७
१७	कोष्ठः २ गतिः {		२००	१९४.०	१७२.१	०.८७१	१९६.८७१
			५	४.८	४.३	४.९२२	४.९२२
१८		१८५०	२२०	२९०.३	१४५.३	३.९५३	१९३.९७६
१९	को. ३, को. ४, रविचंद्रसंस्कारौ ... दि० –०.१६३; + ०.५९४					=+ .४३१	+ .४३१
२०	उज्जयिनी शके १८५० आश्विनशुद्ध १० मी समाप्तिकाले ...					४.३८४	१९४.४०७
२१	वाराग्रम् (प्रातःकालार्थं संशोध्य)					– .३८४	– .३८४
२२	**उज्जयिन्यां प्रातःकाले अहर्गणः**					४.०००	१९४.०२३

अथ बुधादीनां सप्तानां ग्रहाणां गणितम् ।

इदं सप्तग्रहगणितं, मध्यमं रविमध्यं भूमध्यमिति त्रिविधम् । तेष्वादौ **मध्यमगणितम्** । तत्र गुरुशनी परस्परमाकृष्य परस्परयोर्मध्यमस्थानयोर्महदन्तरमुत्पादयतः । परमिदमन्तरं मन्दगतिकम् । वर्षमध्ये गुरोराकर्षणस्य परमा वृद्धिः ३′·२५, शनेः १′·२८ । तस्माद्वर्षस्य मुखेऽन्ते चैवं द्विवारमाकर्षणं साधितं चेन्मध्येऽनुपातेनास्य सूक्ष्ममानं सिध्येत् । अतो हेतोरेतन्मन्दगतिगणितं प्रथमं विधाय पश्चात्केन्द्रदिवसनीचपातानां मध्यममानानयनं कुर्मः । अत्र **केन्द्रदिवसा** नाम ग्रहस्य स्वनीचस्थानातिक्रमणादूर्ध्वं याता दिवसाः । सर्वाण्याकर्षणोपकरणचक्राणि **सहस्रखण्डात्मकानि** । अत एवोपकरणाङ्कानामैक्याल्लब्धाः सहस्राद्युत्तरस्थानीया अङ्का उपेक्षणीयाः ।

अथ ग्रहाणां मध्यमगणितम् ।

पदात्पञ्चमाख्यात् सुराचार्यशन्योर्मिथःकर्षणानां च षट् साधनानि ।
समादौ समान्ते समानीय तैश्च दिनाकर्षणान्याहरेन्नन्द ९ कोष्ठात् ॥ ५ ॥
समाद्यन्तकर्षैक्ययोरन्तरेणानुपातादभीष्टे दिने तत्प्रसाध्यम् ।
पदात्षष्ठकात्केन्द्रघस्राः प्रसाध्यास्ततोऽहर्गणेनेष्टकालेन योज्याः ॥ ६ ॥
पदात्सप्तमान्नीचभोगा ग्रहाणां पदादष्टमात्पातभोगाः प्रसाध्याः ।
समादौ सकृत्साधिता नीचपाताः समान्तं स्थिरा अल्पवेगात्प्रकल्प्याः ॥ ७ ॥

अथान्वयार्थौ—पञ्चमपदात् गुरुशन्योर्मिथः कर्षणानां षडुपकरणानि वर्षादौ वर्षान्ते चैवं द्विवारं समानीय तैः करणैर्नन्दसंख्याकान्नवमकोष्ठकाद्दिनात्मकानि दिनरूपाणि कर्षणान्याहरेत्, गृह्णीयात् । एवं सिद्धानि गुरुशन्योः कषणादिनानि पृथगेकीकृत्य वर्षमध्ये यस्मिन्कस्मिंश्चिद्दिने गणिते कर्तव्ये सति वर्षाद्यन्तयोर्दिनात्मकाकर्षणयोरन्तरेणानुपातात्त्रैराशिकात्तद्दिनभवमाकर्षणमानयेत् । तद्यथा । न्या. २ उत्तरार्धे १४ पंक्तौ आकर्षणस्य वर्षगतिः साधिता । ततः १२ मासैरियं गतिस्तदा इष्टमासैः का गतिः इत्यनुपातेनेष्टमासभवमाकर्षणं साध्यम् । ४ न्यासे २० पंक्तौ गुरुशन्योरेकमाससंभवं कर्षणं अनयैव रीत्या संसाध्य विन्यस्तम् । ***वरुणेन्द्रयोः** कर्षणादिवसास्तयोर्नवमकोष्ठकाच्छकोपकरणेन साध्याः । तद्यथा । पृ. १३२, को. ९ स्तंभे, १८२२।१८७२ समशकवर्षसंमुखस्थयोः वरुणेंद्राकर्षणाङ्कयोः अंतरेण (१८५० − १८२२ =) २८ वर्षभवाकर्षणं अनुपातेन संसाध्य, तस्य + ०·४८, − ०·७४, इति ४ न्यासे २० पंक्तौ विन्यासः कृतः ।

अनन्तरं षष्ठकोष्ठकात्सर्वेषां ग्रहाणां **केन्द्रदिवसा**नानीय ते प्राक्सिद्धेनाहर्गणेन सूर्योदयाद्गतेनेष्टकालेन च युक्ताः कार्याः । एवं कृते ते इष्टकालिका भवन्ति ।

तथैव सप्तमपदात् ग्रहाणां **नीचभोगा** अष्टमपदाच्च तेषां **पातभोगाः** प्रसाध्याः । अत्र ये पातभोगास्ते ऋजुगत्यर्थं चक्रशुद्धाः कृताः । **वरुणेन्द्रयो**र्नीचगतिस्तयोर्ज्ञातकालाल्पत्वान्न सम्यगुपलभ्यते, अतस्तयोर्नीचानयनं नापेक्षितम् । तयोर्नीचस्थाने सदैव शून्यं स्थाप्यम् ।

नीचपातयोरल्पगतित्वाद्वर्षमुखे तयोः सकृदानयनेन वर्षमध्ये सर्वत्र क्रिया निर्वहति । क्रान्तिपातस्य प्रयोजनं भूमध्यग्रहसाधनोत्तरं ग्रहाणां विषुवांशक्रान्तिसाधनप्रसङ्गे । न चात्र । (न्यासः ६ द्रष्टव्यः) । तत्र ८२ पंक्तौ क्रांतिपातस्य नाम अयनांशानामुपयोगः प्रदर्शितः ।

उदाहरणम्— शके १८५० चैत्रशुक्ल १५ यां गुरुवासरे (५ एप्रिल १९२८ इसवी वर्षे) उज्जयिन्यां बुधादीनां सर्वेषां ग्रहाणां प्रातःकालिकानि **भूमध्यदृश्यस्थाना**न्यानय । तत्र प्रथमं

---

* पाश्चिमात्येषु—यूरेनस्, नेप्च्यून्, इति नाम्ना प्रसिद्धावेतौ ग्रहौ शकवर्षात् १७०० पश्चादुपज्ञातौ । आद्यो हर्शलेन श. व. १७०५, अपरो लवरेण श. व. १७६८ । एतौ ग्रहौ दूरदर्शिकया काचनालिकया विना नैव दृश्येते । तयोरुपलब्धिः केतकीपरिमलभाष्ये वर्णिता ।

रविमध्यदृश्यानि गुरुशन्योराकर्षणानि साधयितव्यानि। तदर्थं न्यासः २, पूर्वार्धोत्तरार्धयोरवतारः कृतः। द्वितीय न्यासस्थ पंक्तयः क्रमशः सावधानेन पठनीयाः।

न्यासः २। (पूर्वार्धम्)

पंक्तिः	विवरणम्	शकवर्ष	उप. १	उप. २	उप. ३	उप. ४	उप. ५	उप. ६
१	को. ५. ध्रु·	१८००	६६१	४९१	८३०	८३०	३४७	६६०
२	को. ५. गतिः	५०	३३८	१६०	५१८	८२१	५४	६४२
३	चै.शु.१५ (ट)	१८५०	९९९	६५१	३४८	६५१	४०१	३०२
४	एक वर्षगतिः	१	६०	८३	५०	१६	१	३३
५	चै.शु.१५ (ठ)	१८५१	५९	७३४	३९८	६६७	४०२	३३५

उपारितनन्यासे ३ पंक्तौ शके १८५० वर्षादौ नाम मेषसंक्रमणकाले ९९९।६५१ इत्याद्यो ये उपकरणांकास्तेष्वेकवर्षगतिं प्रक्षिप्य ५ पंक्तौ जनिता उपकरणाङ्काः ५९। ७३४ इत्या० चै० शु० १५ शके १८५१ मेषसंक्रमणकालिकाः। मेषसंक्रमणं चैत्रशुक्ल १५ याः प्रागग्रे वा सदा पञ्चदशाल्पदिनान्तरे तिष्ठति। पञ्चदशदिनान्तरे परममाकर्षणन्यूनाधिक्यं कलाधा दशमांश उत्पद्यते। अत एव स्वल्पान्तरत्वान्मेषसंक्रमकालिकान्युपकरणानि चैत्रशुक्ल १५ यां संजाता मीत्यनुमोयम्। वा पृ. १३१, को. ९, योज्यम्। **इदानीमुपकरणैः** कर्षणदिनान्यानीयन्ते—

न्यासः २। (उत्तरार्धम्)

पंक्तिः	शके १८५० **वर्षादौ** आकर्षणम्				शके १८५० **वर्षान्ते** आकर्षणम्			
	विवरणम् (को. ९)		गुरोः दि०	शनेः दि०	विवरणम् (को. ९)		गुरोः दि०	शनेः दि०
६	उप. १	९९९	०·३४	—	उप. १.	५९	·४२	—
७	उप. २	६५१	०·०८	—	उप. २.	७३४	·२४	—
८	उप. ३	३४८	०·३६	०·९५	उप. ३.	३९८	·४३	·८५
९	उप. ४	६५१	०·३०	५·९६	उप. ४.	६६७	·२६	६·२१
१०	उप. ५	४०१	६·६३	११·३५	उप. ५.	४०२	६·६०	११·४७
११	उप. ६	३०२	—	४·५६	उप. ६.	३३५	—	५·६७
१२	चै. शु. १५, १८५०		७·७१	२२·८२	चै. १५, शके १८५१		७·९५	२४·२०
१३					चै. १५. शके १८५०		७·७१	२२·८२
१४					अंतरं वर्षगतिः ...		०·२४	१·३८

एवं (१२ पंक्तौ) शके १८५० वर्षस्याऽऽद्यन्तयो**र्गुरुशन्योराकर्षण**दिवसाः सिद्धाः। अन्तराले वर्षगत्या त्रैराशिकं कृत्वा ते साध्याः। यथा गुरोः + ७·७१। शनेः + २२·८३। एतौ न्यासः ४, २० पंक्तौ निहिताः। **वरुणेन्द्रयोर्नवमकोष्ठकाच्छकवर्षेण** १८५० क्रमात्, दि. + ०·४८, दि. - ०·७४ आकर्षणं लभ्यते। न्यासः ४, पं. २० विलोक्या।

अथ **केन्द्रदिवसनीचपातानामुदाहरणम्— तृतीयन्यासं** पश्यत। तत्र **प्रथमपंक्तौ** क्षेपभूतान् **षष्ठकोष्ठकस्थान्** रवेः केन्द्रदिवसान् १००·७४१ विलिख्य २ पंक्तौ तेषु ५० **वर्षाणां**

३६५·०९३ गतिदिवसान्प्रक्षिप्य लब्धा मेषसंक्रमकालिका रविकेन्द्रदिवसाः ४६५·८३४। एतेषु (न्यासः १, द्वादशपंक्तौ साधितं) अहर्गणमृणगतं, –७·९७७, तथा गणितस्य प्रातःकालिकत्वा-दिष्टकालार्थं शून्यं च प्रक्षिप्य तृ० न्या० ६ पंक्तौ लब्धाः शके १८५० चैत्रशुक्ल १५ यां गुरौ, उज्जयिन्यां प्रातःकाले रविकेन्द्रदिवसाः ४५७·८५७। (१–६ पंक्तीः विलोकय)

शके १८५० वर्षस्य तिथिपत्रं पञ्चाङ्गाध्यायोक्तरीत्या समाप्य ज्ञायते यत्—चैत्रशुक्ल १५ या अग्रे १५ दिवसैश्चैत्रवदि ३० भवति। तदग्रे १४ दिवसैर्वैशाखशु. १५। तदग्रे १५ दिवसैर्वैशाखकृ० ३०। तदग्रे १५ दिवसैर्ज्येष्ठशु. १५ भवतीति। अत एव चैत्रशुक्ल १५ याः प्रातःकालिका रविकेन्द्रदिवसाः पञ्चदशभिरधिकाः कृताश्चेत्, चैत्रवदि ३० याः प्रातःकालिका भवन्ति। ते पुनः १४ भिर्दिवसैर्युता वैशाखशुक्ल १५ याः प्रातःकालिका भवन्ति। एवं वर्षस्यान्ति-मपक्षपर्यन्तं कृतं चेत्प्रतिपक्षं केन्द्रदिवसा लभ्यन्ते। सूर्येतराणां ग्रहाणामप्यनयैव रीत्या तृतीयन्यासे (१–११) पंक्तिषु दर्शितवत् केन्द्रदिवसान्साध्नुयात्।

रविबुधादीनां नीचपातानयनं सुगमं तत्र तृतीयन्यासे द्वादशादिपंक्तिषु आलोकमात्रेण ज्ञायते। एवं साधिता नीचपाता रविमध्याः स्युः।

इति ग्रहाणां मध्यमगणितम्।

अथ ग्रहाणां रविमध्यगणितम्।

अत्र रविमध्यगणितं नाम रविमध्येम विलोकयमाना ग्रहा आकाशे यस्मिन्स्थाने दृश्येरन् तत्स्थानानयनम्। सूर्यो ग्रहाणां दीर्घवर्तुलाकृतिकक्षाणामेकतरनाभिमाक्रम्य तिष्ठति। अत एवाऽऽदौ तेषां सूर्यमध्यबिन्दौ दृश्यानि स्थानानि निश्चित्य पश्चाद्भूमध्यदृश्यस्थानानि निर्णयेत्।

इदानीं बुधादिकानां सूर्यमध्यसंबन्धिनो भोगा मन्दकर्णाः शरा इत्येषां गणितमुच्यते—

अथाभीष्टकालोद्भवाः केन्द्रघस्रा निजाकर्षणोत्पन्नघस्रैश्च योज्याः॥
दशाख्ये पदे लब्धघस्रान्विलोक्य स्वचक्राधिकाश्चेत्स्वचक्रेण तक्ष्याः॥ ८॥
अथैकादशात्स्वीयचक्राल्पघस्रैर्हरेन्मन्दकेन्द्राणि तानि क्षिपेच्च॥
स्वनीचेषु तेन ग्रहाः सूर्यमध्या भवेयुः स्फुटाः क्रान्तिवृत्तप्रणीताः॥ ९॥
अथैकादशान्मन्दकर्णावशेषैर्युता मध्यमा मन्दकर्णाः स्फुटाः स्युः॥
ततो द्वादशात्कोष्ठकात्संप्रसाध्याः सपातग्रहैर्मार्गणाः सूर्यमध्याः॥ १०॥

मध्यमगणितात्साधिता ये इष्टकालिकाः केन्द्रदिवसास्ते निजनिजाकर्षणोत्पन्नदिवसैः संयोज्याः। एवं जनिता दिवसा दशमकोष्ठके प्रदर्शितेभ्यः स्वस्वभगणदिवसेभ्यो यद्यधिकास्तर्हि तेभ्यो यावन्तो भगणदिवसाः शोध्यन्ते तावतो दिवसान्विशोध्य ते स्वस्वभगणाल्पाः कार्याः। अनन्तरमेभिर्भगणाल्पदिवसैरेकादशकोष्ठकान्मन्दकेन्द्राण्यानीय तानि स्वस्वनीचेषु क्षिपेत्। एवं कृते क्रान्तिवृत्ते सूर्यमध्ये दृश्या ग्रहा भवन्ति। अथ मन्दकर्णगणितम्—मन्दकेन्द्रानयन-समये एकादशकोष्ठकात् ग्रहस्य मन्दकर्णशेषमपि गृहीत्वा तेन तस्यैव कोष्ठकस्य स्कन्धे पठितो मध्यममन्दकर्णो युतश्चेत्स्पष्टमन्दकर्णो भवति। अथ रविमध्यशरगणितम्— पूर्वसिद्धेषु रवि-मध्यग्रहेषु मध्यमगणिते सिद्धान्पातभोगान्संयोज्य सपातग्रहाः साध्याः। एभिर्द्वादशकोष्ठकात् ग्रहाणां सूर्यमध्यशरा आनेयाः। (न्या. ४, पंक्तयः १९–३३ विलोक्याः)

विशेषः—भौमगुरुशनीनां मन्दफलानि, मन्दकर्णाः, शराश्च सहस्रवर्षेषु केश्चित्सूक्ष्मप्र-माणैर्भिद्यन्ते तेषां गणितं वर्तमाने काले नापेक्षितम्। यदा वर्षगणो द्विसहस्रमितो भविष्यति

तदैव तेषां प्रयोजनम्। यदा प्रयोजनं भवति तदा उपर्युक्तं कालांतरं धनर्णं, ४ न्यासे २४।२५ पंक्त्योर्मध्ये निवेश्यम्।

अन्यो विशेषः— नवमश्लोके—"**ग्रहाः सूर्यमध्या भवेयुः**" इति यत्सामान्यं विधानं तेन बुधादिग्रहा एव ग्राह्या न तु सूर्यः, यतः सूर्यो ग्रहो नास्ति किं तु **ग्रहाणामधिपः** शास्ता च। तत्र सूर्यो भूमध्य एव भवतीति ज्ञेयम्।

तृतीयो विशेषः—अत्र ग्रहगणितसाधनीभूतेषु न्यासेषु तत्तत्त्वचरोपकरणानां तत्तत्कोष्ठकोद्धृतानि फलानि दशांशचिह्नादग्रे यावत्संख्याकानि गृहीतानि तावत्संख्याकानि गृहीत्वा गणकैर्गणितं कार्यम्। तद्यथा। आद्यगुणकविन्यासे पंचमन्यासे ४३ पंक्तौ दशांशचिन्हादग्रे, शून्यानि अगणयित्वा, अंकद्वयस्वीकारः कृतः। एवमेव तास्ता पंक्तीः दृष्ट्वा तत्र यथा दर्शितं तथैव अंकग्रहणं कार्यम्। तेन सूक्ष्मतालाभः स्यात्।

उदाहरणम्— **चतुर्थन्यासं** पश्यत। तृतीयन्यासे षष्ठपंक्तौ साधितान् केन्द्रदिवसान् चतुर्थन्यासस्याऽऽदौ १९ पंक्तौ लिखित्वा तेषामधो न्या. २, उत्तरार्धतले साधितान्, **गुर्वादीनां** चतुर्णां ग्रहाणां कर्षणदिवसान्स्वस्वस्थाने २० पंक्तौ विन्यस्य पृथग्योगे कृते जाताः २१ पंक्तौ सूर्यादीनां केन्द्रदिवसाः ज्ञ-संज्ञाः ४५७·८५७, ५४·०८६ इत्या०। अत्र रविकेन्द्रदिवसा दशमपदस्थेभ्यो रविकेन्द्रभगणैकदिवसेभ्योऽधिकाः सन्ति। अत एव रविकेन्द्रदिवसेभ्यः ४५७·८५७, केन्द्रभगणैकदिवसान् ३६५·२६०, अपास्य २२ पंक्तौ लब्धाश्चकाल्पकेन्द्रदिवसाः ९२·५९७ च-संज्ञाः। एभिरेकादशकोष्ठकाद्रवेः **स्पष्टमन्दकेन्द्रं** ९३·१७२ अंशाः लभ्यते। एतस्मिंस्तृतीयन्यासे १४ पंक्तौ संपादितं रविनीचम् २५८·९९५ अंशात्मकं प्रक्षिप्य ४ न्यासे २६ पंक्तौ लब्धो **मन्दस्पष्टो** (भूमध्यस्पष्टो) **रविः** ३५२·१६७ अंशादिः। एवमेव बुधादिग्रहाणां सूर्यमध्यभोगाः साधिताः। एतदर्थे १९–२६ पंक्तयः विलोक्याः।

अथ मन्दकर्णगणितम्—२३ पंक्तिस्थैः रविकेन्द्रदिवसैः ९२·५९७ एकादशकोष्ठकात्सूर्यस्य मन्दकर्णशेषम् + ०·७ लभ्यते। इदं तत्रत्यमध्यममन्दकर्णे १००० संयोज्य २९ पंक्तौ लब्धो रवेः **स्पष्टो मन्दकर्णः** १०००·७। एकादशकोष्टकस्कन्धे मध्यममंदकर्णाः स्थापिताः।

अथ रविमध्यशरगणितम्—सूर्यस्य सदैव शराभावः। २६ पंक्तिस्थः रविमध्यबुधः २६१°·८१४, तृतीयन्यासे १७ पंक्तौ साधितेन स्वकीयपातेन ३२५·३४८ अंशादिना युतो जातः ३१ पंक्तौ **सपातबुधः** २३७·१६२ अंशादिः। अनेन द्वादशकोष्ठकात् **बुधशरः** – ३५२′·६ कलात्मकः लभ्यते। ऋणचिह्नत्वादयं दक्षिणः। एतदर्थे ३०–३३ पंक्तयः विलोक्याः।

इति ग्रहाणां रविमध्यगणितम्।

अथ बुधादिग्रहाणां भूमध्यगणितम्।

तत्राऽऽदौ **भूमध्यग्रहभोगसाधनमुच्यते**—

रव्यूनखेटः किल शीघ्रकेंद्रं। चतुर्दशात्तेन लभेत तस्य॥
इनान्तरं तेन युतो रविः स्यात्। भूमध्यदृष्ट्या स्फुटकल्पखेटः॥ ११॥
त्रयोदशस्थेन समान्तरेण। खेटस्य युक्तं मृदुकर्णशेषम्।
चतुर्दशस्थाद्यगुणेन निघ्नं। फलं हि सूर्यांतरसंस्कृतिर्या॥ १२॥

चतुर्दशस्थश्रवणेन निघ्ना। अनंतरोक्तस्फुटकर्णभक्ता।
लब्धेन युक्तः स्फुटकल्पखेटः। भवेत्सुदृक्प्रत्ययदः कुमध्ये ॥ १३ ॥

अत्रस्यात्प्रथमात्साध्यौ पर्वसंस्कारमार्गणौ ॥ ५ ॥

अयनांशा रविक्रान्तिश्चरं देशान्तरं तथा ।
उदयान्तरमेतानि गणयेच्चन्द्रपर्वणि ॥ ६ ॥

चन्द्रसूर्ययोर्गणिते उक्तवत्प्रथमं सूक्ष्मपर्वान्तकालं प्रसाध्य तत्कालिकौ स्पष्टचंद्रसूर्यौ, राहुः चन्द्रसूर्ययोः स्पष्टदिनगतिः, तथा **पञ्चाङ्गाध्याये** षोडशकोष्टकस्थानि भूभाचन्द्रयोर्मानैक्य-मानान्तर-मान्यखण्डानि साध्यानि । भूभा स्वपंचाशदंशेन ($\frac{1}{50}$) वर्धयित्वा ग्राह्या । लब्धपंचाश-

---

** मध्यमतिथ्यन्तयोर्मध्ये नाम ये मध्यमतिथ्यन्तसमयाः प्रत्यब्द**पञ्चाङ्गगणितावसरे** सिध्यन्ति तेषां ययोर्मध्ये स्पष्टपूर्णिमान्तः पतति तयोस्तत्प्राक्तिथेश्चेति भावः । यथा पृ. ८६, सप्तमे न्यासे १३ । १४ । १५ तिथयः गृहीताः, यतः । १४ । १५ तिथ्योर्मध्ये स्पष्टपौर्णिमान्तः पतितः । तयोः प्राक्तिथिः १३ वर्तते । तां गृहीत्वा अन्तन्यासः कृतः ।

दंशस्य अर्धेन वर्धितं मानैक्यखंडं तेनैव अर्धेन वर्धितं मानान्तरखंडं च ग्राह्यम्। अनन्तरं चन्द्रग्रहणस्य प्रथमकोष्ठकाच्चन्द्रशरं पर्वसंस्कारपलानि च गृह्णीयात्। चन्द्रशरं सूक्ष्मतापेक्षायां सत्यां **चन्द्रसूर्याध्याया**त्साधयेत्।

अत्रोदाहरणम्— शके १८०६ चैत्रशुक्ल १५ यां गुरुवासरे चन्द्रग्रहणमस्ति, अतस्तस्य सायन्तं गणितं कुरु। **बागलकोटे** रेखान्तरं ०, पलानि। अक्षः + १६° १२′।

चैत्रशुक्ल १५ शके १८०६ बागलकोटे

पर्वान्तकालः २६ घ. ५७ प. (पृ. ८७, न्या. १०)।

उपर्युक्तपर्वान्तकालिकाः यथोक्तं करणाल्लब्धाः मूलांकाः।

(१) **अयनांशाः**। ६४ पृ. १० को. १८०६ शके चै. शु. १५ गुरौ २२°। १३′। ३६″।

(२) पृ. ८६, न्या. ८, पौर्णिमादिने ३१ घ. ११ प. समये स्पष्टरविः, ३५८°। ५१′·०। अनुपातेन प्रातःकालिकरविः, ३५८°। २०′। २१″ अयं अयनांशैर्युतः सायनरविः २०°। ३४′। प्रातःकाले पृ. ७२, **रविक्रांतिः**, + ८°। २′। बागलकोटे १६°। १२′ अक्षांशाः। एताभ्यां पृ. ७४, **चरं**, + २३ पलानि। सायनरविणा च पृ. ७३, **उदयांतरं** + २ पलानि।

पृष्ठ ८७, उपर्युक्तविशेषसाहाय्येन—

(३) **सूर्योदयः** = ६० घ. – ५ प. – २३ प. चरं + २ प. उद्. = ५९ घ. ३४ प.

(४) **सूर्यास्तः** = ३० घ. + ५ प. + २३ प. चरं + २ प. उद्. = ३० घ. ३० प.

(५) पृष्ठ ८७, न्यास १०, गुरुवासरे **पर्वान्तघटिकाः** = २६ घ. ५७ प.

४।५ **मूलांकदर्शनेन** अस्मिन्पर्वणि पर्वान्तकालः सूर्यास्तात् प्राक् सार्धघटीत्रयांतरे तिष्ठति। अतोऽस्य ग्रहणस्य गोचरत्वे संशयः। अस्य निरासो गणितस्यान्ते भवेत्।

(६) **स्पष्टसूर्यः**। पर्वान्ते स्पष्टसूर्यः (पृ. ८७, न्या. १०), ३५८°। ४६′। ५०″।

(७) **स्पष्टचंद्रः**। पर्वान्ते स्पष्टचंद्रः (पृ. ८७, न्या. १०,) १७८°। ४६′। ५०″।

(८) **राहुः**। पंचांगाध्यायरीत्या न्यासं बध्वा मध्यमनक्षत्रध्रुवः १६७°। ४०′·२। स च ९°। १७′ अंशैर्युतः फलं मध्यमचंद्रः १७६°। ५७′·२। तृतीयकरणेन, ३५५°। ५३′·४ हीनः फलं १८१°। ३′·८ राहुः। १८०° संयोज्य फलं १°। ४′ केतुः।

(९) **चन्द्रशरः**। पृ. ८७, न्या. १० शरः = – ०°। ११′। ३९″ दक्षिणः।

(१०) **चन्द्रदिनस्पष्टगतिः**। पूर्वोक्तन्यासबंधे द्वितीयोपकरणं १४४°·६। अनेन ६१ पृ. ८ कोष्ठकात् लब्धा चन्द्रगतिः ७२० कलाः। अथवा ८६, पृ. ८ न्यासे दर्शितरीत्या १५॥ तिथौ चन्द्रः १८५°। ३३′। तथाच १४॥ तिथौ चन्द्रः १७३°। ४१′। अनयोरंतरं ११°। ५२′। इदं ५९ घ. ४ पलेषु। ६० घटीषु अनुपातेन १२°। २′ सूक्ष्मतरा चन्द्रगतिः। षष्ट्या विभज्य चन्द्रघटीगतिः १२′। २″। भवति।

(११) **रविस्पष्टदिनगतिः**। पूर्वोक्तन्यासे २७८°·६ प्रथमोपकरणेन ६३ पृ. ९ कोष्ठकात् ५८′·८ रविगतिः। अथवा २७८°·६ + १८०° = ९८°·६ नीचादारभ्य मन्दकेन्द्रम्। पृ. १३४, उपकरणांक ९८। १०० केन्द्रद्विवसयोर्मध्ये इदं ९८°·६ मध्यमकेन्द्रं पतति। पूर्वोक्तोपकरणयोः स्पष्टकेन्द्रांतरं १°·९६१। इदं द्विभक्तं ·९८, षष्टिगुणितं ५८·८ कलाः रविस्पष्टदिनगतिः। षष्ट्या विभज्य रविघटीगतिः ५८·८ विकलाः।

(१२) **पर्वांतसंस्कारः** पर्वांतस्पष्टचंद्रः १७८°। ४६′। ५०″ राहुणा १८१°। ४′ हीनः शेषेण ३५७°। ४२′·८, चन्द्रग्रहणप्रथमकोष्टकात् लब्धः १′·१ कलासंस्कारः। टिप्पणी साहाय्येन, + ६, पलात्मकः संस्कारः।

(१३) **भूभासाधनम्**। सूक्ष्मचन्द्रगतिः ७२२′। अनया पृ. ७१, को. १, भूभा ७७·६४। इयं स्वपंचाशदंशेन १·५५ वर्धिता कलात्मका ७९·१९ गोचरभूभा गणिते ग्राह्या।

(१४) **मानैक्यखंडम्**। ७१ पृ. १६ को. लब्धं ५३·७५। उपर्युक्त १·५५ पंचाशदंशस्य अर्धेन ·७७ संयुतं फलं ५४·५ कलात्मकं सिद्धम्।

(१५) **मानांतरखंडम्**। ७१ पृ. १६ को. लब्धं २३·९। उपर्युक्तपंचाशदंशस्य अर्धेन ·७७ संयुतं लब्धं २४·७ कलात्मम्।

(१६) **मांद्यखंडम्**। ७१ पृ. १६ कोष्ठकात् ८५·८ कलात्मकं प्राप्यते।

उपर्युक्तमूलांकानां क्रमांकितो न्यासः

(६) स्पष्टरविः,	३५८°।४६′।५०″	(१४) मानैक्यखंडं	०°।५४′।३०″
(७) स्पष्टचन्द्रः,	१७८ ।४६ ।५०	(१५) मानान्तरखंडं	० ।२४ ।४२
(११) र. दि. गतिः, कलाः	५८ ।४८	(१६) मान्यखंडं	१°।२५′।४८″
(१०) चं. दि. गतिः, कलाः	१२ । २	(१) अयनांशाः,	२२ ।१३ ।३६
(८) राहुः,	१८१ । ३ ।४८	(९) चन्द्रशरः, द.	−।११′।३९″
(५) पर्वान्तकालः	घ. २६ प. ५७	(१४) पर्वसंस्कारः,	+ ६ पलानि

एतावता गणितेन **ग्रासखग्रासयोः** संभवासंभवौ निश्चेतुं शक्येते। अतस्तत्प्रकारमाह—

> **मानैक्यखण्डं भूमेन्द्वोः शरादल्पं भवेद्यदि।**
> **ग्रहणं न भवेत्तत्त्वन्यथा भवति निश्चितम्॥ ७॥**
>
> **मानान्तरार्धमधिकं शराद्भवति चेत्तदा।**
> **खग्रासो जायते नूनं ग्रासमात्रः किलान्यथा॥ ८॥**

भूभेन्द्वोर्मानैक्यखण्डं यदि विधुशरादल्पतरं तर्हि ग्रहणं नैव भवेत्। यदि महत्तरं तर्हि भवत्येव। एवं हि मानान्तरखण्डं यदि शरादल्पतरं तदा **खग्रासो** नैव भवेत्। यदि महत्तरं तदा **खग्रासेनावश्यं** भवितव्यम्। प्रकृतोदाहरणे विधुशरः ११′·६ अस्मादुभे अपि खण्डे ५४·५। २४·७। महत्तरे स्तः। अत एव ग्रहणं स्यादित्येव केवलं न, अपि तु **खग्रासोऽपि** स्यादिति निश्चयः।

इदानीं ग्रासखग्रासयोः **प्रमाणं दिशं चाऽऽह**—

> **मानैक्यखण्डं भूभेन्द्वोर्मानान्तरदलं पृथक्।**
> **शरहीनं भवेन्मानं ग्रासखग्रासयोः क्रमात्॥ ९॥**
>
> **ग्रासखग्रासलिप्तानां त्र्यंशः स्यादङ्गुलाभिधः।**
> **ग्रासो बाणान्यदिक्चान्द्रे बाणदिग्भास्वतो ग्रहे॥ १०॥**

मानैक्यमानान्तरखण्डे चन्द्रशरेण रहिते क्रमात् ग्रासखग्रासयोः परिमाणे स्याताम्। कलास्त्रिभिर्भक्ता अङ्गुलानि भवन्ति। चन्द्रग्रहे चन्द्रशरस्य विरुद्धदिशि बिम्बप्रान्ते ग्रासारम्भः। रविग्रहणे तु नतिसंस्कृतचन्द्रशरदिशि बिम्बप्रान्ते ग्रासारम्भो ज्ञेयः।

उदाहरणम्— प्रस्तुते उदाहरणे चन्द्रशरस्य दक्षिणत्वाच्चन्द्रबिम्बस्योत्तरप्रान्ते ग्रहणारम्भः स्यात्। अथ ग्रासखग्रासयोः परिमाणे यथा—

मानैक्यखण्डं शरोनम् = ५४′·५ − ११′·६ = ४२′·९ = १४·३ अङ्गुलानि **ग्रासः**।
मानान्तरखण्डं शरोनम् = २४′·७ − ११′·६ = १३′·१ = ४·४ अङ्गुलानि **खग्रासः**।

इदानीं ग्रहणमर्दयोः स्थित्यानयनमाह*—

ग्रासमानैक्यखण्डाभ्यां द्वितीयाद्ग्रहणस्थितिम्।
खग्रासान्तरखण्डाभ्यां तृतीयात्खग्रहस्थितिम् ॥ ११ ॥

स्पष्टोऽर्थः। प्रस्तुते **उदाहरणे** ग्रासः ४२′·९, मानैक्यखण्डं ४५′·५ आभ्यां द्वितीये **कोष्ठके ग्रहणास्थितिः** २८६ प० लभ्यते। तथा च खग्रासः १३′·१, मानान्तरदलं २४′·७, आभ्यां तृतीये कोष्ठके **मर्दास्थितिः** ११६ प० लभ्यते।

इदानीं **ग्रहणमध्यमकालानयनपूर्वकं स्पर्शमोक्षादिकाल**गणितमाह—

ग्रहस्य मध्यः पर्वान्ते स्यात्स्वसंस्कारसंयुते।
ततः स्पर्शादिकालानां सिद्धिर्भवति सा यथा ॥ १२ ॥

ग्रासस्थित्योनितो मध्यः स्पर्शकालः स उच्यते।
खग्रासस्थितिराहितो मध्यः संमीलनाभिधः ॥ १३ ॥

खग्रासस्थितियुक्तस्तु मध्य उन्मीलनाभिधः।
ग्रासस्थित्यन्वितो मध्यो मोक्षकाल उदीरितः ॥ १४ ॥

स्पष्टोऽर्थः। **उदाहरणम्**— पर्वान्तः २६ घ ५७ प० स्वसंस्कारपलैः + ६ संयुतो जातो **ग्रहणमध्यकालः** २७ घ० ३ प० अस्मात्स्पर्शमोक्षादिकालाः सिध्यन्ति।

विवरणम्	घ. प.	घ. प.	घ. प.	घ. प.	घ. प.
ग्रहणमध्यकालः ग्रहणास्थितिः मर्दस्थितिः	२७ ३ − ४ ४६ · ·	२७ ३ · · · − १ ५६	२७ ३ · · · · ·	२७ ३ · · · + १ ५६	२७ ३ + ४ ४६ · · ·
एतस्मिन्काले घटमानः	२२ १७ स्पर्शः	२५ ७ संमीलनम्	२७ ३ मध्यकालः	२८ ५९ उन्मीलनम्	३१ ४९ मोक्षः

इदानीं **पर्वावधिं** स्पर्शमोक्षदिशं चाऽऽह—

स्पर्शमोक्षान्तरं पर्व ग्रहणस्य वदेत्खलु।
चन्द्रस्य पूर्वतः स्पर्शो मोक्षः पश्चिमतो भवेत् ॥ १५ ॥

स्पष्टोऽर्थः। अत्र **स्पर्शमोक्षकालयोरन्तरं** ९ घ. ३२ प०। एतावानेव **पर्वकालः**।

इदानीं स्पर्शमोक्षादिस्थानगणितमाह—

शरात्सहस्रगुणितान्मानैक्यार्धेन भाजितात्।
लब्धेन तुर्यपदकात्स्थानांशाः स्पर्शमोक्षयोः ॥ १६ ॥
शरात्सहस्रगुणितान्मानान्तरदलोद्धृतात्।
लब्धा येंऽशा भार्धयुक्तास्ते स्युर्मीलनयोः स्फुटाः ॥ १७ ॥

---

* मत्प्रचितायां केतक्यां प्रतिपादिता स्थित्यानयनरीतिः—
मानैक्यखण्डशरयोगवियोगघातान्मूलं रवीन्दुघटिकागतिशेषभक्तम्।
नाडीमुखी स्थितिरियं ग्रहणार्धकालो मर्दस्तथा तनुदलान्तरमार्गणाभ्याम्" इति ॥

आद्याद्विक्षेपवलनं पञ्चमादायनं तथा ।
संस्पर्शमोक्षकालाभ्यामक्षजं षष्ठकोष्ठकात् ॥ १८ ॥

वलनत्रयसंयुक्ताः स्थानांशाः पूर्वसाधिताः ।
बिम्बोदीच्याः सकाशात्ते तत्तत्स्थानं दिशन्ति च ॥ १९ ॥

पूर्वतः क्षयचिह्नांश्च परस्ताद्धनसंज्ञकान् ।
बिम्बोदग्बिन्दुमारभ्य दत्त्वा स्पर्शादिकं दिशेत् ॥ २० ॥

स्थानांशा रुद्र ११ संभक्ता अङ्घ्रिसंज्ञा भवन्ति ते ।
दन्ता ३२ ङ्घ्रिप्रमिते वृत्ते दर्शयेच्चरणैरपि ॥ २१ ॥

नष्टचिह्नं चन्द्रशरं सहस्रेण संगुण्यैकत्र मानैक्यखण्डेन, अन्यत्र मानान्तरखण्डेन भक्त्वा लब्धफलाभ्यां चतुर्थकोष्टकात्**स्थानांशा** ग्राह्याः । आद्याः यथागताः स्पर्शमोक्षयोः, द्वितीयास्तु भदलांशैर्युताः संमीलनोन्मीलनयोर्भवन्ति । आद्यकोष्ठका**द्विक्षेपवलनं, पञ्चमकोष्ठादयनवलनं,** षष्ठकोष्ठकात्स्पर्शसंमीलनादिकालैस्तत्तत्कालिकान्य**क्षवलनानि** हर्तव्यानि । विक्षेपवलनं स्पर्श-संमीलनोन्मीलनमोक्षकालेषु समं स्यात् । तथैवायनवलनम् । परमक्षवलनं स्पर्शादिकालमनु भिद्यते । पूर्वानीताः स्पर्शादिकानां स्थानांशाः स्वस्ववलनत्रयेण समायुक्ताश्चेच्चन्द्रबिम्बस्योत्तर-बिन्दोः सकाशात्स्पर्शादिबिन्दूनामन्तराणि भवन्ति ।

विशेषः—चन्द्रग्रहणे स्थानांशाः विक्षेपवृत्तसम्बन्धिनो भवन्ति । तेषां क्रान्तिवृत्तीयत्व-सिद्ध्यर्थं विक्षेपवलनमिष्टम् । नैवं सूर्यग्रहणे । तत्र नतिसंस्कृतशरस्य सर्वदा कदम्बोन्मुखत्वा-द्विक्षेपवलनमप्रासंगिकम् ॥

उदाहरणम् । शरः–११′·६५, नष्टचिह्नः ११′·६५, सहस्रगुणितः ११६५०, अस्मादेकत्र ५४′·५ मानैक्यखण्डेन भक्तः लब्धं फलं २१४, अनेन चतुर्थपदकाल्लब्धाः **स्पर्शस्थानांशाः**–७८°, **मोक्षस्थानांशाः** + ७८° । पुनरन्यत्र सहस्रनिघ्नशरः ११६५० अस्मान्मानान्तरखण्डेन भक्तात् फलं ४७२, अनेन चतुर्थकोष्ठकाल्लब्धाः **संमीलनस्थानांशाः** – ६२°, **उन्मीलनस्थानांशाः** + ६२° । एते भदलांशैः (१८०) युताः क्रमात् संमीलनस्थानांशाः ११८° । उन्मीलन-स्थानांशाः २४२° ।

आद्यकोष्ठाद्राहूनचन्द्रेण ३५७°।४३′ साधितं **विक्षेपवलनं** + ५° । पञ्चमकोष्ठकात्षड्राशि-युक्तसायनरविणा १८०° + २२°·२ + ३५८·८ = २०१° लब्ध**मयनवलनं** –२२° । षष्ठ-कोष्ठकाद्**बागलकोटा**क्षांशैः १६°·२, स्पर्शकालेन २२·३, घटीभिश्च लब्धं **स्पर्शकालिकमक्षव-लनं** + ११° । मोक्षकालेन २१·८ घ. **मौक्षिकाक्षवलनं** + १६° । संमीलनकालेन २५·१ **संमीलनकालिकमक्षवलनं** + १४° । उन्मीलनकालेन २९ घ. **उन्मीलनकालिकमक्षवल-नम्** + १६° । एतानि अक्षवलनानि षष्ठकोष्ठकात् लभ्यानि ।

अत्रैको विशेषः स्मर्तव्यः । अक्षवलनं स्थानिकस्पष्टकालेनैव साधयितव्यम् । उज्जयिनी-मध्यमकालो रेखान्तरेण युतः स्थानिकमध्यमकालो भवतीति ३० पृष्ठे कथितमेव । स एव रवेरुद-यान्तरेण हीनः **स्थानिकस्पष्टकालो** भवति । **बागलकोटे** रेखान्तरं, ० प., अत एव यावानुज्ज-यिनीमध्यमकालस्तावानेव बागल**कोटे**ऽपि । अत्रोदयान्तरं २ प., उपेक्षितमत्यल्पत्वात् ।

केवलं विक्षेपक्रान्तिवलनयुतानि स्थानानि निरक्षदेशे प्रतीयन्ते । वलनत्रयान्वितानि च स्वदेशे इति ज्ञेयम् ।

बागलकोटे स्पर्शादिस्थानांशाः ।

उदग्बिन्दुमारभ्य	अं.	अं.	अं.	अं.	अं.	अंग्रयः
स्पर्शस्थानम्	= − ७८	+ ५	− २२	+ ११	= − ८४	= − ८, नाम पूर्वतः
संमीलनम्	= + ११८	+ ५	− २२	+ १४	= + ११५	= + १० ,, पश्चिमतः
उन्मीलनम्	= + २४२	+ ५	− २२	+ १६	= + २४१	= + २२ ,, पश्चिमतः
मोक्षस्थानम्	= + ७८	+ ५	− २२	+ १६	= + ७७	= + ७ ,, पश्चिमतः

इदानीं स्पष्टार्कोदयात्स्पर्शादिकालानयनम् ।

"**ग्रहस्य मध्यः पर्वान्ते**" इत्यनेन साधिताः स्पर्शादीनां काला आवन्ताः । परं पञ्चाङ्गे सूर्योदयाद्गतकालेन स्पर्शादीन्निर्दिशन्ति । अतः—(ज्योति. पृ. २९, श्लो. २९).

"आवन्तो रेखान्तर-चर-पञ्चपलैर्युतस्तथा रहितः ।
उदयान्तरेण शेषं तद्ग्रामेऽर्कोदयाद्गतः कालः" ॥

इत्यनेन **बागलकोटे** सूर्योदयाद्गताः काला आनेतव्याः । अत्र रेखान्तरं ०, चरं + २३ प. + ५ पलानि, एषामैक्यं = २८ प., अस्मादुदयान्तरं + २ प. विशोध्य जनितः संस्कारः + २६ प., अनेन पूर्वानीता **आवन्ता** युक्ताश्चेद्**बागलकोटे** सूर्योदयाद्गतकाला भवेयुः ।

अत्र उदयान्तरं + २, नाम पलद्वयेन उदये विलम्बः । अर्थात् उदयात् साध्यमानः कालः पलद्वयेन हीनो भवति । अतोऽत्र "उदयान्तरं + २, विशोध्य" इति उपरि प्रोक्तम् ।

	स्पर्शः		संमीलनम्		मध्यः		उन्मीलनम्		मोक्षः		
	घ०	प०	घ०	प०	घ०	प०	घ०	प०	घ०	प०	
पूर्वसिद्धाः आवन्ताः }...	२२	१७	२५	७	२७	३	२८	५९	३१	४९	
संस्कारः +	·	२६	·	२६		२६	·	२६	·	२६	
बागलकोटे...	२२	४३	२५	३३	२७	२९	२९	२५	३२	१५	सूर्योदयात्

इदानीं चन्द्रपर्वणि चन्द्रस्योदयास्तमययोः कालानयनमुच्यते यद्विना ग्रस्तोदयास्तयोः निर्णयं कर्तुं न शक्यते ।

पर्वान्तोनितसूर्योदयसमयात्रिंशदंशसंयुक्ते ।
सूर्योदयसमये वै चन्द्रस्यास्तो भवेद्विधुग्रहणे ॥ २२ ॥
पर्वान्तोनितमार्तण्डास्तमयात्रिंशदंशसंयुक्ते ।
मार्तण्डास्तमये वै पूर्वक्षितिजे सुधांशुरुद्गच्छेत् ॥ २३ ॥

विधुग्रहणे सूर्योदयकालात् ग्रहणमध्यकालमपास्य शेषं त्रिंशता विभज्य लब्धेन सूर्योदयकालो युतश्चेत् स चन्द्रस्य अस्तकालो भवेत् । तथा च सूर्यास्तसमयात् ग्रहणमध्यकालमपास्य शेषं त्रिंशता विभज्य लब्धेन सूर्यास्तकालो युतश्चेत् स चन्द्रस्य उदयकालः स्यात् । अत्र प्रकृतोदाहरणे चन्द्रस्य ग्रस्तोदयः संभवति । अतस्तस्य उदयकालः साध्यः । अत्र स्पष्टार्कोदयात् ग्रहणमध्यकालः २७ घ. २९ प. । सूर्यास्तकालः ३० घ. ३० प. । अनयोर्द्वितीयात् प्रथमं विशोध्य शेषं, + ३ घ. १ प. । अस्य त्रिंशल्लवः + ६ पलानि । एभिः षट्पलैः सूर्यास्तकाले ३० घ. ३० प. संस्कृते सति जातः **चन्द्रोदयकालः** ३० घ. ३६ प. । अत्र ग्रहणमोक्षकालः ३२ घ. १५ प. । चन्द्रोदयकालः ३० घ. ३६ प. । अनयोरन्तरं १ घ. ३९ पलमितं पर्वशेषम् । अतोऽस्मिन्पर्वणि चन्द्रो ग्रस्तः समुद्गच्छतीति सिद्धम् ।

अथ चन्द्रग्रहणपरिलेखः—तत्राऽऽदावभीष्टत्रिज्यया वर्तुलमुत्पाद्य तद्दिगङ्कितं कार्यम् । तदित्थम्—ऊर्ध्वबिन्दौ प्रतीचीम्, अधोबिन्दौ प्राचीं, वामबिन्दावुदीचीं, दक्षिणबिन्दाववाचीमङ्कयेत् । यत्तु सांवत्सरिकाः प्राचीप्रतीच्यौ पूर्वोक्तस्थानविपर्यासेन दर्शयन्ति तन्मम न संमतम् । तेषां परिलेखो जलस्थे प्रतिबिम्बे वास्तवः । आस्माकीनस्त्वाकाशस्थे बिम्बे प्रत्यक्षं प्रतीयते ।

अनन्तरं बिम्बदर्शकं वृत्तमुत्तरबिन्दोः सकाशाद्दक्षिणबिन्दुपर्यन्तमुभयत्र १८०° अंशाङ्कितं कृत्वा तत्र ये ऋणस्थानांशास्ते उत्तरबिन्दोः सकाशात्पूर्वाङ्किते पार्श्वे देयाः । ये तु धनगतास्ते पश्चिमाङ्किते पार्श्वे । एवं स्पर्शादिकानां स्थानानि दर्शयेत् । अथवा किमेतावत्या सूक्ष्मतया स्थानांशेष्वेकादशभिर्भक्तेषु फलमङ्घ्र्यात्मकं भवति । बिम्बपरिधिं द्वात्रिंशता समभागैरङ्कितं कृत्वा लब्धाङ्घ्रिभिरुत्तरबिन्दोः सकाशात्स्पर्शमोक्षादिकं दर्शयेत् ।

अथ पृथिव्या विरलच्छायायां चन्द्रबिम्बस्य प्रवेशनिर्गमकालयोर्गणितम् ।

अस्य गणितस्य प्राचीनग्रन्थेऽनुपलब्धत्वात्, अश्रुतपूर्वत्वात्, प्रतीतेरल्पत्वाच्च सामान्यजना अस्मिन्न विश्वस्युः । परमस्योपपत्त्या सिद्धत्वादीषत्प्रतीतत्वात्सद्विदुषां रञ्जनार्थमेवैतद्गणितमत्र निवेशयामः ।

प्रकाशितगोलात्प्रकाशकगोले महत्तरे सति प्रकाशितगोलस्य घनच्छाया सूच्याकारा भवति । अस्या बहिर्वलयाकाराऽन्या विरलच्छाया वर्तते । इयं विरलच्छायाऽत्र ग्रन्थे **छायाकल्पो भूभाकल्पो** वेत्युक्ता । सप्तज्योतिःप्रदीपे सर्वाणि ज्योतींषि प्रज्वाल्य, एकं सूर्योपमं तेजोमयं वलयमुत्पाद्य तस्योपरि किंचिदन्तरे कन्दुकेऽन्यगोलपदार्थे वा धृते सत्युपरितने विताने तस्य च्छाया छायाकल्पश्च दृश्यौ भवेताम् । सूर्यव्यासः पृथिव्या व्यासाच्छतगुणो महीयान् । अतः सूच्याकारा पृथिवीछाया विरलच्छायया परिवेष्टिता सूर्यात्षड्भान्तरे पृथिव्या सह शश्वद्भ्रमति । यद्यप्याकाशे वितानाभावात्तावुभौ साकल्येन द्रष्टुं न शक्येते तथाऽपि चन्द्रग्रहणावसरे चन्द्र एव अंशतो वितानायते एव । अत एवास्मिन्काले भूभाकल्पस्य दर्शनमंशतोऽपि भवत्येव । भूभाप्रान्ताद्बहिर्दशकलान्तरे चन्द्रबिम्बं धूमलत्वेन यद्यापि दृश्यते तदेव छायाकल्पस्य दर्शनम् । ग्रहणस्पर्शकालात्पूर्वमेवैकघटिकां स्पर्शस्थानं मलिनं भवितुमारभत इति बालानामपि प्रतिपत्तिः । अतच्छायाकल्प*सद्भावे संदेहो निरवकाशः । भूभाकल्पस्य बहिष्प्रान्तस्यात्यन्तवैरल्यात्तत्प्रवेशनिर्गमकालौ दृष्टिविषयौ न भवतः ।

---

* ग्रहणारम्भात्पूर्वमेव यद्बिम्बोपरि मालिन्यमवलोक्यते सा राहोश्छाया, इति सामान्यजना (अनभिज्ञाः) मन्यन्ते । अतश्छायाकल्पो नामभेदेनाऽऽबालवृद्धानां ज्ञात एवेति कथने प्रत्यवायो नास्ति ।

इदानीं छायाकल्पप्रवेशसंबन्धिस्थितिं नाम **मान्द्यस्थितिमाह**—

चन्द्रस्पष्टगतिः सूर्यस्पष्टगत्या विवर्जिता ।
षष्ट्या भक्ता फलं नाडीविशिष्टगतिरुच्यते ॥ २४ ॥

शरस्य मान्द्यखण्डस्य योगान्तरवधात्पदम् ।
शिष्टगत्या विभक्तं चेत्फलं मान्द्यस्थितिर्भवेत् ॥ २५ ॥

मान्द्यस्थित्यूनमध्ये स्यान्मान्द्यारम्भो विधुग्रहे ।
मान्द्यस्थित्यन्वितो मध्ये मान्द्यनाशो भवेत्तथा ॥ २६ ॥

चन्द्रसूर्ययोः स्पष्टदिनगत्योर्यः षष्टिलवस्तस्य विशिष्टघटीगतिरिति संज्ञा । **मान्द्यखण्डं द्विधा स्थापयित्वा**, एकत्र विधुशरेण युक्तम्, अन्यत्र हीनं कृत्वा, योगान्तरयोर्गुणकारफलस्य **वर्गमूलमानीय** तद्विशिष्टघटीगत्या भाज्यम् । फलं घटिकादिर्मान्द्यस्थितिर्भवति ।

अत्रोदाहरणे न्यासः—

मान्द्यखण्डम्	८५′·८	८५′·८	चन्द्रग. ७२२′
शरः	+ ११·६	− ११·६	र. ग. ५९
योगः	९७·४	७४·२	अन्तरम् ६६३ ÷ ६० = ११′·० घटीरूपा विशिष्टगतिः
अन्तरम्	७४·२		

आहतिः ७२०९·९ अस्या वर्गमूलं ८५′ ÷ ११′ = ७ घ. ४२ प. मान्द्यस्थितिः

उज्जयिन्याम् { (२७ घ. ३ प.) − (७ घ. ४२ प.) = १९।२१ प. मान्द्यारम्भः
(२७ घ. ३ प.) + (७ घ. ४२ प.) = ३४।४५ प. मान्द्यनाशः }

अथ केवलाच्छेद्यकात्स्पर्शादिकालानयनमाह ।

चन्द्रग्रहणे चन्द्रस्य घटीगतिं नवभिः संगुण्य विंशत्या विभज्य यत्कलादि लभ्यते सा **पञ्चघटीषु** चन्द्रशरस्य गतिर्नाम ह्रासो वृद्धिर्वा । राहुपर्वणि पर्वान्तात्प्राक्तनी गतिर्ऋणम्, अग्रिमगतिर्धनम् । केतुपर्वणि धनर्णव्यत्यासः स्यात् । छेद्यकलेखनात्पूर्वं तत्साधकान् कांश्चिन्मूलाङ्कानादौ गणयेत् । तेषां मूलाङ्कानां नामानि यथा— (भूभा नाम गोचरभूभा ज्ञेया ।)

१ पर्वान्तकालः
२ चन्द्रदिनगतिः
३ रविदिनगतिः
४ चन्द्रसूर्ययोः पञ्चसु घटीष्वन्तरम्
५ तयोरेकस्यां घट्यामन्तरम्
६ चन्द्रघटीगतिः
७ चन्द्रघटीगतेः $\frac{९}{२०}$ गुणनफलम् = शरगतिः घटीपंचके
८ पर्वान्ते चन्द्रशरः
९ प्राक्पञ्चघट्यन्तरे चन्द्रशरः
१० पश्चात्पञ्चघट्यन्तरे चन्द्रशरः
११ मानान्तरखन्डम्
१२ भूभादलम्
१३ मानैक्यखन्डम्
१४ छायाकल्पदलम् = भूभादलं + रविबिम्बम्
१५ मान्द्यखण्डम्
१६ चन्द्रबिम्बम्

तत्राऽऽदौ छेद्यकलेखनम्— एकं पत्रं गृहीत्वा तस्योर्ध्वदक्षिणाधोवामपार्श्वान् क्रमेण उत्तरपश्चिमदक्षिणपूर्वदिग्भिरङ्कयेत् । ततः पत्रकोपरि कुत्रचिदेकस्यांशस्याभीष्टं दैर्घ्यं प्रकल्प्य तस्यां रेखायां षष्टिः कलाः समाः कार्याः । पत्रस्य मध्यभागे एकां पूर्वापरां रेखां प्रसार्य

बागलकोटे दृश्यं चंद्रग्रहणम्
शके १८०६ चैत्र शु. १५ गुरौ
उत्तरा
दक्षिणा
प्राची
पश्चिमा
प्रमाणरेखा एक भाग मिता
क्रान्तिवृत्तम
चंद्रमार्ग
चंद्रः
मांद्यमोक्षः
ग्रहणमोक्षः
उन्मीलनम्
ग्रहणमध्य
सम्मीलनम्
ग्रहणस्पर्शः
मांद्यारंभः
मानान्तर वर्तुलम् २४.७
भूभावर्तुलम् ३१.६
मानैक्यखण्ड वर्तुलम् ५४.५
भूभाकल्प: ७१.५
मान्द्यखण्ड वर्तुलम् ८५.८

तां **क्रान्तिवृत्तं** वदेत् । अस्य मध्यभागे एकं बिंदुं दत्वा तत्परितो मानान्तरखण्डमितेन कर्कटेन प्रथमं वृत्तं, भूभादलमितेन द्वितीयं, मानैक्यखण्डमितेन तृतीयं, छायाकल्पदलमितेन चतुर्थं, मान्यखण्डमितेन पञ्चमम्, एवं पञ्च वर्तुलान्युत्पादयेत् । ततो वर्तुलमध्याबिन्दोः सकाशात्प्रागग्रे पञ्चघटीजनिते चन्द्रसूर्ययोरन्तरे क्रान्तिवृत्ते द्वौ बिन्दू दत्वा तत्स्थानीयौ द्वौ शरौ यथा क्रान्तिवृत्ते लम्बौ स्यातां तथा स्वस्वदिशि प्रसार्य, अनयोः शराग्रयोर्मध्येन अन्यां रेखां प्रसार्य तां चन्द्रस्य **विक्षेपवृत्तं** वदेत् । ततो मध्यबिन्दोः प्रागग्रे क्रान्तिवृत्ते चन्द्रसूर्ययोर्घटच्यन्तर-मितेन कर्कटेन मान्यखण्डजनितवर्तुलपर्यन्तमुभयत्र प्रतिघटि बिन्दून्दत्वा मध्यबिन्दौ पर्वान्त-कालं विलिख्य, अस्मात्प्राग्बिन्दूष्वेकघट्या उत्तरोत्तरं ह्रियमाणान्कालान्दद्यात्, अग्रिमबिन्दुषु वर्धमानान्कालान्दद्यात् । अत्र चन्द्रस्य पूर्वाभिमुखगमनात्प्रागग्रशब्दौ पाश्चिमपूर्वदिगर्थपराविति ज्ञेयम् । एभ्यो बिन्दुभ्यो विक्षेपवृत्तपर्यन्तं क्रान्तिवृत्तोपरि लम्बान् शरान्प्रसारयेत् । शराग्राणि विक्षेपवृत्ते चन्द्रस्य प्रतिघटि स्थानानि दर्शयन्ति । अन्ते विक्षेपरेखा पर्वान्तात्प्रागग्रे मान्यमानैक्यमानान्तरखण्डवर्तुलानि यत्र यत्र भिनत्ति तत्तद्बिन्दोः सकाशात्क्रान्तिवृत्तोपर्य-वलम्बान्पातयेत् ।

अथ स्पर्शादिकालज्ञानम्-- पर्वान्तात्प्राङ्मान्यमानैक्यमानान्तरखण्डवर्तुलेभ्यः पाति-तानामवलम्बानां क्रान्तिवृत्तस्थमूलानि क्रमेण मान्यारम्भस्पर्शसंमीलनानां कालान्दर्शयन्ति । पर्वान्तादूर्ध्वं तान्येवोत्क्रमेण, उन्मीलनमोक्षमान्यनाशानां कालान्दर्शयन्ति । भूभावच्छिन्नाया विक्षेपरेखायाः* खण्डस्य मध्याबिन्दोः सकाशात्क्रान्तिवृत्तोपर्येकमवलम्बं पातयित्वा तस्य मूलात् ग्रहणमध्यकालो ज्ञेयः ।

अथेष्टकाले ग्रासज्ञानम्— विक्षेपवृत्ते चन्द्रस्येष्टकालिकं स्थानं निर्णीय तत्परितश्च-न्द्रबिम्बदलमितेन कर्कटेन चन्द्रबिम्बमुत्पाद्य तच्च भूभायां (भूछायायां) यावन्मितं निमज्जेत्ता-वन्मित इष्टकाले ग्रासः स्यात् । भूभावच्छिन्नविक्षेपरेखाखण्डमध्यबिन्दुं परितश्चन्द्रबिम्बं लिखित्वा परमग्रासः खग्रासो वा कलात्मको ज्ञेयः ।

उदाहरणम्—पूर्वोक्तचन्द्रग्रहणकालान् आकृत्या विगणय--

१. अत्र पर्वान्तघटिकाः (उज्ज.)	२६।५७.
२. चन्द्रदिनगतिः	७२२′०
३. रविदिनगतिः	५९′·०
४. चन्द्रसूर्ययोः पञ्चघटीष्वन्तरम्	५५′·३
५. तयोरेकस्यां घट्यामन्तरम्	११′·०
६. चन्द्रघटीगतिः	१२′·०
७. चन्द्रघटीगतेः ९/२० गुणाप्तिः शरगतिः घटीपञ्चके	५′·४
८. पर्वान्ते चन्द्रशरः	द० ११′·६
९ प्राकपञ्चघट्यन्तरे शरः	द० १७′·०
१० पश्चात्पञ्चघट्यन्तरे शरः	द० ६′·२
११ मानान्तरखण्डम्	२४′·७
१२ भूभादलम्	३९′·६
१३ मानैक्यखण्डम्	५४′·५
१४ छायाकल्पदलम् = भूभादलं + रविबिम्बम्	७१′·५
१५ मान्यखण्डम्	८५′·८
१६ चन्द्रबिम्बम्	२९′·८

* वृत्तस्याल्पं खण्डं रेखारूपे दृश्यते । अतोऽत्र विक्षेपरेखेत्युक्तम् “ वृत्तस्य षण्णवत्यंशो दण्डवत् दृश्यते तु सः ” इति सूर्यसिद्धान्ते ।

परिलेखोपयोगीनि अस्मत्तातानां पद्यानि।

परिलेखोपकरणान्याह—

एकद्वित्रिघटीजौ पर्वान्तात्पूर्वपश्चिमौ साध्यौ।
सूर्येन्दू, सूर्येऽस्मिन् षड्भाढ्यूने युते भुवो भा स्यात् ॥ ८६ ॥

भूभासुधांशुवियुतिः प्रतिघटिकं पूर्वपश्चिमा साध्या।
भूभाया ऊनश्चेत् चन्द्रः पश्चिमगतोऽन्यथा पूर्वः ॥ ८७ ॥

परिलेखमाह—

चन्द्रशरं प्रतिघटिकं प्रसाध्य रेखापमंडलाख्या सा।
कार्या तस्या मध्ये बिंदुं कृत्वा च भूप्रभार्धवृतिम् ॥ ८८ ॥

मानैक्यखंडवृत्तं, दिगंकितं, पूर्वपश्चिमाख्यायाम्।
रेखायां वृतिमध्यात् भूभाचन्द्रान्तराणि देयानि ॥ ८९ ॥

प्रत्यन्तरात्तु लंबो बाणः शरदिशि तदग्रगो बिंदुः।
चन्द्रस्य बिंबमध्यस्तदुपरि विक्षेपवृत्तसंज्ञायुग् ॥ ९० ॥

रेखा सा मानैक्यार्धवृत्तलूना च यत्र तत्स्थानम्।
स्पर्शस्थितिरपरस्मिन् पूर्वस्मिन् मोक्षसंस्थितिर्ज्ञेया ॥ ९१ ॥

विक्षेपवृत्तरेखा भामध्यादतिसमीपगा यत्र।
तत्र स्थितशीतांशोः परमो ग्रासस्तु दृश्यते स्पष्टः ॥ ९२ ॥

स्पर्शादिकालमानं पर्वान्तात् दृश्यते पुरः पश्चात्।
स्पर्शादिदिग्विमंडलसंबन्धिन्येव दृश्यते लेखे ॥ ९३ ॥

॥ इतिचन्द्रग्रहणम् ॥

इति श्रीरामकृष्णसुतवेङ्कटेश विरचिते ज्योतिर्गणिते द्वितीये परिच्छेदे
प्रथमश्चन्द्रग्रहणाध्यायः समाप्तः ॥ १ ॥

**
भूभा भूमितिकर्मणा विगणिता पंचाशदंशेन सा।
पुष्टा गोचरभूप्रभा भवति या दृक्साम्यसंवर्धिनी।
तत्संसिद्धविधूपरागसमयाः स्युस्तेऽतिसूक्ष्मा इति।
प्रोक्तं विद्वरवेंकटेशकृतिभिः संशुद्धिपत्रे पुरा।
तस्माद्गोचरभूप्रभात्तकरणैरामूलचन्द्रग्रहम्।
कृत्वा तत्परिलेखलेखनमपि स्वीकार्य तातेच्छया।
सर्वं भारतखण्डवासिविबुधप्रीत्यर्थमेव स्फुटम्।
ज्योतिर्विद्वरवेङ्कटेशतनयश्रीदत्तराजो व्यधात् ॥ ** प्रकाशकः

पूर्वगणितस्य सारांशः ।

चन्द्रग्रहणम् । शके १८०६ चैत्रशुक्ल १५ यां गुरुवासरे ।

केवलगणिताल्लब्धाः स्पर्शादिकालाः

स्थानम्		मान्यारम्भः	स्पर्शः	मील.	मध्यः	उन्मी.	चन्द्रोदयः	*मोक्षः	मान्यनाशः	पर्वशेषं	
उज्जयिन्यां मध्यमकालः	घ.	१९	२२	२५	२७	२८	३०	३१	३४	१	खग्रासः १३′·१
	प.	२१	१७	७	३	५९	१०	४९	४५	३९	ग्रासः
बागलकोटे सूर्योदयात्	घ.	१९	२२	२५	२७	२९	३०	३२	३५	१	४२′·९
	प.	४७	४३	३३	२९	२५	३६	१५	११	३९	

* ग्रहलाघवरीत्या गणिते कृतेऽस्य मोक्षश्चन्द्रोदयात्प्रागेवाऽऽयातीति तत्पक्षीये पञ्चाङ्गे ग्रहणाभावः आसीत् । परं चन्द्रं ग्रस्तोदितं दृष्ट्वा सर्वे जना व्यस्मयन्त ।

केवलछेद्यकालब्धाः स्पर्शादिकालः ।

स्थानम्		मान्यारम्भः	स्पर्शः	मील.	मध्यः	उन्मी.	चन्द्रोदयः	मोक्षः	मान्यनाशः	पर्वशेषं	
उज्जयिन्यां मध्यमकालः	घ.	१९	२२	२५	२७	२८	·	३१	३४	·	खग्रासः १३′·१
	प.	२२	१७	७	३	५९	·	४९	४४	·	ग्रासः ४२′·९

तुलनार्थं नाटीकलद्वारा स्पर्शादिकालाः (१०-४-१८८४) ।

उज्जयिन्यां मध्यमकालः	घ.	१९	२२	२५	२७	२९	·	३१	३४	·	ग्रासः
	प.	२४	१९	८	४	०	·	४९	४३	·	४२′·६

कोष्ठकः १ । चन्द्रग्रहणे पर्वसंस्कारः शरो विक्षेपवलनं च ।

उपकरणं = पर्वान्तीयस्पष्टचन्द्रः − राहुः

उपकरणम्	पर्वसंस्कारः	चन्द्रशरः	विक्षेपवलनम्		उपकरणम्	पर्वसंस्कारः	चन्द्रशरः	विक्षेपवलनम्	
अं०	क०	क०	अं०	क०	अं०	क०	क०	अं०	क०
३४२	+ ७·७	द. ९२·६	उ. ४	४५	१६२	+ ७·७	उ. ९२·६	द. ४	४५
३४३	७·४	८७·६	४	४७	१६३	७·४	८७·६	४	४७
३४४	७·०	८२·६	४	४८	१६४	७·०	८२·६	४	४८
३४५	६·५	७७·५	४	५०	१६५	६·५	७७·५	४	५०
३४६	६·१	७२·५	४	५१	१६६	६·१	७२·५	४	५१
३४७	५·७	६७·४	४	५२	१६७	५·७	६७·४	४	५२
३४८	५·३	६२·३	४	५३	१६८	५·३	६२·३	४	५३
३४९	५·०	५७·२	४	५४	१६९	५·०	५७·२	४	५४
३५०	४·५	५२·१	४	५५	१७०	४·५	५२·१	४	५५
३५१	४·०	४६·८	४	५६	१७१	४·०	४६·८	४	५६
३५२	३·६	४१·७	४	५७	१७२	३·६	४१·७	४	५७
३५३	३·२	३६·६	४	५८	१७३	३·२	३६·६	४	५८
३५४	२·७	३१·३	४	५९	१७४	२·७	३१·३	४	५९
३५५	२·२	२६·१	४	५९	१७५	२·२	२६·१	४	५९
३५६	१·८	२०·९	४	५९	१७६	१·८	२०·९	४	५९
३५७	१·३	१५·६	४	५९	१७७	१·३	१५·६	४	५९
३५८	०·९	१०·५	५	०	१७८	·९	१०·५	५	०
३५९	+ ०·४	द. ५·३	५	०	१७९	+ ·४	उ. ५·३	५	०
०	०·०	०·०	५	०	१८०	·०	०·०	५	०
१	− ०·४	उ. ५·३	५	०	१८१	− ·४	द. ५·३	५	०
२	०·९	१०·५	५	०	१८२	·९	१०·५	५	०
३	१·३	१५·६	४	५९	१८३	१·३	१५·६	४	५९
४	१·८	२०·९	४	५९	१८४	१·८	२०·९	४	५९
५	२·२	२६·१	४	५९	१८५	२·२	२६·१	४	५९
६	२·७	३१·३	४	५९	१८६	२·७	३१·३	४	५९
७	३·२	३६·६	४	५८	१८७	३·२	३६·६	४	५८
८	३·६	४१·७	४	५७	१८८	३·६	४१·७	४	५७
९	४·०	४६·८	४	५६	१८९	४·०	४६·८	४	५६
१०	४·५	५२·१	४	५५	१९०	४·५	५२·१	४	५५
११	५·०	५७·२	४	५४	१९१	५·०	५७·२	४	५४
१२	५·३	६२·३	४	५३	१९२	५·३	६२·३	४	५३
१३	५·७	६७·४	४	५२	१९३	५·७	६७·४	४	५२
१४	६·१	७२·५	४	५१	१९४	६·१	७२·५	४	५१
१५	६·५	७७·५	४	५०	१९५	६·५	७७·५	४	५०
१६	७·०	८२·६	४	४८	१९६	७·०	८२·६	४	४८
१७	७·४	८७·६	४	४७	१९७	७·४	८७·६	४	४७
१८	− ७·७	उ. ९२·६	उ. ४	४५	१९८	− ७·७	द. ९२·६	द. ४	४५

अत्र पर्वसंस्कारकलाः षष्टिगुणाश्चन्द्रसूर्ययोर्घटीगत्यन्तरेण भक्ताः पलात्मकः पर्वसंस्कारो भवति । अथवा सुखार्थं पञ्चगुणकला एव पलात्मकसंस्कारो ग्राह्यः ।

कोष्ठकः २ ।

ग्रहणस्थितिकालः ।

द्वे उपकरणे = ग्रासो, गोचरभूभाचन्द्रयोर्मानैक्यखण्डं च ।

उपकरणम्	मानैक्यखण्डम्											उपकरणम्
ग्रासः	क० ५३	क० ५४	क० ५५	क० ५६	क० ५७	क० ५८	क० ५९	क० ६०	क० ६१	क० ६२	क० ६३	ग्रासः
क.	प.	प.	प.	प.	प.	प.	प.	प.	प.	प.	प.	क.
०	०	०	०	०	०	०	०	०	०	०	०	०
१	५८	५७	५६	५४	५३	५२	५१	५०	४९	४८	४८	१
२	८२	८०	७८	७७	७५	७३	७२	७१	६९	६८	६७	२
३	९९	९७	९५	९३	९२	९०	८८	८६	८५	८३	८२	३
४	११४	११२	१०९	१०७	१०५	१०३	१०१	९९	९७	९५	९४	४
५	१२८	१२५	१२२	११९	११७	११५	११३	११०	१०८	१०६	१०४	५
६	१३९	१३६	१३३	१३०	१२७	१२५	१२२	१२०	११८	११६	११४	६
७	१४७	१४५	१४२	१३९	१३६	१३४	१३१	१२८	१२६	१२४	१२२	७
८	१५७	१५४	१५१	१४८	१४५	१४२	१३९	१३७	१३४	१३२	१३०	८
९	१६७	१६४	१६०	१५७	१५४	१५१	१४८	१४५	१४२	१४०	१३८	९
१०	१७४	१७१	१६७	१६४	१६१	१५८	१५५	१५२	१४९	१४७	१४४	१०
११	१८२	१७९	१७५	१७१	१६८	१६५	१६१	१५८	१५५	१५३	१५०	११
१२	१८९	१८६	१८३	१७९	१७५	१७२	१६८	१६५	१६२	१६०	१५७	१२
१३	१९५	१९२	१८९	१८५	१८१	१७८	१७४	१७१	१६८	१६५	१६२	१३
१४	२०१	१९९	१९५	१९१	१८७	१८३	१७९	१७६	१७३	१७१	१६८	१४
१५	२०९	२०५	२०१	१९७	१९३	१८९	१८५	१८२	१७९	१७६	१७३	१५
१६	२१४	२१०	२०६	२०२	१९८	१९४	१९०	१८७	१८४	१८१	१७८	१६
१७	२१९	२१५	२११	२०७	२०३	१९९	१९५	१९२	१८८	१८५	१८२	१७
१८	२२५	२२१	२१६	२१२	२०८	२०४	२०१	१९७	१९३	१९०	१८७	१८
१९	२२९	२२५	२२०	२१६	२१२	२०८	२०४	२०१	१९७	१९४	१९१	१९
२०	२३४	२३०	२२५	२२१	२१७	२१३	२०९	२०५	२०१	१९८	१९५	२०
२१	२३८	२३४	२२९	२२५	२२१	२१७	२१३	२०९	२०५	२०२	१९९	२१
२२	२४२	२३८	२३४	२२९	२२५	२२१	२१७	२१३	२०९	२०६	२०३	२२
२३	२४६	२४२	२३८	२३३	२२९	२२५	२२०	२१६	२१३	२१०	२०६	२३
२४	२५०	२४६	२४१	२३७	२३२	२२८	२२४	२२०	२१६	२१३	२१०	२४
२५	२५३	२४९	२४४	२४०	२३५	२३१	२२७	२२३	२१९	२१६	२१३	२५
२६	२५७	२५३	२४८	२४३	२३९	२३५	२३०	२२६	२२२	२१९	२१६	२६
२७	२६०	२५६	२५१	२४७	२४२	२३८	२३४	२३०	२२६	२२३	२१९	२७
२८	२६४	२५९	२५४	२४९	२४५	२४१	२३६	२३२	२२८	२२५	२२२	२८
२९	२६६	२६२	२५७	२५२	२४८	२४४	२३९	२३५	२३२	२२८	२२५	२९
३०	२६९	२६५	२६०	२५५	२५०	२४६	२४२	२३८	२३४	२३१	२२७	३०
३१	२७१	२६७	२६२	२५८	२५३	२४९	२४४	२४०	२३६	२३३	२३०	३१

कोष्ठकः २। ग्रहणस्थितिकालः।

द्वे उपकरणे = ग्रासो, गोचरभूभाचन्द्रयोर्मानैक्यखण्डं च।

उपकरणम्	मानैक्यखण्डम्											उपकरणम्
ग्रासः	क० ५३	क० ५४	क० ५५	क० ५६	क० ५७	क० ५८	क० ५९	क० ६०	क० ६१	क० ६२	क० ६३	ग्रासः
क०	प.	प.	प.	प.	प.	प.	प.	प.	प.	प.	प.	क०
३१	२७१	२६७	२६२	२५८	२५३	२४९	२४४	२४०	२३६	२३३	२३०	३१
३२	२७४	२७०	२६५	२६०	२५५	२५१	२४७	२४३	२३९	२३६	२३२	३२
३३	२७६	२७२	२६८	२६३	२५८	२५४	२४९	२४५	२४१	२३८	२३५	३३
३४	२७८	२७४	२७०	२६५	२६०	२५६	२५१	२४७	२४३	२४०	२३७	३४
३५	२८०	२७६	२७२	२६७	२६२	२५७	२५३	२५०	२४६	२४२	२३९	३५
३६	२८२	२७८	२७३	२६९	२६४	२६०	२५६	२५२	२४८	२४५	२४१	३६
३७	२८४	२८०	२७५	२७१	२६६	२६२	२५७	२५३	२४९	२४६	२४३	३७
३८	२८६	२८२	२७७	२७२	२६८	२६४	२५९	२५५	२५१	२४८	२४५	३८
३९	२८७	२८३	२७८	२७४	२७०	२६६	२६१	२५७	२५३	२५०	२४७	३९
४०	२८९	२८५	२८०	२७६	२७२	२६७	२६३	२५९	२५५	२५२	२४८	४०
४१	२९०	२८६	२८१	२७७	२७३	२६९	२६४	२६०	२५६	२५३	२५०	४१
४२	२९२	२८८	२८३	२७९	२७४	२७०	२६६	२६२	२५८	२५५	२५१	४२
४३	२९३	२८९	२८४	२८०	२७५	२७१	२६७	२६३	२५९	२५६	२५३	४३
४४	२९४	२९०	२८५	२८१	२७६	२७२	२६८	२६४	२६०	२५७	२५४	४४
४५	२९५	२९१	२८६	२८२	२७८	२७४	२६९	२६५	२६२	२५९	२५६	४५
४६	२९५	२९१	२८७	२८३	२७९	२७५	२७१	२६७	२६३	२६०	२५७	४६
४७	२९६	२९२	२८७	२८३	२७९	२७५	२७२	२६८	२६४	२६१	२५८	४७
४८	२९७	२९३	२८८	२८४	२८०	२७६	२७२	२६९	२६५	२६२	२५९	४८
४९	२९७	२९३	२८९	२८५	२८१	२७७	२७३	२६९	२६६	२६३	२६०	४९
५०	२९७	२९३	२८९	२८५	२८१	२७८	२७४	२७०	२६७	२६४	२६१	५०
५१	२९८	२९४	२९०	२८६	२८२	२७८	२७४	२७१	२६७	२६४	२६२	५१
५२	२९८	२९४	२९०	२८६	२८२	२७९	२७५	२७१	२६८	२६५	२६२	५२
५३	२९८	२९४	२९०	२८६	२८२	२७९	२७६	२७२	२६८	२६६	२६३	५३
५४		२९४	२९०	२८६	२८३	२८०	२७६	२७२	२६९	२६६	२६३	५४
५५			२९०	२८६	२८३	२८०	२७६	२७३	२६९	२६७	२६४	५५
५६				२८६	२८३	२८०	२७६	२७३	२७०	२६७	२६५	५६
५७					२८३	२८०	२७६	२७३	२७०	२६८	२६५	५७
५८						२८०	२७६	२७३	२७०	२६८	२६५	५८
५९							२७६	२७३	२७०	२६८	२६५	५९
६०								२७३	२७०	२६८	२६५	६०
६१									२७०	२६८	२६५	६१
६२										२६८	२६५	६२
६३											२६५	६३

कोष्ठकः ३ ।

खग्रासस्थितिकालः ।

द्वे उपकरणे = खग्रासो, गोचर भूभाचन्द्रयोर्मानान्तरखण्डं च ।

उपकरणम् खग्रासः	मानान्तरखण्डम् ।								उपकरणम् खग्रासः
	क० २३	क० २४	क० २५	क० २६	क० २७	क० २८	क० २९	क० ३०	
क०	प०	प०	प०	प०	प०	प०	प०	प०	क०
०	०	०	०	०	०	०	०	०	०
१	३९	३८	३७	३५	३४	३३	३३	३२	१
२	५४	५३	५२	५०	४८	४७	४६	४५	२
३	६७	६५	६२	६०	५८	५७	५६	५४	३
४	७६	७४	७२	६९	६७	६५	६३	६२	४
५	८५	८२	७९	७६	७४	७२	७०	६९	५
६	९१	८८	८५	८२	८०	७८	७६	७४	६
७	९७	९४	९०	८७	८५	८३	८१	७९	७
८	१०३	९९	९५	९२	९०	८८	८६	८४	८
९	१०८	१०४	१००	९७	९५	९३	९०	८८	९
१०	११२	१०८	१०४	१०१	९८	९६	९४	९२	१०
११	११५	१११	१०८	१०५	१०२	१००	९८	९५	११
१२	११८	११५	१११	१०८	१०६	१०३	१०१	९९	१२
१३	१२१	११८	११४	१११	१०८	१०६	१०४	१०२	१३
१४	१२३	१२०	११६	११४	१११	१०९	१०६	१०४	१४
१५	१२६	१२३	११९	११६	११४	१११	१०९	१०७	१५
१६	१२८	१२५	१२१	११८	११६	११३	१११	१०९	१६
१७	१२९	१२६	१२३	१२०	११८	११५	११३	१११	१७
१८	१३१	१२८	१२५	१२२	११९	११७	११५	११३	१८
१९	१३२	१२९	१२६	१२३	१२१	११९	११६	११४	१९
२०	१३३	१३०	१२७	१२४	१२२	१२०	११८	११६	२०
२१	१३४	१३१	१२८	१२५	१२३	१२१	११९	११७	२१
२२	१३४	१३१	१२८	१२६	१२४	१२२	१२०	११८	२२
२३	१३४	१३१	१२८	१२६	१२४	१२३	१२१	११९	२३
२४		१३१	१२८	१२७	१२४	१२४	१२२	१२०	२४
२५			१२८	१२७	१२५	१२४	१२२	१२१	२५
२६				१२७	१२५	१२४	१२३	१२१	२६
२७					१२५	१२४	१२३	१२२	२७
२८						१२४	१२३	१२२	२८
२९							१२३	१२२	२९
३०								१२२	३०

कोष्ठकः ४ । स्पर्शमोक्षस्थानानि ।

स्पर्शमोक्षे उप० $= \dfrac{१००० \times शरः}{मानैक्यखण्डम्}$; मीलनोन्मीलने उप० $= \dfrac{१००० \times शरः}{मानान्तरखण्डम्}$

ऋणस्थानं बिम्बोत्तरबिन्दोः सकाशात्पूर्वतो भवति । धनस्थानं पश्चिमतः ।

उपकरणम्	अन्तरम्	चन्द्रग्रहणे — चन्द्रशरे उत्तरे सति — स्पर्शस्थानम्	चन्द्रग्रहणे — चन्द्रशरे उत्तरे सति — मोक्षस्थानम्	चन्द्रग्रहणे — चन्द्रशरे दक्षिणे सति — स्पर्शस्थानम्	चन्द्रग्रहणे — चन्द्रशरे दक्षिणे सति — मोक्षस्थानम्	सूर्यग्रहणे — नतियुक्तशरे उत्तरे सति — स्पर्शस्थानम्	सूर्यग्रहणे — नतियुक्तशरे उत्तरे सति — मोक्षस्थानम्	सूर्यग्रहणे — नतियुक्तशरे दक्षिणे सति — स्पर्शस्थानम्	सूर्यग्रहणे — नतियुक्तशरे दक्षिणे सति — मोक्षस्थानम्	उपकरणम्	अन्तरम्
		अं०	अं०	अं०	अं०	अं०	अं०	अं०	अं०		
०	५२	− ९०	+ ९०	− ९०	+ ९०	+ ९०	− ९०	+ ९०	− ९०	०	५२
५२	५२	९३	९३	८७	८७	८७	८७	९३	९३	५२	५२
१०४	५२	९६	९६	८४	८४	८४	८४	९६	९६	१०४	५२
१५६	५२	९९	९९	८१	८१	८१	८१	९९	९९	१५६	५२
२०८	५१	१०२	१०२	७८	७८	७८	७८	१०२	१०२	२०८	५१
२५९	५०	१०५	१०५	७५	७५	७५	७५	१०५	१०५	२५९	५०
३०९	४९	१०८	१०८	७२	७२	७२	७२	१०८	१०८	३०९	४९
३५८	४९	१११	१११	६९	६९	६९	६९	१११	१११	३५८	४९
४०७	४७	११४	११४	६६	६६	६६	६६	११४	११४	४०७	४७
४५४	४६	११७	११७	६३	६३	६३	६३	११७	११७	४५४	४६
५००	४५	१२०	१२०	६०	६०	६०	६०	१२०	१२०	५००	४५
५४५	४३	१२३	१२३	५७	५७	५७	५७	१२३	१२३	५४५	४३
५८८	४१	१२६	१२६	५४	५४	५४	५४	१२६	१२६	५८८	४१
६२९	४०	१२९	१२९	५१	५१	५१	५१	१२९	१२९	६२९	४०
६६९	३८	१३२	१३२	४८	४८	४८	४८	१३२	१३२	६६९	३८
७०७	३६	१३५	१३५	४५	४५	४५	४५	१३५	१३५	७०७	३६
७४३	३४	१३८	१३८	४२	४२	४२	४२	१३८	१३८	७४३	३४
७७७	३२	१४१	१४१	३९	३९	३९	३९	१४१	१४१	७७७	३२
८०९	३०	१४४	१४४	३६	३६	३६	३६	१४४	१४४	८०९	३०
८३९	२७	१४७	१४७	३३	३३	३३	३३	१४७	१४७	८३९	२७
८६६	२५	१५०	१५०	३०	३०	३०	३०	१५०	१५०	८६६	२५
८९१	२२	१५३	१५३	२७	२७	२७	२७	१५३	१५३	८९१	२२
९१३	२१	१५६	१५६	२४	२४	२४	२४	१५६	१५६	९१३	२१
९३४	१७	१५९	१५९	२१	२१	२१	२१	१५९	१५९	९३४	१७
९५१	१५	१६२	१६२	१८	१८	१८	१८	१६२	१६२	९५१	१५
९६६	१२	१६५	१६५	१५	१५	१५	१५	१६५	१६५	९६६	१२
९७८	१०	१६८	१६८	१२	१२	१२	१२	१६८	१६८	९७८	१०
९८८	६	१७१	१७१	९	९	९	९	१७१	१७१	९८८	६
९९४	५	१७४	१७४	६	६	६	६	१७४	१७४	९९४	५
९९९	१	१७७	१७७	३	३	३	३	१७७	१७७	९९९	१
१०००		− १८०	+ १८०	− ०	+ ०	+ ०	− ०	+ १८०	− १८०	१०००	

कोष्ठकः ५ ।

अयनवलनम् ।

चन्द्रग्रहणे उपकरणम् = षड्राशियुक्तः सायनरविः ।
सूर्यग्रहणे उपकरणम् = सायनरविः ।
धनमुत्तरम्, ऋणं दक्षिणमिति वेद्यम् ।

उपकरणम्	० अं० +		३० अं० +		६० अं० +		९० अं० −		१२० अं० −		१५० अं० −		उपकरणम्
अं०	अं०	क०	अं०	क०	अं०	क०	अं०	क०	अं०	क०	अं०	क०	अं०
०	२३	२८	२०	३६	१२	१५	०	०	१२	१५	२०	३६	३०
१	२३	२८	२०	२५	११	५३	०	२६	१२	३६	२०	४७	२९
२	२३	२७	२०	१३	११	३१	०	५२	१२	५७	२०	५८	२८
३	२३	२६	२०	०	११	९	१	१८	१३	१८	२१	९	२७
४	२३	२५	१९	४७	१०	४७	१	४४	१३	३९	२१	१९	२६
५	२३	२३	१९	३४	१०	२४	२	१०	१३	५९	२१	२९	२५
६	२३	२१	१९	२१	१०	१	२	३६	१४	१९	२१	३८	२४
७	२३	१९	१९	७	९	३८	३	२	१४	३९	२१	४७	२३
८	२३	१६	१८	५३	९	१४	३	२७	१४	५८	२१	५६	२२
९	२३	१३	१८	३८	८	५१	३	५३	१५	१७	२२	४	२१
१०	२३	९	१८	२४	८	२७	४	१९	१५	३६	२२	१२	२०
११	२३	५	१८	८	८	३	४	४४	१५	५४	२२	१९	१९
१२	२३	०	१७	५३	७	३८	५	९	१६	१२	२२	२६	१८
१३	२२	५५	१७	३६	७	१४	५	३५	१६	३०	२२	३३	१७
१४	२२	५०	१७	२०	६	४९	६	०	१६	४७	२२	३९	१६
१५	२२	४५	१७	४	६	२५	६	२४	१७	४	२२	४४	१५
१६	२२	३९	१६	४७	६	०	६	४९	१७	२०	२२	५०	१४
१७	२२	३३	१६	३०	५	३५	७	१४	१७	३६	२२	५५	१३
१८	२२	२६	१६	१२	५	९	७	३८	१७	५३	२३	०	१२
१९	२२	१९	१५	५४	४	४४	८	३	१८	८	२३	५	११
२०	२२	१२	१५	३६	४	१९	८	२७	१८	२४	२३	९	१०
२१	२२	४	१५	१७	३	५३	८	५१	१८	३८	२३	१३	९
२२	२१	५६	१४	५८	३	२७	९	१४	१८	५३	२३	१६	८
२३	२१	४७	१४	३९	३	२	९	३८	१९	७	२३	१९	७
२४	२१	३८	१४	१९	२	३६	१०	१	१९	२१	२३	२१	६
२५	२१	२९	१३	५९	२	१०	१०	२४	१९	३४	२३	२३	५
२६	२१	१९	१३	३९	१	४४	१०	४७	१९	४७	२३	२५	४
२७	२१	९	१३	१८	१	१८	११	९	२०	०	२३	२६	३
२८	२०	५८	१२	५७	०	५२	११	३१	२०	१३	२३	२७	२
२९	२०	४७	१२	३६	०	२६	११	५३	२०	२५	२३	२८	१
३०	२०	३६	१२	१५	०	०	१२	१५	२०	३६	२३	२८	०
	+ ३३० अं०		+ ३०० अं०		+ २७० अं०		− २४० अं०		− २१० अं०		− १८० अं०		

कोष्ठकः ६ ।

अक्षवलनम् ।

उपकरणं = स्पर्शादीनां कालाः ।

चन्द्रग्रहणे स्पर्शादिकालाः		उत्तराक्षांशाः							सूर्यग्रहणे स्पर्शादिकालाः	
		५	१०	१५	२०	२५	३०	३५		
घ०	घ०	अं०	अं०	अं०	अं०	अं०	अं०	अं०	घ०	घ०
३०	३०	+५	+१०	+१५	+२०	+२५	+३०	+३५	६०	०
३१	२९	५	१०	१५	२०	२५	३०	३५	५९	१
३२	२८	५	१०	१५	२०	२४	२९	३४	५८	२
३३	२७	५	९	१४	१९	२३	२८	३३	५७	३
३४	२६	४	९	१३	१८	२३	२७	३१	५६	४
३५	२५	४	९	१३	१७	२२	२६	३०	५५	५
३६	२४	४	८	१२	१६	२०	२४	२८	५४	६
३७	२३	४	७	११	१५	१८	२२	२६	५३	७
३८	२२	३	७	१०	१३	१६	२०	२३	५२	८
३९	२१	३	६	९	१२	१४	१७	२१	५१	९
४०		२	५	७	१०	१२	१५	१७		१०
४१		२	४	६	८	१०	१२	१४		११
४२		१	३	४	६	७	९	१०		१२
४३		१	२	३	४	५	६	७		१३
४४		+०	+१	+१	+२	+२	+३	+३		१४
४५		०	०	०	०	०	०	०		१५
४६		−०	−१	−१	−२	−२	−३	−३		१६
४७		१	२	३	४	५	६	७		१७
४८		१	३	४	६	७	९	१०		१८
४९	११	२	४	६	८	१०	१२	१४	४१	१९
५०	१०	२	५	७	१०	१२	१५	१७	४०	२०
५१	९	३	६	९	१२	१४	१७	२१	३९	२१
५२	८	३	७	१०	१३	१६	२०	२३	३८	२२
५३	७	४	७	११	१५	१८	२२	२६	३७	२३
५४	६	४	८	१२	१६	२०	२४	२८	३६	२४
५५	५	४	९	१३	१७	२२	२६	३०	३५	२५
५६	४	४	९	१३	१८	२३	२७	३१	३४	२६
५७	३	५	९	१४	१९	२३	२८	३३	३३	२७
५८	२	५	१०	१५	२०	२४	२९	३४	३२	२८
५९	१	५	१०	१५	२०	२५	३०	३५	३१	२९
६०	०	−५	−१०	−१५	−२०	−२५	−३०	−३५	३०	३०

अथ सूर्यग्रहणाध्यायो द्वितीयः ।

तत्राऽऽदौ सूर्यग्रहणगणिताधारभूता **मूलाङ्काः**—

चन्द्रग्रहे कथितवत्साध्यो देशान्तरस्फुटः ।
दर्शस्तत्कालचन्द्रार्कौ दिनभुक्ती घटीगती ॥ १ ॥

तयोर्बिम्बे तथा चान्द्रौ परलम्बनसायकौ ।
चन्द्रनाडीगतिर्गो ९ घ्ना शत १०० भक्ता त्विषोर्गतिः ॥ २ ॥

राहुग्रहे भवेत्सौम्या याम्या सा केतुपर्वणि ।
बिम्बैक्यार्धं पुष्पवतोर्बिम्बान्तरदलं तथा ॥ ३ ॥

घटीगत्यन्तरं प्रातःकालिको मध्यमो रविः ।
अयनांशास्तथा स्थूलस्पर्शः प्रथमकोष्ठकात् ॥ ४ ॥

इष्टग्रामे पलांशाश्च चरं देशान्तरं तथा ।
उदयान्तरमेतानि साधयेद्दिनपर्वणि ॥ ५ ॥

चन्द्रग्रहणगणिते कथितरीत्या दर्शकालं प्रसाध्य तस्मिन्देशान्तरं क्षिपेत् । **चन्द्रग्रहण-गणिते उज्जयिनी**मध्यमकालेनैव सकलं गणितं विधायान्ते इष्टग्रामे सूर्योदयाद्गतकालज्ञानार्थं रेखान्तरसंस्कारस्य प्रयोजनम् । इह सूर्यग्रहणे उज्जयिनीदर्शान्तकालं प्रथमं रेखान्तरेण संस्कृत्य लब्धेन स्थानिकमध्यमकालेन सर्वं गणितं कृत्वा सूर्योदयाद्गतकालज्ञानार्थमन्ते चरोदयान्तर-संस्कारौ कार्याविति **विशेषः** ।

रविग्रहणसंभवे सत्युपरितनश्लोकेषु पठितान्मूलाङ्कानादौ साधयेत् । तत्र चन्द्रस्य या घटी-गतिस्तां नवभिः संगुण्य शतेन विभज्य यल्लभ्यते तत्तुल्या चन्द्रशरस्य घटीगतिरिति ज्ञेयम् । सा राहुपर्वण्युदङ्मुखी, केतुपर्वणि दक्षिणाभिमुखी तिष्ठति । प्रतिघटि शरसाधनगणिते शरगते-र्धनर्णत्वं चन्द्रग्रहणोक्तभङ्गीलेखनविधेर्ज्ञातव्यम् । (पृ. २२५ विलोक्यम्)

उदाहरणम्—शा० शके १८१५ फाल्गुनकृष्णामावास्यायां शुक्रवासरे भविष्यतः सूर्य-ग्रहणस्य **बागलकोट**संबन्धि सर्वं गणितं कुरुत । **बागलकोट**पत्तने, अक्षांशाः १६° १२′ सौम्याः । रेखान्तरं शून्यम् । **चन्द्रसूर्याध्याये** कथितवन्निखिले गणिते कृते उज्जयिन्यां मध्यम-कालमानेन ७ घ. ३८ पलेषु दर्शान्तः स्यादिति सिध्यति । अस्मिन्देशान्तरं शून्यं क्षिप्त्वा जनितो **बागलकोटे दर्शान्तः** ७ घ. ३८ प. । अनेन स्वल्पान्तरात् ८ घ. दर्शान्तोपकरणेन प्रथमे कोष्ठे स्थूलः स्पर्शकालः ० घ. ० प. लभ्यते । एतद्दिने सायनरविः १६°।२१′। अनेन पृ. ७२ रवि-क्रान्तिः, + ६°।२६′। अक्षांशाः + १६°।१२′। एतदुपकरणाभ्यां (पृ. ७४), बागलकोटे चरं, + १९ प. । सायनरविणा (पृ. ७३) उदयान्तरं च, + ५ प. । (प्रथमं कोष्ठकं २४३ पृष्ठे)

सूर्यग्रहणम् ।

बागलकोटे— शके १८१५ फाल्गुनकृष्ण ३० शुक्रवासरे (६ एप्रिल १८९४) पर्वान्तः ७ घ. ३८ प. । पर्वान्तकाले मूलाङ्काः— (साधनं तु २१८ पृष्ठस्थप्रतिपादनसमम्) ।

	अं०	क०			अं०	क०
स्पष्टरविचन्द्रौ	३५३	५८·८	चन्द्रशर उत्तरः	+		३३·३
रविदिनगतिः	०	५९·०	,, शरघटीगतिः उ. ...	+		१·२
चन्द्रदिनगतिः	१३	३०·०	रविचन्द्रबिम्बैक्यार्धम ...			३१·८
रविघटीगतिः		१·०	,, बिम्बान्तरदलम् ...			०·२
चन्द्रघटीगतिः		१३·५	,, घटीगत्यन्तरम् ...			१२·५
रविबिम्बम्		३२·०	प्रातःकाले मध्यमरविः ...	३५१		५६·४
चन्द्रबिम्बम्		३१·६	अयनांशाः	२२		२१·९
चन्द्रपरमलम्बनं (स्प.ग.८१०′,पृ,७१)		५७·९	राहुः	३४७		४६·७

इदानीं **ग्रहणसंभव**माह—

विराह्वर्कभुजे दर्शे नन्देन्द्वं १९ शाल्पके सति ।
ग्रहस्य संभवो ज्ञेयो, विश्वां १३ शाल्पे तु कुत्रचित् ॥ ६ ॥
भाव्यमर्कोपरागेणाभीष्टग्रामे भवेन्न वा ।
इति वक्तुमशक्यं स्यान्नातियुक्तशरं विना ॥ ७ ॥

पर्वान्ते रविराह्वो रविकेत्वोर्वाऽन्तरं यद्येकोनविंशत्यंशेभ्योऽल्पतरं तर्हि ग्रहणस्य केवलः संभवो न तु निश्चयः । यदि तदेव त्रयोदशांशेभ्योऽल्पतरं तदा भूपृष्ठे कुत्रचिद्ग्रहणं भवत्येव । परं विवक्षिते ग्रामे ग्रहणं भवेन्न वेति दर्शान्तकालिकनतियुक्तशरं विना निश्चयेन वक्तुं न शक्यते । **अत्रोदाहरणे** रविराह्वोरन्तरं ३५३°।५८·८ − ३४७°।४६·७ = ६°।१२′·१ षडंशतुल्यम् । अत एव भूमण्डले कस्मिंश्चित्प्रदेशे ग्रहणेन भवितव्यम् । **बागलकोटे** भवेन्न वेत्यस्य निर्णयो लम्बननतिभ्यां विना कर्तुमशक्यः । लम्बननती त्रिभोनलग्नाधीने । त्रिभोनलग्नं तु विषुवकालाधीनम् । तस्मात्प्रथमं **विषुवकालः** साध्यः । स यथा—

प्रातःकालिकमध्यार्कः सायनो रस ६ भाजितः ।
विषुवाख्यो भवेत्कालो नाड्यादिः प्रातरेव सः ॥ ८ ॥
विषुवाख्यस्तथा पूर्णं स्थूलस्पर्शान्वितौ क्रमात् ।
एको विषुवकालः स्यादपरो मध्यमः किल ॥ ९ ॥
वैषुवस्य गतांशेन रहितौ तावुभौ यदि ।
वैषुवस्तु निरग्रः स्यान्मध्यमः साग्र एव च ॥ १० ॥

प्रातःकालिकः सायनमध्यमरविरंशेषु परिणमितः षड्भिर्भक्तो घटिकात्मको *विषुवकालः प्रातःकाले भवति । अनन्तरमेकत्र विषुवकालमन्यत्र मध्यमकालार्थं षष्टिं पूर्णं वा विलिख्य तयोरुभयोः पूर्वानीतां स्थूलस्पर्शघटीं क्षिप्त्वा योगे कृते, आद्यः स्थूलस्पर्शकाले विषुवकालः स्यात् । अपरस्तु तस्मिन्क्षणे मध्यमकालः । एवं सिद्धस्य विषुवकालस्य गतांशेन नाम षष्ट्यवयवेन विषुवमध्यमकालौ रहितौ कार्यौ । एवं कृते विषुवकालो निरग्रः स्यात् । मध्यमस्तु प्रायः साग्रस्तिष्ठेत् । **अत्रोदाहरणे** प्रातःकालिकमध्यमरविः ३५१°।५६′·४, अयनांशैः २२°।२१′·९, युतो जातः सायनः १४°।१८·३ । अयमंशेषु परिणमितः १४°·३०५, षड्भिर्भक्तश्च जातो घटिकात्मको **विषुवकालः** २·३८४ घटिकात्मकः औदयिकः ।

---

* नक्षत्राध्यायस्य द्वितीयकोष्टकादपि सायनमध्यमरवेः प्रातःकालिको विषुवकाल आनेतुं शक्यते ।

न्यासः	विषुवकालः	मध्यमकालः
विवरणम्	घ.	घ.
मध्यमसूर्योदये	२·३८४	६०·०००
को. १ स्थूलस्पर्शकालः	०·०००	०·०००
स्थूले स्पर्शकाले	२·३८४	६०·०००
विषुवस्य गतांशः (भुक्तांशः)	– ०·३८४	– ०·३८४
स्पर्शकालसमीपे	२·०००	५९·६१६

इदानीं **त्रिभोनलग्नं, नतांशाः, नतिश्चेत्येतेषां** गणितमाह—

वैषुवान्मध्यमाच्चाग्रे क्रमान्नाड्येकवर्धितान् ।
विषुवाख्यान्मध्यमांश्च कालान्दशमितााँल्लिखेत् ॥ ११ ॥
अक्षांशवैषुवाभ्यां हि द्वितीयपदकाद्धरेत् ।
त्रिभोनलग्नमंशाद्यं नतांशाश्च तृतीयकात् ॥ १२ ॥
चतुर्थान्नतभागैश्च ग्राह्या नतिकलाश्च ताः ।
नतदिक्का, नतांशानां कोटिज्या सा सदा धनम् ॥ १३ ॥

एवं संपूरितविषुवघटिकाया अग्रे नाड्येकवर्धितान्दश विषुवकालान्मध्यमकालांश्चाधोऽधो लिखेत् । अनन्तरं विषुवकालं तथा विवक्षितग्रामस्य पलांशानुपकरणं प्रकल्प्य ताभ्यां द्वितीयकोष्ठकात्त्रिभोनलग्नानि तथा तृतीयकोष्ठकात्तेषां नतांशांश्च गृह्णीयात् । एवं लब्धैर्नतांशैश्चन्द्रपरमलम्बनेन च चतुर्थकोष्ठकात्स्पष्टनतिकलास्तथा नतांशानां कोटिज्याऽपि ग्राह्या । इयं सर्वदा धनं वर्तते । नतिर्नतांशदिक्केति ज्ञेयम् । (अधः न्या. १. विलोक्यः)

अत्रोदाहरणम्— नतिगणितदर्शनार्थं **न्यासः १ ।**

विषुव-कालः	अक्षांशाः	मध्यम-कालः	त्रिभोनलग्नं को. २	नतांशाः को. ३	नतिः को. ४	नतांश कोटिज्या
घ.	अं.	घ.	अं.	अं.	क.	को. ४
२	१६·२	५९·६	२८४·९	– ३९·१	– ३६·५	·७८
३	१६·२	०·६	२९२·२	३८·३	३५·९	·७९
४	१६·२	१·६	२९९·४	३७·३	३५·१	·८०
५	१६·२	२·६	३०६·४	३६·०	३४·०	·८१
६	१६·२	३·६	३१३·२	३४·५	३२·८	·८२
७	१६·२	४·६	३१९·८	३२·७	३१·३	·८४
८	१६·२	५·६	३२६·२	३०·८	२९·७	·८६
९	१६·२	६·६	३३२·४	२८·७	२७·८	·८८
१०	१६·२	७·६	३३८·४	२६·५	२५·८	·८९
११	१६·२	८·६	३४४·३	– २४·३	– २३·८	·९१

अत्र प्रथमं द्व्याद्येकादशान्ता विषुवघटीस्तथा बागलकोटाक्षांशानधोऽधो विलिख्य तासां संमुखं नाड्येकवर्धितान् ५९·६ घट्यादिमध्यमकालान्विन्यस्य, विषुवघटी २, बागलकोटपलांशाः १६°·२ आभ्यां द्वितियकोष्ठकात्त्रिभोनलग्नं २८४°·९ तथा तृतीयकोष्ठकान्नतांशाः –३९°·१ साधिताः । एतान्नतांशान् –३९°·१ तथा चन्द्रक्षितिजलम्बनं ५७′·९ उपकरणं प्रकल्प्याऽऽभ्यां **चतुर्थकोष्ठकात्स्पष्टनतिः** – ३६′·५ साधिता । अन्ते केवलैर्नतांशैः – ३९′·१ तस्मादेव चतुर्थकोष्ठकान्नतांशकोटिज्या ०·७८ साधिता । अस्याः प्रयोजनमग्रिमे न्यासे भवति ।

इदानीं **लम्बनसाधनमाह—**

त्रिभोनलग्नरहितः सायनार्क उदीरितः।
विश्लेषो लम्बनं तेन चतुर्थादस्फुटाभिधम् ॥ १४ ॥
लब्ध्वा क्षुण्णं नतांशानां कोटिमौर्व्या भवेत्स्फुटम्।
लम्बनस्य धनर्णत्वं विश्लेषसदृशं सदा ॥ १५ ॥

सायनसूर्यात् त्रिभोनलग्नेऽपनीते शेषो विश्लेषसंज्ञः स्यात्। स च सायनसूर्ये त्रिभोनलग्नादधिके धनम्, अन्यथा विपरीतशोधनाल्लब्धो विश्लेष ऋणं स्यादिति सुगमम्। एवं साधितो विश्लेषस्तथा चन्द्रस्य परमलम्बनकलाः, आभ्यामुपकरणाभ्यां चतुर्थकोष्ठकादस्फुटसंज्ञं लम्बनं गृहीत्वा तत्पूर्वसाधितया तात्कालिकया नतांशकोटिज्यया गुणितं चेत्स्पष्टं नामेष्टग्रामे दृग्गोचरं भवति। विश्लेषस्य धनत्वे लम्बनं धनम्, अन्यथा ऋणमिति वेद्यम्।

पौर्वाह्णिके सूर्यग्रहणे लम्बनं धनम्। आपराह्णिके ऋणमिति सामान्यो नियमः। क्षितिजादधःस्थिते सूर्ये यदा विश्लेषांशा नवतेरधिका भवन्ति तदा तानशीत्यधिकशताद्विशोध्य लब्धांशैर्लम्बनं साध्यम्। एवं हि नवत्यधिकान्नतांशान्नवत्यल्पान्कृत्वा नतिमानयेत्।

अत्रोदाहरणम्—लम्बनगणितदर्शनार्थं **न्यासः १।**

इत उत्तरं विषुवकालस्य प्रयोजनाभावादग्रिमेषु न्यासेषु केवलो मध्यमकाल एवाऽऽरम्भे लेखितः।

मध्यम-कालः घ०	सायन-रविः अं०	त्रिभोन-लग्नं अं०	विश्लेषः उप० को. ४र्थः अं०	अस्फुटं लम्बनं क०	नतांश-कोटिज्या	स्फुटं लम्बनं क०
५९·६	१६·३	− २८४·९	=+ ९१·४	५८·०	× ·७८	=+ ४५·२
०·६	१६·३	२९२·९	८४·१	५७·७	·७९	४५·६
१·६	१६·३	२९९·४	७६·९	५६·६	·८०	४५·३
२·६	१६·३	३०६·४	६९·९	५४·५	·८१	४४·१
३·६	१६·३	३१३·२	६३·१	५१·७	·८२	४२·४
४·६	१६·३	३१९·८	५६·५	४८·३	·८४	४०·६
५·६	१६·३	३२६·२	५०·१	४४·५	·८६	३८·३
६·६	१६·३	३३२·४	४३·९	४०·२	·८८	३५·४
७·६	१६·३	३३८·४	३७·९	३५·६	·८९	३१·७
८·६	१६·३	− ३४४·३	=+ ३२·०	३०·७	× ·९१	=+ २७·९

अत्राऽऽदौ मध्यमकालं स्थापयित्वा तदग्रे सायनसूर्यात् १६·°३ त्रिभोनलग्नं २८४·°९ अपनीय लब्धमन्तरं ९१·°४ इदं नवतेरधिकत्वात् १८०° अंशेभ्योऽपनीय शेषांशैः ८८·°६ परमलम्बनेन च ५८′·० चतुर्थकोष्ठकाल्लब्धं **अस्फुटलम्बनं** ५८′·०। इदमेतत्कालिकपूर्वसाधितनतांशानां − ३९·°१ कोटिज्यया ०·७८ संगुण्य जनितं **स्फुटलम्बनं** ४५′·२। एवं हि अन्येषु एकघट्युत्तरकालेषु स्फुटलम्बनमती साधिते।

लम्बनविरहिते पर्वान्ते चन्द्रसूर्यौ भूमध्ये समकलौ दृश्येते। लम्बनसंस्कृते दर्शान्ते तावेवेष्टग्रामे समकलौ दृश्येते इति बोध्यम्।

इदानीमिष्टग्रामे **दृश्यः पर्वान्तस्तथा स्पर्शमोक्षादिकाला** एतेषां गणितमाह—

मध्यमे दर्शकालेन हीने यच्छेषकं च तत्।
घटीगत्यन्तरक्षुण्णं लम्बनाढ्यं भवेत्स्फुटम् ॥ १६ ॥

पूर्वापरान्तरं, तस्मात् दृश्यदर्शान्तमानयेत् ।
नतियुक्तशरो दृश्यं दक्षिणोत्तरमन्तरम् ॥ १७ ॥
पूर्वापरमुदग्याम्यमेतद्वर्गैक्यसंभवम् ।
मूलं मध्यान्तरं दृश्यं रवीन्द्वोरथ तद्यदा ॥ १८ ॥
प्राक्पश्चाद्दृश्यदर्शान्ताद्बिम्बैक्यार्धसमं भवेत् ।
स्पर्शमोक्षौ तदा स्यातां, बिम्बान्तरदलोन्मितम् ॥ १९ ॥
यदा मध्यान्तरं तिष्ठेन्मीलनोन्मीलने तदा ।
मध्यकालः स विज्ञेयो यदा ग्रासो महत्तमः ॥ २० ॥

क्रमान्नाड्येकवर्धितान्मध्यमकालात्पर्वान्तं विशोध्य यच्छेषं स्यात्तच्चन्द्रसूर्ययोर्घटीगत्यन्तरेण संगुण्य गुणनफलं लम्बनेन संस्कृतं चेदिष्टे ग्रामे दृश्यं चन्द्रसूर्ययोः प्रतिघटि **पूर्वापरान्तरं** भवति । ततः पूर्वापरान्तरेभ्य इष्टग्रामे दृश्यं **दर्शान्तकालं** साधयेत् । **दृश्यदर्शान्तकालो** नामेष्टग्रामे चन्द्रसूर्ययोः पूर्वापरान्तराभावसमयः । स तु त्रैराशिकेन ज्ञातुं शक्यते । नतियुक्तश्चन्द्रशरस्तु चन्द्रसूर्ययोर्**दृश्यं याम्योतरान्तरम्** । अथ **स्पर्शादिकालानयनम्**—प्रतिघटि पूर्वापरयाम्योत्तरान्तरयोर्वर्गे कृत्वा तयोर्योगाद्यन्मूलं तावन्मितं तत्तत्काले चन्द्रसूर्ययोर्मध्यबिन्द्वोर्मध्येऽन्तरं स्यात् एतन्**मध्यान्तरं** दृश्यदर्शान्तात्प्राग्यस्मिन्काले चन्द्रसूर्ययोर्बिम्बैक्यार्धसमं तदा तयोर्बिम्बप्रान्तौ परस्परं स्पृशतः । अत एव स **स्पर्शकालः** । दृश्यदर्शान्तादूर्ध्वं पुनर्यदा मध्यान्तरं बिम्बैक्यार्धसमं स्यात्तदा **मोक्षकालः** । तथैव मध्यान्तरं दर्शान्तात्प्राग्यदा बिम्बान्तरदलसमं तदा **संमीलनम्** । यदा दर्शान्तानन्तरं पुनस्तत्तुल्यं स्यात्त**दोन्मीलनम्** । यदा ग्रासो महत्तमस्तदैव **ग्रहणमध्यकालः** । "**कृतिः स्वर्णयोः स्वम्**" इति **भास्करीय**सूत्रोक्तवद्वर्गराशिः सर्वदा धनं स्यादिति न विस्मरेत् ।

अथेष्टग्रामे गोचरदर्शकालज्ञानार्थं

न्यासः ३ ।

मध्यमकालः	दर्शान्तकालः		अन्तरम्		घटीगत्यन्तरम्		भूमध्ये पूर्वापरम्	लम्बनं		इष्टग्रामे पूर्वापरम्	चन्द्रस्थानम् सूर्यात्
घ०	घ०		घ०		क०		क०	क०		क०	
५९·६	– ७·६	=	– ८·०	×	१२·५	=	– १००·०	+ ४५·२	=	– ५४·८	पृष्ठतः
०·६	– ७·६		– ७·०		१२·५		– ८७·५	+ ४५·६		– ४१·९	”
१·६	– ७·६		– ६·०		१२·५		– ७५·०	+ ४५·३		– २९·७	”
२·६	– ७·६		– ५·०		१२·५		– ६२·५	+ ४४·१		– १८·४	”
३·६	– ७·६		– ४·०		१२·५		– ५०·०	+ ४२·४		– ७·६	”
४·६	– ७·६		– ३·०		१२·५		– ३७·५	+ ४०·५		+ ३·१	अग्रतः
५·६	– ७·६		– २·०		१२·५		– २५·०	+ ३८·३		+ १३·३	”
६·६	– ७·६		– १·०		१२·५		– १२·५	+ ३५·४		+ २२·९	”
७·६	– ७·६		०·०		१२·५		०·०	+ ३१·७		+ ३१·७	”
८·६	– ७·६	=	+ १·०	×	१२·५	=	+ १२·५	+ २७·९	=	+ ४०·४	”

(सूर्यात्पृष्ठतः नाम सूर्यात् पश्चिमतः । सूर्यात् अग्रतः नाम सूर्यात् पूर्वतः इति ।)

अत्र मध्यमकालः ५९·६ घ. । अयमुदयात्प्राक् – ०·४ घटी तुल्यः । अस्मात् ७·६ घ. विशोध्य नाम – ७·६ प्रक्षिप्य जातमन्तरं – ८ घ. । एतद्विशिष्टघटीगत्या १२′·५ संगुण्य जनितं **भूमध्ये** दृश्यं चन्द्रसूर्ययोः पूर्वापरमन्तरं – १००′·० । अस्यर्णत्वाच्चन्द्रः सूर्यात्पश्चिमतो दृश्येत । परं **बागलकोट**पत्तने तयोरन्तरं केवलं – ५४′·८ दृश्येत । यतस्तस्मिन्काले **लम्बनेन चन्द्रो**

निजस्थानात्पूर्वतो ४५′·२ विक्षिप्यते। एवं ३·६ घट्यां सूर्यात्पाश्चिमतः ७′·६ मितेऽन्तरे वर्तमानश्चन्द्रः ४·६ घटिकायां सूर्यादग्रतः ३′·१ तिष्ठति। तस्मादेकस्यां घट्यां ७′·६ + ३′·१ = १०′·७ अन्तरं वर्धते इति सिद्धम्। अतोऽनुपातः। यदि १०′·७ अन्तरेणैका घटी लभ्यते तर्हि ७′·६ अन्तरेण कतीत्यनुपाताल्लब्धः कालः ०·७ घ.। इमं प्राक्तने काले ३·६ घ. संयोज्य जनितो **बागलकोटे दृश्यः पर्वान्तकालः** ४·३ घ.।

इदानीं सूर्यचन्द्रयोर्दृश्यपूर्वापरान्तरसाधनोत्तरं **स्पर्शादिकालज्ञानार्थं** तयो**र्याम्योत्तरान्तरं मध्यान्तरं** च प्रतिघटिकं साध्यम्।

स्पर्शादिकालज्ञानार्थं **न्यासः ४**

मध्यमकालः	चन्द्रशरः भूमध्ये दृश्यः	नतिः	याम्योत्तरमन्तरम् इष्टग्रामे (अ)	पूर्वापरमन्तरम् इष्टग्रामे (इ)	मध्यान्तरं $\sqrt{(अ^2+इ^2)}$ इष्टग्रामे (उ)	रवीन्द्वोः बिम्बैक्यखण्डम् (ऋ)	बिम्बान्तरम् अत्र ऋणान्तरं ग्रासः (उ − ऋ)
घ.	क०	क०	क०	क०	क०	क०	क०
५९·६	+ २३·७ −	३६·५ =	− १२·८	− ५४·८	५६·३	३१·८	+ २४·५
०·६	२४·९	३५·९	− ११·०	− ४१·९	४३·३	३१·८	+ ११·५
१·६	२६·१	३५·१	− ९·०	− २९·७	३१·०	३१·८	− ०·८ ग्रासः
२·६	२७·३	३४·०	− ६·७	− १८·४	१९·६	३१·८	− १२·२ ,,
३·६	२८·५	३२·८	− ४·३	− ७·६	८·७	३१·८	− २३·१ ,,
४·६	२९·७	३१·३	− १·६	+ ३·१	३·५	३१·८	− २८·३ ,,
५·६	३०·९	२९·७	+ १·२	+ १३·३	१३·३	३१·८	− १८·५ ,,
६·६	३२·१	२७·८	+ ४·३	+ २२·९	२३·३	३१·८	− ८·५ ग्रासः
७·६	३३·३	२५·८	+ ७·५	+ ३१·७	३२·६	३१·८	+ ०·८
८·६	+ ३४·५ −	२३·८ =	+ १०·७	+ ४०·४	४१·८	३१·८	+ १०·०

अनन्तरमनुपातात्स्पर्शादिकालाः साधिताः।

घ.	घ.	मध्यान्तरं	बिम्बैक्यार्धम्		
१·५ स्पर्शकालः	$= ०·६ + \frac{११·५}{१२·३}$	३१′·८	३१′·८	०′·०	ग्रासः
४·३ मध्यकालः		२·५	३१·८	२९·४	,,
७·५ मोक्षकालः	$= ६·६ + \frac{८·५}{९·३}$	३१·८	३१·८	०·०	ग्रासः

अत्र प्रथममिष्टकाले ५९·६ घट्यां चन्द्रशरो ज्ञातः। स यथा—भूमध्ये दर्शान्तः ७·६ घटीमितः। अस्मिन्काले चन्द्रशरः + ३३′·३। शरस्य घटीगतिः १′·२। अत्रेष्टकालः ५९·६ घ., भूमध्ये पर्वान्तः ७·६ घ. अनयोरन्तरं ८ घ.। इदं चन्द्रशरघटीगत्या संगुण्य जानिताष्टघटीषु शरगतिः + ९′·६ इमां दर्शान्तकालिकशराद्विशोध्य जनित इष्टकाले ५९·६ घ. **चन्द्रशरः** (३३′·३ − ९′·६) = २३′·७। अस्य घटीगत्या चालनात्प्रतिघटिकं **चन्द्रशरा** लभ्यन्ते।

अथ चन्द्रसूर्ययो**र्मध्यबिन्द्वो**रन्तरं साध्यते। अत्रेष्टकालः ५९·६ घ.। अस्मिन्काले चन्द्रशरे + २३′·७ नत्या − ३६′·५ युते जातं **बागलकोटे** दृश्यं चन्द्रसूर्ययोः परस्पराभ्यां याम्योत्तरमन्तरं − १२′·८, अस्यर्णत्वाच्चन्द्रः सूर्याद्दक्षिणतो वर्तत इति ज्ञेयम्। अनन्तरं याम्योदगन्तरं − १२′·८, पूर्वापरं − ५४′·८, एतयोर्वर्गौ १६३′·८४, ३००३′·०४, वर्गयोर्योगः ३१६६′·८८ अस्मान्मूलं ५६′·३ जातमिष्टकाले चन्द्रसूर्ययोर्मध्यबिन्द्वोः **परस्पराभ्यामन्तरम्**। अस्मात्तयोर्बिम्बैक्यखण्डं ३१′·८ विशोध्य लब्धं बिम्बप्रान्तयोरन्तरं + २४′·५, अस्य धनत्वादस्मिन्काले ग्रासाभावः।

अत्र संचारः— यदि द्वयोः संख्ययोर्वर्गयोगस्य मूलमपेक्षितं तदा तयोर्लघीयस्याः संख्याया वर्गं द्विगुणया गरीयस्या संख्यया भक्त्वा यल्लभ्यते तेन गरीयसी युता चेत्तयोर्वर्गैक्यमूलं सूक्ष्मासन्नं भवति।

उदाहरणम्— अत्र लघीयसी – १२′·८ अस्या वर्गः १६३′·८४ इमं द्विगुणया गरीयस्या १०९′·६ भक्त्वा लब्धेन १′·५ गरीयसी ५४′·८ युता चेज्जातं वर्गैक्यमूलं ५६′·३ आसन्नसूक्ष्मम्।

अथ स्पर्शकालानयनम्— मध्यमकाले ०·६ घट्यां बिम्बप्रान्तयोरन्तरं + ११′·५ लभ्यते, अस्य धनत्वादस्मिन्काले ग्रासाभावः। परं १·६ घट्यां तयोरन्तरं – ०′·८ उपलभ्यते। अस्यर्णत्वाच्चन्द्रबिम्बं ०′·८ प्रमाणं रविबिम्बे निविष्टमिति ज्ञातव्यम्। अतोऽनुपातः। यदि – ११′·५ – ०′·८ = – १२′·३ मध्यान्तरह्रासे घट्येका प्रयाति तर्हि – ११′·५ ह्रासे कतीति लब्धोऽवधिः ०·९ घ. इमं प्राक्तने काले ०·६ घ. संयोज्य जनितः **स्पर्शकालः** १·५ घ.। अनयैव रीत्या **मोक्षकालः** ७·५ घ. साधितः। दृश्य**दर्शान्त**काले याम्योत्तरमन्तरं त्रैराशिकेन २′·४ लभ्यते। इदं बिम्बैक्यखण्डात् ३१′·८ विशोध्य लब्धः **परमग्रासः** २९′·४ इमं रविबिम्बात् ३२′·० विशोध्य जनितं शेषबिम्बं २′·६। **दृश्यदर्शान्ते** याम्योत्तरान्तरस्याल्पत्वात्प्रायो दर्शान्ते एव ग्रहणमध्यकालो घटते। दृश्यदर्शान्तीययाम्योत्तरान्तरस्य परमावधौ दृश्यदर्शान्तात्प्रागग्रे १५ पलेषु ग्रहणमध्यः संभवति।

परमसूक्ष्मतापेक्षायामिष्टकालिकयोर्विश्लेषनतयोः कोटिज्ययोर्घातस्य चापमुन्नतांशा भवन्तीति प्रकल्प्य तैः पञ्चमकोष्ठकाच्चन्द्रबिम्बार्धे नाम वृद्धिं गृहीत्वा तया संस्कृतं चन्द्रबिम्बं गणित उपयोज्यम्। तथा दशसु दशसु पलेषु पूर्वापरयाम्योत्तरान्तराणि प्रसाध्य तेभ्यः स्पर्शमोक्षादयः कालाः निर्णेतव्याः। विश्लेषनतयोर्नाम विश्लेषनतांशयोरित्यर्थः।

इदानीमिष्टकालिकग्रासानयनं तथा **खग्रासकङ्कणग्रहणयोर्ज्ञानमाह**—

> **बिम्बैक्यान्तरखण्डाभ्यां यावन्मध्यान्तरं लघु।**
> **तावत्तात्कालिकं मानं ग्रासखग्रासयोः क्रमात्॥ २१॥**
> **रविबिम्बाद्गुरुतरं चन्द्रबिम्बं भवेद्यदि।**
> **तदा खग्राससंभूतिरन्यथा कङ्कणं भवेत्॥ २२॥**

स्पष्टोऽर्थः। इष्टकालिकग्रासानयनमुपरितनन्यासे प्रदर्शितमेव। प्रस्तुते उदाहरणे रविबिम्बाच्चन्द्रबिंबं लघुतरमत एव यत्र यत्र ग्रामे दृश्यदर्शान्तकाले ऊर्ध्वाधरान्तरं शून्यं स्यात्तत्र तत्र कङ्कणाकृतिर्दृश्येत। अस्मिन् पर्वणि **मङ्गलुरं शृङ्गेरी कडपी विशाखपत्तनं जगन्नाथपुरी कालिकाता** इत्येतासु नगरीषु कङ्कणाकृतिग्रहणं भवेत्।

इदानीं स्पर्शमोक्षयोः **स्थाननिर्णायकं** गणितमाह। तत्राऽऽदावुत्तरबिन्दुसंबन्धेन स्थाननिर्णयः—

> **नतियुक्तश्चन्द्रशरः सहस्रगुणितस्तथा।**
> **बिम्बैक्यार्धहृतोऽनेन स्थानांशान्स्पर्शमोक्षयोः॥ २३॥**
> **चन्द्रग्रहोक्तवत्प्राप्याक्षायनाभ्यां हि केवलम्।**
> **स्पर्शमोक्षस्थले साध्ये विक्षेपवलनं विना॥ २४॥**

उदाहरणम्— स्पर्शकाले नतियुक्तश्चन्द्रशरः – ९′·२ सहस्रगुणः ९२००′ बिम्बैक्यार्धेन ३१′·८ भक्तो जातश्**चन्द्रग्रहणाध्याये** चतुर्थकोष्ठकस्योपकरणं २८९, अनेनोत्तरध्रुवसंबन्धिनः **स्पर्शकालिकाः स्थानांशाः** + १०७° लभ्यन्ते। एवं मोक्षकालिकचन्द्रशरात् + ७′·२ **मोक्षस्थानांशाः** –७७° सिध्यन्ति। सायनरविणा १६° **चन्द्रग्रहणाध्यायस्य** पञ्चमपदकाद**यनवलनं** + २३°, स्पर्शकालेन १·५ घ. **चन्द्रग्रहणाध्यायस्य** षष्ठपदकात्**स्पार्शिकमाक्षवलनं** + १६°, मोक्षकालेन ७·५ घ. **मौक्षिकमाक्षवलनं** + ११° लभ्यते। अतः—

स्पर्शस्थानम् = (१०७° + २३° + १६°) = + १४६° उत्तरबिन्दोः पश्चिमतः ।
मोक्षस्थानम् = (-७७° + २३° + ११°) = - ४३° उत्तरबिन्दोः पूर्वतः ।

इदानीमूर्ध्वबिन्दुसंबन्धिस्थाननिर्णयः—

संस्पर्शमोक्षस्थानांशाः खमध्यवलनान्विताः ।
ऊर्ध्वबिन्दोः सकाशात्स्युः सव्यासव्या धनर्णगाः ॥ २५ ॥

" **नतियुक्तश्चन्द्रशरः** " इत्यनेन साधिताः स्थानांशाः पञ्चमकोष्ठकालुब्धेन खमध्यवलनेन संस्कृताश्चेत्सूर्यस्य शिरोबिन्दुसकाशात्स्पर्शमोक्षस्थानिका भवेयुः । तत्र ये धनगतास्तान्दक्षिणतो दद्यात्, ऋणगतान्वामतः ।

स्पर्शस्थानम्			मोक्षस्थानम्		
स्पर्शस्थानांशाः	...	+ १०७°	मोक्षस्थानांशाः	...	- ७७°
को. ५ उप. नतांशाः - ३७			को. ५ उप. नतांशाः - २७°		
" " विश्लेषांशा + ७७		- ५४	" " विश्लेषांशा + ३८		- ४९
सव्यम् नाम दक्षिणतः	...	+ ५३	अपसव्यम् नाम वामतः	...	-१२८

पूर्वगणितस्य सारांशः

सूर्यग्रहणम् ।

शके १८१५ फाल्गुन ३० शुक्रे ।

(परमग्रासः २९′· ४ = ९·७७ अङ्गुलानि
शेषबिम्बम् २·६ = ०·८७ अङ्गुलानि)

		स्पर्शः	मध्यः	मोक्षः
		घ०	घ०	घ०
बागलकोटपत्तने मध्यमकालः	... ...	१·५	४·३	७·५
" " सूर्योदयात्	... ...	१·८	४·६	७·८
उज्जयिन्यां मध्यमकालः	... ...	१·५	४·३	७·५
मद्रासपत्तने "	... ...	२·३	५·१	८·३
" होराः	... ...	६-५५	८-२	९-१९

परिलेखः ।

स्पर्श उत्तरबिन्दोः पश्चिमतः	१४६°	स्पर्श ऊर्ध्वबिन्दोर्दक्षिणतः	५३°
मोक्ष उत्तरबिन्दोः पूर्वतः	४३	मोक्ष ऊर्ध्वबिन्दोर्वामतः	१२८

म. का. घटी	पूर्वापरं अन्तरं	याम्योत्तरं अन्तरं
५३·६	-५४·८	-१२·८
०·६	४१·९	११·०
१·६	२९·७	९·०
२·६	१८·४	६·७
३·६	-७·६	४·३
४·६	+३·१	-१·६
५·६	१३·३	+१·२
६·६	२२·९	४·३
७·६	३१·७	७·५
८·६	+४०·५	+१०·७

अथ सूर्यग्रहणे स्पर्शादिकालज्ञानार्थं छेद्यकलेखनम् ।

चन्द्रग्रहणे छेद्यकलेखनप्रकरणे कथितवदेकस्यांशस्य दैर्घ्याङ्कनं दिगङ्कनं च कृत्वा पत्रस्य मध्य एकां पूर्वापररेखां प्रसार्य तां **क्रान्तिवृत्तं** वदेत् । अस्य मध्ये बिन्दुमेकं दत्त्वा तं दृश्यदर्शान्तकालिकं सूर्यस्थानं कल्पयित्वा तत्परितो रविबिम्बार्धमितेन कर्कटेनाऽऽदौ रविबिम्बं विलिख्य पश्चाद्बिम्बैक्यार्धमितेन कर्कटेन तमेव बिन्दुं परितोऽन्यत् वृत्तं लिखेत् ।

अनन्तरं क्रान्तिवृत्ते मध्याबिन्दोः सकाशात्पूर्वापरान्तराण्यङ्कयित्वा तेषामग्रबिन्दुषु मध्यमकालान्विलिख्य तेभ्य एव बिन्दुभ्यस्तत्तत्कालिकानि याम्योत्तरान्तराणि यथा क्रान्तिवृत्ते लम्बानि स्युस्तथा स्वस्वदिशि प्रसार्य क्रमेण सर्वाणि लम्बाग्राणि संधाय चापकल्पैका रेखोत्पादनीया । सैव लम्बनविकृतं **विक्षेपवृत्तं** स्यात् ।

विक्षेपबिम्बैक्यवृत्तयोः संपाताभ्यां क्रान्तिवृत्तोपरि द्वौ लम्बौ प्रसार्य तयोः क्रान्तिवृत्तस्थाभ्यामग्राभ्यां स्पर्शमोक्षकालौ परिजानीयात् । विक्षेपवृत्त इष्टकालिकं चन्द्रस्य स्थानं निश्चित्य तत्परितश्चन्द्रबिम्बार्धमितेन चन्द्रबिम्बमुत्पाद्येष्टकालिकं ग्रासं दर्शयेत् ।

इति च्छेद्यकलेखनम् ।

इदानीं **श्रीमद्गणेशदैवज्ञैः** स्वानुभवात्सम्यग्वर्णितं सूर्यग्रहणद्वयं **मुनीश्वरेण** मरीच्यामुल्लिखितमत्रानूद्यै**तमध्यायं** परिसमाप्नोमि ।

" शाके त्र्यब्धीन्द्र १४४३ तुल्ये वृषशरदि मधौ मासि बाणेन्दु १५ नाडी- ।
तुल्ये दर्शेऽश्विधिष्ण्ये दिनकरदिवसे भानुसर्वग्रहोऽभूत् ।
तस्मिन्सर्वग्रहेऽस्तं गतवति सकले काव्यसप्तर्षिमुख्या- ।
स्तारा दृष्ट्वाऽन्धकाराकलितमिह जगत्तत्तु हा हा चकार ॥
शाकेऽष्टाद्रिमनू १४७८ न्मिते नलशरद्यूर्जेऽष्टनाडीमिते ।
दर्शेज्याहनि मित्रभेऽभवदिनग्रस्तं महाश्चर्यकृत् ।
शेषोऽर्कः परितः सितो वलयितो मध्ये च कृष्णं किला-
त्पं चान्द्रं वपुरैक्षताऽत्र कविविद्वान्यन्धकारे जनः " ॥ **गणेशदैवज्ञाः**

श्रीभास्कराचार्यवच्छ्री**गणेशदैवज्ञा** अपि दीर्घायुष आसन्निति दृश्यते । यतो ग्रहलाघवग्रथनादूर्ध्वं षट्त्रिंशता वर्षैः संजातं सूर्यस्य कङ्कणग्रहणं तैर्विलोकितम् ।

इति सूर्यग्रहणगणितम् ।

इति श्रीरामकृष्णसुतवेङ्कटेश विरचिते ज्योतिर्गणिते द्वितीये परिच्छेदे द्वितीयः सूर्यग्रहणाध्यायः समाप्तः ॥ २ ॥

कोष्ठकः १ । सूर्यग्रहणे स्थूलः स्पर्शकालः ।

उपकरणं = दर्शान्तघट्यः ।

दर्श- घ.	स्पर्श- घ.	दर्श- घ.	स्पर्श- घ.	दर्श- घ.	स्पर्श- घ.	दर्श- घ.	स्पर्श- घ.	दर्श- घ.	स्पर्श- घ.
५८	५१	५	५७	१२	५	१९	१६	२६	२५
५९	५२	६	५८	१३	६	२०	१७	२७	२७
६०	५३	७	५९	१४	८	२१	१८	२८	२८
६१	५३	८	६०	१५	१०	२२	१९	२९	३०
६२	५४	९	१	१६	११	२३	२१	३०	३१
३	५५	१०	३	१७	१३	२४	२३	३१	३२
४	५६	११	४	१८	१४	२५	२४	३२	३३

कोष्ठकः २ ।

त्रिभोनलग्नम् ।

द्वे उपकरणे = विषुवकालः, उत्तराक्षांशाश्च ।

उपकरणम् विषुवकालः	उत्तराक्षांशाः								उपकरणम् विषुवकालः
	०	५	१०	१५	२०	२५	३०	३५	
घ०	अं०	अं०	अं०	अं०	अं०	अं०	अं०	अं०	घ०
०	२७०·०	२७०·०	२७०·०	२७०·०	२७०·०	२७०·०	२७०·०	२७०·०	०
१	२७६·५	२७६·८	२७७·१	२७७·४	२७७·८	२७८·२	२७८·७	२७९·४	१
२	२८३·०	२८३·५	२८४·१	२८४·७	२८५·४	२८६·३	२८७·३	२८८·६	२
३	२८९·५	२९०·२	२९१·१	२९२·०	२९३·०	२९४·२	२९५·७	२९७·५	३
४	२९५·९	२९६·८	२९७·९	२९९·१	३००·४	३०१·९	३०३·८	३०६·०	४
५	३०२·२	३०३·४	३०४·६	३०६·०	३०७·६	३०९·४	३११·५	३१४·१	५
६	३०८·४	३०९·७	३११·२	३१२·८	३१४·५	३१६·६	३१८·९	३२१·७	६
७	३१४·५	३१६·०	३१७·६	३१९·३	३२१·२	३२३·४	३२६·०	३२८·९	७
८	३२०·४	३२२·१	३२३·८	३२५·७	३२७·७	३३०·१	३३२·७	३३५·७	८
९	३२६·३	३२८·०	३२९·९	३३१·९	३३४·०	३३६·४	३३९·१	३४२·१	९
१०	३३२·१	३३३·९	३३५·८	३३७·९	३४०·१	३४२·५	३४५·२	३४८·३	१०
११	३३७·८	३३९·७	३४१·७	३४३·७	३४६·०	३४८·४	३५१·१	३५४·१	११
१२	३४३·४	३४५·३	३४७·४	३४९·५	३५१·७	३५४·१	३५६·८	३५९·७	१२
१३	३४९·०	३५०·९	३५३·०	३५५·१	३५७·३	३५९·७	२·३	५·१	१३
१४	३५४·५	३५६·५	३५८·६	०·७	२·८	५·२	७·७	१०·४	१४
१५	०·०	३६२·०	४·०	६·१	८·२	१०·५	१२·९	१५·६	१५
१६	५·५	७·५	९·५	११·५	१३·६	१५·८	१८·१	२०·६	१६
१७	११·०	१३·०	१४·९	१६·९	१९·९	२१·०	२३·३	२५·६	१७
१८	१६·६	१८·५	२०·४	२२·३	२४·३	२६·३	२८·४	३०·६	१८
१९	२२·२	२४·०	२५·९	२७·७	२९·६	३१·४	३३·४	३५·५	१९
२०	२७·९	२९·७	३१·४	३३·१	३४·९	३६·६	३८·५	४०·४	२०
२१	३३·७	३५·४	३७·०	३८·६	४०·२	४१·९	४३·५	४५·३	२१
२२	३९·६	४१·१	४२·६	४४·१	४५·६	४७·१	४८·६	५०·२	२२
२३	४५·५	४७·०	४८·४	४९·७	५१·०	५२·३	५३·७	५५·१	२३
२४	५१·६	५२·९	५४·१	५५·३	५६·५	५७·६	५८·८	६०·१	२४
२५	५७·८	५८·९	६०·०	६१·०	६२·०	६२·९	६४·०	६५·०	२५
२६	६४·१	६५·०	६५·९	६६·७	६७·५	६८·३	६९·१	७०·०	२६
२७	७०·५	७१·२	७१·९	७२·५	७३·१	७३·७	७४·३	७५·०	२७
२८	७७·०	७७·४	७७·८	७८·३	७८·७	७९·१	७९·५	८०·०	२८
२९	८३·५	८३·७	८३·९	८४·१	८४·४	८४·६	८४·८	८५·०	२९
३०	९०·०	९०·०	९०·०	९०·०	९०·०	९०·०	९०·०	९०·०	३०

कोष्ठकः २ ।

त्रिभोनलग्नम् ।

द्वे उपकरणे = विषुवकालः, उत्तराक्षांशाश्च ।

विषुवकालः	उत्तराक्षांशाः								विषुवकालः
	०	५	१०	१५	२०	२५	३०	३५	
घ०	अं०	अं०	अं०	अं०	अं०	अं०	अं०	अं०	घ०
३०	९०·०	९०·०	९०·०	९०·०	९०·०	९०·०	९०·०	९०·०	३०
३१	९६·५	९६·३	९६·१	९५·९	९५·६	९५·४	९५·२	९५·०	३१
३२	१०३·०	१०२·६	१०२·२	१०१·७	१०१·३	१००·९	१००·५	१००·०	३२
३३	१०९·५	१०८·८	१०८·१	१०७·५	१०६·९	१०६·३	१०५·७	१०५·०	३३
३४	११५·९	११५·०	११४·१	११३·३	११२·५	१११·७	११०·९	११०·०	३४
३५	१२२·२	१२१·१	१२०·०	११९·०	११८·०	११७·१	११६·०	११५·०	३५
३६	१२८·४	१२७·१	१२५·९	१२४·७	१२३·५	१२२·४	१२१·२	११९·९	३६
३७	१३४·५	१३३·०	१३१·६	१३०·३	१२९·०	१२७·७	१२६·३	१२४·९	३७
३८	१४०·४	१३८·९	१३७·४	१३५·९	१३४·४	१३२·९	१३१·४	१२९·८	३८
३९	१४६·३	१४४·६	१४३·०	१४१·४	१३९·८	१३८·१	१३६·५	१३४·७	३९
४०	१५२·१	१५०·३	१४८·६	१४६·९	१४५·१	१४३·४	१४१·५	१३९·६	४०
४१	१५७·८	१५६·०	१५४·१	१५२·३	१५०·४	१४८·६	१४६·६	१४४·५	४१
४२	१६३·४	१६१·५	१५९·६	१५७·७	१५५·७	१५३·८	१५१·६	१४९·४	४२
४३	१६९·०	१६७·०	१६५·१	१६३·१	१६१·०	१५९·०	१५६·७	१५४·४	४३
४४	१७४·५	१७२·५	१७०·५	१६८·५	१६६·४	१६४·२	१६१·९	१५९·४	४४
४५	१८०·०	१७८·०	१७६·०	१७३·९	१७१·८	१६९·५	१६७·१	१६४·४	४५
४६	१८५·५	१८३·५	१८१·४	१७९·३	१७७·२	१७४·८	१७२·३	१६९·६	४६
४७	१९१·०	१८९·१	१८७·०	१८४·९	१८२·७	१८०·३	१७७·७	१७४·९	४७
४८	१९६·६	१९४·७	१९२·६	१९०·५	१८८·३	१८५·९	१८३·२	१८०·३	४८
४९	२०२·२	२००·३	१९८·३	१९६·३	१९४·०	१९१·६	१८८·९	१८५·९	४९
५०	२०७·९	२०६·१	२०४·२	२०२·१	१९९·९	१९७·५	१९४·८	१९१·७	५०
५१	२१३·७	२१२·०	२१०·१	२०८·१	२०६·०	२०३·६	२००·९	१९७·९	५१
५२	२१९·६	२१७·९	२१६·२	२१४·३	२१२·३	२०९·९	२०७·३	२०४·३	५२
५३	२२५·५	२२४·०	२२२·४	२२०·७	२१८·८	२१६·६	२१४·०	२११·१	५३
५४	२३१·६	२३०·३	२२८·८	२२७·२	२२५·५	२२३·४	२२१·१	२१८·३	५४
५५	२३७·८	२३६·६	२३५·४	२३४·०	२३२·४	२३०·६	२२८·५	२२५·९	५५
५६	२४४·१	२४३·२	२४२·१	२४०·९	२३९·६	२३८·१	२३६·२	२३४·०	५६
५७	२५०·५	२४९·८	२४८·९	२४८·०	२४७·०	२४५·८	२४४·३	२४२·५	५७
५८	२५७·०	२५६·५	२५५·९	२५५·३	२५४·६	२५३·७	२५२·७	२५१·४	५८
५९	२६३·५	२६३·२	२६२·९	२६२·६	२६२·२	२६१·८	२६१·३	२६०·६	५९
६०	२७०·०	२७०·०	२७०·०	२७०·०	२७०·०	२७०·०	२७०·०	२७०·०	६०

कोष्ठकः ३ ।

त्रिभोनलग्नस्य नतांशाः ।

द्वे उपकरणे = विषुवकालः उत्तराक्षांशाश्च ।

विषुवकालः		उत्तराक्षांशाः							
		०	५	१०	१५	२०	२५	३०	३५
घ०	घ०	अं०	अं०	अं०	अं०	अं०	अं०	अं०	अं०
०	६०	− २३·५	− २८·४	− ३३·४	− ३८·४	− ४३·४	− ४८·४	− ५३·४	− ५८·४
१	५९	२३·३	२८·३	३३·३	३८·३	४३·३	४८·३	५३·३	५८·३
२	५८	२२·९	२७·९	३२·९	३७·९	४२·८	४७·८	५२·७	५७·७
३	५७	२२·३	२७·२	३२·१	३७·१	४२·०	४७·०	५१·९	५६·७
४	५६	२१·३	२६·२	३१·२	३६·१	४१·०	४५·८	५०·७	५५·५
५	५५	२०·२	२५·०	२९·९	३४·८	३९·६	४४·४	४९·२	५४·०
६	५४	१८·८	२३·६	२८·५	३३·३	३८·०	४२·८	४७·५	५२·२
७	५३	१७·२	२२·०	२६·८	३१·५	३६·३	४१·०	४५·६	५०·२
८	५२	१५·४	२०·२	२४·९	२९·७	३४·३	३९·०	४३·६	४८·१
९	५१	१३·५	१८·२	२२·९	२७·६	३२·३	३६·९	४१·४	४५·९
१०	५०	११·५	१६·२	२०·८	२५·४	३०·०	३४·६	३९·१	४३·६
११	४९	९·३	१३·९	१८·६	२३·२	२७·७	३२·३	३६·८	४१·२
१२	४८	७·१	११·७	१६·३	२०·९	२५·४	२९·९	३४·४	३८·८
१३	४७	४·७	९·३	१३·९	१८·५	२३·०	२७·५	३२·०	३६·४
१४	४६	− २·४	७·०	११·६	१६·१	२०·७	२५·२	२९·६	३४·१
१५	४५	०·०	४·६	९·२	१३·७	१८·३	२२·८	२७·३	३१·७
१६	४४	+ २·४	− २·२	६·८	११·४	१५·९	२०·५	२५·०	२९·५
१७	४३	४·७	+ ०·१	४·५	९·१	१३·६	१८·२	२२·८	२७·३
१८	४२	७·१	२·४	− २·२	६·८	११·४	१६·०	२०·६	२५·२
१९	४१	९·३	४·६	०·०	४·६	९·३	१३·९	१८·६	२३·२
२०	४०	११·५	६·८	+ २·१	२·६	७·३	११·९	१६·६	२१·३
२१	३९	१३·५	८·८	४·१	− ०·६	५·४	१०·१	१४·८	१९·५
२२	३८	१५·४	१०·७	५·९	+ १·१	३·६	८·४	१३·२	१७·९
२३	३७	१७·२	१२·४	७·६	२·८	२·०	६·८	११·७	१६·५
२४	३६	१८·८	१३·९	९·१	४·३	− ०·६	५·५	१०·३	१५·२
२५	३५	२०·२	१५·३	१०·४	५·५	+ ०·६	४·३	९·२	१४·१
२६	३४	२१·३	१६·४	११·५	६·५	१·६	३·३	८·३	१३·२
२७	३३	२२·३	१७·३	१२·३	७·३	२·४	२·५	७·५	१२·५
२८	३२	२२·९	१७·९	१३·०	८·०	३·०	२·०	७·०	११·९
२९	३१	२३·३	१८·३	१३·३	८·३	३·३	१·६	६·६	११·६
३०	३०	+ २३·५	+ १८·४	+ १३·४	+ ८·४	+ ३·४	− १·५	− ६·५	− ११·५

कोष्ठकः ४ ।

नत्यानयने— द्वे उपकरणे = त्रिभोनलग्नस्य नतांशाः, चन्द्रस्य परमलम्बनकलाश्च ।

अस्फुटलम्बनानयने— द्वे उपकरणे = विश्लेषांशाः । चन्द्रपरमलम्बनकलाश्च ।

नतांशकोटीज्यानयने— उपकरणं = केवला नतांशाः ।

उपकरणम् आयम्	उप० २ चन्द्रस्य परमलम्बनकलाः ।									उपकरणम् आयम्	नतांश-कोटिज्या
	५३′	५४′	५५′	५६′	५७′	५८′	५९′	६०′	६१′		
अं०	क०	क०	क०	क०	क०	क०	क०	क०	क०	अं०	
०	०·०	०·०	०·०	०·०	०·०	०·०	०·०	०·०	०·०	०	१·००
१	०·९	०·९	०·९	०·९	१·०	१·०	१·०	१·०	१·०	१	१·००
२	१·८	१·८	१·९	१·९	२·०	२·०	२·१	२·१	२·१	२	१·००
३	२·८	२·८	२·९	२·९	३·०	३·०	३·१	३·१	३·१	३	१·००
४	३·७	३·७	३·८	३·८	३·९	४·०	४·१	४·२	४·३	४	१·००
५	४·६	४·६	४·७	४·८	४·९	५·०	५·१	५·२	५·३	५	१·००
६	५·६	५·७	५·८	५·९	६·०	६·१	६·२	६·३	६·४	६	·९९
७	६·५	६·६	६·८	६·८	६·९	७·१	७·२	७·३	७·४	७	·९९
८	७·३	७·५	७·६	७·७	७·९	८·१	८·२	८·३	८·४	८	·९९
९	८·३	८·४	८·६	८·७	८·९	९·१	९·२	९·४	९·५	९	·९९
१०	९·२	९·३	९·५	९·७	९·८	१०·०	१०·२	१०·४	१०·६	१०	·९८
११	१०·२	१०·३	१०·५	१०·७	१०·८	११·०	११·२	११·४	११·६	११	·९८
१२	११·०	११·२	११·४	११·६	११·८	१२·०	१२·३	१२·५	१२·७	१२	·९८
१३	११·९	१२·१	१२·३	१२·५	१२·७	१३·०	१३·३	१३·५	१३·७	१३	·९७
१४	१२·८	१३·०	१३·३	१३·५	१३·८	१४·०	१४·३	१४·५	१४·७	१४	·९७
१५	३३·७	१४·०	१४·२	१४·५	१४·७	१५·०	१५·३	१५·५	१५·८	१५	·९७
१६	१४·६	१४·९	१५·१	१५·४	१५·६	१५·९	१६·२	१६·५	१६·८	१६	·९६
१७	१५·५	१५·८	१६·१	१६·४	१६·७	१७·०	१७·२	१७·५	१७·८	१७	·९६
१८	१६·३	१६·६	१६·९	१७·३	१७·५	१७·८	१८·२	१८·५	१८·८	१८	·९५
१९	१७·३	१७·६	१७·९	१८·३	१८·६	१८·९	१९·२	१९·५	१९·८	१९	·९५
२०	१८·१	१८·४	१८·८	१९·१	१९·५	१९·८	२०·१	२०·५	२०·८	२०	·९४
२१	१९·०	१९·४	१९·७	२०·१	२०·४	२०·८	२१·१	२१·५	२१·९	२१	·९३
२२	१९·९	२०·३	२०·६	२१·०	२१·४	२१·८	२२·१	२२·५	२२·९	२२	·९३
२३	२०·७	२१·१	२१·४	२१·८	२२·२	२२·६	२३·०	२३·४	२३·८	२३	·९२
२४	२१·६	२२·०	२२·४	२२·८	२३·२	२३·६	२४·०	२४·४	२४·८	२४	·९१
२५	२२·५	२२·९	२३·३	२३·७	२४·१	२४·६	२५·०	२५·४	२५·८	२५	·९१
२६	२३·२	२३·७	२४·१	२४·५	२५·०	२५·४	२५·८	२६·३	२६·७	२६	·९०
२७	२४·०	२४·५	२४·९	२५·४	२५·८	२६·३	२६·७	२७·२	२७·६	२७	·८९
२८	२४·९	२५·४	२५·८	२६·३	२६·८	२७·३	२७·७	२८·२	२८·६	२८	·८८
२९	२५·७	२६·२	२६·७	२७·१	२७·६	२८·१	२८·६	२९·१	२९·६	२९	·८७
३०	२६·५	२७·०	२७·५	२८·०	२८·५	२९·०	२९·५	३०·०	३०·५	३०	·८७

कोष्ठकः ४ ।

नतिः, अस्फुटलम्बनं, नतांशकोटीज्या च ।

उपकरणम् आयम्	उप० २ चन्द्रस्य परमलम्बनकलाः ।									उपकरणम् आयम्	नतांश-कोटिज्या
	५३′	५४′	५५′	५६′	५७′	५८′	५९′	६०′	६१′		
अं०	क०	क०	क०	क०	क०	क०	क०	क०	क०	अं०	
३०	२६·५	२७·०	२७·५	२८·०	२८·५	२९·०	२९·५	३०·०	३०·५	३०	·८७
३१	२७·३	२७·८	२८·३	२८·८	२९·४	२९·९	३०·४	३०·९	३१·४	३१	·८६
३२	२८·१	२८·६	२९·२	२९·७	३०·२	३०·७	३१·३	३१·८	३२·४	३२	·८५
३३	२८·९	२९·४	३०·०	३०·५	३१·१	३१·६	३२·२	३२·७	३३·३	३३	·८४
३४	२९·७	३०·२	३०·८	३१·४	३१·९	३२·५	३३·०	३३·६	३४·२	३४	·८३
३५	३०·४	३१·०	३१·५	३२·१	३२·७	३३·३	३३·८	३४·४	३५·०	३५	·८२
३६	३१·२	३१·८	३२·३	३२·९	३३·५	३४·१	३४·७	३५·३	३५·९	३६	·८१
३७	३१·८	३२·४	३३·०	३३·६	३४·२	३४·९	३५·५	३६·१	३६·७	३७	·८०
३८	३२·६	३३·२	३३·८	३४·४	३५·१	३५·७	३६·३	३६·९	३७·५	३८	·७९
३९	३३·४	३४·०	३४·६	३५·३	३५·९	३६·५	३७·२	३७·८	३८·४	३९	·७८
४०	३४·१	३४·७	३५·४	३६·०	३६·७	३७·३	३८·०	३८·६	३९·२	४०	·७७
४१	३४·८	३५·५	३६·१	३६·८	३७·४	३८·१	३८·७	३९·४	४०·०	४१	·७५
४२	३५·४	३६·१	३६·७	३७·४	३८·१	३८·८	३९·४	४०·१	४०·८	४२	·७४
४३	३६·१	३६·८	३७·५	३८·२	३८·९	३९·५	४०·२	४०·९	४१·७	४३	·७३
४४	३६·८	३७·५	३८·२	३८·९	३९·६	४०·३	४१·०	४१·७	४२·४	४४	·७२
४५	३७·४	३८·२	३८·९	३९·६	४०·३	४१·०	४१·७	४२·४	४३·१	४५	·७१
४६	३८·२	३८·९	३९·६	४०·३	४१·०	४१·८	४२·५	४३·२	४३·९	४६	·६९
४७	३८·८	३९·५	४०·२	४१·०	४१·७	४२·४	४३·२	४३·९	४४·६	४७	·६८
५८	३९·४	४०·१	४०·९	४१·६	४२·४	४३·१	४३·९	४४·६	४५·३	४८	·६७
४९	४०·०	४०·८	४१·५	४२·३	४३·०	४३·८	४४·५	४५·३	४६·१	४९	·६६
५०	४०·६	४१·४	४२·२	४२·९	४३·७	४४·५	४५·२	४६·०	४६·८	५०	·६४
५१	४१·२	४१·९	४२·७	४३·५	४४·३	४५·१	४५·८	४६·६	४७·३	५१	·६३
५२	४१·८	४२·६	४३·४	४४·१	४४·९	४५·७	४६·५	४७·३	४८·१	५२	·६२
५३	४२·३	४३·१	४३·९	४४·७	४५·५	४६·३	४७·१	४७·९	४८·७	५३	·६०
५४	४२·९	४३·७	४४·५	४५·४	४६·२	४७·०	४७·८	४८·६	४९·४	५४	·५९
५५	४३·५	४४·३	४५·१	४५·९	४६·७	४७·६	४८·४	४९·२	५०·०	५५	·५७
५६	४३·९	४४·७	४५·६	४६·४	४७·२	४८·०	४८·९	४९·७	५०·५	५६	·५६
५७	४४·४	४५·३	४६·१	४६·९	४७·८	४८·६	४९·५	५०·३	५१·१	५७	·५४
५८	४५·०	४५·८	४६·७	४७·५	४८·४	४९·२	५०·१	५०·९	५१·७	५८	·५३
५९	४५·४	४६·३	४७·१	४८·०	४८·८	४९·७	५०·५	५१·४	५२·२	५९	·५२
६०	४५·९	४६·८	४७·७	४८·५	४९·४	५०·३	५१·१	५२·०	५२·९	६०	·५०

कोष्ठकः ४ ।

नतिः, अस्फुटलम्बनं नतांशकोटीज्या च ।

उपकरणम् आयम्	उप० २ चन्द्रस्य परमलम्बनकलाः ।									उपकरणम् आयम्	नतांश-कोटिज्या
	५३′	५४′	५५′	५६′	५७′	५८′	५९′	६०′	६१′		
अं०	क०	क०	क०	क०	क०	क०	क०	क०	क०	अं०	
६०	४५·९	४६·८	४७·७	४८·५	४९·४	५०·३	५१·१	५२·०	५२·९	६०	·५०
६१	४६·४	४७·२	४८·१	४९·०	४९·९	५०·७	५१·६	५२·५	५३·४	६१	·४८
६२	४६·८	४७·७	४८·६	४९·५	५०·३	५१·२	५२·१	५३·०	५३·९	६२	·४७
६३	४७·२	४८·१	४९·०	४९·९	५०·८	५१·७	५२·६	५३·५	५४·४	६३	·४५
६४	४७·६	४८·५	४९·४	५०·३	५१·२	५२·१	५३·०	५३·९	५४·८	६४	·४४
६५	४८·०	४९·०	४९·९	५०·८	५१·७	५२·६	५३·५	५४·४	५५·३	६५	·४२
६६	४८·४	४९·३	५०·२	५१·१	५२·०	५३·०	५३·९	५४·८	५५·७	६६	·४१
६७	४८ ८	४९·७	५०·६	५१·५	५२·४	५३·४	५४·३	५५·२	५६·१	६७	·३९
६८	४९·२	५०·१	५१·०	५१·९	५२·८	५३·८	५४·७	५५·६	५६·५	६८	·३७
६९	४९·५	५०·४	५१·४	५२·३	५३·२	५४·१	५५·१	५६·०	५६·९	६९	·३६
७०	४९·८	५०·८	५१·७	५२·६	५३·६	५४·५	५५·५	५६·४	५७·३	७०	·३४
७१	५०·१	५१·१	५२·०	५२·९	५३·९	५४·८	५५·८	५६·७	५७·६	७१	·३३
७२	५०·४	५१·४	५२·३	५३·३	५४·२	५५·२	५६·१	५७·०	५८·०	७२	·३१
७३	५०·७	५१·७	५२·६	५३·६	५४·५	५५·५	५६·४	५७·४	५८·४	७३	·२९
७४	५१·०	५२·०	५२·९	५३·९	५४·८	५५·८	५६·८	५७·७	५८·७	७४	·२८
७५	५१·२	५२·२	५३·२	५४·१	५५·१	५६·१	५७·०	५८·०	५९·०	७५	·२६
७६	५१·४	५२·४	५३·४	५४·३	५५·३	५६·३	५७·२	५८·२	५९·२	७६	·२४
७७	५१·६	५२·६	५३·६	५४·६	५५·६	५६·६	५७·५	५८·५	५९·५	७७	·२३
७८	५१·८	५२·८	५३·८	५४·८	५५·८	५६·८	५७·७	५८·७	५९·७	७८	·२१
७९	५२·०	५३·०	५४·०	५५·०	५६·०	५६·९	५७·९	५८·९	५९·९	७९	·१९
८०	५२·१	५३·२	५४·२	५५·१	५६·१	५७·१	५८·१	५९·१	६०·१	८०	·१७
८१	५२·३	५३·३	५४·३	५५·३	५६·२	५७·२	५८·२	५९·२	६०·२	८१	·१६
८२	५२·५	५३·५	५४·५	५५·४	५६·४	५७·४	५८·४	५९·४	६०·४	८२	·१४
८३	५२·६	५३·६	५४·६	५५·६	५६·६	५७·६	५८·६	५९·६	६०·६	८३	·१२
८४	५२·७	५३·७	५४·७	५५·७	५६·७	५७·७	५८·७	५९·७	६०·७	८४	·१०
८५	५२·८	५३·८	५४·८	५५·८	५६·८	५७·८	५८·८	५९·८	६०·८	८५	·०९
८६	५२·९	५३·९	५४·९	५५·९	५६·९	५७·९	५८·९	५९·९	६०·९	८६	·०७
८७	५२·९	५३·९	५४·९	५५·९	५६·९	५७·९	५८·९	५९·९	६०·९	८७	·०५
८८	५३·०	५४·०	५५·०	५६·०	५७·०	५८·०	५९·०	६०·०	६१·०	८८	·०३
८९	५३·०	५४·०	५५·०	५६·०	५७·०	५८·०	५९·०	६०·०	६१·०	८९	·०२
९०	५३·०	५४·०	५५·०	५६·०	५७·०	५८·०	५९·०	६०·०	६१·०	९०	·००

कोष्ठकः ५ ।

खमध्यवलनम् ।

द्वे उपकरणे = त्रिभोनलग्नस्य नतांशाः विश्लेषांशाश्च ।

उप० नतांशाः	उपकरणम्, धनविश्लेषांशाः ।																
	०	६	१२	१८	२४	३०	३६	४२	४८	५४	६०	६६	७२	७८	८४	९०	
	−	−	−	−	−	−	−	−	−	−	−	−	−	−	−	−	
−६०	०	४	७	१०	१३	१६	१६	२१	२३	२५	२७	२८	२९	३०	३०	३०	−६०
५४	०	४	९	१३	१७	२०	२३	२६	२८	३१	३२	३४	३५	३५	३६	३६	५४
४८	०	५	११	१६	२०	२४	२८	३१	३४	३६	३८	३९	४१	४१	४२	४२	४८
४२	०	७	१३	१९	२४	२९	३३	३७	४०	४२	४४	४५	४७	४७	४८	४८	४२
−३६	०	८	१६	२३	२९	३५	३९	४३	४६	४८	५०	५२	५३	५३	५४	५४	३६
३०	०	१०	२०	२८	३५	४१	४६	४९	५१	५५	५६	५८	५९	६०	६०	६०	३०
२४	०	१३	२५	३५	४२	४८	५३	५६	५९	६१	६३	६४	६५	६६	६६	६६	२४
१८	०	१८	३३	४४	५१	५७	६१	६४	६६	६८	६९	७०	७१	७२	७२	७२	१८
−१२	०	२६	४४	५६	६२	६७	७०	७२	७४	७५	७६	७७	७८	७८	७८	७८	−१२
−६	०	४५	६४	७१	७६	७८	८०	८१	८२	८३	८३	८३	८४	८४	८४	८४	−६
०	०	९०	९०	९०	९०	९०	९०	९०	९०	९०	९०	९०	९०	९०	९०	९०	०
+६	०	१३५	११६	१०९	१०४	१०२	१००	९९	९८	९७	९७	९७	९६	९६	९६	९६	+६
+१२	०	१५४	१३६	१२४	११८	११३	११०	१०८	१०६	१०५	१०४	१०३	१०३	१०२	१०२	१०२	+१२
+१८	०	१६२	१४७	१३६	१२९	१२३	११९	११६	११४	११२	१११	११०	१०९	१०८	१०८	१०८	+१८
२४	०	१६७	१५५	१४५	१३८	१३२	१२७	१२४	१२१	११९	११७	११६	११५	११४	११४	११४	२४
३०	०	१७०	१६०	१५२	१४५	१३९	१३४	१३१	१२८	१२५	१२४	१२२	१२१	१२०	१२०	१२०	३०
३६	०	१७२	१६४	१५७	१५१	१४५	१४१	१३७	१३४	१३२	१३०	१२८	१२७	१२७	१२६	१२६	३६
+४२	०	१७३	१६७	१६१	१५६	१५१	१४७	१४३	१४०	१३८	१३६	१३५	१३३	१३३	१३२	१३२	+४२
४८	०	१७५	१६९	१६४	१६०	१५६	१५२	१४९	१४६	१४४	१४२	१४१	१३९	१३९	१३८	१३८	४८
५४	०	१७६	१७१	१६७	१६३	१६०	१५७	१५४	१५२	१४९	१४८	१४६	१४५	१४५	१४४	१४४	५४
+६०	०	१७६	१७३	१७०	१६७	१६४	१६१	१५९	१५७	१५५	१५३	१५२	१५१	१५०	१५०	१५०	+६०
	+	+	+	+	+	+	+	+	+	+	+	+	+	+	+	+	
	०	६	१२	१८	२४	३०	३६	४२	४८	५४	६०	६६	७२	७८	८४	९०	उप० नतांशाः
	उपकरणम्, ऋणविश्लेषांशाः।																

	उन्नतांशपरत्वेन चन्द्रबिम्बवृद्धिः, रविलम्बनं च। वृद्धिलम्बने विकलात्मके।															
उन्नतांशाः	०	६	१२	१८	२४	३०	३६	४२	४८	५४	६०	६६	७२	७८	८४	९०
चन्द्रबिंबवृद्धिः	०	४″	७″	१०″	१३″	१६″	१९″	२२″	२४″	२६″	२८″	२९″	३०″	३१″	३२″	३३″
रविलम्बनम्	९	९	९	८	८	८	७	६	६	५	४	४	३	२	१	०

अथ सूर्यग्रहणाध्याये द्वितीयं प्रकरणम् ।

* भूमण्डलसूर्यग्रहणगणितम् ।

" पश्चाद्भागाज्जलदवदधः संस्थितोऽभ्येत्य चन्द्रो ।
भानोर्बिम्बं स्फुरदसितया छादयत्यात्ममूर्त्या ।
पश्चात्स्पर्शो हरिदिशि ततो मुक्तिरस्यात एव ।
क्वापि च्छन्नः क्वचिदपिहितो नैष कक्षान्तरत्वात् । "

सिद्धान्तशिरोमणिः ।

मेघच्छायेव भूपृष्ठे चलन्ती चन्द्रच्छाया भूपृष्ठस्य यावन्तं प्रदेशं संक्रामति तावति प्रदेशे एव सूर्यश्चन्द्रच्छन्नो दृश्यते न तद्बहिरित्याचार्याणामभिप्रायः । अत्र चन्द्रे मेघसादृश्यमतीव समीचीनम् । (अपिहितो न = अच्छन्नः इत्यर्थः) ।

तत्राऽऽदावुपकरणानि—

पर्वसंस्कारसंयुक्तो दर्शो ग्रहणमध्यगः ।
काल एतत्कालभवं विधोः परमलम्बनम् ॥ १ ॥
शरं राहुं सायनार्कं कालभागाभिधौ गुणौ ।
ताराध्यायादार्क्षकालं चाऽऽनयेत्सुविचक्षणः ॥ २ ॥
आर्क्षः पञ्चेन्दु १५ रहितः षड्गुणो विषुवांशकाः ।
खमध्यबिन्दुसंबद्धा उज्जयिन्यां भवन्ति च ॥ ३ ॥

---

* भूमण्डलगणितं नाम सूर्यग्रहणे चन्द्रस्य विरलच्छाया येन मार्गेण भूगोलमुल्लङ्घति तन्मार्गस्य गणितम् । प्राचीनकाले नौकानयनशास्त्रस्यानुपलब्धेर्द्वीपान्तरगमने जनानां प्रवृत्तिर्नाऽऽसीत् । तेषां भूगोलविषयकं ज्ञानमपि केवलं पुराणाश्रितम् । अतो भूमण्डलसंबन्धिसूर्यग्रहणज्ञानं तदा व्यर्थमेव । संप्रति बाष्पशक्तिप्रेरितां नावमारुह्य निखिलो वारिराशिरुल्लङ्घयितुं शक्यते । अतो भूमण्डलगणितं संप्रत्यावश्यकमिति विज्ञायास्योपपत्तिं सम्यग्विचार्य मयैवैतद्गणितं नवीनं विरचितम् । * * * * अनेन भूमण्डलगणितेन चन्द्रच्छायापथेषु प्राप्तेषु सत्सु तच्छायाकवलिते प्रदेशविस्तारे भारतभूमण्डलं अन्तर्भविष्यति चेत् भरतखण्डस्थनिखिलनगरेषु ग्रहणस्पर्शमोक्षादयः कस्मिन् कस्मिन् काले भविष्यन्तीति जिज्ञासा विचक्षणमनुष्यसुलभैव । किंतु करणग्रंथोक्तरीत्या प्रतिनगरस्पर्शमोक्षगणितं तु एकस्यैव गणकस्य अशक्यमेव । तस्मान्नगरे नगरे घटमानौ स्पर्शमोक्षौ यथा सूक्ष्मौ सुलभौ च स्यातां तथाविधया गणितोपपत्तिघटितया परिलेखपद्धत्या स्पर्शमोक्षरेखाङ्कितः भरतखण्डस्य आलेख्यः एकेनैव गणकेन कथं सज्जीकरणीयः इत्येतदर्थे सम्यक्तया चिरं विचार्य ममैव कल्पनया **भारतभूमण्डलसूर्यग्रहणगणितं** मया निबद्धं प्रकाशितं चापि । तत्र उदाहरणद्वयं प्रदर्शितमस्ति । अत्रोक्तपद्धत्या सज्जीकृते रेखाङ्किते परिलेखे निखिलभारतभूनिष्टग्रामसंबंधिनौ स्पर्शमोक्षौ दृष्टेः पुरस्तात् तिष्ठान्ति । आंग्लफ्रेंचनाविकपंचांगानि सूर्यग्रहणपरिलेखेन यथा शोभन्ते तथैव मद्भरतखण्डस्थपञ्चांगान्यपि पूर्वोक्तपरिलेखालंकारेण शोभमानानि गुणेषु च पूर्वोक्तपंचांगैः सह स्पर्धमानानि च कदा भवेयुरित्याकांक्षा अद्यापि जाज्वल्येन मयि जागर्ति । भरतखण्डस्थपंचांगेषु अद्यापि बहु कर्तव्यमस्तीति विज्ञाय तत्कर्तव्यमभिलक्ष्य आवश्यकाः सर्वे ग्रंथा मया रचिताः संति । **केतकीपरिमलभाष्ये उपपत्तिरपि** उचितविस्तरेण प्रतिपादिता मत्तनयेन बहु श्रमेण । साऽपि मुद्रिता । तेषामुपयोगं कृत्वा वयं भरतखण्डवासिनः बुद्धिवैभवे न हीना इति प्रकटीकरणीयम् ।

आदौ समकलादर्शान्तमानीय चन्द्रग्रहणस्य प्रथमकोष्ठकात्साधितेन पर्वसंस्कारेण तं संस्कृत्य ग्रहणमध्यकालः साध्यः। एतत्कालिकं चन्द्रस्य **परमलम्बनं, शरं** तथा **सायनार्कं, पञ्चाङ्गाध्यायस्य** षोडशकोष्ठकात्**कालगुणं भागगुणं** च साधयेत्। ततो **नक्षत्राध्यायस्य** द्वितीयकोष्ठकाद्ग्रहणमध्यकालभवमार्क्षकालमानीय तस्मात्पञ्चदश घटीर्विशोध्य यल्लभ्यते तत्षड्भिर्गुणितं चेद्ग्रहणमध्यसमय उज्जयिन्यां खमध्यबिन्दोर्विषुवांशा भवन्ति।

उदाहरणम्— शके १८१५ फाल्गुनवद्यमावास्यायां संजाते सूर्यग्रहणे चन्द्रच्छायास्पृष्ट-प्रदेशस्य मर्यादा आनय। अत्र दर्शान्तकालः ७ घ. ३८ प.। विराहुसूर्यः ६°·२। अनेन उपकरणेन चन्द्रग्रहणगणितस्य प्रथमकोष्ठकात्साधितः पर्वसंस्कारः – १२·५ पलानि। अनेन युक्ते दर्शान्तकाले जातो ग्रहणमध्यकालः ७ घ. २५·५ प. = ७·४२ घट्यः। अस्मिन्काले—

चन्द्रपरमलम्बनम्	...	५७′·९	कालगुणः **	... घ.	०·४६३
चन्द्रशरः कलाः	...	+ ३३·३	अंशगुणः **	...	२·७६६
** सायनसूर्यः	...	१६° २१·०	आर्क्षकालः	... घ.	९·८३०
सायनराहुः	...	१०° ८·६	खमध्यविषुवांशाः **	...	३२९°·०००

विशेषः—प्रकृतं सूर्यग्रहणं राहोः संनिधौ घटते। अत इदं **राहुपर्व**। तस्माद्राहुपर्वोपलक्षितात्कोष्ठकत्रितयात्तथा चतुर्थकोष्ठकस्य राहुपर्वोपलक्षितपार्श्वादाद्यादिपञ्चमान्तन्यासेभ्योऽङ्का गृहीताः। ** अस्य सायनसूर्यस्य ९ – १४ न्यासेषु (अ) इति संज्ञा कृता। कालगुणस्य ६ न्यासे उपयोगः। अंशगुणस्य (भागगुणस्य वा) सप्तमे अष्टमे न्यासे उपयोगः। आर्क्षकालादानीतानां खमध्यविषुवांशानामुपयोगः (ष) संज्ञया ७/८ न्यासयोः।

इदानीं भूमण्डले स्पर्शसंमीलनोन्मीलनमोक्षस्थानानां **स्थितिविश्लेषशरांशानां** गणितमाह—

> **सहस्रनिघ्नश्चन्द्रेषुः परलम्बनभाजितः॥**
> **लब्धिश्छायाशरस्तेन प्रथमात् स्थितिखण्डकम्॥ ४॥**
> **विश्लेषांशाञ्शरांशांश्च स्पर्शमीलनयोस्तथा॥**
> **उन्मीलनस्य मोक्षस्य क्रमादासादयेत्सुधीः॥ ५॥**
> **छायाशरे सहस्राल्पे मीलनोन्मीलनं भवेत्॥**
> **अन्यथा केवलः स्पर्शो मोक्षो भूमण्डले भवेत्॥ ६॥**

ग्रहणमध्यकालभवो यश्चन्द्रशरः स सहस्रगुणः परमलम्बनेन भक्तश्**छायाशरो** भवति। अनेन च्छायाशरेण प्रथमकोष्ठकात्स्पर्शमीलनोन्मीलनमोक्षकालिकान्विश्लेषांशाञ्शरांशांश्चाऽऽनयेत्। छायाशरस्य सहस्राल्पत्वे स्पर्शादीनि चत्वारि भवन्ति। सहस्राधिकत्वे केवलौ स्पर्शमोक्षावेव भवतः।

उदाहरणम्—ग्रहणमध्यकालभवश्चन्द्रशरः + ३३′·३ सहस्रगुणः ३३३००′·० परमलम्बनेन ५८′·० भक्तो जातश्छायाशरः + ५७५।

न्यासः १। { स्पर्शसंमीलनोन्मीलनमोक्षस्थानानां स्थितिविश्लेषशरांशाः। अत्रत्यानां ट, इ, श एतेषामुपयोगः नवमन्यासे कृतः।

कोष्ठकः	उपकरणं छायाशरः	चमत्कृतिः	स्थितिखंडं (ट)	विश्लेषांशाः (इ)	शरांशाः (श)
१	५७५	स्पर्शः	– १४·५	– ९०	+ १६·६
.	.	संमीलनम्	– ८·२	– ९०	+ ३०·३
.	.	उन्मीलनम्	+ ८·२	+ ९०	+ ४०·१
.	.	मोक्षः	+ १४·५	+ ९०	+ २६·८

इदानीं चन्द्रछायाया उत्तराग्रस्य मध्यबिन्दोर्दक्षिणाग्रस्य च भूपृष्ठगतमार्गेषु स्थितानां स्थलानां **विश्लेषशर**गणितमुच्यते—

छायाशरोऽब्धिपञ्चाक्षैः ५५४ सहितः शून्ययुक् तथा ॥
वेदपञ्चेषुभि ५५४ र्हीनो द्वितीये करणं भवेत् ॥ ७ ॥
छायोदग्मध्ययाम्यानां बिन्दूनां वर्त्मनां क्रमात् ॥
ऊर्ध्वाधराणि चैतानि तिर्यक्स्थितिदलानि च ॥ ८ ॥
तिर्यकस्थैः स्थितिखण्डैश्च स्वस्वोर्ध्वाधरसाधनैः ॥
छायाया मध्यबिन्दोश्च सौम्ययाम्याग्रयोः क्रमात् ॥ ९ ॥
पथि स्थितानां बिन्दूनां विश्लेषशरभागकाः ॥
द्वितीयपदकात्साध्या रीत्या पूर्वोक्तया, यदि ॥ १० ॥
ऊर्ध्वाधरोपकारश्चेत्सहस्राद्धिकस्तदा ॥
भूमौ तत्तत्पथाभाव इति बोध्यं विचक्षणैः ॥ ११ ॥

द्वितीये कोष्ठके छायाया उत्तराग्रं, मध्यबिन्दुः, दक्षिणाग्रं चैतेषां मार्गानयने तिर्यक्स्थानि स्थितिखण्डानि त्रयाणां साधारणमुपकरणम् । ऊर्ध्वाधरोपकरणं त्वेकैकस्य भिन्नं तद्यथा—

छायायाः	उत्तराग्रपथानयने	उपकरणं = छायाशरः + ५५४
”	मध्यबिन्दुपथानयने	” = छायाशरः + शून्यम्
”	दक्षिणाग्रपथानयने	” = छायाशरः − ५५४

एभिरुपकरणैस्तत्तत्पथानां विश्लेषशरांशानानयेत् । यस्य पथ ऊर्ध्वाधरोपकरणं सहस्राद्धिकं स्यात्स पन्था भूमण्डलं विहाय, आकाशमार्गेण भ्रमतीति ज्ञेयम् । उदाहरणम्—

+ ५७५ + ५५४ = ११२९	इदं उत्तराग्रपथस्य ऊर्ध्वाधरोपकरणम्
+ ५७५ + ० = ५७५	” मध्यबिन्दुपथस्य ”
+ ५७५ − ५५४ = २१	” दक्षिणाग्रपथस्य ”

अत्रोत्तराग्रपथस्योपकरणस्य ११२९, सहस्राधिक्याच्छायाया उत्तराग्रं भूमण्डलमस्पृष्ट्वाऽऽकाशमार्गेण गच्छतीति सिद्धम् । अतोस्मिन्ग्रहण उत्तराग्रस्य पथोऽभाव एव ।

न्यासः २ । { चन्द्रच्छायाया मध्यबिन्दोः पन्थाः
अत्रत्यानां ठ, इ, श एतेषामुपयोगः दशमन्यासे कृतः ।

कोष्ठकः	उपकरणं छायाशरः	स्थितिखंड (ठ)	विश्लेषांशाः (इ)	शरांशाः (श)
२	+ ५७५	− ८·२	− ९०·०	+ ३०·०
.	.	७·	६०·०	३१·०
.	.	५	४०·०	३२·०
.	.	३	२४·०	३३·०
.	.	− १	− ११·०	३४·०
.	.	+ १	+ ३·०	३५·०
.	.	३	१८·०	३७·०
.	.	५	३५·०	३८·०
.	.	७	५७·०	३९·०
.	.	+ ८·२	+ ९०·०	+ ४०·०

उपरि द्वितीयन्यासे प्रथमा तिर्यक्पंक्तिस्तत्रत्य ५७५ च्छायाशरोपकरणेन प्रथमकोष्टात्संमीलनविभागात्साधिता। अन्तिमा पंक्तिश्च प्रथमकोष्ठकात् उन्मीलनविभागात्साधिता।

न्यासः ३। { चन्द्रच्छायाया दक्षिणाग्रस्य पन्थाः। अत्रत्यानां ड, इ, श एतेषामुपयोगः एकादशन्यासे कृतः।

अधस्तने ३ न्यासे प्रथमा तिरश्चीना पंक्तिरत्रत्य २१ च्छायाशरोपकरणेन प्रथमकोष्ठकात् संमीलनविभागात्साधिता। अन्तिमा च पंक्तिः उन्मीलनविभागात्साधिता।

कोष्ठकः	(उप. छाया-शरः – ५५४	स्थितिखंडं (ड)	विश्लेषांशाः (इ)	शरांशाः (श)
२	=+२१)	– १०	– ९०	– ४
.	.	९	६४	३
.	.	७	४४	२
.	.	५	३०	– १
.	.	३	१७	०
.	.	– १	– ६	+ १
.	.	+ १	+ ६	१
.	.	३	१७	२
.	.	५	३०	३
.	.	७	४४	४
.	.	९	६४	५
.	.	+ १०	+ ९०	+ ६

अथ भूमण्डले ग्रस्तोदयास्तप्रदेशमर्यादीभूतरेषाधिष्ठितबिन्दूनां **विश्लेषशरांशानयनम्**—

ग्रस्तोदयास्तक्षेत्रस्य बिन्दूनां प्रान्तदर्शिनाम्।
विश्लेषशरभागा ये तेषां गणितमुच्यते॥ १२॥
तिर्यक्स्थैः स्थितिखण्डैश्च चन्द्रच्छायाशरेण च।
तृतीयपदकात्साध्या शरांशयुगुलावलिः॥ १३॥
नवत्यल्पशरांशानां विश्लेषो नवतिर्ऋणम्।
नवत्यूर्ध्वशरांशानां विश्लेषो नवतिर्धनम्॥ १४॥

तृतीयकोष्ठकात् मध्यपथच्छायाशरेण स्थितिखण्डैश्च ग्रस्तोदयास्तक्षेत्रमर्यादीभूतरेषासाधकाञ्शरांशानानयेत्। अत्र खण्डे खण्डे ये द्विविधाः शरांशा उत्पद्यन्ते ते भूमण्डलचन्द्रच्छाययोर्यौ द्वौ संपातौ तत्स्थानीयाः संपातबिन्द्वोर्भूमण्डलप्रान्ते स्थितत्वात्तयोर्विश्लेषांशाः सर्वदा नवतिरेव। अतस्ते तृतीयकोष्ठके नोक्ताः। ये शरांशा नवत्यल्पास्तेषां विश्लेषांशा ऋणं नवतिः। ये तु नवतेरधिकास्तेषां विश्लेषांशा धनं नवतिरिति ज्ञेयम्।

न्यासः ४। { ग्रस्तोदयास्तावच्छेदकरेषासाधनार्थम्। अस्मिन्न्यासे विश्लेषांशा नवतिरेव। धनर्णमुक्तमेव।

अत्र अधः प्रथमसंपातरेषानिर्दिष्टानां ढ, इ, श, एतेषामुपयोगः द्वादशन्यासे।
तथा च द्वितीयसंपातरेषानिर्दिष्टानां ढ, इ, श, एतेषामुपयोगः त्रयोदशन्यासे।
तथा च ३ काष्ठात् च्छायाशरेण निश्चीयमानं स्थितिखण्डं ग्राह्यम्।

कोष्ठकः	उपकरणं मध्यपथ-छायाशरः	स्थितिखंडं (ढ)	प्रथमसंपातरेषा विश्लेषांशाः (इ)	प्रथमसंपातरेषा शरांशाः (श)	द्वितीयसंपातरेषा विश्लेषांशाः (इ)	द्वितीयसंपातरेषा शरांशाः (श)
३	५७५	− १३	− ९०	+ १	− ९०	+ ३७
•	•	११	९०	− ३	९०	४८
•	•	९	९०	− ३	९०	५८
•	•	७	९०	+ २	९०	६७
•	•	५	९०	११	९०	७७
•	•	३	९०	२७	− ९०	८७
•	•	− १	९०	४८	+ ९०	१०२
•	•	+ १	९०	६९	९०	१२२
•	•	३	− ९०	८२	९०	१४४
•	•	५	+ ९०	९२	९०	१५९
•	•	७	९०	१०२	९०	१६९
•	•	९	९०	११२	९०	१७४
•	•	११	९०	१२१	९०	१७४
•	•	+ १३	+ ९०	+ १३३	+ ९०	+ १६९

इदानीं भूमण्डले सूर्योदये सूर्यास्तमये वा यत्र यत्र ग्रहणमध्यो भवति तत्तत्स्थानानां विश्लेषशरानयनमुच्यते—

क्षितिजस्थे सवितरि यत्र यत्र विलोक्यते ।
ग्रहमध्यस्तादृशानां स्थानानां गणितं ब्रुवे ॥ १५ ॥

तुर्याच्छायाशरेणैव साधयित्वा शिलीमुखान् ।
नवत्यल्पेति रीत्यैव विश्लेषांशान्विनिर्णयेत् ॥ १६ ॥

न्यासः ५ । { सूर्योदयसूर्यास्ते ग्रहणमध्यावच्छेदकरेषा ।
अत्रत्यानां ण, इ, श एतेषामुपयोगः चतुर्दशन्यासे ।

केतुपर्वणि वामपार्श्वस्थं, राहुपर्वणि दक्षिणपार्श्वस्थं छायाशरोपकरणं ग्राह्यम् ।

कोष्ठकः	उपकरणं छायाशरः	स्थितिखंडं (ण)	विश्लेषांशाः (इ)	शरांशाः (श)
४	+ ५७५	− ९	− ९०	+ २१
•	•	७	९०	४१
•	•	५	९०	५५
•	•	३	९०	६७
•	•	− १	− ९०	७९
•	•	+ १	+ ९०	९१
•	•	३	९०	१०३
•	•	५	९०	११५
•	•	७	९०	१२९
•	•	+ ९	+ ९०	+ १४९

इदानीमभीष्टात्स्थितिखण्डात्कालानयनमुच्यते—

स्थितिखण्डं कालगुणक्षुण्णं घट्यश्च तद्युतः ।
मध्यकालो भवेत्कालः स्थितिखण्डस्य तस्य वै ॥ १७ ॥

अभीष्टं स्थितिखण्डं कालगुणेन गुणितं चेत् घट्यो भवन्ति । अमूभिर्ग्रहणमध्यकालो युतश्चेदभीष्टस्थितिखण्डस्य कालो भवति । स्थितिखण्डस्य कालो नाम स्थितिखण्डामिते स्थाने चन्द्रच्छायाया आगमनकालः ।

उदाहरणम्— स्पार्शिके स्थितिखण्डे – १४·५. कालगुणेन घ. ०·४६, गुणिते जातो घट्यात्मकोऽवधिः – ६·६७ । अनेन ग्रहणमध्यकालं घ. ७·४२ संस्कृत्य लब्धो भूमण्डले प्रथमस्पर्श उज्जयिन्यां कालः घ. ०·७५ । न्यासः ६ बिलोकनीयः ।

न्यासः ६ । { अत्रत्यः कालगुणः पृ २५२ वर्तते । अभीष्टस्थितिखण्डात्कालानयनम् ।

भूमण्डले	स्थितिः		कालगुणः		अवधिः	ग्र. म. का.		उज्जयिन्यां
	न्या. १		घ.		घ.	घ.		घ.
स्पर्शः	– १४·५	×	०·४६	=	– ६·६७,	+ ७·४२	=	०·७५
संमीलनम्	– ८·२	×	०·४६	=	– ३·७७,	+ ७·४२	=	३·६५
उन्मीलनम्	+ ८·२	×	०·४६	=	+ ३·७७,	+ ७·४२	=	११·१९
मोक्षः	+ १४·५	×	०·४६	=	+ ६·६७,	+ ७·४२	=	१४·०९

अथाभीष्टे स्थितिखण्डकाल उज्जयिन्यां ये खमध्यविषुवांशास्तेषां गणितम्—

स्थितिखण्डं भागगुणक्षुण्णमंशा भवन्ति तैः ।
परागमध्यकालीनाः खमध्यविषुवांशकाः ॥ १८ ॥
आवन्ताः सहिताः कार्या एवं तत्खण्डकालिकाः ।
अवन्तिकायां द्यौर्मध्यविषुवांशा भवन्ति च ॥ १९ ॥

अभीष्टं स्थितिखण्डमंशगुणेन गुणितं चेदंशा भवन्ति । एतैः प्रागेव साधिता ये ग्रहणमध्यकालभवा **आवन्ता** विषुवांशास्तान्संस्कुर्यात् । एवमवन्तिकायामभीष्टस्थितिखण्डकालीनाः खमध्यविषुवांशा भवन्ति । एषां प्रयोजनमग्रे रेखांशानयने ।

उदाहरणम्— पूर्वस्मिन्गणित उपलब्धानां सर्वेषां स्थितिखण्डानां कालेषूज्जयिन्यां खमध्यविषुवांशानानय ।

न्यासः ७ । { अत्रत्यः अंशगुणः २५२ पृष्ठे वर्तते । उज्जयिनी खमध्य विषुवांशानयनम् ।

	स्थितिः	अंशगुणः पृ. २५२	गुणकारः	ग्रहणमध्य-काले खमध्य-विषुवांशाः	स्थितिखण्ड-काले खमध्य-विषुवांशाः
	(स)	**(ग)**	**(स×ग)**	**(ष)**	**(स×ग) + ष**
		अं.	अं.	अं.	अं.
स्पर्शे	– १४·५	२·७६६	– ४०·१०७	३२९	२८८·९
संमीलने	– ८·२	२·७६६	– २२·६८१	३२९	३०६·३
उन्मीलने	+ ८·२	२·७६६	+ २२·६८१	३२९	३५१·७
मोक्षे	+ १४·५	२·७६६	+ ४०·१०७	३२९	९·१

न्यासः ८। { छायापथगणिते ग्रस्तास्तोदयक्षेत्रगणिते च उपलब्धानां स्थितिखण्डानां कालेष्ववन्त्यां खमध्यविषुवांशाः।

अत्रत्यः, ष २५२ पृष्ठे वर्तते।

स्थितिः (स)	अंशगुणः पृ. २५२ (ग)	गुणकारः (स×ग)	ग्रहणमध्यकाले ख० विषुवांशाः (ष)	स्थितिखण्डकाले ख० विषुवांशाः (स×ग)+ष.
	अं०	अं०	अं०	अं०
– १३	२·७६६	– ३५·९	३२९	२९३·१
११	२·७६६	३०·४	३२९	२९८·६
१०	२·७६६	२७·७	३२९	३०१·३
९	२·७६६	२४·९	३२९	३०४·१
७	२·७६६	१९·४	३२९	३०९·६
५	२·७६६	१३·८	३२९	३१५·२
३	२·७६६	८·३	३२९	३२०·७
– १	२·७६६	– २·८	३२९	३२६·२
+ १	२·७६६	+ २·८	३२९	३३१·८
३	२·७६६	८·३	३२९	३३७·३
५	२·७६६	१३·८	३२९	३४२·८
७	२·७६६	१९·४	३२९	३४८·४
९	२·७६६	२४·९	३२९	३५३·९
१०	२·७६६	२७·७	३२९	३५६·७
११	२·७६६	३०·४	३२९	३५९·४
+ १३	२·७६६	+ ३५·९	३२९	४·९

अथ पूर्वसाधितेभ्यो विश्लेषशरयुगुलेभ्यस्तत्तत्स्थानीयमक्षांशरेखांशानयनम्—

ग्रहमध्यभवः सूर्यः सायनः किल संस्कृतः।
विश्लेषांशैस्त्रिभोनं स्याल्लग्नं तेन शरेण च ॥ २० ॥

पञ्चमात्पदकात्साध्याः खमध्यविषुवांशकाः।
ते तत्कालभवावन्तैः खमध्यविषुवांशकैः ॥ २१ ॥

हीना रेखान्तरं तत्स्यादथ षष्ठाख्यकोष्ठकात्।
साधिताः क्रान्तिभागाः स्युरक्षांशा भूमिमण्डले ॥ २२ ॥

ग्रहणमध्यकालीनः सायनार्को विश्लेषांशैः संस्कृतस्त्रिभोनं लग्नं भवति। अनेन त्रिभोनलग्नेन शरांशैश्च पञ्चमकोष्ठकात्खमध्यविषुवांशानानीय तेभ्यस्तत्खण्डभवानावन्तखमध्यविषुवांशान्विशोध्य यच्छेषं लभ्यते तन्मितास्तत्र रेखांशाः। इदं रेखान्तरमुज्जयिनीरेखासंबन्धि भवति। चक्रार्धादल्पा रेखांशाः पूर्वा भवन्ति। चक्रार्धादधिकांश्चक्रांशेभ्यः ३६०° विशोध्य शेषान्पाश्चिमरेखांशान्वदेत्। अनन्तरं पञ्चमकोष्ठकस्योपकरणाभ्यामेव षष्ठकोष्ठकात्क्रान्तिः साध्या। क्रान्त्यंशास्तत्स्थानीया अक्षांशा भवेयुः। अनन्तरं ९ – १४ न्यासानां दक्षिणपार्श्वे ऊर्ध्वाधरस्थितान्तिमपंक्तिद्वयसिद्धरेखांशाक्षांशसाहाय्येन रेखांशाक्षांशांकिते भूगोलालेख्ये बिन्दून् दत्वा तान् संयोज्य वक्ररेखा उत्पादनीयाः। २६३ पृष्ठस्थं सारं आलेख्योऽपि विलोकयः।

च्छेद्यकलेखनार्थं अक्षांशरेखांशगणितम् ।

* चतुर्थपञ्चमस्तम्भानिष्ठाभ्यां (अ + इ), श, उपकरणाभ्यां पञ्चमषष्ठकोष्ठकगता अंकाः साधनीयाः ।

स्थिति-खण्डम् न्या. १.ट न्या. २.ठ न्या. ३.ड	सायन-रविः (अ)	विश्लेषः अंशाः (इ)	त्रिभोनं लग्नम् * (अ + इ)	शरांशाः * (श)	स्थानिक-ख. स्व. विषुवांशाः *कोष्ठ. ५ (क)	आवन्त-ख. स्व. विषुवांशाः (ख)	तत्तत्स्थलेषु रेखान्तरं अंशाः (क − ख)	तत्तत्स्थलेषु अक्षांशाः *कोष्ठकः ६
न्यासः ९ । भूमण्डले स्पर्शसंमीलनोन्मीलनमोक्षस्थलानि । (ट, इ, श, १. न्यासात्)								
न्यासः १ (ट)	अंशाः (अ)	न्यासः १ (इ)	अंशाः (अ + इ)	न्यासः १ (श)	कोष्ठ. ५ (क)	न्यासः ७ (ख)	रेखान्तरं (क − ख)	अक्षांशाः को. ६
− १४·५	१६·३	− ९०	२८६·३	+ १६·७	२८५·७	२८८·९	− ३·२	− ५·८
− ८·२	१६·३	− ९०	२८६·३	३०·३	२८४·२	३०६·३	− २२·१	+ ७·७
+ ८·२	१६·३	+ ९०	१०६·३	४०·१	११७·३	३५१·७	+ १२५·५	+ ६३·०
+ १४·५	१६·३	+ ९०	१०६·३	+ २६·८	११२·५	९·१	+ १०३·४	+ ४९·३
न्यासः १० । चन्द्रच्छायाकेन्द्रपथवर्तिस्थलानि । (ठ, इ, श, २. न्यासात्)								
न्यासः २ (ठ)	अंशाः (अ)	न्यासः २ (इ)	अंशाः (अ + इ)	न्यासः २ (श)	को. ५ (क)	न्यासः ८ (ख)	रेखान्तरं (क − ख)	अक्षांशाः को. ६
− ७	१६·३	− ६०	३१६·३	+ ३१	३०९·६	३०९·६	+ ०·०	+ १३·७
५	१६·३	− ४०	३३६·३	३२	३२६·०	३१५·२	१०·८	२०·५
३	१६·३	− २४	३५२·३	३३	३३८·९	३२०·७	१८·२	२७·१
− १	१६·३	− ११	५·३	३४	३४९·५	३२६·२	२३·३	३२·९
+ १	१६·३	+ ३	१९·३	३५	१·५	३३१·८	२९·७	३९·३
३	१६·३	+ १८	३४·३	३७	१४·७	३३७·३	३७·४	४७·०
५	१६·३	+ ३५	५१·३	३८	३२·९	३४२·८	५०·१	५४·३
+ ७	१६·३	+ ५७	७३·३	+ ३९	६२·६	३४८·४	+ ७४·२	+ ६०·८
न्यासः ११ । चन्द्रच्छायादक्षिणाग्रपथवर्तिस्थलानि । (ड, इ, श, ३. न्यासात्)								
न्यासः ३ (ड)	अंशाः (अ)	न्यासः ३ (इ)	अंशाः (अ + इ)	न्यासः ३ (श)	कोष्ठ. ५ (क)	न्यासः ८ (ख)	रेखान्तरं (क − ख)	अक्षांशाः को. ६
− १०	१६·३	− ९०	२८६·३	− ४	२८८·२	३०१·३	− १३·१	− २६·४
९	१६·३	६४	३१२·३	३	३१५·७	३०४·१	+ ११·६	− २०·०
७	१६·३	४४	३३२·३	२	३३५·०	३०९·६	+ २५·४	− १२·६
५	१६·३	३०	३४६·३	− १	३४७·८	३१५·२	+ ३२·६	− ६·३
३	१६·३	१७	३५९·३	०	३५९·४	३२०·७	+ ३८·७	− ०·२
− १	१६·३	६	१०·३	+ १	९·०	३२६·२	+ ४२·८	+ ४·९
+ १	१६·३	+ ६	२२·३	१	२०·२	३३१·८	+ ४८·४	+ ९·६
३	१६·३	१७	३३·३	२	३०·४	३३७·३	+ ५३·१	+ १४·५
५	१६·३	३०	४६·३	३	४२·९	३४२·८	+ ६०·१	+ १९·६
७	१६·३	४४	६०·३	४	५७.२	३४८·४	+ ६८·८	+ २४·१
९	१६·३	६४	८०·३	५	७९·१	३५३·९	+ ८५·२	+ २८·१
+ १०	१६·३	+ ९०	१०६·३	+ ६	१०८·५	३५६·७	+ १११·८	+ २८·४

* चतुर्थपंचमस्तम्भनिष्ठाभ्यां (अ + इ), श, उपकरणाभ्यां पंचमषष्ठकोष्ठकगता अंका साधनीयाः ।

स्थिति-खण्डम् न्या. ४.ढ न्या. ५.ढ	सायन-रविः (अ)	विश्लेषः अंशाः (इ)	त्रिभोनं लग्नम् * (अ+इ)	शरांशाः * (श)	स्थानिक ख. स्व. विषुवांशाः * को. ५ (क)	आवन्त-ख. स्व. विषुवांशाः (ख)	तत्तत्स्थलेषु रेखान्तरं अंशाः (क – ख)	तत्तत्स्थलेषु अक्षांशाः कोष्ठकः ६
न्यासः १२ । ग्रस्तोदयास्तप्रदेशस्य मर्यादादर्शिन्यां रेषायां स्थितानि स्थलानि । प्रथमसंपातकृता रेषा । (ढ, इ, श, ४. न्यासात्)								
न्यासः ४ (ढ)	अंशाः (अ)	न्यासः ४ (इ)	अंशाः (अ+इ)	न्यासः ४ (श)	कोष्ठ. ५ (क)	न्यासः ८ (ख)	रेखान्तरं (क – ख)	अक्षांशाः कोष्ठ. ६
– १३	१६·३	– ९०	२८६·३	+ १	२८७·५	२९३·१	– ५·६	– २१·५
११	१६·३	९०	२८६·३	– ३	२८८·०	२९८·६	१०·६	२५·४
६	१६·३	९०	२८६·३	– ३	२८८·०	३०४·१	१६·१	२५·४
७	१६·३	९०	२८६·३	+ २	२८७·४	३०९·६	२२·२	२०·५
५	१६·३	९०	२८६·३	११	२८६·३	३१५·२	२८·९	– ११·५
३	१६·३	९०	२८६·३	२७	२८४·६	३२०·७	३६·१	+ ४·३
– १	१६·३	९०	२८६·३	४८	२८२·०	३२६·२	४४·२	२५·२
+ १	१६·३	९०	२८६·३	६९	२७८·३	३३१·८	५३·५	४६·०
३	१६·३	– ९०	२८६·३	८२	२७४·१	३३७·३	६३·२	५८·८
५	१६·३	+ ९०	१०६·३	९२	२६८·२	३४२·८	७४·६	६८·४
७	१६·३	९०	१०६·३	१०२	२५३·२	३४८·४	९५·२	७७·५
९	१६·३	९०	१०६·३	११२	२००·४	३५३·९	– १५३·५	८३·१
११	१६·३	९०	१०६·३	१२१	१४२·६	३५९·४	+ १४३·२	७९·५
+ १३	१६·३	+ ९०	१०६·३	+ १३३	१२१·९	४·९	+ ११७·०	+ ६८·६
न्यासः १३ । द्वितीयसंपातकृता रेषा । (ढ, इ, श, ४. न्यासात्)								
न्यासः ४ (ढ)	अंशाः (अ)	न्यासः ४ (इ)	अंशाः (अ+इ)	न्यासः ४ (श)	कोष्ठ. ५ (क)	न्यासः ८ (ख)	रेखान्तरं (क – ख)	अक्षांशाः कोष्ठ. ६
– १३	१६·३	– ९०	२८६·३	+ ३७	२८३·४	२९३·१	– ९·७	+ १४·३
११	१६·३	९०	२८६·३	४८	२८२·०	२९८·६	१६·६	२५·२
९	१६·३	९०	२८६·३	५८	२८०·५	३०४·१	२३·६	३५·१
७	१६·३	९०	२८६·३	६७	२७८·७	३०९·६	३०·९	४४·१
५	१६·३	९०	२८६·३	७७	२७६·१	३१५·२	३९·१	५४·२
३	१६·३	– ९०	२८६·३	८७	२७१·८	३२०·७	४८·९	६३·६
– १	१६·३	+ ९०	१०६·३	१०२	२५३·२	३२६·२	– ७०·०	७७·५
+ १	१६·३	९०	१०६·३	१२२	१३९·९	३३१·८	+ १६८·१	७८·६
३	१६·३	९०	१०६·३	१४४	११५·४	३३७·३	१३८·१	५८·०
५	१६·३	९०	१०६·३	१५९	१११·१	३४२·८	१२८·३	४३·२
७	१६·३	९०	१०६·३	१६९	१०९·३	३४८·४	१२०·९	३३·३
९	१६·३	९०	१०६·३	१७४	१०८·५	३५३·९	११४·६	२८·४
११	१६·३	९०	१०६·३	१७४	१०८·५	३५९·४	१०९·१	२८·४
+ १३	१६·३	+ ९०	१०६·३	+ १६९	१०९·३	४·९	+ १०४·४	+ ३३·३

* चतुर्थपञ्चमस्तम्भानिष्टाभ्यां (अ + इ), श, उपकरणाभ्यां पंचमषष्ठकोष्ठकगता अंकाः साध्याः ।

न्यासः १४। सूर्यस्य उदये अस्ते वा यत्र यत्र ग्रहणमध्यो भवति तादृशानि स्थलानि ।
(ण, इ, श, ५. न्यासात्)

स्थितिः न्या. ५ (ण)	साय.रविः अंशाः (अ)	विश्लेषः न्यासः ५ (इ)	त्रिभो.लग्नं अंशाः (अ + इ)	शरांशाः न्यासः ५ (श)	स्था. ख. विषु.को.५ (क)	आवं.विषु. न्यासः ८ (ख)	तत्तत्स्थलेषु	
							रेखान्तरं (क – ख)	अक्षांशाः को. ६
– ९	१६·३	– ९०	२८६·३	+ २१	२८५·२	३०४·१	– १८·९	– १·६
७	१६·३	९०	२८६·३	४१	२८२·९	३०९·६	२६·७	+ १८·३
५	१६·३	९०	२८६·३	५५	२८१·०	३१५·२	३४·२	३२·२
३	१६·३	९०	२८६·३	६७	२७८·७	३२०·७	४२·०	४४·१
– १	१६·३	– ९०	२८६·३	७९	२७५·४	३२६·२	५०·८	५५·८
+ १	१६·३	+ ९०	१०६·३	९१	२६९·१	३३१·८	६२·७	६७·४
३	१६·३	९०	१०६·३	१०३	२५०·६	३३७·३	८६·७	७८·४
५	१६·३	९०	१०६·३	११५	१७४·२	३४२·८	– १६८·६	८३·२
७	१६·३	९०	१०६·३	१२९	१२६·०	३४८·४	+ १३७·६	७२·४
+ ९	१६·३	+ ९०	१०६·३	+ १४९	११३·६	३५३·९	+ ११९·७	+ ५३·१

इदानीं प्राक्साधितानि स्पर्शादिकानां स्थानानि च्छेद्यकलेखनप्रसङ्गे कस्यां रेखायां तिष्ठन्तीति कथयन्नाह--

संमीलनोन्मीलनयोर्बिन्दू केन्द्रपथस्य वै ।
आद्यन्तौ भवतोऽस्मात्तौ च्छायाकेन्द्रपथे लिखेत् ॥ २३ ॥
ग्रस्तोदयास्तक्षेत्रस्य च्छायाग्रपथसंमुखी ।
मर्यादा तत्पथस्याग्रं स्पृष्ट्वा पश्चान्निवर्तते ॥ २४ ॥
भूमण्डले स्पर्शमोक्षबिन्दू यौ पूर्वसाधितौ ।
ग्रस्तोदयास्तक्षेत्रस्य रेषयोरग्रके च ते ॥ २५ ॥
क्षितिजस्थे सवितरि पर्वमध्यप्रदर्शिनी ।
रेखापूर्वापराग्राणि पथां स्पृशति सर्वदा ॥ २६ ॥

संमीलनोन्मीलनयोर्बिन्दू छायाकेन्द्रपथस्य क्रमेणाऽऽद्यन्तौ भवतः। अत एतौ बिन्दू छायाकेन्द्रपथबिन्दूनां पङ्क्तावादावन्ते च लिखेत् । ग्रस्तोदयास्तक्षेत्रस्य च्छायाग्रपथसंमुखी मर्यादा छायाग्रमार्गस्य स्वसंमुखाग्रं स्पृष्ट्वा निवर्तते । छायाग्रपथस्याग्रबिन्दुर्ग्रस्तोदयास्तक्षेत्रस्य मर्यादीभूतायां रेषायां तिष्ठतीत्यर्थः। भूमण्डले यौ स्पर्शमोक्षबिन्दू पूर्वं साधितौ तौ ग्रस्तोदयास्त-क्षेत्रस्य मर्यादीभूतरेषायां द्वे अग्रे भवतः। क्षितिजस्थे सवितरि पर्वमध्यप्रदर्शिनी रेषा छाया-मार्गाणां पूर्वापराग्राणि स्पृशति। अस्याध्यायस्योपसंहारे न्यस्तयोर्गणितसारच्छेद्यकयोर्विलो-कनादिदं सर्वं परिस्फुटं भवेत् ।

इदानीं मध्याह्ने यस्मिन्स्थाने ग्रहणमध्यो भवेत्तत्स्थानं तथा तत्क्षणे उज्जयिन्यां कालः एतयोर्गणितं प्रदर्श्यते ।

आदौ ग्रहणमध्यकालभवेन सायनरविणाऽयनवलनमानीय ततो राहुपर्वणि केतुपर्वणि च विक्षेपवलनं क्रमात् + ५°, – ५° तिष्ठतीति मत्वा विक्षेपवलनं साध्यम् । उभयोर्वलनयोर्योगः स्फुटवलनं भवति ।

अनन्तरं छायाशरं स्फुटवलनभुजज्यया संगुण्य शतेन स्फुटवलनकोटीज्यया च विभज्य यल्लभ्यते तावन्मितं स्थितिखण्डं प्रकल्प्य तेन च्छायाशरेण च द्वितीयकोष्ठकाद्विश्लेषशरांशान्प्रसाध्य ताभ्यां पञ्चमषष्ठकोष्ठकाभ्यामक्षांशरेखांशान्विगणयेत् ।

स्थितिखण्डं कालगुणक्षुण्णमित्यनया रीत्या तत्समय उज्जयिनीकालोऽपि ज्ञातो भवति ।

$$\left.\begin{array}{l}\text{मध्याह्ने यत्र ग्रहणमध्यः}\\ \text{स्यात्तत्रत्यं स्थितिखण्डम्}\end{array}\right\} = \frac{\text{छायाशरः} \times \text{स्फुटवलनभुजज्या}}{१०० \times \text{स्फुटवलनकोटीज्या}}$$

उदाहरणम्—ग्रहणमध्यकाले रविः १६°·३ सायनः, अनेन चन्द्रग्रहणस्य पञ्चमकोष्ठकालुब्धमयनवलनं + २२°·६ । राहोः समीपे ग्रहणं भवतीति **विक्षेपवलनं** + ५° । अनयोर्योगः + २७°·६ **स्फुटं वलनं** अस्य भुजज्या + ·४६३, कोटीज्या + ·८८६ ।

$$\frac{(+५७५)\times(+·४६३)}{(१००)\times(+·८८६)} = +३·००$$ इदं मध्याह्ने ग्रहणमध्यस्थलगतं स्थितिखण्डम् ।

आदौ कालानयनम्— स्थितिखण्डे + ३·० कालगुणेन ·४६ घटीभिर्गुणिते जाताः + १·३८ घट्यः । आभिर्युतो ग्रहणमध्यकालो ७·४२ घ० जात उज्जयिन्यां कालः ८·८० घ० । धनरूपे तृतीये स्थितिखण्डे रेखान्तरं + ३७°·३, अक्षांशाः + ४६°·९, इति च्छायाकेन्द्रपथगणिते पूर्वमेव निष्पन्नम् । पश्य १० न्यासम् ।

इदानीं भूगोलीयसूर्यग्रहणेऽवान्तरविशेषान्समीकरणरूपसूत्रैर्व्याख्यास्यामः ।

इष्टकाले—

सूर्योन्नतांशज्या = विश्लेषकोटीज्या × शरकोटीज्या ... ... (१)

छायाव्यासः = रविबिम्बं − (चन्द्रबिम्बं + चन्द्रबिम्बवृद्धिः) ... (२)

छायाव्यासकलाः सप्तगुणाः = योजनानि ... ... (३)

योजनानि दशगुणानि = मैलाः ... ... (४)

छायाव्यासः × नतांशच्छेदनरेषा = सूर्यदिशि च्छायादैर्घ्यम् ... ... (५)

उदाहरणम्—दशमन्यासं पश्यत । ऋणरूपे सप्तमे स्थितिखण्डे चन्द्रच्छायाया मध्यबिन्दुः, अक्षे + १३°·७, रेखान्तरे ० चाऽऽसीदिति पूर्वोक्तन्यासाज्ज्ञायते । तत्र **पञ्चाङ्गाध्यायस्य** २० कोष्ठके *शृङ्गेरीपुरेऽक्षांशाः + १३°·५ रेखान्तरं च − ०°·१ अस्ति । अत एतत्पुरं छायाकेन्द्रमार्गोपकण्ठेऽतिष्ठदिति स्पष्टमेव । तस्मादत्रत्यं छायादैर्घ्यं गण्यते ।

आदौ सूर्यस्योन्नतांशाः । दशमे न्यासे ऋणरूपे सप्तमे खण्डे विश्लेषः − ६०°·०, शरः + ३१°·० । अनयोः कोटीज्ये + ·५०, + ·८६ । अनयोर्घातः + ·४३ । अस्य धनुः २६°·० । इमे सूर्यस्योन्नतांशाः ।

एभिः सूर्योन्नतांशैः **सूर्याध्यायस्य** पञ्चमकोष्ठकाच्चन्द्रस्य १४″·० बिम्बवृद्धिर्लभ्यते । अतस्तात्कालिकं चन्द्रबिम्बं ३१′·६ + ०′·२ = ३१′·८, सूर्यबिम्बं ३२′·० इदं चन्द्रबिम्बेन हीनं सञ्जातश्छायाव्यासः ०′·२ ।

छायाव्यासकलाः ०′·२ सप्तगुणाः योजनानि १·४ ।

योजनानि १·४ दशगुणानि जाता मैलाः १४ ।

सूर्योन्नतांशाः २६°, नतांशाः ६४°, छेदनरेषा २·३८ । अनयो गुणिताश्छायाव्यासे मैलाः १४, जाताः सूर्ये स्थापितदृङ्मण्डलदिशि च्छायाविस्तारमैलाः ३३·५ ।

अथ मर्दकालानयनम् ।

मर्दो नाम संमीलनोन्मीलनयोरन्तःपाती कालावधिः ।

सूत्रम्—

यदि अ = चन्द्रसूर्ययोर्विशिष्टघटीगतिः ।

$$इ = \frac{६ \times परमलम्बनं \times अक्षांशकोटीज्या \times स्फुटवलनकोटीज्या \times नतकालकोणकोटीज्या}{५७}$$

$$तर्हि\ मर्दकालपलानि = \frac{पूर्वापरविस्तारकलाः \times ६०}{(अ - इ)}$$

सूत्रोक्तवत्करणार्थं न्यासः—

$$अ = १२'·५$$

$$इ = \frac{६ \times ५८' \times ·९७ \times ·८८ \times ·४२}{५७} = २'·२७$$

$$मर्दकालः = \frac{०'·२ \times ६०}{(१२'·५ - २'·२७)} = \frac{१२'·०}{१०'·२} = १·१८\ प. = २८\ सेकन्दाः$$

खग्रासच्छायायाः पूर्वापरो व्यास आरम्भसमाप्तिकालयोर्लघिष्ठो मध्यकाले गरिष्ठो भवति । कङ्कणच्छायायाः पूर्वापरव्यास एतद्विपरीतो भवति ।

शके १७९० श्रावणकृष्णामावास्यायां सभूतं सूर्यस्य खग्रासग्रहणमहं कोल्हापुरक्षेत्रेऽपश्यम् । तद्दिनमारम्य ज्योतिःशास्त्राध्ययन उन्मना अभवम् । एतद्ग्रहणस्य रेषा कोल्हापुर, मूलवाड, गण्टूर, एतद्ग्रामसांनिध्येनागच्छत् । कोल्हापुरे स्पर्शः घ. ४·३ मध्यः ७·४ मोक्षः १०·९ मर्दः १२ पलानि ।

शके १८१९ पौषकृष्णामावास्यायामन्यत्खग्रासग्रहणं जातम् । अस्य रेषा राजापूर, मङ्गळवेढे, नागपूर, बक्सार, इत्यादीनि नगराणि क्रमित्वा हिमालयमुल्लङ्घ्य चीनराज्यं प्राविशत् ।

इति श्रीरामकृष्णसुतवेङ्कटेशविरचिते ज्योतिर्गणिते द्वितीये परिच्छेदे सूर्यग्रहणाध्यायो द्वितीयः समाप्तः ॥

अङ्कानां शोधनाद्यं सततमिह मया यत्कृतं सूक्ष्मदृष्ट्या ।
तेनैवाऽहं प्रतप्तः श्रमगलिततनुस्त्रस्तचित्तः प्रकामम् ।
तातैः श्रीवेङ्कटेशैर्निशमपि दिवसीकृत्य मेधाद्वितीयैः ।
कोष्ठस्थाङ्कार्णवोऽयं कथमथ रचितो नूनमाश्चर्यमेतत् ॥

(प्रकाशकः)

नं. २.

शके १८१५ फाल्गुनकृष्ण ३०
शुक्रे कंकणग्रहणे
भूमंडलोपरि चन्द्रस्य
विरलछायाया:
गमनमार्ग:
वें. बा. केतकर:
सूर्योदयी ग्रहणस्य आरंभ:
सूर्योदयी ग्रहणमध्य:
सूर्योदयी ग्रहण समाप्ति:
केवल स्पर्शस्य दक्षिण रेषा
पुनर्लेखक:
द. वें. केतकर:

भूमण्डलगणितस्य सारम्

शके १८१५ वर्षे फाल्गुन कृ. ३० शुक्रे कङ्कणाकृतिसूर्यग्रहणम्।

भूमण्डले		आवन्तकालः न्यासः ६		रेखान्तरं न्यासः ९	अक्षांशाः न्यासः ९
		घ०	प०	अंशाः	अंशाः
सूर्योदये ग्रहणस्य	आरम्भः	०	४५	३·२ प.	५·८ द.
,, ,,	संमीलनम्	३	३९	२२·१ प.	७·७ उ.
मध्याह्ने	ग्रहणमध्यः	८	४८	३७·४ पू.	४७·० उ.
सूर्यास्ते	उन्मीलनम्	११	११	१२५·५ पू.	६३·० उ.
,,	समाप्तिः	१४	५	१०३·४ पू.	४९·३ उ.

छायामध्यपथः नामपूर्णग्रहणरेषा		केवलस्पर्शस्य दक्षिणा रेषा		ग्रस्तोदयास्तक्षेत्रावच्छेदिके रेषे आद्या		द्वितीया	
न्या. ९।१०	न्या· ९।१०	न्या. ११	न्या. ११	न्या. ९।१२	न्या. ९।१२	न्या. ९।१३	न्या. ९।१३
रेखान्तरं अंशाः	अक्षः अंशाः	रेखान्तरं· अंशाः	अक्षः अंशाः	रेखान्तरं अंशाः	अक्षः अंशाः	रेखान्तरं अंशाः	अक्षः अंशाः
				३·२ प.	५·८ द.	३·२ प.	५·८ द.
२२·१ प·	७·७ उ.	१३·१ प.	२६·४ द.	५·६ प.	२१·५ द.	९·७ प.	१४·३ उ.
०·०	१३·७ उ.	११·६ पू.	२०·० द.	१०·६ प.	२५·४ द.	१६·६ प.	२५·२ उ.
१०·८ पू.	२०·५ उ.	२५·४ पू.	१२·६ द.	१६·१ प.	२५·४ द.	२३·६ प.	३५·१ उ.
१८·२ पू.	२७·१ उ·	३२·६ पू.	६·३ द.	२२·२ प.	२०·५ द.	३०·९ प.	४४·१ उ.
२३·३ पू.	३२·९ उ.	३८·७ पू.	०·२ द.	२८·९ प.	११·५ द.	३९·१ प.	५४·२ उ.,
२९·७ पू.	३९·३ उ.	४२·८ पू.	४·९ उ.	३६·१ प.	४·३ उ.	४८·९ प.	६३·६ उ.
३७·४ पू.	४७·० उ.	४८·४ पू.	९·६ उ.	४४·२ प.	२५·२ उ.	७३·० प.	७७·५ उ.
५०·१ पू.	५४·३ उ.	५३·१ पू.	१४·५ उ.	५३·५ प.	४६·० उ.	१६८·१ पू.	७८·६ उ.
७४·२ पू.	६०·८ उ.	६०·१ पू.	१९·६ उ.	६३·२ प.	५८·८ उ.	१३८·१ पू.	५८·० उ.
१२५·५ पू.	६३·० उ.	६८·८ पू.	२४·१ उ.	७४·६ प.	६८·४ उ.	१२८·३ पू.	४३·२ उ.
		८५·२ पू.	२८·१ उ.	९५·२ प.	७७·५ उ.	१२०·९ पू.	३३·३ उ.
		१११·८ पू.	२८·४ उ.	१५३·५ प.	८३·१ उ.	११४·६ पू.	२८·४ उ.
				१४३·२ पू.	७९·५ उ.	१०९·१ पू.	२८·४ उ.
				११७·० पू.	६८·६ उ.	१०४·४ पू.	३३·३ उ.
				१०३·४ पू.	४९.३ उ.	१०३·४ पू.	४९·३ उ.

१४ न्यासात् सूर्योदये सूर्यास्ते वा यत्र ग्रहणमध्यो भवति तादृक्स्थानगता रेषा।

रेखान्तरं	अक्षांशाः	रेखान्तरं	अक्षांशाः	रेखान्तरं	अक्षांशाः	रेखान्तरं	अक्षांशाः
१८·९ प.	१·६ द.	३४·२ प.	३२·२ उ.	६२·७ प.	६७·४ उ.	१६८·६ प.	८३·२ उ.
२६·७ प.	१८·६ उ.	४२·० प.	४४·१ उ.	८६·७ प.	७८·४ उ.	१३७·६ पू	७२·४ उ.
		५०·८ प.	५५·८ उ.			११९·७ पू.	५३·१ उ.

कोष्ठकः १ । राहुपर्व ।

सूर्यग्रहणे भूमण्डलप्रान्तभवानां स्पर्शसंमीलनोन्मीलनमोक्षाणां प्रत्येकं कालस्थानयोर्ज्ञानार्थं तत्तत्स्थानीयखमध्यबिन्दूनां स्थितिर्विश्लेषः शरश्च ।

उपकरणं = चन्द्रच्छायाशरः ।

उपकरणं	स्पर्शस्थाने			संमीलनस्थाने			उन्मीलनस्थाने			मोक्षस्थाने		
छायाशरः	स्थितिः	विश्ले.	शरः	स्थितिः	विश्ले.	शरः	स्थितिः	विश्ले.	शरः	स्थितिः	विश्ले.	शरः
		अं०	अं०		अं०	अं०		अं०	अं०		अं०	अं०
+ १५००	−४·४	−९०	+६९·८							+४·४	+९०	+८०·०
१४००	७·०	९०	५९·२							७·०	९०	६९·४
१३००	८·७	९०	५१·७							८·७	९०	६१·९
१२००	१०·०	९०	४५·५							१०·०	९०	५५·७
११००	११·१	९०	४०·०							११·१	९०	५०·२
१०००	१२·०	९०	३५·०							१२·०	९०	४५·२
९००	१२·८	९०	३०·३	−४·४	−९०	+५९·३	+४·४	+९०	+६९·१	१२·८	९०	४०·५
८००	१३·४	९०	२५·९	६·०	९०	४८·२	६·०	९०	५८·१	१३·४	९०	३६·१
७००	१३·९	९०	२१·७	७·१	९०	३९·५	७·१	९०	४९·३	१३·९	९०	३१·९
६००	१४·४	९०	१७·६	८·०	९०	३२·०	८·०	९०	४१·८	१४·४	९०	२७·८
५००	१४·८	९०	१३·७	८·७	९०	२५·१	८·७	९०	३४·९	१४·८	९०	२३·९
४००	१५·१	९०	९·८	९·२	९०	१८·७	९·२	९०	२८·५	१५·१	९०	२०·०
३००	१५·४	९०	६·१	९·५	९०	१२·५	९·५	९०	२२·३	१५·४	९०	१६·३
२००	१५·५	९०	+ २·३	९·८	९०	६·६	९·८	९०	१६·४	१५·५	९०	१२·५
+ १००	१५·६	९०	− १·२	९·९	९०	+ ०·८	९·९	९०	१०·६	१५·६	९०	८·८
०	१५·६	९०	५·१	१०·०	९०	− ४·९	१०·०	९०	+ ४·९	१५·६	९०	+ ५·१
− १००	१५·६	९०	८·८	९·९	९०	१०·६	९·९	९०	− ०·८	१५·६	९०	− १·२
२००	१५·५	९०	१२·५	९·८	९०	१६·४	९·८	९०	६·६	१५·५	९०	२·३
३००	१५·४	९०	१६·३	९·५	९०	२२·३	९·५	९०	१२·५	१५·४	९०	६·१
४००	१५·१	९०	२०·०	९·२	९०	२८·५	९·२	९०	१८·७	१५·१	९०	९·८
५००	१४·८	९०	२३·९	८·७	९०	३४·९	८·७	९०	२५·१	१४·८	९०	१३·७
६००	१४·४	९०	२७·८	८·०	९०	४१·८	८·०	९०	३२·०	१४·४	९०	१७·६
७००	१३·९	९०	३१·९	७·१	९०	४९·३	७·१	९०	३९·५	१३·९	९०	२१·७
८००	१३·४	९०	३६·१	६·०	९०	५८·०	६·०	९०	४८·२	१३·४	९०	२५·९
९००	१२·८	९०	४०·५	−४·४	−९०	−६९·१	+४·४	+९०	−५९·३	१२·८	९०	३०·३
१०००	१२·०	९०	४५·२							१२·०	९०	३५·०
११००	११·१	९०	५०·२							११·१	९०	४०·०
१२००	१०·०	९०	५५·७							१०·०	९०	४५·५
१३००	८·७	९०	६१·९							८·७	९०	५१·७
१४००	७·०	९०	६९·४							७·०	९०	५९·२
− १५००	−४·४	−९०	−८०·०							+४·४	+९०	−६९·८

कोष्ठकः २। राहुपर्व।

छायापथस्य विश्लेषाः शराश्च। तिर्यगुपकरणं स्थितिखण्डानि।
छायोत्तराग्रपथानयने ऊर्ध्वाधरोपकरणं = छायाशरः + ५५४।
छायाकेन्द्रपथानयने „ „ = छायाशरः + शून्यम्।
छायादक्षिणाग्रपथानयने „ „ = छायाशरः − ५५४।

ऊर्ध्वाधरम्	स्थितिखण्डानि																			
	− ९ स्थि.		− ७ स्थि.		− ५ स्थि.		− ३ स्थि.		− १ स्थि.		+ १ स्थि.		+ ३ स्थि.		+ ५ स्थि.		+ ७ स्थि.		+ ९ स्थि.	
उपकरणम्	विश्ले.	शरः	विश्ले.	शरः	विश्ले.	शरः	विश्ले.	शरः	विश्ले.	शरः	विश्ले.	शरः	विश्ले.	शरः	विश्ले.	शरः	विश्ले.	शरः	विश्ले.	शरः
	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.
+ ९००							−५०	+६१	−२२	+६३	+ ३	+६५	+३५	+६७						
८००					−५९	+४९	३५	५०	१६	५२	३	५४	२४	५५	+५२	+५७				
७००			−७९	+४०	४७	४१	२९	४२	१३	४३	३	४५	२०	४६	४१	४८	+७७	+४९		
६००			६२	३२	४१	३४	२५	३५	११	३६	३	३७	१८	३८	३६	४०	५९	४१		
५००			५५	२६	३७	२७	२३	२८	९	२९	४	३०	१७	३२	३३	३३	५२	३४		
४००	−७९	+१९	५१	२०	३५	२१	२१	२२	८	२३	४	२४	१७	२५	३१	२६	४८	२७	+७८	+२८
३००	७१	१३	४८	१४	३३	१५	२०	१६	७	१७	४	१८	१७	१९	३०	२०	४६	२१	७०	२२
२००	६७	७	४६	८	३१	९	१९	१०	७	११	५	१२	१७	१३	३०	१४	४५	१५	६६	१६
+ १००	६५	+ १	४५	+ २	३१	+ ३	१८	+ ४	६	+ ५	५	+ ६	१७	७	३०	८	४४	९	६४	१०
०००	६४	− ४	४४	− ३	३०	− २	१७	− १	६	०	६	०	१७	+ १	३०	+ २	४४	+ ३	६४	+ ४
− १००	६४	१०	४४	९	३०	८	१७	७	५	− ६	६	− ५	१८	− ४	३१	− ३	४५	− २	६५	− १
२००	६६	१६	४५	१५	३०	१४	१७	१३	५	१२	७	११	१९	१०	३१	९	४६	८	६७	७
३००	७०	२२	४६	२१	३०	२०	१७	१९	४	१८	७	१७	२०	१६	३३	१५	४८	१४	७१	१३
४००	−७८	−२८	४८	२७	३१	२६	१७	२५	४	२४	८	२३	२१	२२	३५	२१	५१	२०	+७९	−१९
५००			५२	३४	३३	३३	१७	३२	४	३०	९	२९	२३	२८	३७	२७	५५	२६		
६००			५९	४१	३६	४०	१८	३८	३	३७	११	३६	२५	३५	४१	३४	६२	३२		
७००			−७७	−४९	४१	४८	२०	४६	३	४५	१३	४३	२९	४२	४७	४१	+७९	−४०		
८००					−५२	−५७	२४	५५	३	५४	१६	५२	३५	५०	+५९	−४९				
− ९००							−३५	−६७	− ३	−६५	+२२	−६३	+५०	−६१						

प्रथमकोष्ठकस्थसंमीलनोन्मीलनाङ्कपङ्क्ती अस्य कोष्ठकस्य क्रमेणाऽऽद्यन्तावीति मत्वाऽत्रत्यैरूर्ध्वाधरैरुपकरणैस्तत्रत्यान्मार्गाग्रयोः स्थितिविश्लेषशरानानयेत्। २५४ पृष्ठे १·२·५·६ पंक्तयः विलोक्याः। न्यासौ २।३ विलोकनीयौ।

कोष्ठकः ३ । राहुपर्व । (पूर्वार्धम्)

भूमण्डले ग्रस्तोदयास्तक्षेत्रावच्छेदकरेषास्थबिंदूनां शराः ।

द्वे उपकरणे = छायाशरः स्थितिखण्डानि च ।

उपकरणम् छायाशरः	स्थितिखण्डानि ।															
शुक्रयुतौ विक्षेपवलनं सर्वदा ७° भवति । तच्चाधः संपातसमीपायां युतौ धनम्, उर्ध्व-संपातसमीपायामृणम् । " **शरात्सहस्रगुणितान्मानैक्यार्धेन भाजितात् ।** " (पृ. २२० श्लो. १६) इतिसूत्रोक्तवत्सूर्यग्रहणसंबन्धिनो ग्राह्याः । रविबिम्बे पूर्वतः स्पर्शः पश्चिमतो मोक्ष इति सामान्यो नियमः । स्थानांशाः सायनरवेरयनवलनं विक्षेपवलनमेतेषामैक्ये कृते रविबिम्बप्रान्ते विषुववृत्तजनितोत्तरबिन्दोः सकाशात्स्थानांशा भवेयुः । (पृ. २३२ को. ४ उपयोज्यम्) ।

उदाहरणम्—शरः १४′, सहस्रगुणितः १४०००′, मानैक्यार्धेन १६′·८ भाजितो जातः ८३३, अनेन **चन्द्रग्रहणाध्यायस्य** चतुर्थकोष्ठकात्सूर्यग्रहणसंबन्धिनः स्थानांशाः **स्पार्शिकाः** - ३३° । **मौक्षिकाः** + ३३° लभ्यन्ते । सायनरविणा २३४°·८९४ + २२°·०९६ = २५७° लब्धम**यनवलनं** - ६° । अत्रयुतिरूर्ध्वपातसमीपे भवत्यतो **विक्षेपवलनं** - ७° ।

	अं.	अं.	अं.	अं.
स्पर्शस्थानमुत्तरबिन्दोः सकाशात्पूर्वतः	- ३३	- ६	- ७ =	- ४६
मोक्षस्थानं ... ... पश्चिमतः	+ ३३	- ६	- ७ =	+ २०

बुधरविभेद युतिः ।

शके १८२९ कार्तिक शुक्ल ९ मीतिथौ गुरुवासरे (१४ नोव्हें १९०७) सायंकाले रवि-बिम्बं बुधेनाक्रान्तम् । अयं योगः १३ वा ७ वर्षैः परिवर्तते । अस्य गणितम् । पूर्वोक्तदिने उज्ज-यिनीमध्यमसूर्योदयादनन्तरं २७ घ. १५ प. (= ·४५४ दिनांशः) समये अहर्गणः २१४·८६३ दि. । रविनीचं २५८·९२९ अं. । मन्दकेन्द्रं ३०९·४८७ अं. । **मन्दस्पष्टरविः** २०८·४१६ अं. । नाटीकलादपि २०८·४१६ अं. । मन्दकर्णः ९८९·२ । दिनगतिः १·००७ अं. । बिम्बकलाः ३२।३० । परमलंबन विकलाः ९ । अयनांशाः २२·५५७ ।

बुधनीचं ५३·४८६ अं. । मन्दकेन्द्रं ३३४·८४० अं. । मन्दस्पष्टबुधः २८·३२६ अं. । नाटीकलात् २८·३१३ अं. । दिनगतिः ६·१५ अं. । लम्बनविकलाः १४·४ । मन्दकर्णः ३१२·५७ । सपातबुधः ३·६३५ अं. । रविमध्यशरकलाः + २६·५५ । भूमध्यस्पष्टबुधः २०८·४५७ अं. । नाटीकलात् २०८·४५७ अं. । दिनद्वयभूमध्यस्पष्टबुधान्तरेण साधिताः दिनगतिवक्रकलाः - ८१ । शरकलाः १२·३६ । शीघ्रकर्णः ६७६·६३ ।

चालनेन रविबुधसमकलयुतिकालः घ. २८ प. १८ । अस्मिन् समये बुधस्पष्टशरः १२·६ क. । संक्रमणकाले बुधशुक्रयोर्विक्षेपवलनं तत्तत्परमशरांशतुल्यम् । अतः युतिकालीनभूमध्यशरः परमशरज्यागुणितः फलं युतिमध्यकालसंस्कारो भवति । अयं संस्कारश्च सपातबुधे समपदे सति धनं, विषमपदे ऋणम् । पश्चात् रविबुधयोर्दिनगतिसाहाय्येन तस्य संस्कारस्य कालरूपं संपाद्य तेन युतिमध्यकालः संस्कार्यः । एवं युतिकालः लभ्यते । तद्यथा । बुधपरमशरः ७ अं. । अस्य ज्या ·१२२ । अनया शरः १२·६ क. गुणितः लब्धं १·५५ क. । अत्र सपातबुधः विषमपदे तिष्ठत्यतः अयं ऋणम् । अस्य कालरूपं-३४ प. । अतः घ. २८ प. १८, ३४ पलैर्हीनः लब्धं घ. २७ प. ३४ अयं युतिमध्यकालः जातः ।

रविकेन्द्रदिवसक्षेपकः किरणपुरस्सरणार्थं १००·७३३ गृहीत एव । "संसाध्य सर्वं गणितं" इत्यनेन श्लोकेन बुधस्य तात्कालिकशीघ्रकर्णः ६७६। अयं ५० भक्तः १३·५ पलानि बुधसंस्कारः अनेन युक्तः युतिमध्यकालः २७।३४ घ. + १३·५ = दृश्यः युतिमध्यकालः प्राप्तः ।

युतिमध्यकालसाधनानन्तरं चन्द्रग्रहणोक्तरीत्या रविबुधयोः मानैक्यमानान्तरखंडे शरौ च एतेषां साहाय्येन स्पर्शादीनां कालाः अग्रे अधः " पूर्वगणितसारे " निविष्टाः ।

पूर्वगणितस्य सारम्।

रविशुक्रयुतिः (बागलकोटे) रविबुधयुतिः

शके १७९६ मार्गशीर्ष शु. १ पदा।
बुधवासरे रविशुक्रयोरन्तर्योगः।
स्पर्शः १·६ घ. | मध्य: ७·४ घ. | मोक्षः १३·२ घ.
उ. बिन्दोः पूर्वे ४६° | र. बिं ३२′। शु. बिं. १′। | उ. बिन्दोः पश्चि. २०°
युतिमध्यकाले रविशुक्रयोर्मध्ययोः
अन्तरं १३′·६। रविबिंबभेदः २′·४।

शके १८२९ कार्तिक शुद्ध ९ मी।
गुरुवासरे रविबुधयोरन्तर्योगः।
स्प. २३·४ घ. | म. २७·८ घ. | मो. ३२·१ घ.
उ. बिंदोः पूर्वे ६०° | र.बिं.३२′·४। शु.बिं १०″। | उ. बिन्दोः पश्चि. १५°
युतिमध्यकाले रविबुधयोर्मध्ययोः
अन्तरं १२′·६। रविबिंबभेदः ३′·६।

परिलेखः।

परिलेखः।

अथ रोहिणीशकटभेदः।

गुणचत्वारिंशदंशैः सार्धैः ४३°·५ स्तुल्ये नभश्चरे।
दक्षिणेषुः खषट्चन्द्रा १६०′ धिकलिप्तोऽस्ति तस्य चेत्॥ १८॥
ग्रहो भिनत्ति शकटं चन्द्रो भिन्द्याद्विधुंतुदे।
एकसप्ततिभागाग्रे खार्काशा ११०° वाधि संस्थिते॥ २७॥

सार्धत्रिचत्वारिंशदंशैस्तुल्ये ग्रहभोगे यदि तस्य भूमध्यस्पष्टो दक्षिणशरः षट्यधिकशत-कलाभ्योऽधिकः स्यात्तर्हि स ग्रहो रोहिणीशकटं भेत्स्यति। (७१°—१९१°) एतदवधिस्थिते राहौ चन्द्रो रोहिणीशकटं नतिवशाद्भिन्द्यात्।

॥ इति युतिगणितम्॥

ज्योतिःशास्त्रमहातरोर्निगदिताः शाखास्तु या या बुधैः।
ताः सर्वा अधिकृत्य दीर्घतपसा ग्रंथा निबद्धा मया।
ते ग्रन्था अधुनाऽखिले भरतभूप्रान्ते प्रतिष्ठां गताः।
वीक्ष्यैतन्मम मानसाम्बुधिरलं मोदोर्मिभिः पूरितः॥

इति श्रीरामकृष्णसुतवेङ्कटेशविरचिते ज्योतिर्गणिते द्वितीये परिच्छेदे युत्यध्यायस्तृतीयः समाप्तः॥ ३॥

कोष्ठकः १ ।

युत्यनुकूलनक्षत्रान्वेषणम् ।

उपकरणं = स्पष्टराहुः

राहौ				वर्तमाने युत्यनुकूला तारा	राहौ				वर्तमाने युत्यनुकूला तारा
आरभ्य		पर्यन्तम्			आरभ्य		पर्यन्तम्		
रा.	अं.	रा.	अं.		रा.	अं.	रा.	अं.	
११	२४	१०	६	कृत्तिका	५	४	३	२८	रोहिणी
११	२२	१०	६	अग्निः	४	२७	४	१६	कण्वः
११	२०	११	९	कण्वः	४	२७	४	१६	पाणिनिः
११	१८	११	७	चित्रा	४	२५	४	१३	शततारका
१०	२९	१०	१७	कुबेरः	४	१५	४	०	नलः
१०	२३	१०	११	शततारका	४	५	३	२४	मघा
१०	१८	१०	७	मघा	३	२३	३	११	शाकलः
९	२७	९	१४	उत्तराषाढा	३	२२	३	९	शिवः
९	२२	९	१०	पुष्यम्	३	२०	३	८	पुष्यम्
९	१५	९	३	कश्यपः	३	१३	३	१	कुबेरः
९	१३	८	२६	ज्येष्ठा	३	३	२	२१	कपिः
९	६	८	१८	कृत्तिका	३	१	२	२०	शुकः
९	३	८	२२	मृकण्डुः	२	२७	२	१५	पराशरः
९	१	८	१७	रुद्रः	२	२५	२	१४	मनुः
८	२६	८	१५	शुकः	२	२१	२	८	गर्गः
८	१६	८	५	यमः	२	५	०	३	शृङ्गः
८	७	७	२५	पराशरः	२	४	१	२२	गौतमः
८	४	७	२३	मनुः	२	२	१	२१	मृकण्डुः
८	३	७	२१	शाकलः	१	२९	१	१७	कश्यपः
७	२९	७	१८	अनुराधा	१	२४	१	११	उत्तराषाढा
७	११	६	२९	कपिः	१	२१	१	१०	यमः
७	९	६	२६	शिवः	१	७	०	२६	व्यासः
७	४	५	१६	भरद्वाजः	१	२	०	१७	नलः
६	२६	६	१४	गौतमः	१	०	०	१९	अनुराधा
६	२३	६	१२	चित्रा	१	१	०	१८	रेवती
६	२०	६	७	गर्गः	०	११	११	२७	रुद्रः
६	१६	६	५	व्यासः	०	८	११	२५	पाणिनिः
५	१०	४	२७	रेवती	०	६	११	१९	ज्येष्ठा

कोष्ठकः २।

युत्यनुकूलताराणां भोगः, शरो, युतिस्थानं, वर्गश्च।

संख्या	तारा	भोगः			शरः		युतिस्थानम्		वर्गः
		रा०	अं०	क०	अं०	क०	नक्षत्रम्	क.	
१	कृत्तिका	१	६	९·०	+ ४	२·३	कृत्तिका	− २३१	३
२	गर्गः	१	१४	३७·२	− २	३४·८	कृत्तिका	+ २७७	३
३	रोहिणी	१	१५	५६·९	− ५	२८·१	कृत्तिका	+ ३५७	१
४	अग्निः	१	५८	४४·०	+ ५	२२·५	रोहिणी	+ ३२४	२
५	कपिः	२	०	५६·५	− २	१३·६	मृगशीर्षम्	− ३४३	३
६	मनुः	२	९	१५·८	− ०	५४·२	मृगशीर्षम्	+ १५६	३
७	पराशरः	२	११	२७·५	− ०	४९·९	मृगशीर्षम्	+ २८८	३
८	कश्यपः	२	१६	५·९	+ २	३·४	आर्द्रा	− २३४	३
९	शुकः	२	२२	४०·८	− ०	११·०	आर्द्रा	+ १६१	३
१०	पुष्यम्	३	१४	५२·७	+ ०	४·०	पुष्यम्	− १०७	४
११	शुक्रः	४	४	३·८	+ ४	५१·५	आश्लेषा	+ २४४	३
१२	मघा	४	५	५९·७	+ ०	२७·०	आश्लेषा	+ ३६०	१
१३	कण्वः	५	३	१७·९	+ ०	४१·७	पूर्वा	+ ३९८	३
१४	पाणिनिः	५	१०	५९·५	+ १	२२·३	उत्तरा	+ ६०	३
१५	नलः	५	१६	१८·८	+ २	४९·२	उत्तरा	+ ३७९	३
१६	चित्रा	६	०	०·०	− २	२·७	चित्रा	− ४००	१
१७	व्यासः	६	२१	१४·६	+ ०	२०·९	स्वाती	+ ७१	३
१८	अनुराधा	७	८	४३·८	− १	५८·२	विशाखा	+ ३२४	३
१९	गौतमः	७	९	२०·६	+ १	१·४	विशाखा	+ ३६१	२
२०	रुद्रः	७	१३	५७·९	− ४	१·२	अनुराधा	− १६२	३
२१	ज्येष्ठा	७	१५	५५·६	− ४	३३·३	अनुराधा	− ४४	१
२२	यमः	७	५७	३३·२	− १	४९·६	ज्येष्ठा	− १४७	३
२३	शिवः	८	९	२२·३	+ २	२१·४	मूलम्	− २३८	३
२४	मृकण्डुः	८	१२	२८·६	− २	६·९	मूलम्	− ५१	३
२५	उत्तराषाढा	८	१८	४८·९	− ३	२७·१	मूलम्	+ ३२९	३
२६	शाकलः	८	२२	२४·६	+ १	२७·२	पूर्वाषाढा	− २५५	३
२७	भरद्वाजः	९	१०	१२·३	+ ४	३६·१	उत्तराषाढा	+ १२	३
२८	कुबेरः	९	५९	४१·७	− २	३४·९	धनिष्ठा	− ४१८	३
२९	शततारका	१०	१७	४४·०	− ०	२३·०	शततारका	− १३६	४
३०	रेवती	११	२९	१६·९	− ३	४·०	रेवती	− ४३	४½

कोष्ठकः ३ ।

चन्द्रविक्षेपवृत्तत्रिभोनलग्नम् = क्रान्तिवृत्तत्रिभोनलग्नम् + अत्रत्यः संस्कारः ।

ऊर्ध्वाधरम् उपकरणम् = क्रान्तिवृत्तत्रिभोनलग्नम् − सायनराहुः ।

तिरश्चीनम् उपकरणम् = क्रान्तिवृत्तत्रिभोनलग्नस्य नतांशाः ।

त्रिभोनलग्नं सायनराहुरहितम्	त्रिभोनलग्ननतांशाः									त्रिभोनलग्नं सायनराहुरहितम्
	उ. २०	उ. १०	०	द. १०	द. २०	द. ३०	द. ४०	द. ५०	द. ६०	
अं०	अं०	अं०	अं०	अं०	अं०	अं०	अं०	अं०	अं०	अं०
२७०	−०·०+	−०·०+	+०·०−	+०·०−	+ ·०−	+०·०−	+०·०−	+०·०−	+०·०−	२७०
२७६	·२	·१	·०	·१	·२	·३	·५	·७	१·१	२६४
२८२	·३	·१	·०	·२	·४	·७	१·०	१·५	२·२	२५८
२८८	·५	·२	·०	·३	·६	१·०	१·५	२·२	३·३	२५२
२९४	·६	·३	·१	·५	·९	१·४	२·०	२·९	४·३	२४६
३००	·८	·३	·१	·६	१·१	१·७	२·४	३·५	५·१	२४०
३०६	·९	·४	·१	·७	१·२	१·९	२·८	४·१	६·१	२३४
३१२	१·१	·५	·१	·७	१·४	२·२	३·२	४·६	६·८	२२८
३१८	१·२	·५	·१	·८	१·५	२·४	३·५	५·०	७·५	२२२
३२४	१·४	·६	·१	·८	१·६	२·६	३·८	५·४	८·१	२१६
३३०	१·५	·७	·१	·९	१·७	२·७	४·०	५·७	८·४	२१०
३३६	१·६	·७	·१	·९	१·८	२·९	४·२	५·९	८·६	२०४
३४२	१·७	·८	·१	·९	१·९	२·९	४·३	६·०	८·८	१९८
३४८	१·८	·८	·०	·९	१·९	३·०	४·३	६·२	८·९	१९२
३५४	१·८	·९	·०	·९	१·९	३·०	४·३	६·२	८·९	१८६
३६०	१·९	·९	·०	·९	१·९	३·०	४·३	६·१	८·८	१८०
६	१·९	·९	·०	·९	१·८	३·०	४·२	६·०	८·६	१७४
१२	१·९	·९	·०	·८	१·८	२·८	४·१	५·८	८·३	१६८
१८	१·९	·९	·१	·८	१·७	२·७	३·९	५·६	८·०	१६२
२४	१·८	·९	·१	·७	१·६	२·६	३·७	५·३	७·६	१५६
३०	१·७	·९	·१	·७	१·५	२·५	३·५	४·९	७·०	१५०
३६	१·६	·८	·१	·६	१·४	२·२	३·२	४·६	६·५	१४४
४२	१·५	·८	·१	·५	१·२	२·०	२·९	४·१	५·९	१३८
४८	१·४	·७	·१	·५	१·१	१·८	२·६	३·७	५·२	१३२
५४	१·२	·७	·१	·४	·९	१·६	२·३	३·२	४·५	१२६
६०	१·१	·६	·१	·३	·८	१·४	१·९	२·७	३·८	१२०
६६	·९	·५	·१	·३	·६	१·१	१·५	२·२	३·१	११४
७२	·६	·३	·०	·२	·५	०·८	१·२	१·६	२·३	१०८
७८	·४	·२	·०	·१	·३	०·५	·८	१·१	१·६	१०२
८४	·२	·१	·०	·१	·२	०·३	·४	·५	·८	९६
९०	−०·०+	−०·०+	+ ·०−	+०·०−	+०·०−	+०·०−	+०·०−	+०·०−	+०·०−	९०

विशेषः— यत्पार्श्वस्थमूर्ध्वाधरमुपकरणं स्यात्तत्पार्श्वस्थं संस्कारचिह्नमङ्गीकरणीयम् ।

कोष्ठकः ४ ।

चन्द्रविक्षेपवृत्तत्रिभोनलग्ननतांशाः = क्रान्तिवृत्तत्रिभोनलग्ननतांशाः + अत्रत्यसंस्कारः

ऊर्ध्वाधरम् उपकरणं = क्रान्तिवृत्तत्रिभोनलग्नम् – सायनराहुः ।

तिर्यक् उपकरणम् = क्रान्तिवृत्तत्रिभोनलग्नस्य नतांशाः ।

त्रिभोनलग्नं सायनराहुरहितम्	त्रिभोनलग्ननतांशाः									त्रिभोनलग्नं सायनराहुरहितम्
	उ. २०	उ. १०	०	द. १०	द. २०	द. ३०	द ४०	द. ५०	द. ६०	
अं.	अं.	अ.	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.
२७०	– ५·१	– ५·१	– ५·१	– ५·१	– ५·१	– ५·१	– ५·१	– ५·१	– ५·१	२७०
२७६	५·१	५·१	५·१	५·१	५·१	५·१	५·१	५·१	५·१	२६४
२८२	५·०	५·०	५·०	५·०	५·०	५·०	५·०	५·०	५·०	२५८
२८८	४·९	४·९	४·९	४·९	४·९	४·९	४·९	४·९	४·८	२५२
२९४	४·७	४·७	४·७	४·७	४·७	४·७	४·७	४·६	४·६	२४६
३००	४·५	४·५	४·५	४·४	४·४	४·४	४·४	४·४	४·४	२४०
३०६	४·२	४·२	४·२	४·१	४·१	४·१	४·१	४·०	४·०	२३४
३१२	३·८	३·८	३·८	३·८	३·८	३·८	३·७	३·७	३·७	२२८
३१८	३·५	३·४	३·४	३·४	३·४	३·३	३·३	३·३	३·२	२२२
३२४	३·०	३·०	३·०	३·०	२·९	२·९	२·९	२·८	२·७	२१६
३३०	२·६	२·६	२·६	२·५	२·५	२·४	२·४	२·३	२·२	२१०
३३६	२·१	२·१	२·१	२·०	२·०	२·०	१·९	१·९	१·७	२०४
३४२	१·६	१·६	१·६	१·५	१·५	१·४	१·४	१·३	१·२	१९८
३४८	१·१	१·१	१·०	१·०	१·०	·९	·९	·८	·७	१९२
३५४	०·६	– ०·६	– ·५	– ·५	– ·४	– ·४	– ·३	– ·२	– ·१	१८६
३६०	– ·१	·०	·०	+ ·१	+ ·१	+ ·१	+ ·२	+ ·३	+ ·४	१८०
६	+ ·४	+ ·५	+ ·५	·६	·६	·७	·७	·८	·९	१७४
१२	१·०	१·०	१·०	१·१	१·१	१·२	१·२	१·३	१·४	१६८
१८	१·५	१·५	१·६	१·६	१·६	१·७	१·७	१·८	१·९	१६२
२४	२·०	२·०	२·१	२·१	२·१	२·२	२·२	२·३	२·३	१५६
३०	२·५	२·५	२·६	२·६	२·६	२·६	२·७	२·७	२·८	१५०
३६	३·०	३·०	३·०	३·०	३·०	३·१	३·१	३·२	३·२	१४४
४२	३·४	३·४	३·४	३·४	३·५	३·५	३·५	३·६	३·६	१३८
४८	३·८	३.८	३·८	३·८	३·८	३·९	३·९	३·९	४·०	१३२
५४	४·१	४·१	४·२	४·३	४·२	४·२	४·२	४·२	४·३	१२६
६०	४·४	४·४	४·५	४·५	४·५	४·५	४·५	४·५	४·५	१२०
६६	४·८	४·७	४·७	४·७	४·७	४·७	४·७	४·७	४·७	११४
७२	४·९	४·९	४·९	४·९	४·९	४·९	४·९	४·९	४·९	१०८
७८	५·०	५·०	५·०	५·०	५·०	५·०	५·०	५·०	५·०	१०२
८४	५·१	५·१	५·१	५·१	५·१	५·१	५·१	५·१	५·१	९६
९०	+ ५·१	+ ५·१	+ ५·१	+ ५·१	+ ५·१	+ ५·१	+ ५·१	+ ५·१	+ ५·१	९०

अथ ज्योतिर्गणिते लोपदर्शनाध्यायश्चतुर्थः।

चन्द्रदर्शनम्।

तिथिगत्या भूमिं परितो भ्रमंश्चन्द्रः सूर्यसांनिध्यं प्राप्य कृष्णचतुर्दश्यादितिथित्रये क्षीणकलः सन्प्रायो न दृश्यते। क्षितिजस्थे सवितरि यदि चन्द्रस्योन्नतांशा द्वादशभ्योऽल्पास्तर्हि चन्द्रदर्शनं न भवति। अन्यथा मेघादिव्यवधानाभावे भवतीति सामान्यो नियमः।

शुक्लपक्षप्रतिपदि रव्यस्ते तिथिपत्रकात्।
सायनार्कं विधुशरं चन्द्रसूर्यान्तरं स्फुटम्॥ १॥
आद्यात्सत्रिभसूर्येण खमध्यशरमानयेत्।
तेन द्वितीयात्पदकाल्लभेत गुणकद्वयम्॥ २॥
चन्द्रसूर्यान्तरं गुण्यं प्रथमेन गुणेन च।
द्वितीयेन शरो गुण्य एतयोः फलयोर्युतिः॥ ३॥
द्वादशांशेभ्य ऊना चेन्न भवेच्चन्द्रदर्शनम्।
अन्यथा भूद्युतिव्याप्तो दृश्येत सकलो विधुः॥ ४॥

शुक्लपक्षप्रतिपदि रव्यस्तकालिकानि सायनसूर्यश्चन्द्रशरश्चन्द्रसूर्ययोः स्पष्टमन्तरं चैतानि तिथिपत्रकादेव प्रसाध्य प्रथमकोष्ठकात्सत्रिभसायनसूर्येण खस्वस्तिकस्य शरांशानानयेत्। एतैः शरांशैर्द्वितीयकोष्ठकाद्गुणकद्वयमादाय तयोः प्रथमेन चन्द्रसूर्यान्तरं गुण्यं, द्वितीयगुणकेन चन्द्रशरो गुण्यः। एतयोर्गुणकारयोर्योगो यदि द्वादशांशेभ्योऽल्पतरस्तदा चन्द्रदर्शनं न स्यात्। यद्यधिकस्तदा भूचान्द्रिकया शोभमानं चन्द्रबिम्बं* निखिलं पक्ष एककलायुक्तं गोचरं भवेत्। गुणनफलयोगस्य द्वादशसमत्वे चन्द्रदर्शनमनिश्चितम्।

उदाहरणम्— शके १८१५ फाल्गुनशुक्लप्रतिपदि गुरुवासरे (८ मार्च १८९४) चन्द्रदर्शनं भवेन्न वा तद्वद। **केतकीपञ्चाङ्गादस्मिन्दिने बागलकोटे** रव्यस्तकालः ३० घ. १८प.। अस्मिनसमये सायनरविः ३४८°, चन्द्रशरः – १°·१ (दक्षिणः), चन्द्रसूर्यान्तरं ११°·५ चोपलभ्यन्ते। नवत्यंशयुतेन सायनसूर्येण ७८°, बागलकोटाक्षेण १६° च प्रथमकोष्ठकाल्लब्धाः खमध्यशरांशाः –८°, एभिर्द्वितीयकोष्ठकात्साधितः प्रथमो गुणकः, + ०·९९, द्वितीयश्च – ०·१४।

चन्द्रसूर्यान्तरं प्रथमगुणघ्नं =	११°·५ × ०·९९ =	११°·४
चन्द्रशरो द्वितीयगुणघ्नः =	– १°·१ × – ०·१४ =	+ ०°·१
ऐक्यं द्वादशांशेभ्योऽल्पतरम्	... ...	११·५

अत एवास्मिन्दिने चन्द्रदर्शनं न भवेत्।

---

* चन्द्रगोलत्रिज्या ११० योजनानि। भूगोलत्रिज्या ३९८ योजनानि। उक्तत्रिज्योत्पादितवर्तुलद्वयक्षेत्रफलप्रमाणं १२१ ÷ १५८४ नाम १ ÷ १३ समं यस्मात् भवति तस्मात् चन्द्रप्रकाशाद्भूप्रकाशस्त्रयोदशगुणस्तीव्रतरः। अतो भूचान्द्रिकया प्रकाशितं संपूर्णं चन्द्रबिम्बं दृग्गोचरं भवति।

अथागस्त्यलोपदर्शनगणितम्।

त्र्यूनाक्षभा सप्तगुणा लवाद्यं प्रथमं फलम्।
त्र्यूनाक्षभाया वर्गस्य पंचमांशो द्वितीयकम्॥ १॥
त्रयस्त्रिंशल्लवाः कल्प्याः फलमत्र तृतीयकम्।
फलत्रयस्य संयोगः क्षेत्रांशा इति कीर्तितः॥ २॥
क्षेत्रांशैर्हीनयुक्तेषु द्विसप्तति ७२ लवेषु च।
सूर्यागमे क्रमाल्लोपो दर्शनं कुम्भजन्मनः॥ ३॥

त्रिभिरङ्गुलै रहिता पलभा सप्तभिर्गुणितांशाद्यं प्रथमं फलम्। त्र्यङ्गुलरहितपलभावर्गस्य पञ्चमांशोंऽशात्मकं द्वितीयं फलम्। त्रयस्त्रिंशदंशास्तृतीयं फलम्। त्रयाणां फलानामैक्यं क्षेत्रांशाः। द्विसप्ततिलवेभ्यः क्षेत्रांशान्विशोध्य यल्लभ्यते तत्तुल्ये स्पष्टसूर्येऽगस्त्यः पश्चिमस्यां दिशि तरणिकिरणनिकरे लुप्येत्, द्विसप्ततिक्षेत्रांशेषु संयोज्य यल्लभ्यते तत्तुल्ये स्पष्टसूर्ये पूर्वस्यां दिशि स पुनर्व्यक्तरूपो भवेत्।

उदाहरणम्—बागलकोटेऽगस्त्यलोपदर्शनकालौ वद। अत्र पञ्चाङ्गगणितस्य २० कोष्ठकात्साधिता **बागलकोट**पलभा ३·५ अङ्गु०, त्र्यङ्गुलोना ०·५ अङ्गु०। इयमेकत्र सप्तगुणा ३·५ अंशाद्यं **प्रथमं फलम्।** अन्यत्र वर्गिता ०·२५ अङ्गु०, अस्याः पञ्चमांशो ०·०५ अंशः, **द्वितीयं फलं।** ३३°·० **तृतीयं फलं,** त्रयाणामैक्यं (३°·५ + ०°·०५ + ३३°·०) = ३६°·५५ **क्षेत्रांशाः,** एभी रहितेषु द्विसप्ततिलवेषु जातोऽ**गस्त्यलोप**समये रविभोगः (७२° − ३६·५५) = ३५°·४५। पुनरेतयो राश्योर्योगे कृते जातोऽगस्त्यदर्शने रविभोगः (७२° + ३६°·५५) = १०८°·५५।

श्रीकाशिक्षेत्रे पलभा ५·७ अंगुलानि।

द्वितीयोदाहरणम्।		अंशाः	अंशाः
त्र्यूनाऽक्षभासप्तगुणा ७ (५·७ − ३)	... अ	१८·९	
स्ववर्गपंचमांशः $\frac{१}{५}$ (५·७ − ३)^{२}	... ब	१·५	
त्रयस्त्रिंशल्लवाः कल्प्याः	क	३३·०	
(अ+ब+क)=क्षेत्रांशाः		५३·४	५३·४
क्षेत्रांशहीनयुक्ताः ७२° लवाः		७२·०	७२·०
फलं रविभोगः	...	१८·६	१२५·४
अगस्त्यस्य	...	लोपे	दर्शने

श्रीरामेश्वरे पलभा २ अंगुलानि।

तृतीयोदाहरणम्।		अंशाः	अंशाः
७ (२ − ३)	अ.	− ७·०	
$\frac{१}{५}$ (२ − ३)^{२}	ब	+ ०·२	
३३ लवाः	क	+ ३३·०	
(अ + ब + क) =	क्षे	२६·२	२६·२
७२ ± क्षे		७२·०	७२·०
रविभोगः	...	४५·८	९८·२
अगस्त्यस्य	...	लोपे	दर्शने

बागलकोटापेक्षया सप्तदशभिर्दिवसैः पूर्वं **काश्या**मगस्त्यो लुप्यति परं **रामेश्वरे** दशभिर्दिवसैः पश्चाद्दृश्यो भवतीत्युपरितनगणिताज्ज्ञायते।

इत्यगस्त्यलोपदर्शनगणितम्।

सौक्ष्म्ये वा लघुतागुणे सुलभतालाभेऽथवा बोधने।
मज्ज्योतिर्गणितस्य तुल्यमपरं सद्युक्तिकौशल्यभाक्।
तंत्रं भाविसुदीर्घदीर्घसमये न स्यादिति ज्ञायताम्।
स्याच्चेत्तत्खलु मत्कृतेः प्रतिकृतिः स्यान्नामभेदान्विता॥

चन्द्रदर्शनम्।

कोष्ठकः १। खमध्यशरः। द्वे उपकरणे = सत्रिभसायनरविः, उत्तराक्षांशाश्च।									कोष्ठकः २। इनान्तरशरयोर्गुणकौ। उपकरणं खमध्यशरः। इनान्तरं = (चं. − सू.)		
सत्रिभ-सायनरविः		उत्तराक्षांशाः							उपकरणम्	इनान्तर-गुणकः	चन्द्रशर-गुणकः
		५	१०	१५	२०	२५	३०	३५			
अं.	अं.	अं.	अं.	अं.	अं.	अं	अं.	अं.	अं.		
२७०	२७०	+ २८	+ ३३	+ ३८	+ ४३	+ ४८	+ ५३	+ ५८	+ ६०	+ ०·५०	+ ०·८७
२८०	२६०	२८	३३	३८	४३	४८	५३	५८	५५	·५७	·८२
२९०	२५०	२७	३२	३७	४२	४७	५२	५८	५०	·६४	·७७
३००	२४०	२६	३०	३६	४१	४६	५१	५७	४५	·७१	·७१
३१०	२३०	२४	२८	३४	३९	४४	४९	५५	४०	·७७	·६४
३२०	२२०	२१	२६	३१	३७	४२	४७	५३	३५	·८२	·५७
३३०	२१०	१७	२३	२८	३४	३९	४४	५०	३०	·८७	·५०
३४०	२००	१४	१९	२५	३०	३६	४१	४७	२५	·९१	·४२
३५०	१९०	९	१५	२१	२६	३२	३७	४३	२०	·९४	·३४
३६०	१८०	५	११	१६	२२	२७	३३	३९	१५	·९७	·२६
१०	१७०	+ १	७	११	१८	२३	२९	३४	१०	·९८	·१७
२०	१६०	− ३	+ २	७	१४	१८	२४	३०	+ ५	१·००	+ ०·०९
३०	१५०	७	− २	+ ४	९	१४	२०	२५	०	१·००	·००
४०	१४०	११	५	०	५	१०	१६	२१	− ५	१·००	− ०·०९
५०	१३०	१३	८	− ३	+ २	७	१३	१८	१०	·९८	·१७
६०	१२०	१५	१०	५	०	५	१०	१५	१५	·९७	·२६
७०	११०	१७	१२	७	− २	३	८	१३	२०	·९४	·३४
८०	१००	१८	१३	८	३	२	७	१२	२५	·९१	·४२
९०	९०	− १८	− १३	− ८	− ३	+ १	+ ६	+ ११	− ३०	+ ०·८७	− ०·५०

गुरुशुक्रयोर्लोपदर्शनम्।

सर्वे ग्रहाः शीघ्रकेन्द्रगत्या सूर्यमुपेत्य कानिचिद्दिनान्यदृश्या भवन्ति। इयं चमत्कृती रविग्रहयोरुदयास्तमययोः कालयोरन्तरमाश्रयत इति **पूर्वाचार्याणां** मतं न समञ्जसम्। यतः **संध्यारुणदीप्तिः** **सूर्यस्य** क्षितिजादधस्तनान्नतांशाननुसरति न च कालांशान्। यत्र देशे ३५° अक्षांशास्तत्र विषुवद्दिवसे संधिप्रकाशः सूर्यस्योदयास्तकालात्प्राक्पश्चात् ३ घ. ४० प. वर्तते। परमयनप्रवृत्तिदिवसे स एव ४ घ. ४० प. भवति। एतयोः कालांशाः क्रमेण २२°, २८° भवन्ति। अत एव सिद्धं यदेकैरेव कालांशैर्यद्दर्शनादर्शनगणितं **पूर्वाचार्यै**रुक्तं तदुपपत्तिविरुद्धं स्थूलं चेति। अतो ग्रहाणां लोपदर्शनगणितं तेषामुन्नतांशाश्रयेणैव कार्यम्।

इयमुन्नतांशगणितपद्धतिर्मयैवोपज्ञाता। गुरुशुक्रयोरदर्शने मौञ्जीविवाहादिमङ्गलकार्याणां **धर्मशास्त्रेषु** निषेधादेतयोर्मङ्गलकार्यावरोधनयोर्दर्शनादर्शने जनानामतीव जिज्ञासा प्रवर्तते। अत एतयोरेव दर्शनादर्शनज्ञानार्थमत्र कोष्ठकान्युन्नतांशपद्धत्यनुसारेण विरचितानि। एभिः कोष्ठकैः साधितो दर्शनादर्शनकालोऽपि वातावरणशुद्धिमालिन्यवशाद्वित्राणि दिनानि व्यभिचरेत्। वातावरणस्य शुद्धिमालिन्यमनियतम्। अत एव दर्शनादर्शनकालानां सूक्ष्मानयनमशक्यम्। स्थिरकालांशपद्धत्या* दर्शनादर्शने कदा कदा दश द्वादश दिनानि व्यभिचरतः। उन्नतांशपद्धत्या द्वित्रदिनेभ्योऽधिकं नैव व्यभिचरेतामित्यस्मिन्ग्रन्थे विशेषः।

ग्रहलाघवीयपञ्चाङ्गे **शुक्रस्य** पूर्वस्यां दिशि लोपः शके १८१९ वर्षे पौषशुक्लनवम्यामासीत्, तत्प्रतीतिपरीक्षार्थं **बागलकोटे** प्रत्यहं प्रातःकाले रविशुक्रयोरुदयकालयोरन्तरं निश्चेतुमहमारब्धवान्। एवं कुर्वता मया पौषकृष्णैकादशीपर्यन्तं शुक्रो दृष्टः। अन्तिमे दिवसे शुक्रोदयानन्तरमेकया घटिकया सूर्य उदगच्छत्। ततश्चतुरो दिवसानदृश्योऽपि **बागलकोटे** पौषकृष्णामावास्यायां सूर्यग्रहणे द्विकलामिते बिम्बशेषे सूर्यस्य संनिधौ पञ्चषडंशमितेऽन्तरे प्रकाशमानः शुक्रः सर्वैर्दृष्टः।

वातावरणे निर्मले सति हेमन्ततौं षण्मिते कालांशान्तरे शुक्रो दृश्यते। प्रयत्ने कृते सार्धपञ्चमिते कालांशान्तरेऽपि द्रष्टुं शक्यते। परमस्मिन्प्रसङ्गे तत्तेजोहानिरियती जायते यत्केवलास्तीक्ष्णेक्षणा **ज्योतिर्विद** एव तं द्रक्ष्यन्ति।

अग्रिमे गणिते **मध्यम**तिथिगणो मध्यमरविग्रहयोः संगमकालिकः। **स्पष्ट**तिथिगणः स्पष्टरविग्रहयोः संगमकालिकः। **संध्यारुण**संस्कारः शराभावग्रहस्य संधिप्रकाशे निमज्जनोन्मज्जनकालं दर्शयति। **दृक्कर्म** तु शरकृतं विलम्बाविलम्बं ज्ञापयति।

उक्तं च श्रीभास्कराचार्यैः—

"स्वेषुणोत्क्षिप्यते नाम्यते वा कुजात्तेन दृक्कर्म खेटान्तराले कृतम्" इति। इदानीमिष्टवर्षे ग्रहसूर्ययोर्युतिकाले तिथिगणानयनम्—

इष्टवर्षेऽब्दपः शुद्धिः पञ्चाङ्गाध्यायकोष्ठकात्।
दशमादुक्तवत्साध्यौ ततोऽभीष्टग्रहस्य च॥ १॥
आद्यकोष्ठध्रुवे वर्षगणगत्या समायुते।
हारतष्टे भवेच्छेषं मध्यमस्तिथिसंचयः॥ २॥

---

* मदुपज्ञाता चरकालांशपद्धतिः केतक्यां २९० पृष्ठे सवासनतया सम्यग्वर्णिता।

मध्यमेन तु संघेन द्वितीयपदकात्फलम् ।
लब्ध्वा तेन समायुक्तो मध्यमो भवति स्फुटः ॥ ३ ॥

आदौ **पञ्चाङ्गाध्याये** उक्तवदिष्टवर्षीये अब्दपशुद्धी तत्रत्यदशमपदकात्साध्ये । अनन्तरं लोपदर्शनयोः स्वाभीष्टदिकं ध्रुवं कर्मभूमौ निधाय प्रथमकोष्ठकात् तस्मिन्वर्षगणोत्पन्नगतिं नियोज्य स्वकीयेन हारेण भक्त्वा यच्छेषं लभ्यते स मध्यमतिथिगणो भवति । अनेन मध्यमतिथिगणेन द्वितीयकोष्ठकात्संस्कारमादाय तेन मध्यमतिथिगणः संस्कृतश्चेत्स्पष्टतिथिगणः स्यात् ।

उदाहरणम्—शके १८१५ **बागलकोटे** शुक्रस्य पश्चिमलोपः पूर्वदर्शनं च कदा भविष्यति तद्वद । पृ. २५ अष्टमन्यासान्तिमपंक्तिदर्शनेन अस्मिन्वर्षेऽब्दपः ४ वा. ०·२ घ. तिथिशुद्धिः २५·७ ति इति पूर्वं विगणितमेव । अत्रत्यप्रथमकोष्ठकेनापि वा साधनीया ।

न्यासः १ ।

	ति.
को. १ शके १८०० वर्षे शुक्रस्य पश्चिमलोप-पूर्वदर्शनयोः } ध्रुवः	५४०·४
,, { १० वर्षगतिः … … …	४४१·८
,, { ५ वर्षगतिः … … …	५१७·५
शके १८१५ वर्षे … हारः } ५९३·२)	१४९९·७ (२
प्रस्तुताध्यायस्य प्रथमकोष्ठकस्य तले वर्तमानः }	११८६·४
शेषम् … १८१५ वर्षे मध्यमतिथिगणः … …	३१३·३
को० २ उप० ३१३·३ ति. … … …	+ १·९
अतः शके १८१५ वर्षे स्पष्टतिथिगणः … …	३१५·२

एवं शके १८१५ वर्षे शुक्रसूर्ययोरन्तर्युतिकाले तिथिगणे सिद्ध इदानीं **संध्यारुण-संस्कार** उच्यते—

वर्षौघात्खाद्रिभि ७० र्भक्तात्फलं तिथ्यात्मकं च यत् ।
तत्संस्कृतस्तिथिगणः स्पष्टः स्पष्टतरो भवेत् ॥ ४ ॥

अनेन तिथिसंघेन तृतीयपदकाद्धरेत् ।
त्रिभोनलग्नक्रान्त्यंशानक्षांशैस्ते समन्विताः ॥ ५ ॥

ज्ञेयास्त्रिभोनलग्नस्य नतांशास्तैश्चतुर्थकात् ।
संध्यारुणाख्यं संस्कारं गृहीत्वा स्थापयेत्पृथक् ॥ ६ ॥

अत्रोदाहरणम् । वर्षौघः १५, सप्तति ७० भक्तः तिथ्यात्मकं फलं ·२१ । अनेन ·२१ फलेन स्पष्टतिथिगणः ३१५·२ संस्कृतश्चेत् लब्धः ३१५·४१ स्पष्टतरतिथिगणो भवेदिति । स्वल्पान्तरान्मया अग्रिमद्वितीयन्यासे द्वितीयपंक्तौ उप. ३१५·४१ स्थाने उप. ३१५·२ ति. इत्येव गृहीत्वा द्वितीयन्यासः संपादितः । वर्षौघे महति सति अयं संस्कारः अवश्यं ग्राह्यः ।

स्पष्टतिथिगणेन तृतीयकोष्ठकात्त्रिभोनलग्नक्रान्तिं* मादाय तस्यामक्षांशैः संस्कृतायां फलं त्रिभोनलग्नस्य नतांशा भवन्ति । एतैर्नतभागैश्चतुर्थकोष्ठकात्संध्यारुणसंस्कारं गृह्णीयात् ।

---

* अत्रोक्ता क्रान्तिर्नतांशाश्च विरुद्धदिक्काः स्युः ।

न्यासः २।

शुक्रस्य	प. लोपे		पू. दर्शने
को. ३ उप. ३१५·२ ति. त्रिभोनलग्नक्रान्तिः	− १८°	...	+ २०°
बागलकोटे, अक्षांशाः ...	+ १६	...	+ १६
त्रिभोनलग्ननतांशाः को० ४ उपकरणम्	− २	...	+ ३६
को. ४ संध्यारुणसंस्कारः ... ति.	− ४·०	... ति.	+ ५·०

अथ **दृक्कर्म**गणितमुच्यते—

नतांशैश्च पुनः साध्यश्चतुर्थाद्गुणकोऽमुना।
पञ्चमस्थतिथिर्गुण्या फलं दृक्कर्मसंज्ञकम्॥ ७॥

संध्यारुणसंस्कारोत्तरं त्रिभोनलग्ननतांशैश्चतुर्थकोष्ठकान्नतांशदिक्कं गुणकं गृहीत्वा तदधः पञ्चमकोष्ठकात्स्पष्टतिथिगणेन तिथिमादाय तां विन्यसेत् एतयोर्गुणकारस्तिथ्यात्मकं दृक्कर्म भवति। तद्यथा—

न्यासः ३।

शुक्रस्य		प. लोपे.		पू. दर्शने
को. ४ उप. − ०°	गुणकः	− ०·० ति.	उप. + ३६°	+ ०·७
को. ५ उप. ३१५ ति.	...	+ ४·८ ति.	उप. ३१५	− ४·८ ति.
गुणकारः दृक्कर्मसंस्कारः	...	− ०·०	गुणकारः,	− ३·३ ति.

इदानीं **लोपदर्शनकालिकतिथ्यानयन**माह—

स्पष्टस्तिथिगणो द्विःस्थोऽरुणदृक्कर्मशुद्धिभिः।
युक्तः स्याच्चैत्रशुक्लादेर्लोपदर्शनयोस्तिथिः॥ ८॥

द्युतिकालिकः स्पष्टतिथिगणो द्विःस्थो लोपदर्शनयोः पृथग्भूताभ्यां संध्यारुणदृक्कर्मभ्यां तथा तिथिशुद्ध्या च संयुतश्चेल्लोपदर्शनयोः संबन्धिनी चैत्रशुक्लादेर्नाम संवत्सरारम्भायाता वर्षतिथिः स्यात्। तद्यथा—

न्यासः ४।

शुक्रस्य			पाश्चिमलोपे तिथिः		पूर्वदर्शने तिथिः
स्पष्टतिथिगणः	...	अ	३१५·२	...	३१५·२
संध्यारुणः	...	ब	− ४·०	...	+ ५·०
दृक्कर्म	...	क	− ०·०	...	− ३·३
तिथिशुद्धिः	...		+ २५·७	...	+ २५·७
वर्षारम्भात्	...		३३६·९	...	३४२·६
आषाढस्याधिकत्वात्	...		माघशुक्ल ७ मी	...	माघशुक्ल १२ शी

———

न्यासः ५ । लोपदर्शनवारनिर्णयः ।

पश्चिमलोपे चतुर्थन्यासात्	पूर्वदर्शने चतुर्थन्यासात्	अ + ब + क = ३११।३१७। एतयोः फलं को.५।			
		तिथिः प. लोपे	वारगतिः	तिथिः पू. दर्शने	वारगतिः
अ = ३१५·२ ति.	३१५·२ ति.	३००	१·३१	३००	१·३१
ब = −४·० ति.	+५·० ति.	१०	२·८४	१०	२·८४
क = −०·० ति.	− ३·३ ति.	१	०·९८	७	६·८९
(अ + ब + क) = ३११ ति.	३१६·९ ति.	३११	५·१३	३१७	४·०४
(२५) पृष्ठे पूर्वसाधितः अब्दपः			४·००		४·००
			९·१३		८·०४
			−७·००		−७·००
यथासंख्यं माघशुक्ल ७ मी, माघशुक्ल १२ शी तिथिभ्यां निर्दिष्टौ लोपदर्शनवारौ.........			२·१३ सोमवारः		१·०४ रविवारः

फलितम् । माघशुक्ल ७ मी सोमवासरे शुक्रस्य पश्चिमलोपः । माघशुक्ल १२ शी रविवासरे शुक्रस्य पूर्वलोपः इति निर्दिष्टव्यम् । कचित्तिथिवारयोर्भेदे सति लब्धतिथिसमीपस्थो वारः प्रमुखः ।

अथ बुधभौमशनीनां लोपदर्शनकालगणितम् ।

त्रयोदश विदः सप्तदश भौमस्य वै शनेः ।
पञ्चाधिकदश १५ प्रोक्ताः कालांशा लोपदर्शने ॥ ९ ॥
एतावत्यन्तरे सूर्यात्प्राक्पश्चात्तिष्ठति ग्रहे ।
लोपदर्शनके वाच्ये स्थूलप्रत्ययकाङ्क्षिणा ॥ १० ॥

केतक्यां लोपदर्शनाधिकारे चरकालांशैः साधितमेतेषां ग्रहाणां लोपदर्शनकालगणितं सूक्ष्मां दृक्प्रतीतिं दास्यति । (२९० पृष्ठे सवासनतया वर्णितं तत्र केतक्यामित्यर्थः) ।

इति ग्रहाणां लोपदर्शनगणितम् ।

लोपदर्शनकालगणितरचनासमये स्वकृतगणितपरीक्षणार्थं दर्शनादर्शनान्यवलोकयितुं दिने दिने तिमिरग्रस्तायां रात्रौ वा महति प्रत्यूषे वा अनावृत्तशरीरेण उपानद्विरहितपादाभ्यां केवलाकाशदत्तदृष्ट्या विवक्षितसामुग्रीसहितैः अस्मत्तातचरणैः कंटकग्रस्तवनेषु नदीप्रान्तेषु पर्वताग्रेषु वा कथमनवरतं ब्रह्मान्वेषितपस्विवत् भ्रान्तमासीदित्येतस्य वृत्तांतस्तातलिखिताश्चित्तं मोहयित्वा परमादरं समुत्पादयति । न निद्रा न सुखभोजनं न संसारचिंता । एवमेव भ्रान्तावस्थायां एकविंशतिवर्षादारभ्य सप्तसप्ततिवर्षपर्यन्तं षट्पंचाशद्वर्षाणि व्यतीतानि तातपादैरित्यलम् ।

कोष्ठकः १ । युतिकाले तिथिगणः ।

ध्रुवाः	शुक्रस्य		गुरोः		
शा. वा. शक-वर्षाणि	प. लोपे पू. दर्शने ति. गण:	पू. लोपे प. दर्शने ति. गण:	लोपे दर्शने ति. गण:	तिथि-शुद्धिः ति.	अब्द-पतिः वार:
१८००	५४०·४३	२४३·८५	३१३·१८	९·८२	६·१६
उप० वर्षग०	वर्षगतिः				
१	२२२·१३	२२२·१३	३४·१७	११·०६	१·२६
२	४४४·२८	४४४·२८	६८·३२	२२·१२	२·५१
३	७३·२२	७३·२२	१०२·४८	३·१९	३·७७
४	२९५·३७	२९५·३७	१३६·६३	१४·२५	५·०२
५	५१७·५०	५१७·५०	१७०·८०	२५·३१	६·२८
६	१४६·५७	१४६·४२	२०४·९७	६·३७	०·५४
७	३६८·४२	३६८·५७	२३९·१२	१७·४४	२·००
८	५९०·७०	५९०·७०	२७३·२८	२८·५०	३·०५
९	२१९·६३	२१९·६३	३०७·४३	९·५६	४·३१
१०	४४१·७८	४४१·७८	३४१·६२	२०·६२	५·५६
२०	२९०·४०	२९०·४०	२७८·०२	११·२५	४·१३
३०	१३९·००	१३९·००	२१४·४२	१·८७	२·६९
४०	५८०·८०	५८०·८०	१५०·८२	२२·५०	१·२६
५०	४२९·४०	४२९·४०	८७·२२	१३·१२	६·८२
६०	२७८·००	२७८·००	२३·६२	३·७४	५·३८
७०	१२६·६०	१२६·६०	३६५·२३	२४·३७	३·९५
८०	५६८·४०	५६८·४०	३०१·६३	१४·९९	२·५१
९०	४१७·००	४१७·००	२३८·०३	५·६२	१·०७
१००	२६५·५७	२६५·५७	१७४·४३	२६·२४	६·६४
२००	५३१·१२	५३१·१२	३४८·८७	२२·४८	६·२७
३००	२०३·४८	२०३·४८	११८·०७	१८·७२	५·९१
४००	४६९·०३	४६९·०३	२९२·५०	१४·९७	५·५५
५००	१४१·४०	१४१·४०	६१·७२	११·२१	५·१९
६००	४०६·९७	४०६·९७	२३६·१२	७·४५	४·८२
७००	७९·३२	७९·३२	५·३५	३·६९	४·४६
८००	३४४·८८	३४४·८८	१७९·७८	२९·९३	४·१०
९००	१७·२३	१७·२३	३५४·२२	२६·१७	३·३४
१०००	२८२·८०	२८२·८०	१२३·३८	२२·४१	३·३७
२०००	५६५·६०	५६५·६०	२४६·७८	१४·८३	६·७५
३०००	२५५·२०	२५५·२०	३७०·१८	७·२४	३·१२
४०००	५३८·००	५३८·००	८८·३३	२९·६६	६·५०
५०००	२२७·६०	२२७·६०	२११·७३	२२·०७	२·८७
६०००	५१०·४०	५१०·४०	३३५·१२	१४·४८	६·२४
७०००	२००·००	२००·००	५३·२८	६·९०	२·६२
८०००	४८२·८०	४८२·८०	१७६·६८	२९·३२	६·००
९०००	१७२·४०	१७२·४०	३००·०७	२१·७३	२·३७
१००००	४५५·२०	४५५·२०	१८·२३	१४·१४	५·७४
हारः	५९३·२०	५९३·२०	४०५·२२	३०·००	७·००

कोष्ठकः २। मन्दफलसंस्कारः।

उप.	शुक्रस्य		गुरोः
मध्यमगतितिथिगणः	प. लोपे पू. दर्श-	पू. लोपे प. दर्श-	लोपे दर्शने
	ति०	ति०	ति०
०	+ १·९	+ ४·३	– १·५
१०	१·७	४·२	– ०·३
२०	१·५	४·०	+ ०·८
३०	१·२	३·६	२·०
४०	०·९	३·२	३·०
५०	०·६	२·७	४·०
६०	+ ०·२	२·१	४·९
७०	– ०·१	१·५	५·६
८०	०·५	०·८	६·१
९०	०·८	+ ०·१	६·६
१००	१·१	– ०·६	६·८
११०	१·४	१·३	६·८
१२०	१·६	२·०	६·६
१३०	१·८	२·६	६·२
१४०	२·०	३·०	५·७
१५०	२·१	३·५	५·९
१६०	२·१	३·९	४·१
१७०	२·१	४·१	३·२
१८०	२·०	४·२	२·१
१९०	१·९	४·२	+ १·०
२००	१·६	४·१	– ०·२
२१०	१·४	३·९	१·२
२२०	१·१	३·६	२·४
२३०	०·८	३·१	३·४
२४०	०·५	२·५	४·३
२५०	– ०·१	२·०	५·१
२६०	+ ०·२	१·२	५ ८
२७०	०·६	– ०·५	६·४
२८०	०·९	+ ०·२	६·७
२९०	१·३	१·०	६·८
३००	१·६	१·७	६·८
३१०	१·८	२·३	६·५
३२०	२·०	२·९	६·०
३३०	२·१	३·४	५·५
३४०	२·१	३·८	४·७
३५०	२·१	४·०	३·८
३६०	२·०	४·२	२·७
३७१	+ १·९	+ ४·३	– १·५

कोष्ठकः ३ । त्रिभोनलग्नस्य व्यस्तक्रान्तिः ।

उपकरणं = स्फुटतिथिगणः + $\frac{\text{वर्षगणः}}{७०}$ तिथिः ।

उपकरणम्	शुक्रस्य				गुरोः	
	पश्चिमलोपे	पूर्वदर्शने	पूर्वलोपे	पश्चि-दर्शने	लोपे	दर्शने
	अं०	अं०	अं०	अं०	अं०	अं०
०	−२२	+२१	+२३	−१४	−२३	+१९
१०	२१	१९	२३	११	२२	१६
२०	१९	१६	२३	८	२१	१३
३०	१६	१३	२२	४	१९	१०
४०	१३	१०	२०	− ०	१६	६
५०	१०	६	१७	+ ३	१३	+ २
६०	६	+ ३	१४	७	१०	− १
७०	− ३	− १	११	१०	६	५
८०	+ १	५	८	१४	− २	९
९०	५	८	४	१७	+ १	१२
१००	९	१२	+ १	१९	५	१५
११०	१२	१५	− ३	२१	९	१८
१२०	१५	१८	७	२२	१२	२०
१३०	१८	२०	१०	२३	१५	२२
१४०	२०	२२	१४	२३	१८	२३
१५०	२२	२३	१७	२३	२०	२३
१६०	२३	२३	१९	२१	२२	२३
१७०	२३	२३	२१	२०	२३	२२
१८०	२३	२२	२२	१७	२३	२१
१९०	२२	२१	२३	१४	२३	१८
२००	२०	१९	२३	११	२२	१५
२१०	१८	१६	२३	७	२१	१२
२२०	१६	१३	२२	+ ३	१८	९
२३०	१२	९	२०	− १	१५	५
२४०	९	५	१७	५	१२	− १
२५०	५	− ३	१४	९	९	+ ३
२६०	+ १	+ ३	११	१२	५	७
२७०	− ३	७	७	१५	+ १	११
२८०	७	१०	− ३	१८	− ३	१४
२९०	११	१४	+ १	२१	७	१७
३००	१४	१७	५	२२	११	२०
३१०	१७	१९	९	२३	१४	२२
३२०	२०	२१	१२	२३	१७	२३
३३०	२२	२३	१५	२३	२०	२३
३४०	२३	२३	१८	२२	२२	२३
३५०	२३	२३	२१	२०	२३	२२
३६०	२३	२२	२२	१७	२३	२१
३७१	−२२	+२१	+२३	−१४	−२३	+१९

कोष्ठकः ४ ।

संध्यारुणसंस्कारः ।

उपकरणं = त्रिभोनलग्नस्य नतांशाः ।
= व्यस्तक्रान्तिः + अक्षांशाः ।

उपकरणम् धनमृणं वा	शुक्रस्य		गुरोः	पञ्चमकोष्ठगतशर-संस्कारस्य गुणकः उपकरणवद्धनर्णम्
	− { पश्चिम-लोपे + { पूर्व-दर्शने	− { पूर्व-लोपे + { पश्चिम-दर्शने	− { पश्चिम-लोपे + { पूर्व-दर्शने	
	तिथिः	तिथिः	तिथिः	स्पर्शरेषा
०	४·०	२४·०	११·०	०·००
३	४·०	२४·०	११·०	·०५
६	४·०	२४·१	११·०	·१०
९	४·०	२४·३	११·०	·१६
१२	४·१	२४·६	११·२	·२१
१५	४·१	२४·८	११·४	·२७
१८	४·२	२५·२	११·६	·३२
२१	४·३	२५·७	११·७	·३८
२४	४·४	२६·३	१२·१	·४४
२७	४·५	२७·०	१२·३	·५१
३०	४·६	२७·८	१२·७	·५८
३३	४·८	२८·७	१३·१	०·६५
३६	५·०	२९·८	१३·७	·७३
३९	५·१	३१·०	१४·२	·८१
४२	५·४	३२·४	१४·९	·९०
४५	५·७	३४·१	१५·६	१·००
४८	६·०	३६·०	१६.५	१·११
५१	६·४	३८·४	१७·६	१·२३
५४	६·८	४१·१	१८·८	१·३८
५७	७·४	४४·६	२०·४	१·५४
६०	८·१	४८·६	२२·२	१·७३

कोष्ठकः ५ । दृक्कर्म = चतुर्थकोष्ठकगतगुणकगुणितोऽन्त्यः शरसंस्कारः ।
उपकरणं = स्फुटतिथिगणः ।

उपकरणम्	शुक्रस्य				गुरोः		वारगतिः	
	पश्चिमलोपे	पूर्वदर्शने	पूर्वलोपे	पश्चिम-दर्शने	लोपे	दर्शने	तिथिगणः	वारगतिः
	ति.	ति.	ति.	ति.	ति.	ति.	ति.	वारः
०	+ ४·२	− ४·२	− ६·३	− ०·९	− १·४	+ १·४	१	०·९८
१०	३·७	३·७	६·६	+ ०·३	१·३	१·३	२	१·९७
२०	३·०	३·०	६·६	१·४	१·२	१·२	३	२·९५
३०	२·३	२·३	६·४	२·५	१·१	१·१	४	३·९४
४०	१·५	१·५	६·०	३·५	०·९	०·९	५	४·९२
५०	+ ०·७	− ०·७	५·६	४·४	०·७	०·७	६	५·९१
६०	− ०·२	+ ०·२	४·८	५·२	०·५	०·५	७	६·८९
७०	१·०	१·०	४·०	५·८	०·३	०·३	८	०·८७
८०	१·८	१·८	३·०	६·२	− ०·१	+ ०·१	९	१·८६
९०	२·६	२·६	२·०	६·५	+ ०·२	− ०·२	१०	२·८४
१००	३·३	३·३	− ०·९	६·६	०·४	०·४	२०	५·६९
११०	३·९	३·९	+ ०·३	६·५	०·६	०·६	३०	१·५३
१२०	४·४	४·४	१·४	६·२	०·८	०·८	४०	४·३७
१३०	४·८	४·८	२·५	५·७	१·०	१·०	५०	०·२२
१४०	५·०	५·०	३·५	५·१	१·२	१·२	६०	३·०६
१५०	५·१	५·१	४·४	४·३	१·३	१·३	७०	५·९०
१६०	५·१	५·१	५·२	३·५	१·४	१·४	८०	१·७५
१७०	४·९	४·९	५·८	२·५	१·४	१·४	९०	४·५९
१८०	४·६	४·६	६·२	१·४	१·४	१·४	१००	०·४३
१९०	४·१	४·१	६·५	+ ०·४	१·४	१·४	२००	०·८७
२००	३·५	३·५	६·६	− ०·७	१·४	१·४	३००	१·३१
२१०	२·८	२·८	६·५	१·८	१·२	१·२		
२२०	२·०	२·०	६·२	२·८	१·०	१·०		
२३०	१·२	१·२	५·७	३·८	०·९	०·९		
२४०	− ०·३	+ ०·३	५·१	४·६	०·७	०·७		
२५०	+ ०·६	− ०·६	४·३	५·३	०·५	०·५		
२६०	१ ४	१·४	३·५	५·९	+ ०·२	− ०·२		
२७०	२·३	२·३	२·५	६·३	०·०	०·०		
२८०	३·०	३·०	१·४	६·६	− ०·२	+ ०·२		
२९०	३·७	३·७	+ ०·४	६·६	०·५	०·५		
३००	४·२	४·२	− ०·७	६·४	०·७	०·७		
३१०	४·७	४·७	१·८	६·१	०·९	०·९		
३२०	५·०	५·०	२·८	५·६	१·१	१·१		
३३०	५·१	५·१	३·८	४·९	१·२	१·२		
३४०	५·१	५·१	४·६	४·०	१·४	१·४		
३५०	५·०	५·०	५·३	३·१	१·४	१·४		
३६०	४·९	४·९	६·०	२·१	१·४	१·४		
३७०	+ ४·२	− ४·२	− ६·३	− १·०	− १·४	+ १·४		

अस्मदध्यायात्साधितास्तोदयानां तिथिर्मध्यमा । पञ्चाङ्गे तु स्पष्टा वर्तते । अतो द्युतिकालिकस्पष्टतिथिगणः संध्यांशकणा दृक्कर्म, एषामैक्यं विधाय लब्धतिथीनां वारगतिमद्धे संयोज्य जानीते वाराहिकालेऽस्तोदयादीनि पञ्चाङ्गे दृश्येरन् । ३०१ पृष्ठे उदाहरणम्

अथ शनिवलयगणितम्।

महाप्रभावकाचनलिकया विलोक्यमाने **शनौ** तत्परितो दीर्घवर्तुलाकारं पूर्वापरस्थितं वलयं दृश्यते। तच्च भूसूर्यशनीनां परस्परस्थितिमनुसृत्य संकुचितं विकसितं वा भवति। परमे संकोचे तस्यैका पूर्वापरा रेखा भवति। क्वचिददृश्यमपि भवति। अत एवेष्टकाले शनिवलयं कियत्प्रमाणं याम्योदग्दिशि विस्तृतं दृश्येत, वलयस्य याम्योदगक्षो याम्योत्तरवृत्तस्थिते **शनौ** कत्यंशाः कस्यां दिशि च नतो दृश्येतेत्येतस्य गणितमिहोच्यते—

> **पूर्णतिथ्यंश १५०° हीनेन मन्दस्पष्टेन सौरिणा।**
> **प्रथमात्कोष्ठकात्साध्या वलयाद्भास्करोन्नतिः॥ १॥**
> **रसाब्धिभू १४६° लवोऽनेन रविणा च द्वितीयकात्।**
> **लब्धांशैः संस्कृता भानोरुन्नतिः कून्नतिर्भवेत्॥ २॥**
> **शनिमन्दश्रुतिक्षुण्णा शीघ्रकर्णेन भाजिता।**
> **कून्नतिः स्यात्स्पष्टतरा ततस्तज्ज्यां च साधयेत्॥ ३॥**

मन्दस्पष्टशनेः १५० अंशान्विशोध्य शेषेण प्रथमकोष्ठकादंशादिसंख्या ग्राह्या। सा शनिवलयक्षेत्रस्योपरिष्टात्सूर्यस्योच्छ्रितिः स्यात्। ततः १४६ अंशैरूनितेन मन्दस्पष्टरविणा द्वितीयकोष्ठकादंशादिं संस्कारं लब्ध्वा तेन सूर्योच्छ्रितिं संस्कृत्य शनेर्मन्दकर्णेन संगुण्य शीघ्रकर्णेन भक्ता चेद्वलयक्षेत्रोपरिष्टाच्छनिलोके दृश्यमाना भूमेरुच्छ्रितिर्भवति।

अथ वलयाक्षस्य **वलनम्**—

> **रसाब्धिभू १४६° लवोनेन भूमध्यस्पष्टसौरिणा।**
> **तृतीयपदकात्साध्यं वलनं चाऽऽद्यसंज्ञकम्॥ ४॥**
> **सायनेन तथा तुर्याद्द्वितीयं वलनं हरेत्।**
> **द्वयोर्योगोऽक्षवलनं धनं पूर्वमृणं परम्॥ ५॥**

षट्चत्वारिंशदधिकशत १४६ भागै रहितेन भूमध्यस्पष्टशनिना तृतीयकोष्ठात्प्रथमं वलनं प्रसाध्यम्। ततोऽयनांशयुतेन भूमध्यस्पष्टशनिना **चतुर्थकोष्ठकात्** द्वितीयं वलनं गृहीत्वाऽऽद्यद्वितीययोरैक्ये कृते **वलयाक्षस्य** वलनं भवति।

उदाहरणम्—शके १८१५ चैत्र शुक्ल १५ मायां शनिवासरे शनिवलयाकृतेर्गणितं कुरु। ग्रहगणिताध्यायादग्रिमाणि मानान्यत्र साधितानि। **मन्दस्पष्ट**शनिः १६७°·१ **भूमध्यस्पष्ट**शनिः १६६°·९, **सायन**भूमध्यस्पष्टशनिः १८९°·३, शनेर्**मन्दकर्णः** ९५८२ **शीघ्रकर्णश्च** ८५८२, निरयण **मन्दस्पष्टरविः** ३४९·१, पृ. १९३, कोष्ठः १५, शनेः शीघ्रकेन्द्रेण १७८° **शनिव्यासः** १९″·५। तस्मादेव कोष्ठात् वलयस्य **बाह्यव्यासः** ४५″, **आन्तरः** ३०″। १८१५ वर्षे अयनांशाः २२°·४।

को. १ उप. = (१६७°·१ − १५०°) = १७°·१ अनेन लब्धा सूर्योन्नतिः + ७°·७
को. २ उप. = (३४९°·१ − १४६°) = २०३°·१ ... ... संस्कारः − १·२

इयं मन्दकर्णमितेऽन्तरे दृश्या भूमेरुन्नतिः ... ... + ६·५

(६°·५ × ९५८२) ÷ ८५८२ = ७°·३ इमे शीघ्रकर्णान्तरे शनिलोके शनिवलयक्षेत्रादुपरि दृश्यमाना भूमेरुन्नतांशाः।

अथाक्षवलनम्

को. ३ उप० = (१६६°·९ − १४६°) = २०°·९ ... − २६°·२ आद्यं वलनम्
को. ४ उप० = (१६६°·९ + २२°·४) = १८९°·३ ... + २३·२ द्वितीयं वलनम्
शनिवलयस्याक्षस्योदगग्रं याम्योत्तरवृत्तात्पश्चिमतोऽवनतम् − ३·० दृश्यते

अथ वलयपरिलेखनम् ।

खेटानां पञ्चदशाद्वलयाक्षौ पूर्वपश्चिमौ लब्ध्वा ।
कून्नतिभुजज्यया तौ गुणितौ याम्योत्तरौ भवतः ॥ ६ ॥
पूर्वापरयाम्योदग्व्यासानपसार्य सौरिकेन्द्रगतान् ।
कून्नतिदिशि शनिमण्डलपिहिते द्वे दीर्घवर्तुले जनयेत् ॥ ७ ॥
भूरव्योरुच्छ्रित्योरेकाशात्वे प्रकाशितं पार्श्वम् ।
वलयस्य गोचरं स्याद्भिन्नाशात्वे तु कृष्णमेव भवेत् ॥ ८ ॥

ग्रहगणितस्य पञ्चदशपद्काच्छनिवलयस्य द्वौ पूर्वापरावक्षावन्तर्बाह्यावुद्धृत्य तौ पूर्वसिद्धया कून्नतिभुजज्यया संगुणितौ पूर्वापरौ भवतः । तत एकां पूर्वपश्चिमरेखां प्रसार्य तस्यां बिन्दुमेकं दत्त्वा शनिबिम्बव्यासार्धेन तद्बिन्दुं परित एकं वृत्तं लिखेत् । अस्मान्मध्यबिन्दोः स्वस्वदिशि पूर्वापरयाम्योत्तरव्यासानपसार्य तेषामग्राणि स्पृशती द्वे दीर्घवर्तुले वलयस्यान्तर्बहिष्प्रान्तदर्शके उत्पादयेत् । इदं परिलेखनमादौ सीसलेखन्या संपाद्य पश्चाद्ग्रहणपरिलेखवद्दिगङ्कितं कृत्वा कून्नतांशदिक्कौ वलयप्रान्तौ शनिबिम्बेन यथा पिहितौ स्यातां तथा मष्या सीसलेखोपरि लिखित्वा शनिवलयस्य दृश्याकृतिं दर्शयेत् । अत्र कून्नतिः ७°·३ । एषां भुजज्या ·१३।

अत्र उ − ऊ = ३०″, पू − प = ४५″, याम्योदग्व्यासौ ४५″ × ·१३ = ५·४ ।
३०″ × ·१३ = ३″·९

॥ इति ज्योतिर्गणिते शनिवलयगणितम् ॥

शनिवलयकोष्ठकाः ।

सर्वेषां कोष्ठकानाम् उपकरणानि उन्नतिचिह्नानि च				ज्या	कोष्ठकः १ उपकरणम् (र. म. शनिः - १५०°)	कोष्ठकः २ उपकरणम् (स्पष्टरविः - १४६°)	कोष्ठकः ३ उपकरणम् (भू.म.शनिः - १४६°)	कोष्ठकः ४ उपकरणम् सायनभूमध्यमशनिः
+	+	−	−		वलयोपरि रव्युन्नतिः	भून्नत्यर्थं संस्कारः	आद्यं वलनम्	द्वितीयं वलनम्
अं.	अं.	अं.	अं.	संख्या	अं.	अं.	अं.	अं.
०	१८०	१८०	३६०	·००	०·०	०·०	२८·२	२३·५
३	१७७	१८३	३५७	·०५	१·४	·१	२८·१	२३·४
६	१७४	१८६	३५४	·१०	२·७	·३	२८·०	२३·३
९	१७१	१८९	३५१	·१६	४·१	·४	२७·८	२३·२
१२	१६८	१९२	३४८	·२१	५·४	·६	२७·५	२३·०
१५	१६५	१९५	३४५	·२६	६·८	·७	२७·१	२२·७
१८	१६२	१९८	३४२	·३१	८·१	·९	२६·७	२२·४
२१	१५९	२०१	३३९	·३६	९·४	१·०	२६·२	२२·१
२४	१५६	२०४	३३६	·४१	१०·७	१·२	२५·६	२१·६
२७	१५३	२०७	३३३	·४५	११·९	१·३	२४·९	२१·१
३०	१५०	२१०	३३०	·५०	१३·२	१·४	२४·२	२०·६
३३	१४७	२१३	३२७	·५४	१४·३	१·५	२३·४	२०·०
३६	१४४	२१६	३२४	·५९	१५·५	१·७	२२·६	१९·३
३९	१४१	२१९	३२१	·६३	१६·६	१·८	२१·६	१८·६
४२	१३८	२२२	३१८	·६७	१७·७	१·९	२०·७	१७·९
४५	१३५	२२५	३१५	·७१	१८·७	२·०	१९·६	१७·१
४८	१३२	२२८	३१२	·७४	१९·७	२·१	१८·५	१६·२
५१	१२९	२३१	३०९	·७८	२०·६	२·२	१७·४	१५·३
५४	१२६	२३४	३०६	·८१	२१·५	२·३	१६·२	१४·३
५७	१२३	२३७	३०३	·८४	२२·३	२·४	१५·०	१३·३
६०	१२०	२४०	३००	·८७	२३·१	२·५	१३·८	१२·२
६३	११७	२४३	२९७	·८९	२३·८	२·६	१२·५	११·१
६६	११४	२४६	२९४	·९१	२४·४	२·६	११·२	१०·०
६९	१११	२४९	२९१	·९३	२४·९	२·७	९·८	८·८
७२	१०८	२५२	२८८	·९५	२५·४	२·७	८·५	७·६
७५	१०५	२५५	२८५	·९७	२५·८	२·८	७·१	६·४
७८	१०२	२५८	२८२	·९८	२६·२	२·८	५·७	५·१
८१	९९	२६१	२७९	·९९	२६·५	२·८	४·३	३·९
८४	९६	२६४	२७६	·९९	२६·७	२·९	२·९	२·६
८७	९३	२६७	२७३	१·००	२६·८	२·९	१·४	१·३
९०	९०	२७०	२७०	१·००	२६·८	२·९	०·०	०·०
−	+	+	−		र. म. शनिः - १५०°	स्पष्टरविः - १४६°	भू. म.शनिः - १४६°	सायनभूमध्यशनिः
वलनचिह्नानि								

अथ चन्द्रशृङ्गोन्नतिः।

सूर्यचन्द्रयोर्मध्यबिन्दू संधाय प्रसारितं महावृत्तमपसारवृत्तम्। तत्क्षेत्रोपरि चन्द्रशृङ्गाग्रे सदैव लम्बे भवतः। चन्द्रमध्यबिन्दौ स्थापितदृङ्मण्डलस्यापसारवृत्तस्य च संपातस्थाने यः कोणः सा शृङ्गोन्नतिः। क्षितिजसंलग्ने रवौ चन्द्रशृङ्गोन्नतेर्गणितं सुगमम्, अन्यकालिकं कठिनम्, अतो हेतोः संध्याकालिकीं शृङ्गोन्नतिमेवात्र विस्तरेण व्याख्याय तदन्यकालिकशृङ्गोन्नतिसाधकानि केवलानि सूत्राणि दास्यामस्तेषां साहाय्येन तद्गणितेच्छुः शृङ्गोन्नतिं गणयेत्।

अथ सूर्यास्तोदयकालिका शृङ्गोन्नतिः।

वक्ष्यमाणप्रकारेण सिद्धा शृङ्गोन्नतिर्भवेत्।
अवलोकयितुं योग्या संलग्ने क्षितिजे रवौ ॥ १ ॥
इष्टकाले स्पष्टरविमयनांशान्विधोः शरम्।
चन्द्रसूर्यान्तरं स्पष्टं तिथिपत्रात्प्रसाधयेत् ॥ २ ॥
प्रातःकाले त्रिभोनार्कात्सूर्यास्ते सत्रिभार्कतः।
सिद्धा क्रान्तिः पलांशैश्च वर्जिताः स्युर्नता लवाः ॥ ३ ॥
चन्द्रसूर्यान्तरांशैश्च निशापतिशरेण च।
प्रथमात्कोष्ठकाद्ग्राह्या नतांशानां च संस्कृतिः ॥ ४ ॥
संस्कृतैर्नतभागैश्च चन्द्रसूर्यान्तरेण च।
द्वितीयपदकात्साध्याः शृङ्गोन्नतिलवाः खलु ॥ ५ ॥
नतभागान्यदिक्शृङ्गमुन्नतं स्यादथोन्नतिः।
रुद्र ११ भक्ताऽङ्गुलादिः स्यात्परिधौ दन्त ३२ संमिते ॥ ६ ॥

स्पष्टोऽर्थः। **उदाहरणम्**—शके १८१५ अधिक आषाढशुक्लपञ्चम्यां रविवासरे रव्यस्ते च **बागलकोटे** चन्द्रशृङ्गं यावत्प्रमाणं यस्यां दिशि चोन्नतं स्यात्तद्वद। अस्मिन्दिने **बागलकोटे** सूर्यास्तकालः ३१ घ. ३० पलानि।

तथा **केतकी**पञ्चाङ्गे—

तिथिः	वारः	घ. प.		चन्द्रः − सूर्यः
अ. आषाढशुक्ल ४ र्थी	शनिवासरे	४० । २७	...	४८° तिथ्यन्ते
”	५ मी रविवासरे	३६ । ३	...	६० ”
अनुपातेन	५ म्यां रविवासरे	३१ । ३०	...	५९ रव्यस्ते

अत्रेष्टकालः सूर्यास्तः, अत “**इष्टकाले स्पष्टरविम्**” इत्यनेन चन्द्रशृङ्गोन्नतिगणिते प्रयोजनभूतान्युपकरणानि साधनीयानि।

बागलकोटे शके १८१५ आषाढशुक्लपञ्चम्यां रविवासरे रव्यस्ते घ. ३१ । ३० **केतकीपद्धतीय** पञ्चाङ्गात्—

	अं०
स्पष्टरविः	६५·१
अयनांशाः	२२·४
स्पष्टचन्द्रः(६५°·१ + ५९°·०) { सू. + (चं. − सू.) } =	१२४·१
राहुः	३·३
चन्द्रशरः, उपकरणम्	४·४
(चंद्रः − सूर्य) सूर्योनचन्द्रः	५९·०
सत्रिभसायनसूर्यस्य १७७°·५ क्रान्तिः, उपकरणम्	१·२
बागलकोटे पलांशाः	...१६·२
(क्रान्तिः − पलांशाः) = त्रि. ल. नतांशाः = ...	− १५·०

अथैभिरुपकरणैः शृङ्गोन्नतिः साध्यते—**चन्द्रसूर्यान्तरांशैश्चेति**। चन्द्रसूर्यान्तरं ५९°·० चन्द्रशरः + ४°·४ आभ्यां प्रथमकोष्ठकालब्धो नतांशसंस्कारः + ५°·५ अनेन युक्ताः पूर्वसिद्ध-नतांशाः – १५°·० जाताः संस्कृतनतांशाः – ९°·५ । संस्कृतैर्नतांशैः – ९°·५ चन्द्रसूर्यान्तरेण ५९°·१ च द्वितीयकोष्ठकाच्छृङ्गोन्नतिः २२° मिता लभ्यते । इयं नतांशानामृणत्वादेतद्विपरीत-दिका नामोत्तरा । चन्द्रस्योत्तरशृङ्गं २२° मितमुन्नतं दृश्येतेति यावत् । अंशात्मिका **शृङ्गोन्नतिः** २२° इमामेकादशभिर्विभज्य लब्धमङ्गुलात्मकं **शृङ्गौच्चयं** २ । इदं द्वात्रिंशदङ्गुलमितचन्द्र-बिम्बपरिधौ भवतीति ज्ञेयम् ।

इदानीं चन्द्रस्य **शौक्ल्यमाह**—

> **पञ्चनिघ्ना चन्द्रसूर्यविवरोत्क्रमशिञ्जिनी ।**
> **अङ्गुलात्मसितं तच्च चन्द्रव्यासे दशाङ्गुले ॥ ७ ॥**

स्पष्टम् ।

अत्र चन्द्रसूर्यान्तरस्य ५९° उत्क्रमज्या नाम कोटिज्योना त्रिज्या १·००० – ०·५१५ = = ·४८५ अस्यां पञ्चनिघ्नायां जातं सितं २·४२५ अङ्गुलानि । सितस्यान्तःप्रान्तो वस्तुतो दीर्घवर्तुलाकारो वर्तते । तस्मात्कारणाच्छुक्लपक्षे प्रतिपदि द्वितीयायां च तथा कृष्णपक्षे त्रयोदश्यां चतुर्दश्यां च चन्द्रबिम्बस्य परिधेः केवलस्त्र्यंशः शुक्लत्वेन विलोक्यते । अत एव **सूक्ष्मप्रतीतीच्छुः** शृङ्गोन्नतिभङ्ग्यां सितस्याऽन्तःप्रान्तं दीर्घवर्तुलार्धेन दर्शयेत् ।

परिलेखः ।

चन्द्रशृङ्गोन्नतिः ।

अथ सूर्यास्तोदयव्यतिरिक्तकालिका चन्द्रशृङ्गोन्नतिः ।

आदाविष्टकालीनौ सूर्यचन्द्रयोः शरभोगौ, ततस्तयोः क्रान्तिविषुवांशाः, ततस्त्रिप्रश्नाध्याय उक्तवदुन्नतांशदिगंशाः साध्याः । क्षितिजाधःस्थितसूर्यस्योन्नतांशा ऋणमिति स्मर्तव्यम् ।

क्षितिजोत्तरबिन्दुमारम्भस्थानं कल्पितं चेत्सव्यभ्रमणेन पूर्वबिन्दौ ९० अंशाः, दक्षिण-बिन्दौ १८० अंशाः, पश्चिमबिन्दौ २७० अंशा भवन्तीति स्पष्टम् । तस्मात्पूर्वपश्चिमादिग्बिन्दो-र्विगणितान्दिगंशांस्तत्तत्स्थानीयेष्वंशेषु संयोज्य विशोध्य वा चक्रदिगंशानानयेत् । चन्द्रसूर्य-योश्चक्रदिगंशानामन्तरं **खमध्यकोणः** ।

अनन्तरमधस्तनेन सूत्रेण चन्द्रसूर्यान्तरमानेतव्यम् ।

यदि, अ = चन्द्रसूर्यान्तरं, न = नतांशाः, उ = उन्नतांशाः, ख = खमध्यकोणः, को = कोटी, ज्या = भुजज्या, तदा—

अ कोटीज्या = (चं. उ. ज्या × सू. उ. ज्या)
+ (चं. उ. को. ज्या × सू. उ. को. ज्या × ख. को. ज्या)

अनया रीत्या चन्द्रसूर्ययोरन्तरं लब्ध्वाऽग्रिमसूत्रेण शृङ्गोन्नतिरानेया।

यदि शृ = शृङ्गोन्नतिस्तर्हि।

$$\text{शृ. को. ज्या} = \frac{\text{सू. उ. ज्या} - (\text{चं. उ. ज्या} \times \text{अ को. ज्या})}{\text{चं. उ. को. ज्या} \times \text{अ. ज्या}}$$

उदाहरणम्-- शके १८०२ फाल्गुनशु० ३ गुरुवारे ३३ घटिकामिते समये **बागलकोटे** चन्द्रस्य शृङ्गोन्नतिरवलोकनीयाऽस्ति। तर्हि सा कियत्प्रमाणा कस्यां दिशि च स्यात्तद्वद।

उद्दिष्टकाले	रविः		चन्द्रः	
स्पष्टभोगः	३२०°	५८	१°	३८
शरः	•	•	+ ४	२१
प्रातःकाले सायनमध्यमः	३४०	५७	•	•
विषुवांशाः	३४४	३०	२०	२९
क्रान्तिः	− ६	३९	१३	१९
एभ्यस्त्रिप्रश्नाध्यायोक्तरीत्या--				
उन्नतांशाः	− १६	११	२३	३३
दिगंशाः पश्चिमबिन्दोः सकाशात्	− २	२२	+ ७	४४
चक्रदिगंशाः	२६७	३८	२७७	४४
अनयोरन्तरमेव खमध्यकोणः	...	...	१०	६

अग्रिमगणितस्योपकरणानि।

			भुजज्या	कोटिज्या
सू. उ.	− १६°	११′	− ·२७९	+ ·९६०
चं. उ.	+ २३	३३	+ ·४००	+ ·९१७
खमध्यकोणः	१०	६	+ ·१७५	+ ·९८४

आदौ चन्द्रसूर्यान्तरम्।

(− ·२७९ × ·४००) + (·९१७ × ·९६० × ·९८४) = ·७५४ इयं चन्द्रसूर्यान्तरस्य कोटीज्या। अस्याश्चापं ४९° ५८′, इदं नवतेर्विशोध्य जनितं शेषं **चन्द्रसूर्ययोरन्तरं** ४१° २′ = अ, अस्य भुजज्या ·६५६।

इदानीं शृङ्गोन्नतिः।

$$\frac{(-\cdot२७९) - (\cdot४०० \times \cdot७५४)}{\cdot९१७ \times \cdot६५६} = -\cdot९६५२$$ इयं शृङ्गोन्नतेः कोटीज्या, अस्या धनुः ७४° ५०′, इदं ९० अंशेभ्यो विशोध्य लब्धं **शृङ्गोन्नतेः प्रमाणं** १५° १०′ अत्र सूर्यस्य चक्रदिगंशाश्चन्द्रस्य दिगंशेभ्यो न्यूनाः, अतो **वामं** शृङ्गाग्रमुन्नतं दृश्येत।

इति ज्योतिर्गणिते चन्द्रशृङ्गोन्नतिः।

इति श्रीरामकृष्णसुतवेङ्कटेशविरचिते ज्योतिर्गणिते द्वितीये परिच्छेदे लोपदर्शनाध्यायश्चतुर्थः समाप्तः॥ ४॥

कोष्ठकः १।

त्रिभोनलग्ननतांशानां संस्कारः।

अनेन युतास्त्रिभोनलग्ननतांशा अपसारवृत्तस्य नतांशा भवन्ति।

द्वे उपकरणे = सूर्योनचन्द्रः, चन्द्रशरश्च।

उपकरणम् (चन्द्रः-रविः)	चन्द्रशरः						उपकरणम् (चन्द्रः-रविः)
	०°	१°	२°	३°	४°	५°	
अं०	अं०	अं०	अं०	अं०	अं०	अं०	अं०
९	०	६	१३	१९	२४	२९	३५१
१२	०	५	१०	१४	१९	२३	३४८
१५	०	४	८	११	१५	१९	३४५
१८	०	३	६	१०	१३	१६	३४२
२१	०	३	६	८	११	१४	३३९
२४	०	२	५	७	१०	१२	३३६
२७	०	२	४	७	९	११	३३३
३०	०	२	४	६	८	१०	३३०
३३	०	२	४	५	७	९	३२७
३६	०	२	३	५	७	८	३२४
३९	०	२	३	५	६	८	३२१
४२	०	१	३	४	६	७	३१८
४५	०	१	३	४	६	७	३१५
४८	०	१	३	४	५	७	३१२
५१	०	१	३	४	५	६	३०९
५४	०	१	२	४	५	६	३०६
५७	०	१	२	४	५	६	३०३
६०	०	१	२	४	५	६	३००
६३	०	१	२	३	४	६	२९७
६६	०	१	२	३	४	५	२९४
६९	०	१	२	३	४	५	२९१
७२	०	१	२	३	४	५	२८८
७५	०	१	२	३	४	५	२८५
७८	०	१	२	३	४	५	२८२
८१	०	१	२	३	४	५	२७९
८४	०	१	२	३	४	५	२७६
८७	०	१	२	३	४	५	२७३
९०	०	१	२	३	४	५	२७०

अयं संस्कारश्चन्द्रशरदिक्को नाम चन्द्रशरवद्धनर्णम्।

कोष्ठकः २ ।

चन्द्रशृङ्गोन्नतिः ।

द्वे उपकरणे = रव्यूनचन्द्रः, संस्कृतनतांशाश्च ।

उपकरणम् (चं. – सू.)	संस्कृतनतांशाः धनमृणं वा ।															
	०	६	१२	१८	२४	३०	३६	४२	४८	५४	६०	६६	७२	७८	८४	९०
अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.	अं.
९०	.	९०	९०	९०	९०	९०	९०	९०	९०	९०	९०	९०	९०	९०	९०	९०
८४	.	४५	६४	७२	७७	८०	८२	८३	८५	८६	८६	८७	८८	८९	८९	९०
७८	.	२६	४६	५७	६५	७०	७४	७७	७९	८१	८३	८५	८६	८८	८९	९०
७२	.	१९	३४	४६	५५	६२	६७	७१	७४	७७	८०	८२	८४	८६	८८	९०
६६	.	१४	२८	३९	४८	५५	६१	६६	७०	७३	७७	८०	८३	८५	८८	९०
६०	.	१२	२३	३३	४२	४९	५५	६१	६६	७०	७४	७८	८१	८४	८७	९०
५४	.	१०	२०	२९	३७	४४	५१	५७	६२	६७	७१	७५	७९	८३	८६	९०
४८	.	९	१८	२६	३४	४१	४७	५३	५९	६४	६९	७४	७८	८२	८६	९०
४२	.	८	१६	२४	३१	३८	४४	५०	५६	६२	६७	७२	७७	८१	८६	९०
३६	.	७	१५	२२	२९	३५	४२	४८	५४	५९	६५	७०	७५	८०	८५	९०
३०	.	७	१४	२१	२७	३४	४०	४६	५२	५८	६३	६९	७५	८०	८५	९०
२४	.	७	१३	२०	२६	३२	३८	४५	५१	५६	६२	६८	७४	७९	८५	९०
१८	.	६	१३	१९	२५	३१	३७	४३	४९	५५	६१	६७	७३	७९	८४	९०
१२	.	६	१२	१८	२४	३०	३७	४३	४९	५५	६१	६७	७३	७९	८४	९०
६	.	६	१२	१८	२४	३०	३६	४२	४८	५४	६०	६६	७२	७८	८४	९०
०	.	६	१२	१८	२४	३०	३६	४२	४८	५४	६०	६६	७२	७८	८४	९०

अथ ज्योतिर्गणिते पञ्चमः पाताध्यायः।

महापातगणितम्।

अत्र पातो नाम **सूर्यचन्द्रयोः क्रान्तिसाम्यम्**। सायनसूर्यचन्द्रयोः सार्धत्रयोदशासन्ने योगे यत्क्रान्तिसाम्यं स **व्यतीपातः**। उपसप्तविंशे योगे यत्क्रान्तिसाम्यं सा वैधृतिः। "भावाभावे गतैष्यत्वे पातस्य विदुषां भ्रमः" इति **श्रीभास्करीयो**क्तेरिदं पातगणितं **ज्योतिर्विदा**मपि सुदुष्करम्। अत्र तु साधारणगणकानामपि यथा सुकरं स्यात्तथेदं पातगणितं विरचितम्।

तत्राऽऽदौ केचित्**पारिभाषिकशब्दा** व्याख्यायन्ते— क्रान्तिविषुववृत्तयोर्द्वौ संपातौ परस्पराभ्यां षड्भान्तरितौ स्तः। तयोर्यस्य मध्येन रविर्विषुववृत्तस्योत्तरतो याति स **क्रान्तिपात** इत्युच्यते। अस्मादग्रे क्रान्तिवृत्ते ९० अंशान्तं प्रथमं पदम्। ९१ अंशादि १८० अंशान्तं द्वितीयं पदम्। १८१ अंशादि २७० अंशान्तं तृतीयं पदम्। २७१ अंशादि ३६० अंशान्तं चतुर्थं पदम्। तत्र प्रथमतृतीयपदयोर्विषममिति संज्ञा, द्वितीयचतुर्थयोः **सम**मिति।

चन्द्रकक्षाविषुववृत्तयोरुदङ्मुखः संपातोऽस्मिन्नध्याय **उत्तरगोलसंधिः** केवलं **संधि**र्वेत्युक्तः। अस्मिन्बिन्दौ विक्षेपविषुववृत्तयोर्मध्ये यः कोणः सा चन्द्रस्य चन्द्रकक्षाया वा **परमक्रान्तिः**।

यस्मिन्योगे पातो घटते तस्य **पातसंभवयोगो**ऽथवा केवलं **पातयोग** इति संज्ञा कृता। **सर्वयोग**घटिकाः **सार्वर्क्ष**घटिका इत्यनेन तत्तन्नामकानां संपूर्णोऽवधिर्ज्ञेयः।

इति पारिभाषिकशब्दव्याख्या।

अथ विवक्षिते शकवर्षे **पातसंभवयोगा**नयनमाह—

त्रिनिघ्नायनभागानां विंशांशेन विवर्जिताः।
सार्धविश्वे तथा भानि व्यतीपातस्य वैधृतेः॥ १॥
क्रमेण पातयोगौ स्तो यद्दिने तिथिपत्रके।
एतावन्तौ युजौ स्यातां तद्दिने संभवस्तयोः॥ २॥

अयनांशास्त्रिगुणा विंशत्या भक्ताश्चेययोगात्मकं लभ्यते तत्सार्धत्रयोदशभ्यः सप्तविंशत्याश्च विशोधयेत्। शेषे क्रमेण व्यतीपातवैधृत्योः पातयोगौ भवतः।

अत्रोदाहरणम्— शा. वा. शके १८०५ वर्षे पातयोगौ कथय। अस्मिन्वर्षेऽयनांशाः २२° १२′.५ एतानंशेषु परिणमय्य २२°.२, त्रिगुणीकृत्य ६६°.६, विंशत्या भक्ता जनितो योगात्मकः संस्कारः ३.३३०।

	व्यतीपातयोगः	वैधृतियोगः
शून्यायनांशशकवर्षे	१३.५००	२७.०००
अयनांशजनितसंस्कारः	−३.३३०	−३.३३०
शकवर्षे १८०५ ...	१०.१७०	२३.६७०

अतः १८०५ शकवर्षे दशमे योगे नाम गण्डयोगे व्यतीपातः, चतुर्विंशतितमे योगे नाम शुक्लयोगे वैधृतिः संभवेदिति सामान्यो निर्णयः। स्फुटपातयोगानयनमग्रे वक्ष्यमाणरीत्या कार्यम्।

इदानीं तावत्सावयवपातयोगस्य तिथिपत्रकादेव **कालानयनं** तात्कालिकानि कानिचिदुपकरणानि चाऽऽह—

पातयोगस्यावयवः सर्वयोगघटीगुणः ।
पूर्णयोगस्य कालेन पञ्चाङ्गस्थेन संयुतः ॥ ३ ॥
पातकालो भवेत्स्थूल एतत्कालिकसायनौ ।
पञ्चाङ्गादेव राह्वर्कौ सूर्यक्रान्तिं च साधयेत् ॥ ४ ॥

पातसंभवयोगस्य योऽवयवो नाम भुक्तांशः स वर्तमानयोगस्य घट्यात्मकेन सर्वकालेन (तिथिपत्रस्थगतैष्यघटिकानामैक्यात्संपादितेन) गुण्यः । गुणनफलं घटिकादि स्यात्तेन **पञ्चाङ्गस्थ**पातसंभवपूर्णयोगस्य वारादिकालो युतश्चेत्सावयवपातयोगस्य कालो भवति । अयं कालः स्थूलः, पातयोगस्य सावयवस्य स्थूलत्वात् । अग्रे सूक्ष्मपातयोगानयनानन्तरं तस्य वारादिकालोऽनयैव रीत्या साध्यः ।

उदाहरणम्— शके १८०५ श्रावणकृष्णचतुर्थ्यां बुधवासरे गण्डयोगोऽस्ति तर्ह्यस्मिन्दिने पातो भवेन्न वा, भवति चेत्तस्याऽऽरम्भादिकालान्विगणय ।

अस्मिन्काले पञ्चाङ्गशुद्धिः केतकीपद्धतीय पञ्चाङ्गे **बागलकोट**मध्यमकालेन—

४ र्थी बुधवारे घ० २।६ रेवती घ० २५।१६ । गण्डः घ० ५०।५० ।
५ मी ,, घ० ५५।१७
६ ष्ठी गुरुवारे घ० ४९।९ अश्विनी घ० २०।४३ । वृद्धिः घ० ४३।४ ।
अस्माद्वृद्धियोगस्य संपूर्णः कालः ५२·२ घ० ।
,, अश्विनीनक्षत्रस्य ,, ,, ५५·४ घ० ।

		वा.	घ.
पूर्वन्यासाल्लब्धो व्यतीपातयोगः ...	...		१०·१७०
अस्यावयवम्	...		०·१७०
वर्तमानवृद्धियोगस्य सर्वकालेन	घ०		५२·२००
संगुण्य लब्धो गुणकारो घटिकादिः		०	८·८८
पूर्णयोगो दशमः, गण्डाख्यः अस्य समाप्तिकालेन	...	४	५०·८४
संयुतो जातः स्थूलपातकालः ...		४	५९·७२

अस्मिन्काले पञ्चाङ्गात्—

सायनरविः	१४९° ३०′
सायनराहुः	२१५ ३२
रविक्रान्तिः उत्तरा	११ ३९

चन्द्रस्य **परमक्रान्ते**र्ज्ञानं विना पातो भवेन्न वेति ज्ञातुं न शक्यते । सति पाते तत्कालानयनार्थं गोलसंधिज्ञानमवश्यम् । अतस्तयोरुभयोः साधनमाह—

आद्यकोष्ठाद्विधोः कक्षाक्रान्तिं सायनराहुणा ।
द्वितीयपदकात्सौम्यगोलसंधिं समानयेत् ॥ ५ ॥
द्विगुणार्कश्चक्रशुद्धौ राहुसंधी तथा त्रिभम् ।
एषामैक्यात्परक्रान्तेः फलं ग्राह्यं तृतीयकात् ॥ ६ ॥

तेनैक्येन त्रिभोनेन फलं लब्ध्वा तृतीयकात् ।
चतुर्थस्थगुणक्षुण्णं जायते संधिसंस्कृतिः ॥ ७ ॥
स्वसंस्कारयुतौ क्रान्तिसंधी स्यातां स्फुटावथ ।
संध्यंशास्त्रिगुणाः खाब्धि ४० भक्ता योगस्वरूपिणः ॥ ८ ॥

सायनराहूपकरणेन प्रथमकोष्ठकाच्चन्द्रस्य परमक्रान्तिं तथा द्वितीयकोष्ठकादुदग्गोलसंधिमानयेत् । एतौ सूर्यस्याऽऽकर्षान्न्यूनाधिकौ भवतः । अत एवाऽऽकर्षणयुतौ कार्यौ । तत्साधनं यथा—द्विगुणसायनरविः, चक्रशुद्धराहुः, चक्रशुद्धसंधिः, ९०° एषां चतुर्णां राशीनामैक्यं विधाय तेन तृतीयकोष्ठकात्संस्कारमादाय तेन चन्द्रपरमक्रान्तिः संस्कार्या । अनन्तरं नवत्यंशविहीनेन तेनैवोपकरणेन तृतीयकोष्ठकात्पुनरेकवारं संस्कारमादाय तं चतुर्थपदकाच्चन्द्रपरमकान्त्या साधितेन गुणकेन संगुण्य लब्धेन गोलसंधिः संस्कार्यः । एवं स्फुटौ परमक्रान्तिगोलसंधी प्रसाध्यानन्तरं स्फुटगोलसंधिमंशात्मकं कृत्वा स त्रिभिर्गुण्यः, चत्वारिंशता भाज्यः । फलं योगरूपो गोलसंधिः स्यात् ।

उदाहरणम्— सायनराहुः २१५° ३२′ अनेन प्रथमकोष्ठकाच्चन्द्रकक्षापरमक्रान्तिः १९° २९′·५ तथा द्वितीयकोष्ठकादुत्तरगोलसंधिः – ८° २२′·३ लभ्येते ।

अथानयोः संस्कारः

				अं.	क.
द्विगुणः सायनरविः	...	२९९°·०			
चक्रशुद्धो राहुः	...	१४४·५			
चक्रशुद्धः संधिः	...	८°·४			
त्रिभं = नवत्यंशाः	...	९०·०			
तृ. को. उपकरणम्	...	१८१·९	क्रान्तिसंस्कारः	– ०	०·३
चन्द्रपरमक्रान्तिः	...		...	१९	२९·५
चन्द्रस्य स्पष्टा परमक्रान्तिः			... (ट)	१९	२९·२
त्रिभं		–९०·०			
तृ. को. उप. ...	...	९१·९	संधिफलं	+ ०	८·८
चतु. को. उपकरणम् (ट) १९°·५ ...			गोलसंधिगुणः		२·८३
गुणकारो गोलसंधिसंस्कारः	...	...		+ ०	२४·९
गोलसंधिः	...	...		– ८	२२·३
स्पष्टो गोलसंधिः	...	...		– ७	५७·४

एवं साधितः स्पष्टसंधिः – ७° ५७′·४ अंशेषु परिणमितः –७°·९६, त्रिगुणः २३°·८८, चत्वारिंशता भक्तो जातो योगात्मको गोलसंधिः –०·५९७ ।

इयत्कालपर्यन्तं यद्गणितं कृतं तस्य सारम् ।

बागलकोटे— स्थूलः पातकालः ४ वा. ५९·७२ घ. अस्मिन्काले—

				अं.	क.
सायनरविः	...	...		१४९	३०·०
रविक्रान्तिः	...	...	उ.	११	३९·०
चन्द्रस्य परमक्रान्तिः	...	...		१९	२९·२
चन्द्रस्योत्तरगोलसंधिः	...	...		– ७	५७·४
स एव ...	...	योगात्मकः		–	०·५९७

एतावता गणितेन पातस्य संभवासंभवज्ञानं भवति। अत इदानीं पातस्य संभवासंभवावाह—

चंद्रस्य परमा क्रान्तिर्जिनांशे २४ भ्यो गरीयसी।
चेत्तदा घटते पातोऽन्यथा सूर्यापमाश्रयात्॥ ९॥
पातस्य स्थूलकालेऽर्कक्रान्तेश्चन्द्रपरापमे।
अधिके सति पातः स्यात् द्यंशाल्पविवरे तयोः॥ १०॥
पातस्य संशयस्तत्र गणितात्स निवर्तते।
पाताभावे क्वचिद्बिम्बक्रान्तिसाम्यं भविष्यति॥ ११॥

चन्द्रस्य परमक्रान्तिर्यावच्चतुर्विंशत्यंशेभ्योऽधिका तावत्प्रतिपातयोगं पातो भवत्येव। इदं सायनराहुर्यावन्मकरादिषड्राशिषु वर्तते तावन्नव वर्षाणि सततं संभवति। यदा तु सायनराहुः तर्कादिषट्के तिष्ठति तदा नव वर्षाणि चन्द्रस्य परमकान्ती रविपरमक्रान्तेर्लघीयसी वर्तते। अत एवास्मिन्नवधौ पातः परतन्त्रस्तात्कालिकरविक्रान्त्यधीनः। तस्मात्कारणात्पातस्य स्थूलकाले चन्द्रपरमक्रान्ती रविक्रान्त्यपेक्षया यद्यधिका तदैव पातो भवति नान्यथा। यदा क्रान्त्योरन्तरमंशद्वयान्न्यूनतरं तदा पातः संदिग्धः। अस्मिन्प्रसङ्गे पातो भवेन्न वेत्यस्य निर्णयो वक्ष्यमाणगणितादेव भवति। पाताभावे क्वचिच्चन्द्रसूर्ययोर्बिम्बयोर्याम्योदग्बिन्द्वोः क्रान्तिसाम्यं भविष्यति प्रकृतोदाहरणे चन्द्रपरमक्रान्तिश्चतुर्विंशत्यंशेभ्योऽल्पीयस्यपि स्थूलपातकालिकरविक्रान्त्यपेक्षयाऽष्टभिरंशैरधिका वर्तते तस्मात्पातेन भवितव्यम्।

इदानीं पात**मध्यकालानयन**माह—

सति पाते रविक्रान्त्या चन्द्रकक्षापमेन च।
पञ्चमात्पदकाद्योगरूपं साध्यं भुजान्तरम्॥ १२॥
पातसंभवयोगे च युञ्ज्यात्संधिं भुजान्तरम्।
ऐक्यं स्पष्टतरो योगस्तस्य कालस्तु पूर्ववत्॥ १३॥
एतत्कालरविक्रान्त्या चन्द्रकक्षापमेन च।
पुनर्भुजान्तरं साध्यं संधिकक्षापमौ स्थिरौ॥ १४॥
पातसंभवयोगे च पुनः संधिं भुजान्तरम्।
युञ्ज्यात्स्पष्टतमः स स्यात्तस्य कालस्तु पूर्ववत्॥ १५॥
एवं भुजान्तरं यावदविशेषं पुनः पुनः।
प्रायो द्विर्गणिते पातमध्यकालः स्फुटो भवेत्॥ १६॥

पातस्य संभवे सति स्थूलपातमध्यकालिकरविक्रान्त्या चन्द्रपरमक्रान्त्या च पञ्चमपदकायोगरूपं भुजान्तरमानीय पूर्वानीते पातयोगे संधिभुजान्तरे संयोजयेत्। एवं साधितो योगः पूर्वस्मात्**स्पष्टतरो** भवति। अस्य स्पष्टतरयोगस्य पूर्वोक्तवत्कालः साध्यः।

पुनरेकदा **स्पष्टतर**योगकालिकसूर्यक्रान्तिमादाय तया पूर्वानीतचन्द्रकक्षाक्रान्त्या च पञ्चमकोष्ठकाद्भुजान्तरं साध्यम्। एतद्द्वितीयं भुजान्तरं संधिं च स्थूलपातसंभवयोगे संयोज्य **स्पष्टतम**पातसंभवयोगः साध्यः। अस्य स्पष्टतमपातयोगस्य पूर्वोक्तवत्काल आनेयः। अयं सूक्ष्मः **पातमध्यकालो** भवेत्।

एवं रविक्रान्तिर्भुजान्तरं वा यावदविशेषं वा नाम पूर्वानीततुल्यं स्यात्तावत्कृत्वा गणितं **कार्यम्**। परमिदं पौनःपुन्यमतीव विरलमयनसंधिस्थे चन्द्र एव प्राप्तं भवति। प्रायो द्वितीयभुजान्तरयुक्तात्पातसंभवयोगात्स्पष्टः पातमध्यकालः सिध्यति।

अत्रोदाहरणम्— स्थूलपातयोगकालिकरविक्रान्तिः उ. ११° ३९′·० चन्द्रपरमक्रान्तिः १९° २९′·२, आभ्यां पञ्चमकोष्ठकाद्भुजान्तरं यो० + ०·५०७ लभ्यते। अस्याऽऽनयनप्रकार एवमस्ति—

पञ्चमकोष्ठके	योगभुजान्तरम्
रविक्रान्तिः ११°, चन्द्रपरमक्रान्तिः १९° २९′·२, आभ्यां लब्धं	+ ०·४६९
रविक्रान्तिः १२°, चन्द्रपरमक्रान्तिः १९° २९′·२, आभ्यां लब्धं	+ ०·५३०
रविक्रान्तिः ६०°, कलावृद्धौ भुजान्तरवृद्धिः	+ ०·०६१
तस्मात्,	
रविक्रान्तेः ३९′ कलावृद्धौ भुजान्तरवृद्धिः	+ ०·०३९
रविक्रान्त्यां ११° सत्यां, च. प. क्रां. १९° २९′·२ सत्यां, लब्धम्	+ ०·४६९
अत एव.	
रविक्रान्तिः ११° ३९′, चं. प. क्रां. १९° २९′·२, आभ्यां, लब्धम्	+ ०·५०७

अथ पातमध्यकालगणितम्।

स्थूलपातकालः वा. ४ । ५९·७२ रविक्रान्तिः + ११° ३९′।

पातसंभवयोगः स्थूलः	१०·१७०
उदग्गोलसंधिः	− ०·५९७
भुजान्तरम्	+ ०·५०७
पातमध्ययोगः स्पष्टः	१०·०८०

अथास्य कालानयनम्।

	वा.	घ.
पातमध्ययोगावयवः		०·०८०
वृद्धियोगस्याऽऽद्यन्तकालवत्यः		× ५२·२००
गुणकारः	०	४·१७६
दशमयोगस्य समाप्तिकालः	४	५०·८४
पातमध्यकालः स्पष्टतरः	४	५५·०१६

पुनरेकवारं पातमध्यकालगणितम्।

पूर्वलब्धपातमध्यकालः ४ वा. ५९·७२ घ.। स्पष्टतरः पातमध्यकालः ४ वा. ५५·०१६ घ.। अनेन द्वितीयकालः पंचघटीभिर्हीनः। सायनसूर्यस्य (१४९°।३०′) द्वितीयपदस्थितत्वात् रविक्रान्तिर्हीयमाना उत्तरा च। अर्थात् ४ वा. ५५·०१६ घटीसमये नाम प्राक्पंचघटीसमये रविक्रान्तिरधिका। ६० घटीषु २१ कलासमा प्राक्वृद्धिस्तदा पंचघटीभिः कियतीति अनुपातेन कलाद्वयं लभ्यते तस्मात् स्पष्टतरे वा. ४। घ. ५५·०१६ पातमध्यकाले रविक्रान्तिः उ. ११° ४१′·० अनया चन्द्रपरमक्रान्त्या च १९° २९′·२ लब्धं द्वितीयं भुजान्तरं + ०·५०९ योगरूपम्।

पातसंभवयोगः स्थूलः	१०·१७०
उदग्गोलसंधिः	− ०·५९७
द्वितीयं भुजान्तरं	+ ०·५०९
पातमध्ययोगः स्पष्टतमः	१०·०८२

अथास्य कालानयनम्।

पातमध्ययोगावयवः		०·०८२
वृद्धियोगस्याऽऽयन्तकालघट्यः ... ... ×		५२·२००
	वा.	घ.
गुणकारः	०	४·२८०
दशमयोगस्य समाप्तिकालः	४	५०·८४
स्पष्टतमपातमध्यकालः...	४	५५·१२०

अथवा किं द्वितीयभुजान्तरादिगणितश्रमेण। स्पष्टतरपातयोगकालिकरविक्रान्त्या ज्ञातया स्पष्टतमपातमध्यकालोऽल्पायासेन ज्ञातुं शक्यते। तद्यथा— स्पष्टतरपातसंभवयोगकालिका रविक्रान्तिः उ· ११° ४१′, इयं स्थूलपातयोगकालिकाया रविक्रान्तेः कलाद्वयेनाधिका जाता। पूर्वन्यासे रविक्रान्तेः ६० कलावृद्ध्या ·०६१ भुजान्तरवृद्धिर्लभ्यते तर्हि द्विकलामितया वृद्ध्या किमित्यनुपाताज्जाता भुजान्तरवृद्धिः ०·००२। इयं वृद्धियोगस्याऽऽयन्तकालेन ५२ घ· संगुण्य जनितं स्पष्टतमस्पष्टतरकालयोरन्तरं ०·१०४ घ. अनेन युक्तः स्पष्टतरः पातमध्यकालः ५५·०१६ घ. जातः **स्पष्टतमः पातमध्यकालः** ५५·१२० घटिकाः।

इदानीं पातस्य प्रवेशनिर्गमकालगणितमाह—

स्थित्यर्थं षड्पदकादष्ट ८ लिप्तायुतोनया।
पातमध्यरविक्रान्त्या गृह्णीयाद्धारकद्वयम् ॥ १७ ॥
पातमध्यस्थसर्वर्क्षघट्यो रद ३२ गुणाः पृथक्।
हारद्वयेन संभक्ताः स्थितियुग्मं भवेच्च तत् ॥ १८ ॥
गरीयस्या भवेत्स्पर्शो लघीयस्या च निर्गमः।
सायनार्के ह्योजपदे व्यत्यासोऽस्य समे पदे ॥ १९ ॥
स्पर्शस्थित्यूनिते पातमध्यकाल उपक्रमः।
मोक्षस्थित्यन्विते पातमध्यकाले च निर्गमः ॥ २० ॥

आदावष्टकलोनया पातमध्यकालिकरविक्रान्त्या चन्द्रपरमक्रान्त्या च षड्पदकाद्धारमेकमानयेत्। पुनरष्टकलासहितया पातमध्यकालिकरविक्रान्त्या चन्द्रपरमक्रान्त्या च द्वितीयं हारं साधयेत्। अनन्तरं पातमध्यकाले वर्तमानस्य नक्षत्रस्याऽऽयन्तकालमादाय तं द्वात्रिंशता संगुण्य द्विः स्थाप्य हाराभ्यां पृथग्विभज्य द्वौ स्थितिकालौ साध्यौ। सायनरवौ विषमे पदे वर्तमाने गरीयस्या स्थित्या प्रवेशकालः साध्यः, लघीयस्या निर्गमकालः साध्यः। परं तु सायनरवौ समे पदे वर्तमानेऽस्य व्यत्यासः कार्यः। लघीयस्या प्रवेशकालः साध्यो गरीयस्या निर्गमः साध्य इति यावत्। पातमध्यकाले प्रवेशस्थितिं विशोध्य प्रवेशकालमानयेत्। निर्गमस्थितिसंयोज्य निर्गमकालमानयेत्।

उदाहरणम्—स्पष्टतमपातमध्यकाले रविक्रान्तिः उ.११°४१′, अष्टकलाभिर्युता ११°४९′, ऊना ११° ३३′, आभ्यां चन्द्रपरमक्रान्त्या च १९° २९′·२ षड्पदकाद्धारौ २३५′, २३२′ लभ्येते। पातमध्यकालेऽश्विनीनक्षत्रं वर्ततेऽतोऽस्याऽऽयन्तघटिकाः ५५·४ द्वात्रिंशता गुणिताः १७७२·८ इमा हाराभ्यां पृथग्भक्त्वा जनितं स्थितियुगुलं ७·५४ घ. ७·६४ घ. पातमध्यकाले सायनरविः १४९° २६′। अस्य द्वितीये नाम समे पदे स्थितत्वाल्लघीयस्या स्थित्या प्रवेशः, गरीयस्या निर्गमः स्यात्।

पातमध्यकालः।	स्थितिः।		बागलकोटे	
वा. घ.	घ.		वा. घ.	व्यतीपातस्य
४ ५५·१२ −	७·५४	=	बुधे ४ ४७·५८	प्रवेशः।
४ ५५·१२	०	=	बुधे ४ ५५·१२	मध्यः।
४ ५५·१२ +	७·६४	=	गुरौ ५ २·७६	निर्गमः।

इति पातोदाहरणम्।

अथ पातगणितस्य शुद्धिपरीक्षार्थं पातमध्यकाले चन्द्रस्य क्रान्तिभोगविषुवांशानां गणितम्।

अस्य गणितस्योपयोगो द्विविधः। पातकालपरीक्षा, चन्द्रस्य क्रान्तिविषुवांशानां प्रकारान्तरेणाऽऽनयनं चेति। ग्रहगणितप्रकरण उक्तया रीत्याऽपि क्रान्तिविषुवांशौ सिध्यतः। परं तु तत्र चन्द्रशरस्यापेक्षा वर्तते। अत्र शरं विना केवलं गोलसंधिपरमक्रान्तिभ्यां तत्साधनमुच्यते। किंच यदा प्रत्यहं प्रतिघटिकं वा चन्द्रस्य क्रान्तिविषुवांशानयनमपेक्षितं तदाऽत्रोक्तया रीत्या गणिते कृतेऽल्पायासेन महती कार्यसिद्धिः स्यात्।

पातमध्यस्पष्टतमो योगो द्विघ्नायनांशयुक्।
तत्कालभवसूर्येण सायनेन विवर्जितः॥ २१॥
शेषं सायनचन्द्रः स्यात्स च संध्यूनितः परः।
परज्या परमक्रान्तिज्याऽनयोर्घातजं धनुः॥ २२॥
तत्कालचन्द्रक्रान्तिः स्यादनया सह भास्वतः।
तत्कालक्रान्तिमानस्य साम्यं पश्येत्परीक्षकः॥ २३॥

स्पष्टोऽर्थः। **उदाहरणम्—**

		अं०	क०
पूर्वोदाहरणे पातमध्ये स्पष्टतमो योगः १०·०८२ लवीकृतः	=	१३४	२६
द्विघ्नायनांशाः = (२२° १२·५′) × २ =	+	४४	२५
द्विघ्नायनांशयुक्फलं … … … …		१७८	५१
एतत्कालिकसायनसूर्येण … … … …	−	१४९	२६
विवर्जितः शेषं सायनस्पष्टचन्द्रः … … …		२९	२५
गोलसंधिना … … … … …	−	७	५७
ऊनितः, जातः परमसंज्ञकः … … …		३७	२२

परः …	३७° २२′,	अस्य ज्याघाताङ्काः	९·७८३१३
चन्द्रपरमक्रान्तिः	१९° २९′·५,	अस्या ज्याघाताङ्काः	९·५२३२२
चन्द्रक्रांतिर्लब्धा	११° ४१·०,	ज्याघाताङ्कादस्मात्	९·३०६३५
रविक्रान्तिः	११° ४१·०	पूर्वगणिते साधिता	

नाटीकलतोऽपि चन्द्रक्रांतिः, ११ । ४१′ । १७″ आयाति।

अत्रोभयोः क्रान्त्योः साम्यं दृश्यते। अत इदमखिलं पातगणितं निरवद्यमिति सिद्धम्। अत्र घाताङ्कानां योगात् गुणनं साधितमिति दिक्।

अथ चन्द्रविषुवांशगणितम् ।

परस्पर्शगुणः कक्षाक्रान्तिकोटिज्यकाऽनयोः ।
घातो विषुवभागानां स्पर्शरेषाऽथ तद्धनुः ॥ २४ ॥
गोलसंधेश्च विषुवैर्भागैराकर्षणस्फुटैः ।
युक्तं विषुवभोगः स्याच्चन्द्रस्य क्रान्तिपाततः ॥ २५ ॥

स्पष्टोऽर्थः ।

पं. १	परस्य ३७° २२′ अस्य स्पर्शरेषाघाताङ्काः	९·८८२८७
,, २	कक्षाक्रान्तिः १९° २९′·२ कोटीज्याघाताङ्काः	९·९७४३८
,, ३	योगः, परविषुवांशा लब्धा ३५° ४५′ स्पर्शरेषाघाताङ्कादस्मात्	९·८५७२५
,, ४	विषुवभागानां धनुः	३५° ४५′
,, ५	गोलसंधेर्विषुवांशैः सप्तमकोष्ठकगतैः	− ९ ०
,, ६	सूर्याकर्षणेन च = ८′·८ × २·९९८ =	+ · २६
,, ७	युक्तम्, जातः क्रान्तिसंपाताच्चन्द्रस्य विषुवभोगः	२७ १२
,, ८	नाटीकलतः	२७° १२′·३

विवरणम् । ३२० पृष्ठे तलस्थे न्यासे ८ पंक्तौ ३७°।२२′ लब्धं तदेवात्र १ पंक्तौ गृहीतम् । ३१६ पृष्ठे ट संज्ञया १९°।२९′·२ प्राप्तं तदेवात्र २ पंक्तौ दर्शितम् । विषुवभागस्पर्शज्यायाः लाग्. ९·८५७२५ विलोमविधिना प्राप्तं धनुः ३५°।४५′ तृतीयपंक्तौ लिखितम् । ३१५ पृष्ठतलस्थेन सायन २१५°।३२′ राहूपकरणेन सप्तमकोष्ठकात् गोलसंधेर्विषुवांशाः − ९° लब्धास्ते पंचमपंक्तौ दक्षिणे पार्श्वे लिखिताः । ३१६ पृष्ठे मध्यभागे स्थितानां द्विगुणसायनरवि २९९° चक्रशुद्धसायनराहु १४४°·५ चक्रशुद्ध ८°·४ संधीनां संकलनेन प्राप्तं ९१·९ यदुपकरणं तेन तृतीयकोष्ठात् ८′·८ कलाः सूर्याकर्षणम् । चन्द्रकक्षापरमक्रांति १९°।२९′·२ संज्ञोपकरणेन चतुर्थकोष्ठकस्य दक्षिणस्तम्भात् २·९९८ गुणकः प्राप्तः । एतयोः, ८′·८ × २·९९८ गुणकारः षष्ठपंक्तौ दर्शितः । अन्यत्सर्वं स्पष्टम् ।

इति प्रकारान्तरेण चन्द्रस्य विषुवक्रान्तिगणितम् ।

॥ इति श्रीरामकृष्णसुतवेङ्कटेशविरचिते ज्योतिर्गणिते द्वितीयपरिच्छेदे पञ्चमः पाताध्यायः समाप्तः ॥

कोष्ठकः १।

चन्द्रस्य परमक्रान्तिः शकवर्षे १८००।

उपकरणं = सायनराहुः।

उपकरणम्	अं. ०	अं. ३०	अं. ६०	अं. ९०	अं. १२०	अं. १५०	उपकरणम्
अं.	अं. क.	अं. क.	अं. क.	अं. क.	अं. क.	अं. क.	अं.
०	२८ ३६·१	२८ १·१	२६ २२·८	२३ ५८·४	२१ १९·६	१९ १०·०	३०
१	२८ ३६·०	२७ ५८·७	२६ १८·६	२३ ५३·१	२१ १४·६	१९ ६·८	२९
२	२८ ३५·८	२७ ५६·३	२६ १४·४	२३ ४७·८	२१ ९·७	१९ ३·६	२८
३	२८ ३५·६	२७ ५३·८	२६ १०·१	२३ ४२·५	२१ ४·७	१९ ०·६	२७
४	२८ ३५·४	२७ ५१·२	२६ ५·७	२३ ३७·२	२० ५९·८	१८ ५७·६	२६
५	२८ ३५·०	२७ ४८·६	२६ १·३	२३ ३२·०	२० ५४·९	१८ ५४·८	२५
६	२८ ३४·६	२७ ४५·९	२५ ५६·९	२३ २६·७	२० ५०·०	१८ ५२·१	२४
७	२८ ३४·१	२७ ४३·१	२५ ५२·५	२३ २१·४	२० ४५·२	१८ ४९·५	२३
८	२८ ३३·५	२७ ४०·२	२५ ४८·०	२३ १६·१	२० ४०·४	१८ ४७·०	२२
९	२८ ३२·९	२७ ३७·३	२५ ४३·४	२३ १०·८	२० ३५·६	१८ ४४·६	२१
१०	२८ ३२·२	२७ ३४·३	२५ ३८·७	२३ ५·५	२० ३०·८	१८ ४२·३	२०
११	२८ ३१·४	२७ ३१·३	२५ ३४·०	२३ ०·१	२० २६·१	१८ ४०·१	१९
१२	२८ ३०·५	२७ २८·३	२५ २९·३	२२ ५४·७	२० २१·५	१८ ३७·९	१८
१३	२८ २९·५	२७ २५·२	२५ २४·५	२२ ४९·३	२० १७·०	१८ ३५·८	१७
१४	२८ २८·५	२७ २२·१	२५ १९·७	२२ ४३·९	२० १२·५	१८ ३३·९	१६
१५	२८ २७·३	२७ १८·९	२५ १४·८	२२ ३८·६	२० ८·१	१८ ३२·०	१५
१६	२८ २६·१	२७ १५·६	२५ ९·[illegible]	२२ ३३·३	२० ३·८	१८ ३०·३	१४
१७	२८ २४·८	२७ १२·२	२५ ५·०	२२ २७·९	१९ ५९·५	१८ २८·७	१३
१८	२८ २३·४	२७ ८·८	२५ ०·०	२२ २२·६	१९ ५५·३	१८ २७·२	१२
१९	२८ २१·९	२७ ५·३	२४ ५५·०	२२ १७·२	१९ ५१·१	१८ २५·८	११
२०	२८ २०·४	२७ १·७	२४ ४९·९	२२ ११·९	१९ ४७·१	१८ २४·६	१०
२१	२८ १८·८	२६ ५८·१	२४ ४४·९	२२ ६·६	१९ ४३·१	१८ २३·५	९
२२	२८ १७·२	२६ ५४·४	२४ ३९·८	२२ १·३	१९ ३९·१	१८ २२·५	८
२३	२८ १५·५	२६ ५०·६	२४ ३४·७	२१ ५६·०	१९ ३५·२	१८ २१·६	७
२४	२८ १३·७	२६ ४६·८	२४ २९·६	२१ ५०·७	१९ ३१·३	१८ २०·८	६
२५	२८ ११·८	२६ ४२·९	२४ २४·४	२१ ४५·४	१९ २७·५	१८ २०·२	५
२६	२८ ९·८	२६ ३९·०	२४ १९·२	२१ ४०·२	१९ २३·८	१८ १९·६	४
२७	२८ ७·७	२६ ३५·०	२४ १४·०	२१ ३५·०	१९ २०·३	१८ १९·२	३
२८	२८ ५·६	२६ ३१·०	२४ ८·८	२१ २९·९	१९ १६·८	१८ १८·८	२
२९	२८ ३·४	२६ २६·९	२४ ३·६	२१ २४·८	१९ १३·३	१८ १८·६	१
३०	२८ १·१	२६ २२·८	२३ ५८·४	२१ १९·७	१९ १०·०	१८ १८·५	०
	३३० अं.	३०० अं.	२७० अं.	२४० अं.	२१० अं.	१८० अं.	

कोष्ठकः २ ।

चन्द्रविक्षेपवृत्तस्योदग्गोलसंधिः शकवर्षे १८०० ।

उपकरणं = सायनराहुः ।

उपकरणम्	० अं० +		३० अं० +		६० अं. +		९० अं. +		१२० अं. +		१५० अं. +		उपकरणम्
अं.	अं.	क.	अं.	क.	अं.	क	अं.	क.	अं.	क.	अं.	क.	अं.
०	०	०	४	५६	९	८	११	४१	११	२५	७	१९	३०
१	०	१०	५	६	९	१५	११	४३	११	२०	७	७	२९
२	०	२०	५	१५	९	२२	११	४६	११	१६	६	५४	२८
३	०	३०	५	२४	९	२९	११	४८	११	११	६	४२	२७
४	०	४०	५	३४	९	३६	११	५०	११	६	६	२९	२६
५	०	५०	५	४३	९	४२	११	५२	११	१	६	१६	२५
६	१	१	५	५२	९	४९	११	५४	१०	५५	६	३	२४
७	१	११	६	१	९	५५	११	५५	१०	४९	५	४९	२३
८	१	२१	६	१०	१०	१	११	५६	१०	४३	५	३६	२२
९	१	३१	६	१९	१०	७	११	५७	१०	३६	५	२२	२१
१०	१	४१	६	२८	१०	१३	११	५८	१०	३०	५	८	२०
११	१	५१	६	३६	१०	१९	११	५९	१०	२३	४	५३	१९
१२	२	१	६	४५	१०	२५	११	५९	१०	१६	४	३९	१८
१३	२	११	६	५४	१०	३०	११	५९	१०	८	४	२४	१७
१४	२	२१	७	२	१०	३६	११	५९	१०	०	४	१०	१६
१५	२	३१	७	११	१०	४१	११	५८	९	५२	३	५५	१५
१६	२	४१	७	१९	१०	४६	११	५८	९	४४	३	४०	१४
१७	२	५१	७	२८	१०	५१	११	५७	९	३५	३	२५	१३
१८	३	१	७	३६	१०	५६	११	५६	९	२६	३	१०	१२
१९	३	१०	७	४४	११	१	११	५५	९	१७	२	५५	११
२०	३	२०	७	५२	११	५	[illegible]	५४	९	८	२	३९	१०
२१	३	३०	८	०	११	९	[illegible]	५२	८	५८	२	२३	९
२२	३	४०	८	८	११	१३	११	५०	८	४८	२	७	८
२३	३	४९	८	१६	११	१७	११	४७	८	३८	१	५१	७
२४	३	५९	८	२४	११	२१	११	४५	८	२७	१	३६	६
२५	४	९	८	३१	११	२५	११	४२	८	१७	१	२०	५
२६	४	१८	८	३९	११	२९	११	३९	८	६	१	४	४
२७	४	२८	८	४७	११	३२	११	३६	७	५४	०	४८	३
२८	४	३७	८	५४	११	३५	११	३२	७	४३	०	३२	२
२९	४	४७	९	१	११	३८	११	२९	७	३१	०	१६	१
३०	४	५६	९	८	११	४१	११	२५	७	१९	०	०	०
	— ३३० अं.		— ३०० अं.		— २७० अं.		— २४० अं.		— २१० अं.		— १८० अं.		

कोष्ठकः ३ ।

चन्द्रस्य परमक्रान्तौ सूर्याकर्षणम् ।

उपकरणं = (द्विगुणसायनरविः + चक्रशुद्धसायनराहुः + चक्रशुद्धोदग्गोलसंधिः + नवत्यंशाः)

चन्द्रस्य गोलसंधौ विषुवांशेषु च सूर्यस्यास्फुटाकर्षणानयने । अस्य कोष्ठकस्योपकरणं = (२ सा. रविः + च. शु. सा. राहुः + च. शु. गोलसंधिः)

उपकरणम्	० अं. +		३० अं. +		६० अं. +		९० अं. +		१२० अं. +		१५० अं. +		उपकरणम्
अं.	अं.	क.	अं.	क.	अं.	क.	अं.	क.	अं.	क.	अं.	क.	अं.
०	०	०·०	०	४·४	०	७·६	०	८·८	०	७·६	०	४·४	३०
१	०	०·१	०	४·५	०	७·७	०	८·८	०	७·६	०	४·३	२९
२	०	०·३	०	४·७	०	७·८	०	८·८	०	७·६	०	४·१	२८
३	०	०·५	०	४·८	०	७·९	०	८·८	०	७·४	०	४·०	२७
४	०	०·६	०	४·९	०	७·९	०	८·८	०	७·३	०	३·९	२६
५	०	०·८	०	५·०	०	८·०	०	८·८	०	७·२	०	३·७	२५
६	०	०·९	०	५·२	०	८·१	०	८·८	०	७·१	०	३·६	२४
७	०	१·०	०	५·३	०	८·१	०	८·७	०	७·०	०	३·४	२३
८	०	१·२	०	५·४	०	८·२	०	८·७	०	६·९	०	३·३	२२
९	०	१·४	०	५·५	०	८·२	०	८·७	०	६·८	०	३·२	२१
१०	०	१·५	०	५·७	०	८·३	०	८·७	०	६·७	०	३·०	२०
११	०	१·७	०	५·८	०	८·३	०	८·६	०	६·६	०	२·९	१९
१२	०	१·८	०	५·९	०	८·४	०	८·६	०	६·५	०	२·७	१८
१३	०	२·०	०	६·०	०	८·४	०	८·६	०	६·४	०	२·६	१७
१४	०	२·१	०	६·१	०	८·५	०	८·६	०	६·३	०	२·४	१६
१५	०	२·३	०	६·२	०	८·५	०	८·५	०	६·२	०	२·३	१५
१६	०	२·४	०	६·३	०	८·६	०	८·५	०	६·१	०	२·१	१४
१७	०	२·६	०	६·४	०	८·६	०	८·४	०	६·०	०	२·०	१३
१८	०	२·७	०	६·५	०	८·६	०	८·४	०	५·९	०	१·८	१२
१९	०	२·९	०	६·६	०	८·६	०	८·३	०	५·८	०	१·७	११
२०	०	३·०	०	६·७	०	८·७	०	८·३	०	५·७	०	१·५	१०
२१	०	३·२	०	६·८	०	८·७	०	८·२	०	५·५	०	१·४	९
२२	०	३·३	०	६·९	०	८·७	०	८·२	०	५·४	०	१·२	८
२३	०	३·४	०	७·०	०	८·७	०	८·१	०	५·३	०	१·१	७
२४	०	३·६	०	७·१	०	८·८	०	८·१	०	५·२	०	०·९	६
२५	०	३·७	०	७·२	०	८·८	०	८·०	०	५·०	०	०·८	५
२६	०	३·९	०	७·३	०	८·८	०	७·९	०	४·९	०	०·७	४
२७	०	४·०	०	७·४	०	८·८	०	७·९	०	४·८	०	०·५	३
२८	०	४·१	०	७·५	०	८·८	०	७·८	०	४·७	०	०·३	२
२९	०	४·३	०	७·६	०	८·८	०	७·७	०	४·५	०	०·१	१
३०	०	४·४	०	७·६	०	८·८	०	७·६	०	४·४	०	०·०	०
	— ३३० अं.		— ३०० अं.		— २७० अं.		— २४० अं.		— २१० अं.		— १८० अं.		

कोष्ठकः ४ ।

चन्द्रस्य गोलसंधौ विषुवांशेषु च सूर्यस्य स्फुटाकर्षणम् ।

स्फुटाकर्षणम् = अत्रत्यगुणकगुणितं तृतीयकोष्ठगतमस्फुटाकर्षणम् ।

उपकरणं = चन्द्रस्य परमक्रान्तिः ।

उपकरणम् चन्द्रपरमक्रान्तिः	गोलसंधावस्फुटाकर्षणस्य गुणकः		गोलसंधिविषुवांशेऽस्फुटाकर्षणस्य गुणकः	
०		अन्तरम्		अन्तरम्
१८	३·०७८	०·१७४	३·२३६	०·१६४
१९	२·९०४	·१५७	३·०७२	·१४८
२०	२·७४७	·१४२	२·९२४	·१३४
२१	२·६०५		२·७९०	
		·१३०		·१२१
२२	२·४७५	·११९	२·६६९	·११०
२३	२·३५६	·११०	२·५५९	·१००
२४	२·२४६	·१०१	२·४५९	·०९३
२५	२·१४५		२·३६६	
		·०९५		·०८५
२६	२·०५०	·०८७	२·२८१	·०७८
२७	१·९६३	·०८२	२·२०३	·०७३
२८	१·८८१	०·०७७	२·१३०	०·०७०
२९	१·८०४		२·०६०	

कोष्ठकः ५ ।

भुजान्तरम् ।

भुजान्तरं नाम सूर्यचन्द्रयोः स्वस्वगोलसंधिभ्यां मीयमानभुजयोरन्तरम् ।

अस्य द्वे उपकरणे = रविक्रान्तिश्चन्द्रपरमक्रान्तिश्च ।

रवि-क्रान्तिः	चन्द्रपरमक्रान्तिः ।						
	१८°	१९°	२०°	२१°	२२°	२३°	२३°२७′
अं.	योगः	योगः	योगः	योगः	योगः	योगः	योगः
०	·०००	·०००	·०००	·०००	·०००	·०००	·०००
१	·०५४	·०४१	·०३१	·०२१	·०११	·००४	·०००
२	·१०९	·०८४	·०६१	·०४१	·०२३	·००७	·०००
३	·१६४	·१२७	·०९३	·०६३	·०३६	·०११	·०००
४	·२२१	·१७१	·१२५	·०८४	·०४७	·०१४	·०००
५	·२८०	·२१६	·१५८	·१०७	·०६०	·०१७	·०००
६	·३४१	·२६२	·१९२	·१३०	·०७२	·०२१	·०००
७	·४०५	·३११	·२२७	·१५४	·०८६	·०२५	·०००
८	·४७२	·३६३	·२६५	·१७९	·१००	·०३०	·०००
९	·५४४	·४१८	·३०५	·२०५	·११५	·०३४	·०००
१०	·६२३	·४७७	·३४८	·२३४	·१३१	·०३८	·०००
११	·७११	·५४२	·३९४	·२६४	·१४८	·०४३	·०००
१२	·८०९	·६१३	·४४६	·२९७	·१६६	·०४८	·०००
१३	·९२२	·६९६	·५०३	·३३५	·१८६	·०५५	·०००
१४	१·०५६	·७९२	·५६८	·३७७	·२०९	·०६१	·०००
१५	१·२२३	·९०६	·६४६	·४२५	·२३५	·०६८	·०००
१६	१·४४६	१·०५१	·७३९	·४८४	·२६६	·०७७	·०००
१७	१·७८७	१·२३५	·८६१	·५५४	·३०२	·०८७	·०००
१८	२·९३०	१·५५४	१·०२६	·६४७	·३४८	·१००	·०००
१९		२·६३४	१·२९६	·७८१	·४१०	·११६	·०००
२०			२·३०७	·९९२	·५०१	·१३७	·०००
२१				१·९३५	·६६४	·१७१	·०००
२२					१·४८२	·२४३	·०००
२३						·७५०	·०००
२३।२७′							·०००

समपदस्थे सायनसूर्येऽयं संस्कारो धनं विषमपदस्थे ऋणम् ।

कोष्ठकः ५ ।

भुजान्तरम् ।

भुजान्तरं नाम सूर्यचन्द्रयोः स्वस्वगोलसंधिभ्यां मीयमानभुजयोरन्तरम् ।

अस्य द्वे उपकरणे = रविक्रान्तिश्चन्द्रपरमक्रान्तिश्च ।

रवि-क्रान्तिः	चन्द्रपरमक्रान्तिः ।						
	२३°२७′	२४°	२५°	२६°	२७°	२८°	२९°
अं.	योगः	योगः	योगः	योगः	योगः	योगः	योगः
०	·०००	·०००	·०००	·०००	·०००	·०००	·०००
१	·०००	·००४	·०११	·०१७	·०२३	·०२९	·०३४
२	·०००	·००९	·०२२	·०३५	·०४७	·०५७	·०६८
३	·०००	·०१२	·०३३	·०५२	·०७०	·०८६	·१०१
४	·०००	·०१६	·०४४	·०७०	·०९४	·११६	·१३७
५	·०००	·०२१	·०५६	·०८८	·११८	·१४६	·१७२
६	·०००	·०२५	·०६८	·१०७	·१४३	·१७७	·२०८
७	·०००	·०३०	·०८०	·१२७	·१६९	·२०९	·२४५
८	·०००	·०३४	·०९३	·१४७	·१९६	·२४२	·२८४
९	·०००	·०३९	·१०७	·१६८	·२२४	·२७६	·३२४
१०	·०००	·०४४	·१२१	·१९०	·२५४	·३१२	·३६६
११	·०००	·०५०	·१३६	·२१४	·२८५	·३५०	·४११
१२	·०००	·०५७	·१५२	·२३९	·३१८	·३९१	·४५८
१३	·०००	·०६३	·१६९	·२६६	·३५४	·४३४	·५०८
१४	·०००	·०७१	·१८८	·२९६	·३९३	·४८२	·५६३
१५	·०००	·०७९	·२१०	·३२९	·४३६	·५३४	·६२३
१६	·०००	·०८७	·२३५	·३६६	·४८४	·५९१	·६८९
१७	·०००	·०९७	·२६३	·४०९	·५३९	·६५७	·७६५
१८	·०००	·१११	·२९६	·४५९	·६०४	·७३३	·८५१
१९	·०००	·१२९	·३३७	·५२०	·६८१	·८२४	·९५३
२०	·०००	·१५२	·३९२	·५९९	·७७८	·९३७	१·०७९
२१	·०००	·१८४	·४६८	·७०४	·९०८	१·०८५	१·२४२
२२	·०००	·२४०	·५८९	·८६८	१·१००	१·३०१	१·४७६
२३	·०००	·३९०	·८६०	१·२०२	१·४७६	१·७०५	१·९०३
२३।२७′	·०००	·८९५	१·४७५	१·८६०	२·१५८	२·४०८	२·६१२

समपदस्थे सायनसूर्येऽयं संस्कार ऋणं विषमपदस्थे धनम् ।

कोष्ठकः ६ ।

हारानयनम् ।

हारो नाम पातमध्यकालिकनक्षत्रस्य सार्वर्क्षकाले चन्द्रसूर्ययोः क्रान्त्योरन्तरम् ।

द्वे उपकरणे = रविक्रान्तिश्चन्द्रपरमक्रान्तिश्च ।

रवि-क्रान्तिः	चन्द्रपरमक्रान्तिः ।											
	१८°	१९°	२०°	२१°	२२°	२३°	२४°	२५°	२६°	२७°	२८°	२९°
अं.	क.	क.	क.	क.	क.	क.	क.	क.	क.	क.	क.	क.
०	२७२	२८४	२९७	३११	३२३	३३६	३४९	३६२	३७४	३८६	३९९	४११
१	२७१	२८४	२९६	३१०	३२२	३३५	३४९	३६१	३७३	३८६	३९९	४११
२	२७०	२८२	२९५	३०९	३२१	३३४	३४८	३६१	३७३	३८५	३९८	४११
३	२६७	२८०	२९४	३०८	३२०	३३३	३४६	३६०	३७२	३८४	३९७	४१०
४	२६४	२७८	२९१	३०४	३१८	३३१	३४४	३५७	३६९	३८२	३९५	४०७
५	२५९	२७४	२८८	३००	३१४	३२८	३४१	३५४	३६७	३७९	३९२	४०४
६	२५४	२६९	२८३	२९६	३१०	३२४	३३७	३५०	३६४	३७६	३८९	४०१
७	२४८	२६४	२७८	२९२	३०६	३२०	३३३	३४७	३६१	३७३	३८६	३९८
८	२४२	२५८	२७३	२८७	३०१	३१५	३२९	३४३	३५७	३७०	३८२	३९५
९	२३४	२५०	२६६	२८१	२९५	३०९	३२३	३३८	३५२	३६५	३७७	३९२
१०	२२५	२४२	२५८	२७४	२८७	३०३	३१७	३३४	३४७	३६०	३७२	३८८
११	२१४	२३२	२४८	२६६	२७९	२९५	३११	३२७	३४१	३५४	३६६	३८३
१२	२०१	२२२	२३७	२५५	२७१	२८७	३०२	३१९	३३५	३४८	३६१	३७७
१३	१८७	२०९	२२५	२४३	२६१	२७८	२९४	३०९	३२८	३४१	३५६	३७०
१४	१६९	१९२	२१२	२३२	२४९	२६८	२८५	३००	३१७	३३२	३४९	३६३
१५	१४८	१७३	१९६	२१७	२३६	२५५	२७३	२९०	३०७	३२३	३३९	३५५
१६	११८	१५०	१७६	२००	२२२	२४२	२६०	२७८	२९७	३१३	३३०	३४७
१७	६०	१२१	१५३	१८०	२०४	२२६	२४७	२६६	२८५	३०१	३१९	३३७
१८		६०	१२२	१५६	१८४	२०८	२३१	२५१	२७०	२८९	३०७	३२५
१९			५९	१२३	१५८	१८६	२१२	२३३	२५५	२७५	२९४	३१२
२०				५९	१२५	१६०	१८९	२१३	२३८	२५९	२८०	२९९
२१					५८	१२६	१६२	१९०	२१८	२४२	२६४	२८४
२२						५६	१२५	१६४	१९६	२२२	२४६	२६८
२३							९१	१३७	१७१	१९९	२२८	२५१
२३°।२७							३७	११२	१५२	१८३	२१०	२३८

कोष्ठकः ७ ।

चन्द्रविक्षेपवृत्तस्योदग्गोलसंधेर्विषुवांशाः । शके १८०० ।

उपकरणं = सायनराहुः ।

उपकरणम्	० अं. +		३० अं. +		६० अं. +		९० अं +		१२० अं. +		१५० अं. +		उपकरणम्
अं.	अं.	क.	अं.	क०	अं.	क०	अं.	.	अं.	क.	अं.	क.	अं.
०	०	०	५	२९	१०	३	१२	४५	१२	२०	७	५१	३०
१	०	११	५	४०	१०	११	१२	४७	१२	१५	७	३८	२९
२	०	२२	५	५०	१०	१९	१२	५०	१२	१०	७	२५	२८
३	०	३४	६	०	१०	२६	१२	५२	१२	५	७	११	२७
४	०	४५	६	१०	१०	३३	१२	५४	११	५९	६	५७	२६
५	०	५६	६	२०	१०	४०	१२	५६	११	५३	६	४३	२५
६	०	७	६	३०	१०	४७	१२	५७	११	४७	६	२९	२४
७	०	१८	६	४०	१०	५४	१२	५९	११	४०	६	१४	२३
८	०	३०	६	५०	११	१	१३	०	११	३३	६	०	२२
९	०	४१	६	५९	११	७	१३	०	११	२६	५	४५	२१
१०	१	५२	७	९	११	१४	१३	१	११	१९	५	३०	२०
११	२	३	७	१९	११	२०	१३	१	११	११	५	१४	१९
१२	२	१५	७	२८	११	२६	१३	१	११	३	४	५९	१८
१३	२	२६	७	३८	११	३२	१३	१	१०	५५	४	४३	१७
१४	२	३७	७	४७	११	३८	१३	१	१०	४६	४	२७	१६
१५	२	४८	७	५७	११	४३	१३	०	१०	३७	४	११	१५
१६	२	५९	८	६	११	४८	१३	०	१०	२८	३	५५	१४
१७	३	१०	८	१५	११	५४	१२	५९	१०	१९	३	४९	१३
१८	३	२०	८	२४	११	५९	१२	५७	१०	९	३	२३	१२
१९	३	३१	८	३३	१२	४	१२	५५	९	५९	३	६	११
२०	३	४२	८	४२	१२	८	१२	५३	९	४९	२	४९	१०
२१	३	५३	८	५०	१२	१२	१२	५१	९	३८	२	३३	९
२२	४	४	८	५९	१२	१७	१२	४९	९	२७	२	१६	८
२३	४	१५	९	८	१२	२१	१२	४६	९	१६	१	५९	७
२४	४	२५	९	१६	१२	२५	१२	४३	९	५	१	४२	६
२५	४	३६	९	२४	१२	२९	१२	४०	८	५३	१	२५	५
२६	४	४७	९	३२	१२	३३	१२	३७	८	४१	१	८	४
२७	४	५७	९	४०	१२	३६	१२	३३	८	२९	०	५१	३
२८	५	८	९	४८	१२	३९	१२	२९	८	१७	०	३४	२
२९	५	१८	९	५६	१२	४२	१२	२५	८	४	०	१७	१
३०	५	२९	१०	३	१२	४५	१२	२०	७	५१	०	०	०
	— ३३० अं.		— ३०० अं.		— २७० अं.		— २४० अं.		— २१० अं.		— १८० अं.		

ऋणं विषुवांशाश्चक्रशुद्धाः कृता अनुलोमाः स्युः ।

अथ ज्योतिर्गणिते षष्ठस्त्रिप्रश्नाध्यायः ।

वेधगणितम् ।

नभश्चराणामथ यंत्रवेधाद्दिग्देशकालानवगन्तुमत्र ।
ब्रुवे प्रकारान्ग्रहलाघवोक्तान्प्रश्नांश्च सिद्धांतशिरोमणिस्थान् ॥ १ ॥

शङ्कुः—" समतलमस्तकपरिधिर्भ्रमसिद्धो दन्तिदन्तजः शङ्कुः ।
तच्छायातः प्रोक्तं ज्ञानं दिग्देशकालानाम् " ॥ (शिरोमणिः ।)

अथ दिग्ज्ञानम्

अम्भःसमीकृतायां भूम्यामादौ विलिख्य सद्वृत्तम् ॥
केन्द्रे तस्य निदध्याच्छङ्कोः केन्द्रं ततो यदा छाया ॥ २ ॥
परिधिं विशेदपेयात्तद्बिन्द्वोरुपरि सारिता रेषा ॥
पूर्वापराऽथ तस्या मत्स्याद्याम्योत्तरे दिशे साध्ये ॥ ३ ॥
अथवाऽभीष्टे दिवसे सूर्यस्याग्रां प्रसाध्य शङ्कोर्भाम् ॥
अपरां स्पृशत्तुरीयं भूमौ सूर्योदये न्यसेद्गणकः ॥ ४ ॥
अग्रादिश्यपरस्यामग्रातुल्यान्तरे तुरीयस्य ॥
परिधौ न्यस्तो बिन्दुर्ह्यपरस्यां तुर्यकेन्द्रकाद्भवति ॥ ५ ॥

जलवत्समीकृतायां भूमावभीष्टप्रमाणमितेन कर्कटेनैकं वृत्तमुत्पाद्य तत्केन्द्रोपरि शङ्कोः केन्द्रं तथा स्थापयेद्यथाऽसौ शङ्कुर्भूमेरुपरि लम्बः स्यात् । ततश्छाया यस्मिन्बिन्दौ परिधिं प्रविशेद्य-स्मिंश्चापेयात्तावुभौ बिन्दू संधार्यैकां रेखामुत्पादयेत् । एषा **प्रागपरा** रेषा भवति । अस्या दैर्घ्य-मितेन कर्कटेनास्या अग्रबिन्दू परितो द्वे समवर्तुले विलिख्य तयोः संपातबिन्द्वोर्मध्येनैका तिर्यग्रेखा प्रसार्या । असावेव **याम्योत्तरा** रेखा भवति । याम्योत्तरा रेखोभयतः प्रसारिता शङ्कोः केन्द्रगतं वर्तुलं ययोर्बिन्द्वोर्भिन्द्यात्तौ याम्योदग्बिन्दू भवतः । आभ्यां परिधिचतुर्थांशान्तरे पूर्वा-परौ बिन्दू दद्यात् ।

अथ **प्रकारान्तरेण** दिक्साधनम् । इष्टदिनं शके १८१५ चैत्रशुद्धपक्षपौर्णिमा शनिवासरं प्रकल्प्य तद्दिने दिक्साधनं क्रियते । अस्मिन्दिने प्रातःकाले सायनसूर्यः ११° । ३२′, क्रान्ति-रुत्तरा ४° । ३४′, **बागलकोटे**ऽक्षांशाः + १६° । १२′, आभ्यामग्राप्रापकद्वितीयकोष्ठकाल्लब्धा **अग्रा** + ४° । ४१′ उत्तरदिका । (१ एप्रिल १८९३) ।

अथ देशज्ञानम् ।

भूपृष्ठस्थस्य कस्यचिद्बिन्दोरक्षांशरेखांशयोर्ज्ञातयोर्भूपृष्ठे तद्बिन्दोः स्थानं निर्णेतुं शक्यते । अतस्तयोर्ज्ञानोपाया उच्यन्ते । तत्राऽऽदावक्षांशसाधनम्—

त्रिंशद्घट्यन्तरितध्रुवनक्षत्रोन्नतिद्वयस्यार्धम् ॥
अक्षप्रमाणमेतद्दक्षिणगोलार्धगे रवौ साध्यम् ॥ ६ ॥

दक्षिणगोलार्धगे रवौ यदा रात्रिमानं त्रिंशद्घटीभ्योऽधिकं भवेत्तदा प्रातःकाले सूर्योदयात्पूर्वं तुरीययन्त्रेणोत्तरध्रुवताराया उन्नतांशाः साध्याः । अस्मात्कालात्त्रिंशन्नाक्षत्रघटीभिः पुनरेकदा

ध्रुवोन्नतिरानेया। एतयोरैक्यस्यार्धमेवाक्षांशाः स्युः। ध्रुवताराया वास्तवध्रुवस्थानात्संप्रति १°। २०′ अन्तरे स्थितत्वात्त्रिंशद्घट्यन्तरितं वेधद्वयमवश्यम्। अन्यथा सकृद्वेधादेव निर्वाहोऽभविष्यत्। एवं **शतवारं** साधिताया ध्रुवोन्नतेर्मध्यममानं सूक्ष्मा ध्रुवोन्नतिर्भवितुमर्हति। परमत्र ध्रुवोन्नतौ **किरणवक्रीभवनसंस्कारः** करणीयः। तत्प्रकारमग्रे वक्ष्यामः। इदानीं **पलभासाधनमाह—**

अक्षज्या सूर्यगुणा १२ पलकोटीज्याहृता भवेत्पलभा॥
यद्वा विषुवद्दिवसे मध्याह्ने शङ्कुतलगतच्छाया॥ ७॥

स्पष्टोऽर्थः। **बागलकोटे**ऽक्षांशाः १६°। १२′, एषां भुजज्या ·२७९, कोटीज्या ·९६०। अत एवोक्तवद्गणिते कृते सति (१२ × ·२७९) ÷ ·९६० = ३·४९ अं. पलभा = ३ अङ्गु. २९ व्यङ्गु. अथवा द्वादशगुणाक्षस्पर्शज्या = (१२ × ·२९०५) = ३·४९ = ३ अङ्गु. २९ व्यङ्गु.।

अथवा विषुवद्दिवसे जलसमीकृतायां भूमौ समद्वादशखण्डाङ्कितां द्वादशहस्तप्रमाणां यष्टिं मूर्ध्वाधरं स्थिरीकृत्य पूर्वोक्तवत्साधितायां याम्योत्तररेषायां यस्मिन्क्षणे यष्टिच्छाया पतिष्यति तत्क्षणे छायाग्रे चिह्नं कृत्वा यष्टितलमध्याच्छायाग्रपर्यन्तं यदन्तरं तद्यष्ट्या प्रमाय पलभा साध्या। अत्र मापनसुखार्थमेकाङ्गुलदैर्ध्यं हस्तप्रमाणं कल्पितमिति बोध्यम्। यतो हस्तप्रमाणे दैर्घ्ये व्यङ्गुलज्ञानार्थं षष्टिर्भागाः सुखेन कर्तुं शक्यन्ते न तथाऽङ्गुलप्रमाणे दैर्घ्ये। एवमनेकेषु विषुवद्दिनेषु कृत्वा लब्धानां पलभानां मध्यममानं पलभार्थं ग्राह्यम्। अस्मिन्प्रकारे भूमेर्जलसमास्थितिरवश्या।

अथ रेखान्तरम्।

तत्राऽऽदौ **उज्जयिनी**रेखायाः संनिहितानि नगराण्याह—

जालंदरं जयपुरं किल सौम्यदेशे
टोकं च कोटपुरमुज्जयिनी च मध्ये।
याम्ये तु भास्करपुरं बिडनामधेयं
सोलापुरं तदनु बागलकोटपूश्च॥ ८॥
कर्णाटके हरिहरं मडिकेरिनाम्नी
मल्याळवारिधितटस्थितकल्लिकोटम्।
मेरूज्जयिन्युपरिगप्रथमाख्यरेखो-
पान्ते स्थिता भरतखण्ड इमा नगर्यः॥ ९॥

स्पष्टोऽर्थः। केतकी पृ. ३९ भरतखण्डालेख्यो विलोक्यः। तत्रेमानि दर्शितानि।

अथ रेखान्तरानयनम्।

एतन्नूतनमोत्तमैर्यन्त्रैरेव सुसाध्यम्। अन्यथा दुःसाध्यमेव।

प्रथमः प्रकारः—आदौ **नक्षत्राध्याये** कथितवदुज्जयिन्यामिष्टग्रामे च नक्षत्राणां याम्योत्तरलङ्घनं विलोक्य मध्यमकालः साध्यः। तत **उज्जयिन्यां** प्रवर्तितं कालयन्त्रं प्रयत्नेन स्वग्रामे नीत्वोभाभ्यां कालयन्त्राभ्यां दर्शितयोः कालयोर्यावान्भेदस्तावत्तद्ग्रामे रेखान्तरम्। एवं विलोममनुलोमं चासकृत्कृते यानि रेखान्तराणि लभ्यन्ते तेषां मध्यममानं सूक्ष्मं **रेखान्तरं** भवेत्। उज्जयिन्याः कालापेक्षयेष्टग्रामीयः कालो यद्यधिकस्तर्हि रेखान्तरं पूर्वम्, अन्यथा पश्चिममिति ज्ञेयम्।

द्वितीयः प्रकारः—विद्युच्छक्तिप्रेरिततन्तुयन्त्रमुखेण द्वौ पुरुषौ योजनशतांतरितावप्येक-समयावच्छेदेन परस्पराभ्यां सह संभाषितुं शक्नुतः। अत एवोज्जयिन्याः सकाशादिष्टग्रामपर्यन्तं यदि तन्तुयन्त्रमुपलब्धं तर्ह्युज्जयिन्यामिष्टग्रामे च स्थितौ पुरुषावेकस्मिन्नेव क्षणे स्वस्वस्थानिकं मध्यमकालं परस्परं निवेद्य **रेखान्तरं** साधयेताम्।

तृतीयः प्रकारः—उज्जयिन्यामिष्टग्रामे च चन्द्रग्रहणसमये मध्यमकालदर्शियन्त्रैः स्पर्श-मोक्षकालौ सूक्ष्मं निश्चित्य लब्धकालौ द्रष्टारौ परस्परं निवेदयेताम्। एवं यदन्तरमुपलभ्येत तदपि सूक्ष्मासन्नं **रेखान्तरं** स्यात्।

अथ कालप्रकाराः।

१ अर्धोदिते सवितरि जलपूर्णपात्रे घटिकापात्रं निधाय यः कालो मीयते स **सावनो** यज्ञादिकर्मसु विहितः।

२ उन्मण्डलासक्ते स्पष्टरवौ यः काल आरभ्यते स **स्पष्टः**।

३ पूर्वबिन्दुगते सायनमध्यमरवौ यः कालः आरभ्यते स **मध्यमः**।

४ पूर्वबिन्दुलग्ने क्रान्तिपाते यः काल आरभ्यते स **नाक्षत्रः, आर्क्षो वा**।

एवं चतुर्विधः कालः।

अथ लग्नसावनकालयोरेकतरे ज्ञातेऽन्यतरस्याऽऽनयनम्।

सावनघटिका निजरस ६ लवतुल्यपलैर्युता भवन्त्यार्क्ष्यः।
आर्क्ष्यश्च तैर्विरहिताः सावनघटिका भवेयुरिति सुगमम्॥ १०॥

लग्नपदे पार्श्वस्थामार्क्षघटीमथ च सायनं लग्नम्।
करणं मत्वा च तयोरन्यतरत्साधयेद्यथाभीष्टम्॥ ११॥

प्रातःकालिकसायनरवितुल्यं लग्नमेव तत्काले।
तेनैव साधनेनौदयिकीमार्क्षीं घटीं हरेत्प्रथमम्॥ १२॥

युक्त्वेष्टकालमौदयिकार्क्ष्यां नाड्यां तया हरेल्लग्नम्।
अयनांशवर्जितं तद्योग्यतरं भवति धर्मकार्येषु॥ १३॥

इष्टेन सायनेन च लग्नेनाऽऽर्क्षीं घटीं हरेत्तस्याः॥
औदयिकार्क्ष्यां नाड्यां विशोधितायां त्वभीष्टकालः स्यात्॥ १४॥

स्पष्टोऽर्थः। यथोक्तवत्करणेनाभीष्टलाभः स्यादेवेति।

इष्टग्रामे इष्टसावनकाले लग्नसाधनम्।

आदावभीष्टदिवसे औदयिकः सायनरविः साध्यः। स एवौदयिकं लग्नं भवति। ततः कोष्ठ-कोदरगतमौदयिकसायनरविमुपकरणं प्रकल्प्य पार्श्वस्थामौदयिकीमार्क्षघटीं नाम नाडीलग्नमानयेत्।

अनन्तरं लग्नानयनार्थं या इष्टघटिका उक्ताः स्युस्ताः सावनाश्चेत्ता उक्तवदार्क्ष्यः कार्याः। ततस्ता औदयिकार्क्षघट्यां युक्त्वा लब्धघटिकाभिः कोष्ठकाल्लग्नमानीय तस्मादयनांशान्विशोध-येत्। शेषं धर्मकार्येषु विहिततरं लग्नं स्यात्।

अथेष्टलग्नात्सावनकालानयनम्।

प्रातःकालिकसायनसूर्येण तथेष्टसायनलग्नेन (३।४) लग्नकोष्ठकादार्क्षघटिके लब्ध्वा तयो-रिष्टलग्नात्साधिताया आर्क्षघटिकाया औदयिकार्क्षीं घटीं विशोध्य शेषघटिकाः सावनाः कृत्वा **कालं** वदेत्।

अत्र श्रीमद्विश्वनाथदैवज्ञाविरचितं **ग्रहलाघवो**दाहरणं मद्रीत्या विवृणोमि, **येनोभयोः** पद्धत्योः सौक्ष्म्यं सौकर्यं च **सद्गणकाः** परीक्षेरन् ।

श्रीमद्विश्वनाथदैवज्ञमतेन शालिवाहननृपशकवर्षेषु १५३४ वैशाखशुक्लपूर्णिमायां सोमवासरे **श्रीकाशीक्षेत्रे**—

	सूर्योदये		
स्पष्टरविः	३५° ४२′·६	इष्टकालो द्युगतः	१० घ. ३० प.
*अयनांशाः	१८° १०′·०	अस्मिन्दिनार्धं	घ. १६　३३
पलांशाः उ.	+२५° २६′·७	पूर्वनतकालः	घ. ६　३
*पलभा अंगु.	५　४५·०	पूर्वनतकालांशाः	३६°　१८′
चरं　प. +	१　३३·०	सायनस्पष्टरविः	५४°　२′·७
		क्रान्तिः	+१९°　६·७

उदाहरणम्—पूर्वनिर्दिष्टदिवसे **श्रीकाश्यां** सूर्योदयाद्गतघट्यः १० पलानि ३०, अस्मिन्क्षणे लग्नं वद । अत्र सूर्योदये सायनस्पष्टरविः ५३° । ५२′·६ । इदमेव सूर्योदये लग्नम् । अनेन लग्नकोष्ठकात्साधित औदयि**कार्क्षकालः**, ७ घ. ३ प. ।

अत्रे**ष्टकालः** सावनः घ. १०·५, अस्य षष्ठांशः १·७५, एतैः पलैर्युतो जात आर्क्षः १० घ. ३२·० प. । एता औदयिकीषु ७ घ. ३ प. संयोज्य जनित इष्टकाल आर्क्षकालः १७ घ. ३५ प. । अनेन लग्नपद्मालब्धं सायनं लग्नं ११४°·३ अथवा ११४°।१८′। अस्मात् १५३४ शकीयायनांशान् १८° । १० विशोध्य जनितमिष्टकाले **लग्नं** ९६° । ८′ । अथवा ३ रा. ६ अं. ८ क. ।

अथेष्टदिवस **इष्टलग्नात्कालानयनस्योदाहरणम्**— उक्तदिवसे लग्ने ९६ अं० ८ क० मिते **श्रीकाश्यां** यावान्सावनकाल आसीत्तं वद । अस्मिन्दिवसे प्रातःकाले सायनरविः ५३° ५२′·६ तथा—इष्टं सायनलग्नं ११४° । १८′ । आभ्यां लग्नकोष्ठकात्पृथक्साधितौ नाक्षत्रकालौ क्रमेण ७ घ० ३ प०, तथा १७ घ० ३५ प० । अनयोर्द्वितीयात्प्रथमं विशोध्य लब्ध आर्क्षकालः १० घ० ३२ प०, । अयं घटीषष्ठांशमितैः पलैरूनितो जातः सावनः १० घ० ३० प० । एतावानेवेष्टलग्ने **काल** आसीत् ।

विशेषः— अत्र ग्रन्थे सायनरविलग्नयोरेकराशिस्थितयोरपि तथा रात्रौ लग्ने साध्यमाने सत्यपि गणितपद्धतिरेकैव ।

अथ वेधगणितम् ।

तत्राऽऽदौ दिगंशव्याख्या— (श्रीभास्कराचार्य कृता)—

" चक्रांशकाङ्के क्षितिजाख्यवृत्ते प्राक्स्वस्तिकाभीष्टदिशोस्तु मध्ये ।
येंऽशाः स्थितास्तेऽत्र दिगंशकाख्यास्तज्ज्याऽत्र दिग्ज्येत्यपरे विभागे " इति ॥

नतोन्नतकालनिर्णये मत्सूत्रम्—

द्युगतं विशोध्य कालं द्युदलाच्छेषेऽधिके नतं पूर्वम् ।
ऊने सत्यपरं तत्तत्कालांशज्यकाऽपि तद्विक्का ॥ १५ ॥

द्युगतकालो दिनार्धाद्बीजरीत्या विशोध्यः । शेषस्य धनत्वे शेषकालः पूर्वनतः, ऋणत्वे पश्चिमनतो भवति । नतघट्यः षड्गुणा अंशा भवन्ति । तज्ज्या तु शेषचिह्नवद्धनर्णम् ।

उदाहरणम्—द्युदले घ० १६।३३, द्युगतेन घ० १०।३० हीने शेषं घ० ६।३, इदं **पूर्वनतम्** ।

---

* सूक्ष्मरीत्या गणिते कृते— अंगु. ५।४५ पलभया २५°।३६′ अक्ष उपलभ्यते । तथा च ज्योतिर्गणितरीत्या ६४ पृष्ठाश्रयेण १५३४ शकीयायनांशाः १८° । २५′ । ५१″ । सूक्ष्माः प्राप्यन्ते । विश्वनाथोक्ता अयनांशाः सूक्ष्मासन्नाः । अयनगतेः स्थूलत्वात् ।

इदानीमक्षांशादिकानां भुजकोटीज्ययोर्धनर्णत्वमुच्यते—

भारतवर्षेऽक्षांशाः सौम्यास्तद्बाहुकोटिमौर्व्यौ स्वम्।
क्रान्तिज्या निजदिक्का तत्कोटीज्या सदा धनं ज्ञेया॥ १६॥

नतदोर्ज्यानिजदिक्का पञ्चेन्दू १५ ल्पे नते धनं कोटी।
अधिके सा ऋणचिह्ना दिग्लवदोर्ज्या भवेच्च निजदिक्का॥ १७॥

पूर्वकपाले दिग्लवकोटी स्वं पश्चिमे ऋणं भवति।
पूर्वोत्तरोन्नताः स्वं पश्चिमदाक्षिणनता ऋणं ज्ञेयाः॥ १८॥

धनर्णविवेकाय प्रस्तारः।

	भुजज्या		कोटीज्या
भारतवर्षेऽक्षांशानाम्	+		+
उत्तरक्रान्तेः	+		+
दक्षिणक्रान्तेः	−		+
पूर्वनतकालांशानाम्	+	पञ्चदशघट्य-ल्पे नते	+
पश्चिमनतकालांशानाम्	−		
पूर्वनतकालांशानाम्	+	पञ्चदशघट्य-धिके नते	−
पश्चिमनतकालांशानाम्	−		
उत्तरदिगंशानाम्	+	पूर्वकपाले	+
दक्षिणादिगंशानाम्	−		
उत्तरादिगंशानाम्	+	पश्चिमकपाले	−
दक्षिणादिगंशानाम्	−		

अथ वेधस्थानीया अक्षांशाः, वेधसमये ग्रहस्य नतकालः, क्रान्तिश्च, एतेषु ज्ञातेषु तस्योन्नतांशाः, नतांशाः, शङ्कुच्छाया, छायाकर्णश्च, इत्येषामानयनमुच्यते—

अक्षक्रान्तिभुजज्याघातोऽक्षक्रान्तिकालकोज्यानाम्॥
घातेन संयुतः स्यादुन्नतभागज्यकेष्टनतकाले॥ १९॥

तच्चापमुन्नतांशास्ते नवतेः शोधिता नतास्तेषाम्॥
स्पर्शच्छेदनरेखे अर्क १२ घ्ने भा श्रुतिश्श्रुतिर्भवतः॥ २०॥

अत्र कोज्येत्यनेन कोटीज्या ज्ञेया। **अस्यार्थः समीकरणैरधः प्रदर्श्यते—**

उन्नतांशज्या = (अक्षांशज्या × क्रान्तिज्या)
+ (क्रान्तिको०ज्या × अक्षको०ज्या × नतकालांशको०ज्या)

नतांशाः = ९०° − उन्नतांशाः। शङ्कुच्छाया = १२ × नतांशस्पर्शरेषा।

छायाकर्णः = १२ × नतांशच्छेदनरेषा।

उदाहरणम्—पूर्वोक्ते दिवसे पूर्वनतकाले च **श्रीकाश्यां** सूर्यस्योन्नतांशाञ्शङ्कुच्छायां छायाकर्णं च कथय।

अत्र ज्ञातराशयः।	धनुः	भुजज्या	कोटीज्या
काश्यामक्षांशाः	उ. + २५।३६	·४३२१	·९०१८
रविक्रान्तिः	उ. + १९। ७	·३२७५	·९४४८
पूर्वनतकालांशाः	+ ३६।१८	·५९२०	·८०५९

सूत्रप्रक्रिया।

(+·४३२१)×(+·३२७५) =+·१४१५१
(+·९०१८)×(+·९४४८)×(+·८०५९) =+·६८६६४
ज्याकोष्ठकाल्लब्धा उन्नतांशाः ५५°।५५′ उन्न०ज्या ·८२८१५

नतांशाः =(९०°−५५°।५५′)=३४°।५′
शङ्कुच्छाया =नतांशाः(३४°।५′), स्पर्शरेषा ·६७६६×१२= ८ अं. ८·४ प्र.
छायाकर्णः =नतांशाः(३४°।५′), छेदनरेषा १·२०७४×१२=१४ अं. २९·६ प्र.

इदानीं क्रान्त्यादिपूर्वोक्तेष भावेषु ज्ञातेषु दिगंशास्तथा शङ्कच्छायाया भुजः कोटी चेत्येषामानयनरीतिरुच्यते—

क्रान्तिज्याऽक्षोन्नत्योर्भुजशिञ्जिन्योर्वधेन किल रहिता।
अक्षांशोन्नतिकोट्योर्ज्याभ्यां भक्ता भवेद्दिगंशज्या॥ २१॥
नतकालांशभुजज्यापमलवकोटीज्ययोश्च यो घातः।
उन्नतिकोटीज्याहृत्सा स्यात्कोटीज्यका दिगंशानाम्॥ २२॥
दिग्भागज्यानिघ्नच्छायाऽङ्गुलमुखभुजा भवेत्तस्य।
वर्गोनाङ्गावर्गाद्यन्मूलं साऽङ्गुलात्मिका कोटी॥ २३॥

उपरितनपद्यत्रयनिष्ठार्थज्ञानमधस्तनैः समीकरणैः समीचीनं भवेत्।

$$\text{दिगंशज्या} = \frac{\text{क्रान्तिज्या} - (\text{अक्षज्या} \times \text{उन्नतांशज्या})}{\text{अक्षकोटीज्या} \times \text{उन्नतांशकोटीज्या}}$$

$$\text{दिगंशकोटीज्या} = \frac{\text{नतकालांशज्या} \times \text{क्रान्तिकोटीज्या}}{\text{उन्नतांशकोटीज्या}}$$

भुजः = छाया × दिगंशज्या। कोटी $=\sqrt{(\text{छाया}^2 - \text{भुजः}^2)}$

पूर्वसूत्रोक्तप्रक्रिया।

क्रान्तिज्या ... ... +०·३२७५
अक्षज्या +०·४३२१
उन्न०ज्या +०·८२८१
घातः +०·३५७८ ... ... +०·३५७८
अन्तरम् ... ... (अ) ... ... −·०३०३
अक्षको०ज्या +०·९०१८
उन्न०को०ज्या +०·५६०४
घातः +०·५०५४ (इ) ... ... + ·५०५४

$\frac{\text{अ}}{\text{इ}} = \frac{-०·०३०३}{+०·५०५४} = -·०५९९५$ = दिगंशज्या। अस्याश्चापो **दिगंशाः −३°।२६′।**

अथ **प्रकारान्तरेण** दिगंशानयनम्। द्वितीये समीकरणे ज्ञातराशीन्विन्यस्य गुणनभजनादि कार्यम्। यथा—

$$\text{दिगंशकोटीज्या} = \frac{(+·५९२०)\times(+·९४४८)}{+·५६०४} = ·९९८१८$$

दिगंशकोटीज्या = ·९९८१८। अस्याश्चापः ८६° । ३४′। इमं नवतेर्विशोध्य जनिता **दिगंशाः** ३° । २६′। चिह्नं तु पूर्वलब्धमेव

अत्र दिगंशानां कोटीतस्तेषां दिङ्न ज्ञायते। तज्ज्ञानार्थमुपाय उच्यते-- **भारतवर्षे** दक्षिणस्यां क्रान्त्यां दिगंशा दक्षिणाः। उदक्क्रान्त्यामक्षांशेभ्योऽधिकायां दिगंशा उदीच्याः। अल्पायां दिक्संशयः। दिक्संशय आद्यरीत्या दिगंशा गणनीयाः।

अथ शङ्कुच्छायाया भुजकोटीगणितस्योदाहरणम्—

भुजः = छाया × दिगंशज्या = (८·११९ अ) × (− · ०५९९५)

= − ० अङ्गु. २९·२ प्र. अङ्गु.

कोटी = $\sqrt{(८·११९^{२} - ·४८७^{२})}$ = ७·९७३ अं. = ७ अङ्गु० ५८ प्र. अङ्गु.

अथ सूर्यस्योन्नतांशा दिगंशाः क्रान्तिश्चेति राशित्रयान्नतकालानयनम्—

उन्नतिदिक्कोटीज्याघातोऽपमकोटिशिञ्जिनीभक्तः।
लब्धिः स्यान्नतकालोद्भवभागानां भुजज्यका सूक्ष्मा ॥ १४॥

समीकरणेनार्थदर्शनम्।

$$\text{नतकालांशज्या} = \frac{(\text{उन्नतांशकोटीज्या}) \times (\text{दिगंशकोटीज्या})}{\text{क्रान्तिकोटीज्या}}$$

उदाहरणम्—पूर्वज्ञापकस्योन्नतांशदिगंशक्रान्तिभ्यो नतकालमानय। अत्र ज्ञातराशयः, उन्नतांश (+ ५५° । ५५′) कोटीज्या, + ·५६०४। दिगंश (− ३° । २६′) कोटीज्या, ·९९८२। क्रान्ति (+ १९° । ७′) कोटीज्या, + ·९४४८।

$$\text{नतकालांशज्या} = \frac{(+·५६०४) \times (+·९९८२)}{+·९४४८} = ·५९२१$$

·५९२१ अस्याश्चापः ३६° । १८′ नतकालांशा एते षड्भिर्भक्ता जातो **नतकालः** ६ घ० ३ प०। अयं धनत्वात्पूर्वः।

वेधकाले सूक्ष्मनतकालानयनम्।

पूर्वोक्ते गणिते सूर्यस्य द्युदलाद्यो नतकालः साधितः स नातिसूक्ष्मः, द्युदलस्य प्रत्यहं भिद्यमानत्वात्। अत एव सूक्ष्मनतकालानयनरीतिरुच्यते।

नक्षत्राध्यायस्य द्वितीयकोष्ठकस्य साहाय्येन वेधदिनीयं मध्यमौदयिकार्क्षकालमानीयं तस्मात्पञ्चदशघटीषु वर्जितासु यच्छेषं स औदयिको याम्योत्तरवृत्तलग्नो **विषुवकालः** स्यात्। अस्मिन्विषुवकालेऽभीष्टं वेधकालं तथा तस्मिञ्जायमानां विषुवगतिं च संयोज्य वैधकालिकं याम्योत्तरलग्नविषुवकालमानयेत्। अस्मादभीष्टग्रहस्य ताराया वा वैधकालिकविषुवकाले विशोधिते शेषः सूक्ष्मो नतकालः स्यात्। शेषं गणितं प्रागुक्तवत्कार्यम्।

इति वेधगणितम्।

अथ संधिप्रकाशः।

अत्रोन्नतांशगणितप्रसङ्गेन संध्याप्रकाशगणितमुच्यते। सूर्यास्तमारभ्य सूर्यस्य क्षितिजाधस्तना **नतांशा** यावत् १८° भवन्ति तावत्कालपर्यन्तं योऽवधिः स **संध्याकाल** इत्युच्यते। एवं

सूर्योदयात्पूर्वं तावानेव **प्रातःसंध्याकाल**स्तिष्ठति । संधिप्रकाशावधिरेकस्मिन्स्थलेऽपि सर्वदा न समः । विषुवसमीप*स्थिते सवितरि स प्रायः सर्वत्राल्पिष्ठो वर्तते । अभीष्टे दिवसेऽभीष्टे ग्रामे संधिप्रकाशावधिरिष्टश्चेत् अग्रिमसूत्रे—

$$\text{नतकालकोनको०ज्या} = \frac{\text{उन्नतांशज्या} - (\text{क्रान्तिज्या} \times \text{अक्षज्या})}{\text{क्रान्तिको०ज्या} \times \text{अक्षको०ज्या}}$$

उन्नतांशज्यां शून्यं मत्वा रविक्रान्त्याऽक्षांशैश्च समीकरणमुत्थाप्य नतकालः साध्यः । स **सूर्योदय**कालो भवति । पुनरेकदोन्नतांशज्यां – ·३०९ मितं मत्वा पूर्ववन्नतकालः साध्यः । सोऽ**रुणोदय**कालो भवति । सूर्यारुणयोरुदयकालयोरस्तकालयोर्वा यदन्तरं तावानेन तद्दिने **संधिकालः** स्यात् । (– ·३०९ इयं – १८ अंशानां ज्या ज्ञेया) ।

अथ महत्तमसंधिकालगणितम् ।

०° । ४८°·५ एतदवधिस्थेष्वक्षांशसमदिक्कया परमरविक्रान्त्या पूर्वोक्तसमीकरणमुत्थाप्यम् । ४८°·५, ६६°·५ एतदवधिस्थितेष्वक्षांशविरुद्धदिक्कया परमरविक्रान्त्योत्थाप्यम् । ६६°·५, ८१° एतदवधिस्थितेष्वक्षकोटीमितया विरुद्धदिक्कया परमरविक्रान्त्योत्थाप्यम् । ८१° अक्षांशानामग्रे यद्दिने विरुद्धदिक्का क्रान्तिरक्षकोटीसमा भवति तद्दिनमारभ्य यद्दिने (१८° – अक्षकोटी), एतावती भवति तद्दिनपर्यन्तं सततं संधिकालो वर्तते ।

$$\text{लघुतमसंधिकालकोनार्धज्या} = (९)\ \text{नवांशज्या} \div \text{अक्षकोटीज्या}$$

$$\text{लघुतमसंधिकाले सूर्यक्रान्तिज्या} = -\ (९)\ \text{नवांशस्पर्शज्या} \times \text{अक्षज्या}$$

अथ किरणवक्रीभवनम् ।

अयं विषयो ** **ज्योतिःशास्त्रसुबोधिन्या**मस्मत्तातपादैर्विस्तरेण व्याख्यात एव । अत्र तद्गणितमात्रमुच्यते । तुरीययन्त्रेणोपलब्धाः सूर्यादीनामुन्नतांशाः किरणानां वक्रीभवनाद्वास्तवमानादधिका उपलभ्यन्ते । परं दिगंशा अविकृतास्तिष्ठन्ति । अत एव वेधोपलब्धनतांशा अनेन संस्कारेण युताश्चेदथवोन्नतांशा रहिताश्चेत्तेषां **वास्तवं** मानं सिध्यति ।

उदाहरणम्—उदगयनप्रवृत्तिसमये **श्रीकाश्यां** सूर्यस्य नतांशाः ४८° । ४६′ उपलब्धास्तर्हि तत्राक्षांशाः कति तद्वद । अत्र विद्धनतांशाः ४८° । ४६′, एभिः किरणवक्रीभवन (५) कोष्ठकात्संस्कार एककलामितो लब्धस्तेन सहिता विद्धनतांशा जाता वास्तवाः ४८° । ४७′ । एभ्यः सूर्यक्रान्तिं २३° । २७′ विशोध्य जनितं शेषं २५° । २०′ **श्रीकाश्यामक्षांशाः** ।

---

* भारतवर्षे काश्मीरदेशे विषुवदिवसात्पूर्वं दशमे दिवसे लघुतमः संधिकालः । सेतुबन्धे रामेश्वरे द्वितीये दिवसे । अनयोर्मध्ये स तारतम्येन ज्ञेयः ।

** श्रीरामकृष्णकेतकराः । (इ. स. १८१४–१८७०) । (शक: १७३६–१७९२) । वासस्थलं प्रतिष्ठानक्षेत्रम् । तत्र वेदव्याकरणज्योतिषाध्ययनेन प्रफुल्लाः रुद्रवीणाध्ययनाय तंजावरं प्रस्थिताः । मार्गाक्रमणे शके १७६५ भाद्र. १५ शुक्रे सायंकाले नृगुंदं प्रत्यागताः । वीणाध्ययनव्यवस्था तत्रैव कृता । नृगुंदसंस्थानाधिपैः स्वविद्वत्सभायां ते अग्रत्वेन समादृताः । इ. स. १८५७ वर्षीयनृगुंदराज्यविप्लवे सति “ मदाश्रितमिदं विद्वद्रत्नं श्रीमद्भिः परिपाल्यं ” इति लिखितसंदेशः श्रीरामदुर्गसंस्थानाधिपेभ्यः प्रेषितः । तदनंतरं ते रामदुर्गं गताः (१) ज्योतिःशास्त्रसुबोधिनी शुद्धमतप्रचारिणी संस्कृतगद्यमया (२) संस्कृतपद्यमयो भूगोलः (३) संस्कृतपद्यमयः खगोलः (४) श्री केरोपंतकृतग्रहसाधनस्य संस्कृतपद्यमयं रूपान्तरं (५) सिद्धांतकौमुद्या महाराष्ट्ररूपान्तरं चैते तेषां ग्रंथा अद्याप्यप्रसिद्धा मन्निकटे विलसन्ति ।

अथान्यदुदाहरणम्—जयपुरे शकवर्षे १८०२ **अगस्त्यः** १०°। ३१′ दक्षिणक्षितिजादुन्नतो दृष्टस्तार्हि तत्रत्यानक्षांशान्वद। अत्र दृश्या उन्नतांशाः १०°। ३१′ नवतेर्विशोधिता जाता दृश्यनतांशाः ७९°। २९′। एते किरणवक्रीभवनसंस्कारेण ५′ युता जाता वास्तवाः ७९°। ३४′। एभ्योऽगस्त्यक्रान्तिं ५२°। ३८′ विशोध्य जनिता **जयपुरे**ऽक्षांशाः २६°। ५६′।

किरणवक्रीभवनं ८०° नतांशावधि प्रायो नतांशस्पर्शरेषातुल्यकलामितं तिष्ठति। तदग्रेऽनियतप्रमाणेन वर्धते।

इति किरणवक्रीभवनम्।

अथ सिद्धान्तशिरोमणौ श्रीभास्कराचार्यैर्विरचितेषु दिग्देशकालविषयकप्रश्नेषु केषांचिन्मुख्यानां भङ्ग उच्यते।

प्रश्नः १

“भाकर्णे खगुणा ३० ङ्गुले किल सखे याम्यो भुजस्त्र्यङ्गुलोऽ-
न्यस्मिन्पञ्चदशाङ्गुलेऽङ्गुलमुदग्बाहुश्च यत्रेक्षितः।
अक्षाभां वद तत्र षट्कृतगजै ८४६ र्यद्वाऽपमज्यां समां
दृष्ट्वेष्टामनयोः श्रुतिं च सभुजां द्राग्ब्रूहि मेऽक्षप्रभाम्” ॥ १ ॥ इति।

कस्मिंश्चिद्ग्रामे दिवसे च केनचित्पुरुषेण दिक्साधनं कृत्वा ज्ञाता राशयः—

एकस्मिन्समये भाकर्णः ३० अङ्गु०, याम्यभुजः ३ अङ्गु०।
अन्यस्मिन्समये भाकर्णः १५ अङ्गु०, सौम्यभुजः १ अङ्गु०।

ज्ञेयो राशिः = पलभा।

अत्र ज्ञातज्ञेयराशिसंबन्धदर्शि समीकरणम्।

$$\text{अग्रा} = \frac{\text{क्रान्तिज्या}}{\text{अक्षकोटिज्या}} = \frac{\text{पलभा} + \text{भुजः}}{\text{भाकर्णः}}$$

अस्मिन्समीकरणे वेधद्वयान्तःपातिकालस्याल्पत्वात्सूर्यक्रान्तिमग्रां च स्थिरां कल्पयेत्। ततः पूर्वोक्तसमीकरणस्य तृतीये पक्षे ज्ञातराशिषु स्वस्वस्थानेषु न्यस्तेषु स्थिराग्राया द्विविधं मानमुपलभ्यते। अतस्ताभ्यां समाभ्यां भवितव्यम्। अत्र पकारः पलभायाः प्रतिनिधिः।

$$\frac{\text{प} + ३}{३०} = \frac{\text{प} - १}{१५}$$

एतौ समपक्षौ समच्छेदीकृत्य च्छेदगमे कृते जातौ पक्षौ

$$\text{प} + ३ = २\text{प} - २$$

अस्य समशोधनाल्लब्धं पलभामानं ५ अङ्गुलानि।

अथ द्वितीयोदाहरणे—

ज्ञातराशयः भाकर्णः ३० अङ्गु०। याम्यभुजः ३ अङ्गु०। क्रान्तिज्या ८४६′।

ज्ञेयराशिः = पलभा।

अत्राऽऽचार्यैर्निर्दिष्टं यत्क्रान्तिज्यामानं ८४६′ तत् ३४३८′ मितत्रिज्यायां वास्तवम् । अस्मिन्ग्रन्थे सर्वत्र त्रिज्या रूपमिताऽङ्गीकृताऽस्ति । अतस्त्रैराशिकेन रूपमितमिज्यायां लब्धं क्रान्तिज्यामानं ०·२४६ ।

अत्र पूर्ववत् प-कारं पलभां प्रकल्प्य ज्ञातराशीन्यथास्थानं विन्यस्य जनितौ समपक्षौ—

$$\frac{\cdot २४६}{\text{अक्षकोटीज्या}} = \frac{प + ३}{३०}$$

परम्, $$\text{अक्षांशकोटीज्या} = \frac{१२}{\sqrt{(प^२ + १४४)}}$$

अतः, $$\frac{\cdot २४६ \sqrt{(प^२ + १४४)}}{१२} = \frac{प + ३}{३०}$$

एतौ पक्षौ समच्छेदीकृत्य च्छेदगमे कृते जातौ समपक्षौ--

$$१\cdot २३० \sqrt{(प^२ + १४४)} = २ प + ६$$

अर्धितौ, $$\cdot ६१५ \sqrt{(प^२ + १४४)} = प + ३$$

वर्गितौ, $$\cdot ६१५^२ (प^२ + १४४) = प^२ + ६ प + ९$$

$$\cdot ३७८ प^२ + ५४\cdot ५ = प^२ + ६ प + ९$$

समशोधनात्, $$प^२ - \cdot ३७८ प^२ + ६ प = ५४\cdot ५ - ९$$

$$\cdot ६२२ प^२ + ६ प = ४५\cdot ५$$

इदं वर्गसमीकरणम् । अस्य मध्यमाहरणाय श्रीधराचार्यकृतसूत्रम्--

" चतुराहतवर्गसमै रूपैः पक्षद्वयं गुणयेत् ।
अव्यक्तरूपवर्गैर्युक्तौ पक्षौ ततो मूलम् ," इति ।

अत्र चतुराहतवर्गरूपाणि २·४८८ । अतः--

$$२\cdot ४८८ (\cdot ६२२ प^२ + ६ प) = २\cdot ४८८ \times ४५\cdot ५$$

$$१\cdot ५४७५३६ प^२ + १४\cdot ९२८ प = ११३\cdot २०४०$$

$$१\cdot ५४७५३६ प^२ + १४\cdot ९२८ प + ३६ = १४९\cdot २०४०$$

वर्गमूलं, $$१\cdot २४४ प + ६ = १२\cdot २१५$$

समशोधनात्, $$१\cdot २४४ प = ६\cdot २१५$$

तस्मात् $$प = ५$$ आसन्ना

प्रश्नः २ ।

" दिनकरे करिवैरिदलास्थिते नरसमा नरभाऽपरदिङ्मुखी ।
भवति यत्र बटो पुटभेदने कथय तान्त्रिक तत्र पलप्रभाम् " ॥ २ ॥ इति ।

अत्र करिवैरिदले नाम सायनसिंहराशौ १५° भागेषु । अतः सायनसूर्यभोगः १३५° इत्युक्तं भवति यदा छाया शङ्कुसमा तदोन्नतांशाः ४५° । अतोऽस्मिन्प्रश्ने--

ज्ञातराशयः ।

सायनरविः १३५°, अस्य क्रान्तिः + १६° १०′, ज्या + ·२८१२ ।
छायाङ्गुलानि १२, उन्नतांशाः + ४६ ०, ज्या + ·७०७१ ।

ज्ञेयराशिः = पलभा।

अथास्य प्रश्नस्योत्तरम्।

समवृत्तगते सूर्ये दिगंशानामभावतः।
उन्नतांशज्यया भक्ता क्रान्तिज्याऽक्षज्यका भवेत् ॥ १५ ॥

अस्य समीकरणेनार्थव्यक्तिः—

$$\text{समवृत्तगते सूर्येऽक्षज्या} = \frac{\text{क्रान्तिज्या}}{\text{उन्नतांशज्या}};$$

अस्मिञ्ज्ञातराशीन्स्वस्वस्थाने विन्यस्य समीकरणे उत्थापिते लब्धाऽक्षज्या, + ·३९७७।

$$\frac{+\cdot२८१२}{+\cdot७०७१} = +\cdot३९७७;$$ अस्याश्चापः २३°। २६′ अक्षांशाः।

$$\text{परं तु पलभा} = \frac{\text{१२ अक्षज्या}}{\text{अक्षकोटीज्या}};$$ अक्षकोटिज्या = ·९१७५।

$$\text{तस्मात्} \frac{\cdot३९७७ \times १२}{\cdot९१७५} = ५\cdot२ \text{ अङ्गु· पलभा।}$$

प्रश्नः ३।

"यत्र त्रिवर्ग ९ प्रमिता पलाभा तत्र त्रिनाडीप्रमितं चरं स्यात्।
यदा तदाऽर्कं यदि वेत्सि विद्वन्सांवत्सराणां प्रवरोऽसि नूनम्" ॥ ३ ॥ इति।

अत्र ज्ञातराशयः। पलभा ९। चरांशाः १८। चरज्या ·३०९।

ज्ञेयराशिः = सूर्यः।

अथास्योत्तरम्।

अर्क १२ घ्नचरभुजज्या पलभाहृत्स्पर्शाशिञ्जिनी क्रान्तेः।
तच्चापः क्रान्तिः स्यात्तस्याः सिध्यति चतुर्विधः सूर्यः ॥ १६ ॥

उक्तवत्करणेन—

$$\text{क्रान्तिस्पर्शरेषा} = \frac{\text{१२ चरज्या}}{\text{पलभा}} = \frac{१२ \times \cdot३०९०}{९}$$

$$= \cdot४१२० \text{ अस्याश्चापः क्रान्तिः } २२^\circ।२४'$$

अस्याः क्रान्तेर्गोलादिग्भेदाभ्यां सायनसूर्यस्य चतुर्विधानि स्थानानि ७३°, १०७°, २५३°, २८७° इत्येतानि सिध्यन्ति।

प्रश्नः ४।

"मार्तण्डः सममण्डलं किल यदा दृष्टः प्रविष्टः सखे
काले पञ्चघटीमिते दिनगते यद्वा नते तावति।
केनाप्युज्जयिनीगतेन तरणेः क्रान्तिं तदा वेत्सि चे-
न्मन्ये त्वां निशितं सगर्वगणकोन्मत्तेभकुम्भाङ्कुशम्" ॥ ४ ॥ इति।

तत्राऽऽदौ नतकालात्क्रान्तिज्ञानम्। तद्यथा—

अत्र ज्ञातराशयः ।

नतकालः ५ घट्यः, नतकालांशाः ३०° । ०′, कोटीज्या – ·०८६६०
उज्जयिन्यां ... ... अक्षांशाः २३° । ९′, को० स्पर्शज्या २·३३८८

ज्ञेयराशिः = क्रान्तिः ।

अथास्य प्रश्नस्योत्तरम् ।

अक्षकोटीस्पर्शगुणो नतकालांशकोज्यया ।
भक्तः स्यात्क्रान्तिकोस्पर्शरेषा क्रान्तिश्च तद्धनुः ॥ २७ ॥

उक्तवत्करणेन—

$$\text{क्रान्तिको० स्पर्शरेषा} = \frac{\text{अक्षको० स्पर्शरेषा}}{\text{नतकालकोणकोटीज्या}} = \frac{२·३३८८}{·८६६}$$

$$= २·७०१७ \text{ अस्याश्चापः } २०° । १९′ \text{ क्रान्तिः}$$

इदानीं पूर्वप्रश्नोक्तदिनगतकालात्क्रान्तिज्ञानमुच्यते । सममण्डलगते सूर्ये एकं गोलीयं त्र्यस्रमुत्पद्यते तस्मिन्—

उन्नतकालांशमिता भूः । इयं **ब**संज्ञका भवतु ।
उन्नतांशमित एको भुजः, **अ**संज्ञकः । अस्याभिमुखः
कोण **आ**संज्ञकोऽक्षांशकोटीप्रमितस्तिष्ठति ।
अपरो भुजः **क**संज्ञकोऽग्रासमः । अस्याभिमुखः कोणः
कासंज्ञकोऽक्षांशसमः । ईदृशा भावास्तिष्ठन्ति ।

इदानीं गोलीयत्र्यस्रेऽवयवानां मिथःसंबन्धदर्शिन्याः सरणे रूपान्तरेण स्वाभीष्टं सूत्रमुत्पादनीयं तयथा—

गोलीयत्र्यस्रावयवसंबन्धदर्शिका मूलसरणी ।

$$(\text{को०स्प. अ.} \times \text{भु. ब}) = (\text{स्प. का} \times \text{भु. का}) + (\text{को. ब} \times \text{को. का})$$

$$\text{अतः को० स्प. अ} = \frac{(\text{स्प. का} \times \text{भु. का}) + (\text{को. ब} \times \text{को. का})}{\text{भु. ब}}$$

अनन्तरं को. **का**पदेन द्वितीयं पक्षमादौ भक्त्वा पश्चात्संगुण्य लब्धं समीकरणम् ।

$$\text{को० स्प. अ} = (\text{स्प.}^{२}\,\text{का} + \text{को. ब})\,\frac{\text{को. का}}{\text{भु. ब}}$$

पण्डितबापूदेवशास्त्रिभिरस्य समीकरणस्य रूपान्तरं विधायाक्ष**क्षेत्रावयवात्मिका** भङ्गसरणी विरचिता । अतस्तां पूर्वस्मात्समीकरणादुत्पादयामः । अक्षक्षेत्रेभ्योऽग्रिमाणि समीकरणान्युत्पद्यन्ते—

$$\text{को. स्प. अ} = \frac{\text{समभा}}{१२} \qquad \text{स्प. का} = \frac{\text{पलभा}}{१२}$$

$$\text{को. का} = \frac{१२}{\text{पलकर्णः}} \qquad \text{पलकर्णः} = \sqrt{\text{पलभा}^{२} + १४४}$$

$$\text{कोटीज्या} = \text{त्रिज्या} - \text{उत्क्रमज्या}$$

एतेषु पूर्वस्मिन्समीकरणे स्वस्वस्थानेषु स्थापितेषु जातम्—

$$\frac{\text{समभा}}{१२} = \left(\frac{\text{पलभा}^{२}}{१४४} + \frac{\text{त्रिज्या} - \text{उत्क्रमज्या. ब}}{\text{त्रिज्या}}\right)\frac{१२}{\text{पलकर्णः}} \times \frac{\text{त्रिज्या}}{\text{उन्नतकालज्या}}$$

$$\text{समभा} = \left(\frac{\text{पलभा}^2}{१४४} + १ - \frac{\text{उत्क्रमज्या. ब}}{\text{त्रिज्या}} \right) \times \frac{१४४ \times \text{त्रि.}}{\text{पलकर्णः} \times \text{उन्नतकालज्या}}$$

$$= \frac{\frac{\text{अक्षकर्णः}^2 \times \text{त्रिज्या} \times १४४}{१४४} - \frac{१४४ \text{ उत्क्र० ब} \times \text{त्रिज्या}}{\text{त्रिज्या}}}{\text{पलकर्णः} \times \text{उन्नतकालज्या}}$$

$$= \frac{\text{त्रिज्या} \times \text{अक्षकर्णः}^2 - १४४ \text{ उत्क्रमज्या ब}}{\text{अक्षकर्णः} \times \text{उन्नतकालज्या}}$$

एवं **पण्डितबापूदेव**विरचिताऽधस्तनी भङ्गसरण्युपपन्ना--

" **त्रिज्यानिघ्नादक्षकर्णस्य** वर्गाद्वेदेन्द्र १४४ घ्नीमुन्नतासूत्क्रमज्याम् ।
त्यक्त्वा शेषादुन्नतासुज्यकाक्षश्रुत्याहत्याप्तं समाख्यप्रभा स्यात् ॥
तस्याः समनरः साध्यस्तस्मादक्षभया हतात् ।
पलकर्णेन लब्धस्य चापः क्रान्तिर्भवेत्सकृत् " ॥

ज्यात्मिकया मत्सरण्या गणिते कृत **उज्जयिन्यां** पञ्चमघटीमिते दिनगते काले यस्मिन्दिने **सूर्यः सममण्डलं** प्रविष्टो दृष्टस्तस्मिन्क्षणे सूर्यस्योन्नतांशाः २७°। २५′ उपलभ्यन्ते । सममण्डलोन्नतांशज्याऽक्षज्यया गुणिता क्रान्तिज्या स्यात् । अतो लब्धा **क्रान्तिरु**त्तरा १०°। १६′ ।

प्रश्नः ५ ।

" मार्तण्डे सममण्डलं प्रविशति च्छाया किलाष्ट्य १६ ङ्गुला
दृष्टाऽष्टासु घटीषु कुत्रचिदपि स्थाने कदाचिद्दिने ॥
अर्कक्रान्तिगुणं तदा वदसि चेदक्षप्रभां तत्र च
त्रिप्रश्नप्रचुरप्रपञ्चचतुरं मन्ये त्वदन्यं न हि " ॥ इति ।

एतत्प्रश्नभङ्गविधौ पूर्वोक्ताऽक्षक्षेत्रात्मिका सरणी रूपान्तरेणोपयोक्तुं शक्यते । यथा--

$$\text{समभा} = \frac{\text{त्रिज्या} \times \text{अक्षकर्णः}^2 - १४४ \text{ उन्नतासूत्क्रमज्या}}{\text{अक्षकर्णः} \times \text{उन्नतासुज्या}}$$

राशीनां स्थलान्तरात्--

$$\text{अक्षकर्णः}^2 - \frac{\text{उन्नतासुज्या} \times \text{समभा}}{\text{त्रिज्या}} \text{ अक्षकर्णः} = \frac{१४४ \text{ उन्नतासूत्क्रमज्या}}{\text{त्रिज्या}}$$

इदं वर्गसमीकरणम् । अस्य मध्यमाहरणात् ।

$$\text{अक्षकर्णः} = \sqrt{\frac{१४४ \text{ उन्नतासूत्क्रमज्या}}{\text{त्रिज्या}} + \frac{\text{उन्नतासुज्या}^2 + \frac{१}{४} \text{समभा}^2}{\text{त्रिज्या}^2}} + \frac{\text{उन्नतासुज्या} \times \frac{१}{२} \text{समभा}}{\text{त्रिज्या}}$$

अतः सिद्धा **ज्योतिर्विद्बापूदेवशास्त्रिणा**मधस्तनी भङ्गसरणी--

"अत्रोन्नतासूत्क्रममौर्विकाघ्नत्रिज्याहतो द्वादशवर्ग आद्यः ।
समप्रभार्धेन हतोन्नतासुज्यका त्रिभज्याविहृतान्यसंज्ञः ॥
अन्यस्य वर्गेण युताद्यदाद्यान्मूलं तदन्यान्वितमक्षकर्णः ।
ततोऽक्षभाया अपि चाप(?)मस्य ज्ञानं द्रुतं स्याद्गणकाग्रणीनाम् " ॥ इति ।

८४	९६	६	३९	११	३८	१६	३८	२१	३८	२६	३८	३१	३७	२७६	२६४
९०	९०	+ ६	३२–	+११	३२–	+१६	३२–	+२१	३२–	+२६	३२–	+३१	३२–	२७०	२७०
		३०°		३५°		४०°		४५°		५०°		५५°		विषुवांशाः वा सायनभोगः	
		दक्षिणक्रान्तिरथवा, उत्तरशरः													

कोष्ठकः ९

विषुवक्रान्तिभ्यां शरानयनं तथा सायनभोगशराभ्यां क्रान्त्यानयनम्।

अत्र भोगशराभ्यां साधितायाः क्रान्तेर्दिग्विपर्यासः कार्यः।

उपकरणम् = एकतरं युगुलम्।

विषुवांशाः वा सायनभोगः		उत्तरक्रान्तिरथवा दक्षिणक्षरः													
		६०°		६५°		७०°		७५°		८०°		८५°	९०°		
अं.	अं.	अं.	क.	अं.	क.	अं.	क.	अं.	क.	अं.	क.	अं.	क.	अं.	अं.
२७०	२७०	+८३	२८-	+८८	२८-	+८६	३२-	+८१	३२-	+७६	३२-	+७१	३२-	९०	९०
२७६	२६४	८२	५६	८७	६	८५	५३	८१	१९	७६	२७	७१	३०	८४	९६
२८२	२५८	८१	३४	८४	५१	८४	२३	८०	४१	७६	१०	७१	२४	७८	१०२
२८८	२५२	७९	३९	८२	२९	८२	३२	७९	४५	७५	४४	७१	१४	७२	१०८
२९४	२४६	७७	३०	८०	६	८०	३२	७८	३५	७५	८	७१	०	६६	११४
३००	२४०	७५	१२	७७	४३	७८	३०	७७	१४	७४	२५	७०	४३	६०	१२०
३०६	२३४	७२	५०	७५	२१	७६	२७	७५	४८	७३	३६	७०	२२	५४	१२६
३१२	२२८	७०	२८	७३	१	७४	२५	७४	१७	७२	४२	६९	५९	४८	१३२
३१८	२२२	६८	४	७०	४४	७२	२३	७२	४५	७१	४४	६९	३३	४२	१३८
३२४	२१६	६५	४२	६८	२९	७०	२४	७१	१२	७०	४४	६९	६	३६	१४४
३३०	२१०	६३	२२	६६	१६	६८	२७	६९	३९	६९	४२	६८	३७	३०	१५०
३३६	२०४	६१	५	६४	८	६६	३२	६८	७	६८	४०	६८	७	२४	१५६
३४२	१९८	५८	५१	६२	३	६४	४१	६६	३६	६७	३८	६७	३५	१८	१६२
३४८	१९२	५६	४२	६०	२	६२	५४	६५	९	६६	३६	६७	५	१२	१६८
३५४	१८६	५४	३७	५८	६	६१	११	६३	४४	६५	३५	६६	३३	६	१७४
३६०	१८०	५२	३६	५६	१४	५९	३२	६२	२३	६४	३६	६६	२	३६०	१८०
६	१७४	५०	४१	५४	२८	५७	५८	६१	४	६३	३९	६५	३२	३५४	१८६
१२	१६८	४८	५१	५२	४८	५६	२८	५९	५०	६२	४५	६५	३	३४८	१९२
१८	१६२	४७	८	५१	१२	५५	४	५८	४०	६१	५३	६४	३४	३४२	१९८
२४	१५६	४५	३२	४९	४३	५३	४६	५७	३५	६१	५	६४	८	३३६	२०४
३०	१५०	४४	१	४८	२०	५२	३३	५६	३४	६०	१९	६३	४२	३३०	२१०
३६	१४४	४२	३८	४७	५	५१	२६	५५	३९	५९	३७	६३	१८	३२४	२१६
४२	१३८	४१	२३	४५	५७	५०	२६	५४	४८	५८	५९	६२	५७	३१८	२२२
४८	१३२	४०	१६	४४	५६	४९	३२	५५	२	५८	२५	६२	३७	३१२	२२८
५४	१२६	३९	१८	४४	३	४८	४५	५३	२३	५७	५६	६२	२०	३०६	२३४
६०	१२०	३८	२८	४३	१७	४८	५	५२	४९	५७	३१	६२	६	३००	२४०
६६	११४	३७	४६	४२	४०	४७	३१	५२	२२	५७	१०	६१	५४	२९४	२४६
७२	१०८	३७	१३	४२	१०	४७	६	५२	०	५६	५३	६१	४४	२८८	२५२
७८	१०२	३६	५०	४१	४८	४६	४७	५१	४४	५६	४१	६१	३७	२८२	२५८
८४	९६	३६	३७	४१	३६	४६	३६	५१	३५	५६	३५	६१	३४	२७६	२६४
९०	९०	+३६	३२-	+४१	३२-	+४६	३२-	+५१	३२-	+५१	३२-	+६१	३२-	२७०	२७०
		६०°		६५°		७०°		७५°		८०°		८५°	९०°	विषुवांशाः वा सायनभोगः	
		दक्षिणक्रान्तिरथवा, उत्तरशरः													

अन्तरयोः सर्वाः संख्याः + ६६° ३२′ − मिताः

अथ सप्तमः कालविपरिणामाध्यायः

अभीष्टायां तिथौ तारिखानयनम् ।

तत्राऽऽदावभीष्टशकवर्षे इस्वीवर्षज्ञानं तज्जातिनिर्णयश्च ।

अष्टाद्यान्वित ७८ शालिवाहनशकः स्यादिस्विवर्षं च त-
न्निःशेषं यदि भज्यते जलधि ४ भिः प्राचीनरीत्या प्लुतम् ।
भूपञ्चाद्रिकु १७५१ हायनाच्च परतोऽर्वाचीनरीतिस्तया
दीर्घत्वं न च वत्सरे शततमेऽभाज्ये खशून्याब्धि ४०० भिः ॥ १ ॥

शालिवाहनशकवर्षमष्टसप्तत्या युतमिस्वीशकवर्षं भवति । **यदिस्वीशकवर्षं** ४ भिर्निःशेषं विभज्यते तद्वर्षं **प्राचीनरीत्या प्लुत**संज्ञकं भवति । प्लुते वर्षे **फेब्रुआरी**मासे २९ दिवसाः साधारणे वर्षे तु २८ दिवसा इति नियमः । इयं प्राचीना रीतिराङ्ग्**लदेशे** इस्वीशके १७५१ वर्षपर्यंतं प्रचचार । इस्वीशके १७५१ वर्षे **आङ्ग्लैर्नवीना** रीतिरङ्गीकृता । प्लुतवर्षनिर्णये नवीनरीतावेको विशेषोऽस्ति । यच्छततमं वर्षं चतुःशत्या निःशेषं न विभज्यते तत्**प्राचीन**रीत्या प्लुतमपि **नवीन**रीत्या ह्रस्वं नाम साधारणमिति मन्तव्यम् । यथेस्वीश० १६००, १७००, १८००, १९००, २०००, इमानि सर्वाणि **प्रा**चीनरीत्या प्लुतान्यपि **नवीन**रीत्या, १७००, १८०० १९००, एतानि वर्षाणि ह्रस्वाण्येव । यतस्तानि ४०० वर्षैर्निःशेषं भक्तुं न शक्यन्ते । १६००, २०००, एते वर्षे उभयपद्धत्योः प्लुते एव ।

अथ गणितमुच्यते—

इस्वीवर्षगतिं ध्रुवेषु निदधीताऽऽद्याद्द्वितीयात्ततोऽ-
भीष्टेऽब्दे च सति प्लुते खरस ६० भिर्ह्रस्वे नवाक्षै ५९ र्युता ।
इस्वीवर्षजतारिखा दिनगणः स स्यादजादौ ततः
शेषं खेटदिनौघवद्विगणयेत्कालान्तराढ्यैर्ध्रुवैः ॥ २ ॥
एवं सिद्धदिनौघतो ह्यपनयेत्तुर्ये पदे दर्शिता-
नीस्वीमासदिनान्यतः प्रकथयेन्मासं तथा तारिखाम् ।
इस्वीमासदिनैस्तिथिप्रगणनापक्षे तु मेषोद्गतै-
र्घस्रैः पूर्ववदानयेत्तिथिगणं तस्माच्च मासं तिथिम् ॥ ३ ॥

शालिवाहनशकात्पूर्वोक्तवत्साधितमिस्वीवर्षमुपकरणं प्रकल्प्य प्रथमद्वितीयकोष्ठकाभ्यां गतीरादाय ताः प्रथमकोष्ठध्रुवाणामधो यथास्थानं विन्यस्य संकलय्य च या तारिखा लभ्यते **तस्यामिष्टेस्वीवर्षे** ह्रस्वे सत्येकोनषष्टिं प्लुते सति षष्टिं क्षिप्त्वेस्वीशकस्य वर्षारम्भान्निर्गत**स्तारिखागणः** साध्यः । स च मेषसंक्रमणकालिको भवति ।

अनन्तरं **पञ्चाङ्गप्रकरण**स्य द्वितीयकोष्ठकस्थं वारकालान्तरं वारे तारिखागणे **च** क्षिप्त्वा **तत्रत्यप्रथमद्वितीययो**रुपकरणयोः कालान्तरे क्रमाद्रविचन्द्रकरणयोर्योजयेत् ।

ततो **ग्रहगणिताध्याये**ऽहर्गणप्रकरणे कथितवत्तिथिभोग्यांशं तिथिशुद्धौ वारे तारिखा **गणे** रविकरणे चन्द्रकरणे च क्षिप्त्वा संकलितेषु प्रकृताध्याये तृतीयकोष्ठगतास्तिथिगणभवगतीश्च संयोज्येष्टमध्यमतिथ्यन्तकालिका ध्रुवा आनेयाः ।

अनन्तरं ग्रहगणितस्य तृतीयचतुर्थपदाभ्यां क्रमाद्रविचन्द्रकरणाभ्यां फले गृहीत्वा ताभ्यां वारस्तारिखागणश्च संस्कार्यौ । एवं कृते तावभीष्टतिथ्यन्तकालिकौ भवतः ।

तिथ्यन्तीयात्तारिखागणाच्चतुर्थकोष्ठके प्रदर्शितानीस्वीमासदिनानि विशोध्य तिथ्यन्तकालिकं मासं तारिखां च कथयेत् ।

विवक्षितैरिस्वीवर्षमासदिनैः शकवर्षमासतिथिज्ञानं यद्यपेक्षितं तर्ह्यादौ शकवर्षं ज्ञात्वा प्रागुक्तवन्मेषसंक्रमणतिथ्यन्तकालिकान्कालान्तरसंस्कृतान्ध्रुवान्साध्नुयात् । ततस्तारिखाभोग्यांशमितरध्रुवेषु प्रक्षिप्य तारिखापूर्तिं कृत्वा शेषतारिखाणां गतिभिस्तृतीयकोष्ठकस्योत्तरार्धे प्रदर्शिताभिर्वारं तिथिं च चालयित्वा लब्धतिथिगणेनोपकरणे चालयेत् । एवमिष्टतारिखारम्भकालिकान्ध्रुवकानानीयोपकरणजनितसंस्कारौ तिथिरूपौ प्रकल्प्य तिथिगणान्विशोधयेन्नाम चिह्नं व्यत्यस्य संयोजयेत्तेन तारिखादौ स्पष्टो गततिथिगणः सावयवः सिध्यति । तं त्रिंशता विभज्य गतमासांस्तिथींश्च वदेत् ।

उदाहरणम्— शके १८०७ वर्षस्य श्रावणशुक्लाष्टम्यां भौमवासरे नवीनपद्धत्येस्वीवर्षस्य मासं तारिखां च वद । १८०७ + ७८ = १८८५ इदमिस्वीवर्षं जातं तथाऽस्य चतुर्भिरविभाज्यत्वादिदं साधारणम् ।

न्यासः १ ।

विवरणम्	शालि० शकः	तिथि-शुद्धिः	वारः	इस्वी शकः	तारिखा	रविकरणं अंशाः	चन्द्रकरणं अंशाः
ध्रुवाः को. १ ... गतिः को. १,२, क्षेपकः ...	— ७८ १८०० ८४ १	२४·६० २२·३५ २९·२३ ११·०६ ...	५·६९ ०·४७ ०·५३ १·२६ ...	० १८०० ८४ १ ...	१६·९४ २५·४७ ०·५३ ०·२६ ५९·००	१०५·७ ३५३·९ ३५९·७ ०·० ...	२८१·५ २२१·१ १८३·१ ३१९·३ ...
मेषादौ ... तिथिभोग्यम् कालन्तरम्	१८०७ ०	२७·२४ ·७६	०·९५ ·७६ ·००	१८८५ ०	१०२·२० ·७६ ·००	९९·३ ·८ ·०	२८५·० ·८ ·०
मेषतिथ्यन्ते गतिः को० ३ (पूर्वार्धे)	१८०७ ० ०	२८·० १००·० ३०·०	१·७१ ०·४३ १·५३	१८८५ ० ०	१०२·९६ ९८·४३ २९·५३	१००·१ ९७·० २९·१	२८५·८ ८६·१ २५·८
श्रा. शु. अष्टम्याम् परारूयः = १२ + (— ·४७)	१८०७	१५८·०	३·६७ — ०·५९	१८८५	२३०·९२ — ०·५९	२२६·२ =—·१२दि.	३७·७ — ·४७दि.
स्पष्टतिथ्यन्ते ऋणम्			३·०८ — ·०८		२३०·३३ — ·०८		
सूर्योदये ... कोष्ठकः ४ ...			३·०० ...		२३०·२५ २१२·००		
सूर्योदये ...			भौमेवारे	आगस्तस्य	१८·२५	तारिखाऽऽसीत्	

अत्र प्रथमे **न्यासे** प्रथमकोष्ठगतान्ध्रुवकाञ्शिरोभागे संस्थाप्य तदधः प्रथमद्वितीय-कोष्ठकान्तर्गतां वर्षगतिं तथाऽभीष्टेस्वीवर्षस्य सामान्यत्वात् ५९ दिवसांस्तारिखाया अधो निधाय संकालिते कृते जाता अभीष्टशकवर्षे मेषसंक्रमणकालिका ध्रुवाः । ततस्तेषु सर्वेषु तिथिभोग्यांशं तथा **पञ्चाङ्गाध्यायस्य** द्वितीयकोष्ठकात्साधितं कालान्तरं च प्रक्षिप्य योगे कृते जाता मेष-संक्रमणाधिष्ठिततिथेरवसानकाले ध्रुवाः । शके १८०७ ज्येष्ठोऽधिकः, अतश्चैत्रादेः श्रावणशुक्ला-ष्टमीसमाप्तिपर्यन्तं १५८ तिथयो भवन्ति । ताभ्यः पूरिततिथिं २८ विशोध्य जनितं शेषं १३० तिथिगणः । अनेन तृतीयकोष्ठकाद्गतिमादाय तां मेषतिथ्यन्तध्रुवेषु संयोज्य श्रावणशुक्लाष्टम्याः समाप्तौ ध्रुवाः साधिताः । ततो रविकरणेन २२६°·२, चन्द्रकरणेन ३७°·७ च ग्रहगणितस्य पृ. १२०।१२१ क्रमेण तृतीयचतुर्थकोष्ठकाभ्यां – ·१२ दि०, – ·४७ दि०, संस्कारौ लब्ध्वा तेषामैक्यं – ०·५९ दि०, वारे तारिखायां च संयोज्य स्पष्टतिथ्यन्तकाले वा. ३·०८, तारिखाः २३०·३३ च साधिताः । ततो वारस्यावयवे ·०८ तिथ्यन्तात्तारिखागणाच्च विशोधिते जातः सूर्योदये बुधवासरस्तारिखागणश्च २३०·२५ । आभ्यश्चतुर्थात्कोष्ठकाल्लब्धान् २१२ दिवसा-न्विशोध्य ज्ञातं शके १८०७ वर्षे श्रावणमासे **शुक्लाष्टम्यां** भौमवासरे इस्वीशक १८८५ वर्ष-स्याऽगस्तमासस्य १८ **तारिखा**ऽऽसीदिति । अत्र तारिखाया भुक्तांशः ·२५ प्रयोजनाभावादु-पेक्षणीयः । वारतारिखयोर्भुक्तांशयोरन्तरं सर्वदा ·२५ तिष्ठति । यतस्तारिखारम्भो वारारम्भात्पञ्च-दशघटिकाभिः पूर्वं भवति ।

अथान्यदुदाहरणम्—इस्वीवर्षे १८८५ आगस्तमासस्य प्रवर्तमानायां १८ तारिखायां भौमवासरे शालिवाहनशकवर्षस्य मासं तिथिं च वद ।

न्यासः २ ।

विवरणम्	शालि० शकः	तिथि-शुद्धिः	वारः	इस्वीवर्ष	तारिखा	रविकरणं अंशाः	चन्द्रकरणं अंशाः
मेषतिथ्यन्ते तारिखाभोग्यम्	१८०७	२८·०० ·०४	१·७१ ·०४	१८८५ ...	१०२·९६ ·०४	१००·१ ०	२८५·८ ·०
तारिखान्ते	१८०७	२८·०४	१·७५	१८८५	१०३·०	१००·१	२५५·८
को. ३ गतिः उत्तरार्धे	० ० ०	१०१·५८ २०·३२ ७·१२	२·०० ६·०० ०·००		१००·० २०·० ७·०	९७·० १९·४ ६·८	८६·१ १७·२ ६·०
तिथिद्वये करण गतिः						१·९	१·७
	१८०७	१५७·०६ + ·५९	२·७५	१८८५	२३०·०	२२५·२ =–·१२दि.	३६·८ –·४७दि.
श्रावण शु. ८ मी		१५७·६५					

पूर्वगणिते लब्धान्मेषतिथ्यन्तभवान्ध्रुवानादौ विलिख्य वर्तमानतारिखाभोग्यांशं ·०४ ध्रुवेषु क्षिप्त्वा लब्धा पूर्णतारिखा १०३ तमी । सामान्ये वर्षे इस्वीवर्षारम्भादागस्तमासस्य १८ तारिखापर्यन्तं तारिखागणः २३० । अस्मात्पूरिततारिखां विशोध्य लब्धः शेषतारिखागणः १२७ । अनेन तृतीयकोष्ठकस्योत्तरार्धाद्गतिं गृहीत्वा पूर्णतारिखाध्रुवेषु क्षिप्ता । परं तु १२७

दिवसाः १०१·५८ + २०·३२ + ७·१२ = १२९·०२ तिथिभिः समाः । करणयोस्तु १२७ तिथीनामेव गतिः प्रक्षिप्ता । अतो द्वयोस्तिथ्योर्गतिं १·९ । १·७ पुनरानीय करणयोः प्रक्षिप्ता । ताभ्यां पूर्ववद्वारे – ·५९ दि. संस्कार उत्पन्नः । एनं तिथौ १५७·०६ विशोध्य लब्धा सोमवासरे मध्यरात्रेः स्पष्टातिथिः १५७·६५ नाम वर्तमाना १५८ मी तिथिः, अतो विवक्षिततारिखायां शके १८०७ वर्षे, श्रावणमासः, शुक्लाष्टमी चाऽऽसन्निति सिद्धम् ।

तृतीयोदाहरणम्—शा. वा. शके ४०६ वर्ष आषाढशुक्ल १२ शी गुरुवारे पपातेति पूर्वमेव २३ पृष्ठे प्रतिपादितम् । इदानीं तद्दिवस इस्वीशकस्य प्राचीनरीत्या का तारिखाऽऽसीत्तद्वद । ४०६ + ७८ = ४८४ इदं वर्षं ४ भिः निशेषं विभज्यते । अत इदं प्लुतं वर्षम् ।

न्यासः ३ ।

विवरणम्	शालि. शकः	तिथि शुद्धिः	वारः	इस्वी वर्ष	तारिखा	रविकरणं अंशाः	चन्द्रकरणं अंशाः
ध्रुवाः को. १	– ७८	२४·६०	५·६९	०	१८·९४	१०५·७	२८१·५
गतिः को. १, २ {	४००	१४·९७	५·५५	४००	२·५५	३५८·७	२८९·१
	८४	२९·२३	०·५३	८४	०·५३	३५९·७	१८३·१
क्षेपकः	...	...	...	...	६०·००	...	...
मेषादौ	४०६	८·८०	४·७७	४८४	८२·०२	१०४·१	३३·७
तिथिभोग्यम्	...	·२०	·२०	...	·२०	·२	·२
कालान्तरम्	...	...	– ·०५	...	– ·०५	– ·२	+ १·७
गतिः को. ३ {		९०·००	४·५९	...	८८·५९	८७·३	७७·४
		३·००	२·९५	...	२·९५	२·९	२·६
	४०६	१०२·००	५·४६	४८४	१७३·७१	१९४·३	११५·६
परारव्यः	...	...	+ ·४५		+ ·४५	= – ·०४ दि.	+ ·४९ दि.
स्पष्टातिथ्यन्ते	४०६	१०२·००	५·९१	४८४	१७४·१६		
			– ·९१		– ·९१		
सूर्योदये			५·००		१७३·२५		
कोष्ठकः ४					१५२·००		
सूर्योदये	...	...	गुरुवारे	जूनस्य	२१·२५	तारिखाऽऽसीत्	

अथेस्वीशकारम्भात्प्राक्कालिकं
मासतारिखागणितम् ।

इस्वीशकस्य चाऽऽरम्भात्प्राक्तने कालनिर्णये ।
इस्वीशकध्रुवस्थाने ऋणमेकं न्यसेत्सदा ॥ ४ ॥
तारिखायां षड्नहानि ह्रस्वेऽब्देऽपि क्षिपेदिमम् ।
ऋणगेस्वीवत्सरस्य विशेषं च स्मरेत्सुधीः ॥ ५ ॥

इस्वीशकात्प्राक्तने तारिखागणिते कर्तव्य इस्वीशकध्रुवस्थाने यत्र शून्यं वर्तते तत्र −१ लिखेत् । तथैव मेषसंक्रमणतारिखायां सर्वदा षष्टिदिनानि क्षिपेत् । अभीष्टमिस्वीशकवर्षं ह्रस्वं वा प्लुतमित्यस्य विचारश्चतुर्थकोष्ठकात्तारिखासाधनप्रसङ्गे करणीयो न चात्र ।

उदाहरणम्— शा. वा. शकात्पूर्व **नन्दाद्रीन्दुगुणमिते** वर्षे − ३१७९ चैत्रशुक्लप्रातिपदि कलियुगारम्भो जातः । तद्दैतद्दिवस इस्वीशकस्य मासतारिखादि सर्वं वद ।

अत्र − ३१७९ + ७८ = − ३१०१ इदमिस्वीवर्षं ह्रस्वम् ।

न्यासः ४ ।

विवरणम्	शालि० शकः	तिथि. शुद्धिः	वारः	इस्वी. वर्ष	तारिखा	रविकरणं अंशाः	चन्द्रकरणं अंशाः
ध्रुवाः (अ)	− ७८	२४·६०	५·६९	− १	१८·९४	१०५·७	२८१·५
को. १,२, गतिः {	२००० १००० १०० १	१४·८३ २२·४१ २६·२४ ११·०६	६·७५ ३·३७ ६·६४ १·२६	२००० १००० १०० १	१२·७५ ६·३७ ०·६४ ०·२६	− ३५३·२ ३५६·६ ३५९·७ ०·०	५·५ २·७ २५२·३ ३१९·३
(ब)	३१०१	१४·५४	४·०२	३१०१	२०·०२	३४९·५	२१९·८
(अ. − ब.) = संक्षेपतिथिभोग्यम्	−३१७९	१०·०६ ·९४	१·६७ ·९४	−३१०२	− १·०८ ६०·९४	११६·२ ·९	६१·७ ·९
चै. शु. ११	−३१७९	११·०० −१०·००	२·६१ − २·८४	−३१०२	५९·८६ − ९·८४	११७·१ − ९·७	६२·६ − ८·६
चै. शु. १ पञ्चाङ्गको. ३ कालां.	−३१७९	१·००	६·७७ − ·६३	−३१०२	५०·०२ − ·६३	१०७·४ − २·८	५४·० + २३·१
मध्यमतिथ्यन्ते	−३१७९	१·००	६·१४ − ·१४	−३१०२	४९·३९ − ·१४	१०४·६ = + ·१७ दि.	७७·१ − · ४४ दि·
सूर्योदये कोष्ठकः ४ सूर्योदये		 ... फेब्रुवारी	६·०० ... मासस्य	 शुक्रे	४९·२५ ३१·०० १८·२५	तारिखाऽऽसीत्	

विशेषः— इस्वीशकारम्भात्प्राक्कालिकतारिखायां तिथ्यानयनप्रसङ्गे निरेकात्प्राक्तनेस्वीवर्षात्तद्वर्षस्य सामान्यत्वं प्लुतत्वं वा निर्णयेत् ।

उदाहरणम्— इस्वीशकारम्भात्प्राक्तनं वर्षं − ३१०२ निरेकं − ३१०१ अस्य चतुर्भिरविभाज्यत्वादिदं सामान्यं वर्षम् ।

कोष्ठकः १ ।

शालिवाहनशकस्य वर्षमासतिथिभिरिस्वीशकस्य वर्षमासतारिखानयनम् ।

उपकरणम् = इस्वीशकवर्षाणि ।

ध्रुवकाः							
शा० श	तिथिशुद्धिः	वारः	इस्वीश. *	तारिखा नवीनरीत्या	रविकरणम्	चन्द्रकरणम्	तारिखा प्राचीनरी
व.	ति.	वा.	व.	मार्च	अं	अं.	मार्च
– ७८	२४·६०	५·६९	०	१६·९४	१०५·७	२८१·५	१८·९४
शतकगतिः							
१००	२६·२४	६·६४	१००	१·६४	३५९·७	२५२·३	०·६४
२००	२२·४८	६·२७	२००	३·२७	३५९·३	१४४·५	१·२७
३००	१८·७२	५·९१	३००	४·९१	३५९·०	३६·८	१·९१
४००	१४·९७	५·५५	४००	५·५५	३५८·७	२८९·१	२·५५
५००	११·२१	५·१९	५००	७·१९	३५८·३	१८१·४	३·१९
६००	७·४५	४·८२	६००	८·८२	३५८·०	७३·६	३·८२
७००	३·६९	४·४६	७००	१०·४६	३५७·७	३२५·९	४·४६
८००	२९·९३	४·१०	८००	११·१०	३५७·३	२१८·२	५·१०
९००	२६·१७	३·७४	९००	१२·७४	३५७·०	११०·५	५·७४
१०००	२२·४१	३·३७	१०००	१४·३७	३५६·६	२·७	६·३७
११००	१८·६६	३·०१	११००	१६·०१	३५६·३	२५५·०	७·०१
१२००	१४·९०	२·६५	१२००	१६·६५	३५५·९	१४७·३	७·६५
१३००	११·१४	२·२९	१३००	१८·२९	३५५·६	३९·६	८·२९
१४००	७·३८	१·९२	१४००	१९·९२	३५५·३	२९१·९	८·९२
१५००	३·६२	१·५६	१५००	२१·५६	३५४·९	१८४·२	९·५६
१६००	२९·८६	१·२०	१६००	२२·२०	३५४·६	७६·५	१०·२०
१७००	२६·१०	०·८४	१७००	२३·८४	३५४·३	३२८·८	१०·८४
१८००	२२·३५	०·४७	१८००	२५·४७	३५३·९	२२१·१	११·४७
१९००	१८·५९	०·११	१९००	२७·११	३५३·६	११३·४	१२·११
२०००	१४·८३	६·७५	२०००	२७·७५	३५३·२	५·५	१२·७५
४०००	२९·६६	६·५०	४०००	५५·५०	३४६·६	११·०	२५·५०
६०००	१४·४८	६·२५	६०००	८३·२५	३३९·८	१६·५	३८·२५
८०००	२९·३१	५·९९	८०००	११०·९९	३३३·०	२२·०	५०·९९
१००००	१४·१४	५·७४	१००००	१३८·७४	३२६·५	२७·५	६३·७४

* **विशेषः**—इस्वीशकारम्भात्पूर्ववर्षस्य मासतारिखानयने इ० श० ध्रुवकस्थाने –१ लिखेत् ।

कोष्ठकः २ ।

शतकालपवर्षगतिः ।

उपकरणम् = इस्वीशकवर्षाणि ।

उपकरणम् इष्टशक-वर्षगणः	तिथिशुद्धिः	वारः	इस्वीशकः	तारिखा	रविकरणम्	चन्द्रकरणम्
वर्षाणि	ति.	वा.	वर्षाणि	तारिखा	अं.	अं.
१	११·०६	१·२६	१	०·२६	०·०	३१९·३
२	२२·१२	२·५१	२	०·५१	०·०	२७८·६
३	३·१९	३·७७	३	०·७७	०·०	२३८·०
४	१४·२५	५·०२	४	०·०२	०·०	१९७·३
८	२८·५०	३·०५	८	०·०५	०·०	३४·६
१२	१२·७५	१·०७	१२	०·०७	०·०	२३१·९
१६	२७·००	६·१०	१६	०·१०	०·०	६९·२
२०	११·२५	४·१३	२०	०·१३	३५९·९	२६६·५
२४	२५·५०	२·१५	२४	०·१५	३५९·९	१०३·८
२८	९·७५	०·१८	२८	०·१८	३५९·९	३०१·१
३२	२४·००	५·२०	३२	०·२०	३५९·९	१३८·४
३६	८·२५	३·२३	३६	०·२३	३५९·९	३३५·६
४०	२२·५०	१·२५	४०	०·२५	३५९·९	१७२·९
४४	६·७५	६·२८	४४	०·२८	३५९·९	१०·२
४८	२१·००	४·३०	४८	०·३०	३५९·९	२०७·५
५२	५·२५	२·३३	५२	०·३३	३५९·८	४४·८
५६	१९·५०	०·३५	५६	०·३५	३५९·८	२४२·१
६०	३·७५	५·३८	६०	०·३८	३५९·८	७९·४
६४	१८·००	३·४०	६४	०·४०	३५९·८	२७६·७
६८	२·२४	१·४३	६८	०·४३	३५९·८	११४·०
७२	१६·४८	६·४५	७२	०·४५	३५९·७	३११·३
७६	०·७३	४·४८	७६	०·४८	३५९·७	१४८·६
८०	१४·९८	२·५१	८०	०·५१	३५९·७	३४५·८
८४	२९·२३	०·५३	८४	०·५३	३५९·७	१८३·१
८८	१३·४८	५·५६	८८	०·५६	३५९·७	२०·४
९२	२७·७३	३·५८	९२	०·५८	३५९·७	२१७·७
९६	१२·००	१·६१	९६	०·६१	३५९·७	५५·०

कोष्ठकः ३।

पूर्वार्धम् तिथेस्तारिखानयनार्थम्			उत्तरार्धम् तारिखायास्तिथ्यानयनार्थम्			उप० = तिथिगणः	
उप० तिथि-गणः	वारः	दिवसाः	तिथिः	वारः	उप० तारि० गणः	रविकरणम्	चन्द्रकरणम्
	क.	क.	क.	क.	क.	अं.	अं.
१	०·९८	०·९८	१·०२	१	१	१·०	०·९
२	१·९७	१·९७	२·०३	२	२	१·९	१·७
३	२·९५	२·९५	३·०५	३	३	२·९	२·६
४	३·९४	३·९४	४·०७	४	४	३·९	३·४
५	४·९२	४·९२	५·०८	५	५	४·८	४·३
६	५·९१	५·९१	६·१०	६	६	५·८	५·२
७	६·८९	६·८९	७·१२	०	७	६·८	६·०
८	०·८७	७·८७	८·१३	१	८	७·८	६·९
९	१·८६	८·८६	९·१५	२	९	८·७	७·७
१०	२·८४	९·८४	१०·१७	३	१०	९·७	८·६
२०	५·६९	१९·६९	२०·३२	६	२०	१९·४	१७·२
३०	१·५३	२९·५३	३०·४८	२	३०	२९·१	२५·८
४०	४·३७	३९·३७	४०·६३	५	४०	३८·८	३४·४
५०	०·२२	४९·२२	५०·८०	१	५०	४८·५	४३·०
६०	३·०६	५९·०६	६०·९५	४	६०	५८·२	५१·६
७०	५·९०	६८·९०	७१·१२	०	७०	६७·९	६०·२
८०	१·७५	७८·७५	८१·२७	३	८०	७७·६	६८·८
९०	४·५९	८८·५९	९१·४२	६	९०	८७·३	७७·४
१००	०·४३	९८·४३	१०१·५८	२	१००	९७·०	८६·१
२००	०·८७	१९६·८७	२०३·१८	४	२००	१९४·०	१७२·१
३००	१·३१	२९५·३१	३०४·७७	६	३००	२९१·०	२५८·२

कोष्ठकः ४।

इस्वीमासाः	सामान्यवर्षे	प्लुतवर्षे	इस्वीमासाः	सामान्यवर्षे	प्लुतवर्षे
	दि०	दि०		दि०	दि०
जानुआरी	०	०	जुलई	१८१	१८२
फेब्रुआरी	३१	३१	आगस्त	२१२	२१३
मार्च	५९	६०	सप्तंबर	२४३	२४४
एप्रिल	९०	९१	आक्टोबर	२७३	२७४
मे	१२०	१२१	नवंबर	३०४	३०५
जून	१५१	१५२	दिसेंबर	३३४	३३५

अथ ज्योतिर्गणिते कोष्ठकरचनाध्यायः।

अथ पञ्चाङ्गकोष्ठकरचना।

अत्र पञ्चाङ्गकोष्ठकाधारभूता गतिस्थितीनां मूलाङ्काः प्रायः सर्वे ज्योतिर्विद्धानसेनरचितचन्द्रकोष्ठकेभ्यः साधिताः। परमास्माकीनां कालगणनापद्धतिमनुसृत्य गणिते यथा लाघवसिद्धिः स्यात्तथा नवीनान्संस्कारकलापान्प्रकल्प्य कोष्ठकांश्च निर्माय निखिलं गणितमहमेवारचयम्। मदनुभूतश्रमं तु गणितविद्वा प्रभुरेव ज्ञातुं समर्थः।

कोष्ठकः १। शके १८०० वर्षे मेषसंक्रमणं चैत्रशुक्ल १० दशम्यां शुक्रवासरेऽपतत्। अतोऽस्मिन्वर्षे चैत्रशुक्लदशमीं तिथिध्रुवं प्रकल्प्य तात्कालिकचन्द्रसूर्याभ्यां वारादीनां ध्रुवाः साधिताः। चैत्रशुक्लदशमी उज्जयिन्यां शुक्रवासरे मध्यमप्रातःकालात् ०·३३४५ दिनांशे नाम २० घ. ४·० पलेषु समाप्तिमयात्। अस्मिन्काले ये मध्यमध्रुवास्तानधः प्रदर्शयामि। ते च यथा–

नामानि	निजध्रुवाः	स्थिरराशिः	संस्कृतध्रुवाः
शकवर्षाणि	१८००	०	१८००
तिथिध्रुवः	१० ति.	०	१० ति.
वारः	६·३३४५	०	६·३३४५
प्रथमोपकरणम्	२७९·५८७०	०	२७९·५८७०
द्वितीयोपकरणम्	२९·८८३३	०	२९·८८३३
तृतीयोपकरणम्	१८१·१६००	०	१८१·१६००
मासिकीतिथिः	१०ति. ०′	– ६५७′	९ ति. ६३′·०
नक्षत्रं	८ न. ६९७′·०	– ५५७′	८ न. १४०′·२
योगः	८यो. ५९४′·५	– ६५७′	७यो ७३७′·५

अत्र निजतिथेर्याः स्थिरकलाः – ६५७′ ता उपकरणत्रयजनितसंस्काराणां सर्वदा धनत्वसिध्यर्थं यावत्यः कला एकैकस्मिन्संस्कारे प्रक्षिप्तास्तासामैक्यसमाः सन्ति। एवं नक्षत्रयोगयोरपि।

वर्षगतिः। (**अत्रैकं वर्षं ३७१ तिथिमितमित्यंगीकृतम्।**)

वर्षगतिः	११	·	०००	०००	०००	०००
वारः	१	·	१९४	९३७	००३	८०७
प्रथमोपकरणम्	३५९	·	९३६	३०७	१७९	०५०
द्वितीयोपकरणम्	३१९	·	२६९	०३८	९२२	३३०
तृतीयोपकरणम्	१५१	·	२९२	००५	३९२	७५०
मासिकीतिथिः	११	·	०००	०००	०००	०००
नक्षत्रम्	९	·	८९५	४५९	६९९	६०७
योगः	९	·	८९०	९१९	३९९	२१४

अस्मिन्वर्षगतिगणित ईषत्संचारो वर्तते। अयुतवर्षेषु तिथयः ३७१०६२४, अथवा स्थूलमानेन ३७१०६२५ भवन्ति। प्रत्यब्दं ३७१ तिथय इति कल्पितेऽयुतवर्षेषु ३७१०००० तिथयो भवन्ति। अनयोरन्तरं ६२५ तिथयः। आभिरयुतवर्षाणि विभज्य १६ लभ्यन्ते। अत एव षोडश-

भिर्वर्षैरेका तिथिरधिका कार्या। अनया युक्त्या मेषसंक्रमणाधिष्ठिता तिथिः परमावधावेकेनाधिका भवति। परं तु तिथिगणितेऽस्मात्कारणान्न किंचिदप्यन्तरं स्यात्। अयुतवर्षैर्ययेकाऽधितिथिस्त्यज्यते तर्हीदमप्यन्तरं नोत्पद्येत। उदाहरणार्थमत्र शतवर्षाणां वारगतिर्गण्यते—

न्यासः	वारगतिः।
१०० वर्षेषु प्रत्यब्दं ३७१ तिथिप्रमाणेन (को० ३)	११९.४९३७००
१०० ÷ १६ = ६ अधितिथीनां	५.९०६११८
१०० वर्षेषु ... ... ६ वा. २३ घ ५९.३ प. =	१२५.३९९८१८

कोष्ठकः २। अथ **कालान्तरसंस्कारः।** सांप्रतं भूकक्षाकेन्द्रच्युतिर्मन्दं मन्दमपचीयमाना वर्तते। तेन चन्द्रस्य मध्यमगतिरपि मन्दं मन्दमुपचीयते। एवं महता कालेन मध्यमचन्द्र उच्चपातयोश्च महदन्तरमुत्पद्यते। संप्रत्यस्योपचयस्य प्रमाणं सूक्ष्मं न ज्ञातम्। एष्यमाणैर्वर्षशतैर्ज्ञास्यते। **हानसेन**मतेन शतवर्षेष्विदं, $+१२''.१९$ श^२, **न्यूकम्ब**मतेन, $+८''.४४$ श^२ **हानसेन**प्रणीता चन्द्रस्य मध्यमगतिः शतवर्षेषु वास्तवमध्यमगतेः, $२९''.१७$ विकलामिता अधिकाऽस्तीति **न्यूकम्बमतम्।** अस्योपचयस्याऽऽद्यं शकवर्षं **हानसेन**ग्रन्थे शके १७२२ तमम्। मद्ग्रन्थे तदेव १८०० तममिति गृहीतत्वाच्छतवर्षेषु **हानसेन**प्रणीता चन्द्रमध्यमगतिः १९ विकलाभिर्न्यूना जाता, अतो मद्ग्रन्थसिद्धेन मध्यमचन्द्रेण **हानसेन**ग्रन्थसाधितात्सूक्ष्मतरेण भवितव्यम्।

पञ्चाङ्गगणिते तिथेः प्राधान्यात्तिथौ यावन्मितं कालान्तरमुत्पद्यते तावत्, कालरूपेण परिणमय्य लब्धकालस्य चिह्नविपर्यासे कृते यल्लभ्यते तावान्वारस्य कालान्तरसंस्कारः कल्पितः, अनया युक्त्या मध्यमा तिथिः सर्वदा निरग्रा भवति, नाम तस्याः कालान्तरसंस्काराभावसिद्धिर्भवति। तस्मान्नक्षत्रयोगयोरपि कालान्तराभावः।

अग्रिमासु सरणीषु—

$$\text{शकारः} = \frac{\text{शकवर्षाणि} - १८००}{१००} \quad \text{इति ज्ञेयम्।}$$

कालान्तरम्।

वारः	दि.	− ०.०००२७७७८८ श^२	− ०.००००००३०७ श^३
प्र. उ.	अं.	०.०००४२९१ श^२	− ०.००००००३०३ श^३
द्वि. उ.	अं.	+ ०.०१०१०२५ श^२	+ ०.००००००९८९८ श^३
तृ. उ.	अं.	− ०.००२२५८० श^२	− ०.०००००२३१० श^३

कोष्ठकः ३। एकस्यां तिथौ वारादीनां गतयः।

वारः	वा.	०.९८४	३५२	९२९	९२९।
प्रथमोपकरणम्	अंशाः	०.९७०	१७८	७२५	५५०।
द्वितीयोपकरणम्	अंशाः	०.८६०	५६३	४४७	२३०।
तृतीयोपकरणम्	अंशाः	१३.०२२	३५०	४१८	८५०।
मासिकतिथिः	ति.	१.०००	०००	०००	०००।
नक्षत्रम्	न.	०.९७२	७६४	०४२	३१७।
योगः	यो.	१.०४५	५२८	०८४	६३४।

सूर्यमध्यमगतेः कालान्तरमसत्प्रायमेव।

कोष्ठकः ४। तिथिनक्षत्रयोगाणां रविकेन्द्रवशवर्तिसंस्कारः। अयं रविमन्दफलं चन्द्र-वार्षिकविकारश्चैतयोः समवायात्साधितः, उपकरणाभेदात्।

तिथेः संस्कारः	=	+	१२६′	१५″·८	भुजज्या	प्र. उ.
		−	१	१९ ·८	भुजज्या	२ प्र. उ.
		+	१५०	० ·०	स्थिरराशिः	
नक्षत्रस्य	=	+	१०	५७ ·५	भुजज्या	प्र. उ.
		−	०	७ ·३	भुजज्या	२ प्र. उ.
		+	५०	० ·०	स्थिरराशिः	
योगस्य	=	−	१०४	२० ·८	भुजज्या	प्र. उ.
		+	१	५ ·२	भुजज्या	२ प्र. उ.
		+	१५०	० ·०	स्थिरराशिः	

अत्र 'प्र० उ०' रविकेन्द्रवाचीति ज्ञेयम्। 'भुजज्या प्र० उ०' इत्यनेन प्रथमोपकरणस्य भुजज्येति ज्ञेयम्, तथा '२ प्र० उ०' इत्यनेन द्विगुणप्रथमोपकरणं बोध्यम्।

कोष्ठकः ५। अस्मिंश्चन्द्रस्य तिथिसंस्कारः, च्युतिविकारः, द्वौ लघुसंस्कारौ, मन्दफलम् इति संस्कारपञ्चकस्य संमेलनं कृतम्। अस्य द्वे उपकरणे, प्रथमं मासिकी तिथिः, द्वितीयं द्वियीयोपकरणम्। अत्र संस्कारानयने **तिथि**पदेन सूर्याचन्द्रमसोर्मध्यमयोरंशात्मकमन्तरं वेदितव्यम्। स्कन्धे ( ) एतच्चिह्नित**तिथि**पदेन स्वोपरितनैः संस्कारैः संस्कृतं चन्द्रसूर्ययोरन्तरं ज्ञेयम्। द्वितीयमुपकरणं चन्द्रोच्चात्सूर्यस्यान्तरं बोधयति।

संस्कारः =	−	२′	१″·४	भु.	तिथिः	तिथिसंस्कारः
	+	३५	४५·०	भु.	२ तिथिः	
	+	०	१०·७	भु.	४ तिथिः	
	−	७४	२७·०	भु.	तिथिः − द्वि० उ०	च्युतिसंस्कारः
	+	०	३०·०	भु.	२ तिथिः − २ द्वि० उ०	
	−	०	११·७	भु.	द्वि० उ०	लघुसंस्कारः
	+	०	४१·६	भु.	२ द्वि० उ०	
	−	१	०·०	भु.	३ तिथिः + द्वि० उ०	”
	−	०	३५·७	भु.	३ तिथिः − द्वि० उ०	
	−	३७७	२२·९	भु.	तिथिः + द्वि० उ०	मन्दफलम्
	+	१२	५६·५	भु.	२ तिथिः + २ द्वि० उ०	
	−	·	३६·९	भु.	३ तिथिः + ३ द्वि० उ०	
	+	·	२·०	भु.	४ तिथिः + ४ द्वि० उ०	
	+	५००	०·०	स्थिरराशिः		

उपकोष्ठकः ५। पञ्चमकोष्ठके संस्काराः षट्सु षट्सूपकरणांशान्तरेषु पठिताः। तदन्तर इष्ट उपकरणान्तरे संस्कारान्सुखेन गणयितुमयं कोष्ठको रचितः। पञ्चमकोष्ठके षड्भिरुपकरणा-न्तरांशैर्यदि पार्श्वस्थं फलान्तरं लभ्यते तर्हीष्टेनोपकरणशेषेण कियदिति लब्धेन पञ्चमकोष्ठकस्थः

संस्कारः संस्कृतश्चेदिष्टे द्वितीयोपकरणे संस्कारमानं लभ्यते। अस्योपकोष्ठकस्य द्वे उपकरणे। ऊर्ध्वाधरं, द्वितीयोपकरणशेषं, तिर्यक्, संस्कारान्तरकलाः।

कोष्ठकः ६। चन्द्रस्य कक्षापरिणतिसंस्कारः। अस्योपकरणं तृतीयम्। चन्द्रस्य राहोः सकाशाद्यदन्तरं तदेव तृतीयोपकरणम्।

संस्कारः = − ६′ ४८″·८ भुजज्या २ तृ० उ०
+ ७ ०· ० स्थिरराशिः।

कोष्ठकः ७। पराख्यपलानि $= \dfrac{\text{भाज्यः} \times ३५४४}{\text{हारः}}$

कोष्ठकः ८। चन्द्रदिनगतिः।

पञ्चमकोष्ठके षष्टिघट्यन्तरेण यावान्भेदस्तावता भेदेन चन्द्रस्य मध्यमदिनगतिः संस्कृता चेच्चन्द्रस्य स्पष्टा दिनगतिर्भवति । तत्साधनमेवम् । एकोनषष्टिघटीभिरेका तिथिर्वर्धते । द्वितीयोपकरणं तस्मिन्नेवावधौ ०°·८६ अंशमितं वर्धते । इयं वृद्धिः षडंशानां सप्तमांशेन समा । अतः पञ्चमकोष्ठे पूर्वोत्तरतिथ्योः संस्कारयोर्यदन्तरं तदुत्तरातिथेः संस्कारस्याग्रिमान्तरस्य सप्तमांशेन युतं चेदेकोनषष्टिघटिकासु गतिफलं भवति । तच्च स्वकीयेनैकोनषष्टितमांशेन युतं चेत्षष्टिघट्यन्तराले गतिफलं भवतीति दिक् ।

उदाहरणम्— पञ्चम्यां तिथौ द्वितीयोपकरणे २४०° समे सति चान्द्रीं दिनगतिमानय ।

विवरणम्	फलम्
पृ. ३८, ५ मे कोष्ठे उत्तरातिथिः ६ ष्ठी । अस्यां द्वि. उ. २४०° साति	८००′
” पूर्वतिथिः ५ मी · ” ” ” ”	८४३
अन्तरम्	− ४३
उत्तरातिथिः ६ अस्या अग्रिमकलाः − ३५	
आसां सप्तमांशः. − ३५ ÷ ७ = ...	− ५
५९ घटीषु दिनगतिफलं	− ४८
स्वकीय एकोनषष्ट्यंशः − ४८ ÷ ५९ =	− १
६० घटीषु दिनगतिफलं	− ४९
चन्द्रस्य मध्यमदिनगतिः	७९१
चन्द्रस्य स्पष्टा दिनगतिः	७४२
५ ति. द्वि उ. २४० अनेनोपकरणेन पृ. ६१ को. ८ गतिः	७४१

उपकोष्ठकः ८। अष्टमकोष्ठकाद्गतिकलोत्पादने साहाय्यार्थम् ।

पृ. २३ पं. १८ द्वि. उप. ३४०, मासिकी तिथिः २२ । अष्टमकोष्ठके ३३६ उपकरणेन ७९७ तथा च ३४८ उपकरणेन ७८३ गतिकलाङ्कौ लब्धौ । अनयोरन्तरं ७९७ − ७८३ = १४ फलान्तरकलाः । इष्टमुपकरणं ३४० कोष्ठकस्थं ३३६ अनयोरंतरं ४ द्वितीयोपकरणशेषम् । पृ. ६२, उपकोष्ठके ८ मे उर्ध्वाधरं ४ करणशेषसंमुखं, तीरश्चीन १४ अन्तरकलानामधः ५ लभ्यन्ते । ७९७, ७८३ अनेन गतेर्हीयमानत्वात् इष्ट ३४० उपकरणेन ७९७ − ५ = ७९२ चन्द्रगतिकलाः प्राप्तास्ताः पृ. २३ पं. १९ दर्शिताः ।

कोष्ठकः ९ । { रवेर्दिनस्पष्टगतिः = ५९′ । ८″·० – २′ । ०″·० कोटीज्या प्रथ. उप.
रवेर्बिम्बम् = ३२ । २·० – ० ३०″·० कोटीज्या प्रथ. उप.

कोष्ठकः १० । शके १८०० चैत्रशुद्धदशम्यां शुक्रवासरे उज्जयिन्यां प्रातःकालाद्गतघटी ९ पलानि ७·५, एतत्समये स्पष्टरवेर्मेषराशौ आश्विनीनक्षत्रे वा निजसंक्रमणमभवत् एतस्मिन्काले—

नामानि		अं.	क.	वि.
मध्यमरविः		३५८	६	३९ · ०६०
मध्यमचन्द्रः		११५	५३	५३ · ६०२
रविकेन्द्रम्		२७९	२५	४० · २६०
रविमन्दफलम्		+ १	५३	२० · ९४०
ध्रुवकाः। अब्दपः	वा.	६	९	७ · ५
तिथिशुद्धिः	ति.	९ · ८२०		
अयनांशाः	अं.	२२° ।	८′ ।	३३″·४

वर्षगतिः । दिवसाः ... ... ३६५ · २५६ ३७४ ४१७
तिथयः ... ... ३७१ · ०६२ ४१४ ००९
अयनगतिः ... ... { ५०″ · २३५ ७२ व
अयनगतेः कालान्तरम् ... ०″ · ००० ११२ व²
अयनगतेः संस्कारः ... — १७″ · २ भु. सायनराहुः

पूर्वोक्तं निजमेषसंक्रमणं किरणपुरःसरणात् २०·५ पलैः पश्चाद्दृश्यते । अतो दृश्यमेषसंक्रमणकालः शुक्रवासरे ९ घ. २८ पलेष्वभवत् ।

मेषसंक्रमणादग्रे शेषसंक्रमणमहानक्षत्राणां वारगतिः केवलं गणितेन साधिता । सहस्रवर्षेषु रव्युच्चं द्वीनंशान्पुरः सरति तथैवं मन्दफलं तिसृभिः कलाभिरपचीयते । अत एष्यमाणसहस्रवर्षाणामन्ते संक्रमणानि यथा स्युस्तथा विगणय्य यो वारभेदो दृष्टस्तं सहस्रेण विभज्य प्रत्यब्दवारविकारः साधितः । अयं द्विसहस्रवर्षाण्युपयुक्तः स्यात् ।

कोष्ठकः ११ । इष्टवर्षे मेषसंक्रमणकालादुगयनपर्यंतं वारभेदस्तिथिभेदश्च ।

ध्रुवकौ वारः ... ... वा. १ ४४ ४७
तिथिः ... ... ति. २५७ · ७५

वर्षगतिः ।

वर्षगतिः । वारः ... ... – ० · ०१४ १५८ ४००
तिथिः ... ... – ० · ०१४ ३८३ ४००

उत्तरार्धस्थानां पुण्यकालानां गणितमेकादशकोष्ठाविवरणे कथितरीत्या कृतम् ।

कोष्ठकः १२ । क्षयाधिमासानां संभवमर्यादा राशीनां सावनमानं क्षयाधिमासवर्षाणि च केवलं गणितात्साधितानि । एकोनविंशतिवर्षैस्तिथिशुद्धेः पुनरावृत्तिर्भवति । ततस्तावन्मितैर्वर्षैः प्रायोऽधिकक्षयमासानामपि पुनरावृत्ति संभवति । ३२·५४२४४ मध्यमसौरमासैरेकोऽधिमासः प्रजायते ।

कोष्ठकः १४। परमचन्द्रशरः = ५°। ८′। ४०″। तृ० उ० = (चन्द्रः − राहुः)
इष्टकालिकचन्द्रशरभुजज्या = भु० परमशरः × भु० तृ० उ०

कोष्ठकः १५। चन्द्रशरस्याऽऽकर्षणसंस्कारः = ८′ ४८″ भु० (२ ति − तृ० उ०)

कोष्ठकः १६। चन्द्रक्षितिजलम्बनम् = २·०४√ (चन्द्रदिनगतिः)
चन्द्रबिम्बम् = १·११√ (चन्द्रदिनगतिः)
भूभा = $\frac{५१}{५०}$ (२ क्षि० लम्बनं − रविबिम्बम्)
मान्यखण्डम् = $\frac{१}{२}$ (२ क्षि० लम्बनं + चन्द्रबिम्बं + रविबिम्बम्)
मानैक्यखण्डम् = $\frac{१}{२}$ (भूभा + चन्द्रबिम्बं)
मानान्तरखण्डम् = $\frac{१}{२}$ (भूभा − चन्द्रबिम्बं)
कालगुणः = क्षि· लं. दशमांशः ÷ चं. सू. घ. गत्यन्तरम्।
अंशगुणः = कालगुणः × ६°·०१६

कोष्ठकः १७। रवेः परमक्रान्तिः = २३° २७′ १८″·५ − ०″·४७६ व.
रवेरिष्टकालिकक्रान्तिः = भु० प० क्रान्तिः × भु० सायनरविः

कोष्ठकः १८। रवेरुदयान्तरं = सायनस्पष्टरविविषुवकालः सायनमध्यमरवेर्विषुवकालेन रहितः।

सायनस्पष्टरवेर्विषुवकालो ग्रहगणितस्य १९ कोष्ठकात्सिध्यति। सायनमध्यमरवेर्विषुवकालश्च नक्षत्रगणितस्य तृतीयकोष्ठकात्सिध्यति। सायनमध्यमरविर्विषुववृत्ते भ्रमतीति कल्पितत्वात्तस्यांशादिभोगस्य कालविपरिणाम एव तद्विषुवकालः।

कोष्ठकः १९। चरभुजज्या = अक्षांशस्पर्शरेषा × क्रान्तिस्पर्शरेषा।

कोष्ठकः २०। रेखान्तरम्, अक्षांशाः, पलभा इमानि प्रतिपत्तनं विद्वद्भिर्वेधेभ्यः साधितानि। साधनरीतिस्त्वग्रे वेधगणिते द्रष्टव्या।

इति ज्योतिर्गणिते पञ्चाङ्गाध्यायकोष्ठकरचना समाप्ता॥ १॥

अथ चन्द्रसूर्यकोष्ठकरचना ।

पूर्वस्मिन्पञ्चाङ्गाध्याये चन्द्रगणितकोष्ठका विस्तरेण व्याख्याता एव । अतोऽस्मिन्नध्याये ये विशेषास्तानेव कथयामः ।

इह सूक्ष्मताधिक्यासिद्ध्यर्थं चन्द्रभोगगणितेऽधिकान्षट्संस्कारान्नियोज्य सर्वे संस्कारा आकलादशमांशं सूक्ष्माः पठिताः ।

चन्द्रशरगणिते संस्कारषट्कमधिकमुपयोज्य धनर्णचिन्तानिरासार्थं चन्द्रशरे '५३८८' मितं स्थिरराशिं प्रक्षिप्य यल्लब्धं तद्दक्षिणकदम्बान्तरमिति संकेतितम् ।

आविकलासूक्ष्ममत्रत्यं रविमन्दफलकोष्ठकं ज्योतिर्विल्लुवरविरचिताद्ग्रन्थादुद्धृतम् ।

कोष्ठकः १ । ध्रुवकाः ।

नामानि	निजाः	स्थिरराशयः	कोष्ठकस्थाः
शकवर्षम्	१८००	०	१८००
तिथिः	१०	०	१०
वारः	६।२०१४	०	६।२०१४
उप. १ अंशाः	२७९·५८७०	०	२७९·५८७०
उप. २ शतांशाः	८९·००३६	०	८९·००३६
उप. ३ शतांशाः	५९·०१११	०	५९·०१११
उप. ४ शतांशाः	६३·९७०३	०	६३·९७०३
उप. ५ शतांशाः	१९·२९६४	०	१९·२९६४
उप. ६ शतांशाः	४७·३७०४	०	४७·३७०४
उप. ७ शतांशाः	३३·९७६६	०	३३·९७६६
उप. ८ अंशाः	२९°·८८००	− १°·०५००	२८·८३००
उप. ९ अंशाः	१८१°·१६००	− ९°·३८३०	१७१·७७७०
चन्द्रः अंशाः	११८°।१७·२	− ९°।३०′·०	१०८°।४७′·२
सूर्यः अंशाः	३५८°।१७·२	०	३५८°।१७′·२
उप. १० शतांशाः	४१·६३३३	०	४१·६३३३
उप. ११ शतांशाः	६६·६६६७	०	६६·६६६७
उप. १२ शतांशाः	८·६८८९	०	८·६८८९

वर्षगतिः ।

तिथिः	...	...	११·	०००	०००	०००	००
वारः	...	...	१·	१९४	९३७	००३	८१
उप. १	...	...	३५९°·	९३६	३०७	१७९	०५
उप. २	...	...	७३·	३५१	०२५	७८१	३३
उप. ३	...	...	५८·	६९८	५९७	२८८	५५
उप. ४	...	...	२५·	३७०	२०३	२६१	६१
उप. ५	...	...	२५·	३३४	८१८	३५३	२५
उप. ६	...	...	४७·	९९८	५१४	९७३	९०
उप. ७	...	...	१०·	७१७	७७४	७६१	४१
उप. ८	...	...	३१९°·	२६९	०३८	९२२	३३
उप. ९	...	...	१५१°·	२९२	००५	३९२	७५
चन्द्रः		१३१°	५६′·	३६७	७५९	६८५	६०
सूर्यः		३५९°	५६′·	३६७	७५९	६८५	६०
उप. १०	...	...	२५·	३५२	५१०	९०९	२७
उप. ११	...	...	३६·	६६६	६६६	६६६	६७
उप. १२	...	...	१६·	६७३	०४३	२४२	४५

कोष्ठकः २ । कालान्तरसंस्काराः । श = वर्षगणः ÷ १००

तिथिः	...	... ...	...	... ...	...
वारः	−	० ·००० २७७ ७८८ श^{2}	−	० ·००० ००० ३०७ श^{3}	
उप. १	−	०°·००० ४२९ १०० श^{2}	−	० ·००० ००० ३०३ श^{3}	
उप. २	+	० ·००० ११८ ००० श^{2}	+	० ·००० ००० ०७० श^{3}	
उप. ३	−	० ·००० ४०५ ००० श^{2}	−	० ·००० ००४ ०३० श^{3}	
उप. ४	+	० ·००२ ९२५ ००० श^{3}	+	० ·००० ००२ ८३० श^{3}	
उप. ५	+	० ·००२ ६८७ ००० श^{2}	+	० ·००० ००२ ६६० श^{3}	
उप. ६	−	० ·००२ ६८८ ००० श^{2}	−	० ·००० ००२ ६६० श^{3}	
उप. ७	−	० ·००१ २५३ ००० श^{2}	−	० ·००० ००१ ६४० श^{3}	
उप. ८	+	०°·०१० १०२ ५०० श^{2}	+	०°·००० ००९ ८९८ श^{3}	
उप. ९	−	०°·००२ २५८ ००० श^{2}	−	०°·००० ००२ ३१० श^{3}	
चन्द्रः	...	... ...	...	... ...	...
सूर्यः	...	... ...	...	... ...	...
उप. १०	+	० ·००२ ८०६ ००० श^{2}	+	० ·००० ००२ ७५० श^{3}	
उप. ११	...	... ...	...	... ...	...
उप. १२	−	० ·००३ ४३३ ००० श^{2}	−	० ·००० ००३ ३८० श^{3}	

कोष्ठकः ३ । तिथिगतिः ।

तिथिः	...	१·००० ००० ००० ०००				
बारः	...	०·९८४ ३५२ ९२९ ९२९				
उप. १	...	...	०°·९७०	१७८	७२५	५५
उप. २	...	...	६ ·३९७	१७२	५७६	२३
उप. ३	...	...	३ ·६६२	२६०	३७०	०५
उप. ४	...	...	३ ·३०२	८८४	६४४	९१
उप. ५	...	...	३ ·८४१	८७२	८२५	७५
उप. ६	...	...	२ ·८२४	७९३	८४०	९२
उप. ७	...	...	० ·५६७	९७२	४३८	७१
उप. ८	...	...	०°·८६०	५६३	४४७	२३
उप. ९	...	...	१३°·०२२	३५०	४१८	८५
चन्द्रः...	१२°	...	५८′·२११	२३३	८५३	६०
सूर्यः ...	...	...	५८′·२११	२३३	८५३	६०
उप. १०	...	...	३ ·५७२	३७८	७३५	६०
उप. ११	...	...	६ ·६६६	६६६	६६६	६७
उप. १२	...	...	° ० ·०४४	९४०	८१७	३६

अत्रोपकरणानि १।८।९। अंशात्मकान्युर्वरितानि शतखण्डात्मकानीति स्मर्तव्यम् ।

कोष्ठकः ४ । चन्द्रस्य वार्षिकसंस्कारः ।

संस्कारः	=	+	१०′	५७″·५	भु. प्र. उ.
प्रथमः		−	·	७ ·३	भु. २ प्र. उ.
		+	५०	० ·०	स्थिरराशिः ।

कोष्ठकः ५ । लघुसंस्कारः ।

संस्कारः	स्थिरः			
२	३′·० − २′ ३५″·१	भु. द्वि. उ.	नाम	(२ ति. − रविकेन्द्रम्)
३	१·५ + १ २४ ·९	भु. तृ. उ.	,,	(चं. कें. − २ चं. उच्चं. + २ राहुः)
४	२·० + १ ५१ ·७	भु. च. उ.	,,	(चं. कें. − र. कें.)
५	१·५ − १ १३ ·३	भु. प. उ.	,,	(चं. कें. + र· कें.)
६	३·५ + ३ १८ ·१	भु. ष. उ.	,,	(२ ति. − चं. कें. − र. कें.)
७	१·५ − १ २१ ·६	भु. स. उ.	,,	(२ र. कें. + २ र. उच्चं. − २ राहुः)

कोष्ठकः ६ । चन्द्रस्य कक्षापरिणतिः ।

९	७′·० − ६′ १ ४८″·८	भु. २ न. उ.	नाम	(चन्द्रः − राहुः)

कोष्ठकः ७. ८. ९. । चन्द्रस्य दक्षिणकदम्बान्तरम्।

कोष्ठकः स्थिरः

७ ५३८८′ + ३०८′ ४०″·० भु. स्फुटं नवममुपकरणम्।

---

८ ५२८″·६ + ८ ४२ ·६ भु. (तिथिः – न. उ.)

९	२४ ·६	+	०	२४·६ भु.	(उप. ४ + उप. १२)
	२३ ·४	–	०	२३·४ भु.	(उप. ५ + उप. १२)
	२२ ·८	–	०	२२·८ भु.	(उप. ६ – उप. १२)
	४३ ·८	–	०	४३·८ भु.	(उप. ७ – उप. १२)
	२४ ·६	+	०	२४·६ भु.	(उप. १० – उप. १२)
	३० ·६	–	०	३०·६ भु.	(उप. ११ – उप. १२)
	२१ ·६	–	०	२१·६ भु.	(उप. १२)
	५४००′				

उप. १० = चन्द्रकेन्द्रम्। उप. ११ = २ तिथिः। उप. १२ = चन्द्रोच्च – राहुः।

कोष्ठकः १० । रविमन्दफलम्।

मन्दफलं = – (१° ५५′ १८·″३ – ०″· १७१ व.) भु. प्र. उ.
+ (० १ १२· ५) ... ... भु. २ प्र. उ.
– (० ० १· १) ... ... भु. ३ प्र. उ.

इति ज्योतिर्गणिते चन्द्रसूर्यगणिताध्यायकोष्ठकरचना समाप्ता ॥ २ ॥

अथ ग्रहकोष्ठकरचना।

अत्र रविबुधशुक्रभौमानां गतिस्थितिसंस्काराणां मूलाङ्काः प्रायेण ज्योतिर्विल्लवराचार्यकृतग्रहकोष्ठकेभ्य आसादिताः। गुरुशन्योश्च ज्योतिर्वित्केरोपण्डितकृतग्रहसाधनकोष्ठकेभ्यः। वरुणेन्द्रयोस्तु—अमेरिकाखण्डनिवासिनां ज्योतिर्विद्यूकम्बाचार्याणां कोष्ठकेभ्य उद्धृताः। ग्रहगणिते मन्दकेन्द्रारम्भो नीचाद्भवतीत्यत्र विशेषः। अत्रत्या ध्रुवकाः शके १८०० मेषसंक्रमणकालिका न तु तिथ्यन्तकालिकाः। अहर्गणारम्भश्च प्रत्यब्द मेषसंक्रमणाद्भवतीति स्मर्तव्यम्।

कोष्ठकः १ । अहर्गणानयनम् ।

नामानि		ध्रुवका	वर्षगतिः ।
शकवर्षम्		१८००	१ · ००० ००० ०००
तिथिः		९· ८२००	३७१ · ०६२ ४१४ ००९
रविकरणम्	अं०	९९· ४०००	३५९ · ९९६ ६४७ ३९३
चन्द्रकरणम्	अं०	२०९· ६०००	३१९ · ३२२ ७५० १८५
वारः		६· १५७८	१ · २५६ ३७४ ४१७
अहर्गणः		०· ००००	० · ००० ००० ०००

कोष्ठकः २ ।

नामानि		तिथिगतिः ।
तिथिः		१ · ००० ००० ०००
रविकरणम्	अं०	० · ९७० १७८ ७२५
चन्द्रकरणम्	अं०	० · ८६० ५६३ ४४७
वारः		० · ९८४ ३५२ ९२९
अहर्गणः		० · ९८४ ३५२ ९२९

अत्र वाराहर्गणयोर्गतिसमत्वेऽपि यदा वाराङ्काः सप्तभ्योऽधिका भवन्ति तदा तान्सप्तभिर्भक्त्वा शेषाङ्का ग्राह्याः । अहर्गणं षट्षष्ट्यधिकशतत्रयपर्यन्तं वृद्धिं नयेत् ।

कोष्ठकः ३ । $\frac{११}{१०}$ रविमन्दफलं दिनीकृतं $= \frac{१·१ \times \text{रविमन्दफलम्}}{\text{चन्द्रसूर्ययोर्मध्यमदिनगत्योरन्तरम्}}$

कोष्ठकः ४ । चन्द्रफलं दिनीकृतं $= \frac{\text{पञ्चाङ्गाध्यायस्थपञ्चमकोष्ठजकलाः}}{\text{अष्टमकोष्ठजकलाः} - ५९'}$

कोष्ठकः ५ । गुरुशन्योराकर्षणोपकरणानि ।

उपकरणम्	ध्रुवकः	वर्षगतिः
१	६६१	६६·७७००
२	४९१	८३·२०१०
३	८३०	५०·३५५०
४	८३०	१६·४१७०
५	३४७	१·०८९३
६	६६०	३२·८४६०

अत्रोपकरणचक्रं सहस्रखण्डात्मकम् ।

कोष्ठकः ६ । केन्द्रदिनानि ।

ग्रहाः	निजध्रुवाः	स्थिरराशिः		कोष्ठकस्था ध्रुवाः
	दि०	दि०		दि०
रविः	१०० · ७४१०	·	=	१०० · ७४१०
बुधः	८ · ९००६	·	=	८ · ९००६

ग्रहाः	निजध्रुवाः दि॰	स्थिरराशिः दि॰		कोष्ठकस्था ध्रुवाः दि॰
शुक्रः	६४ · ००२८	·	=	६४ · ००२८
भौमः	२३३ · ६८९०	·	=	२३३ · ६८९०
गुरुः	३४४४ · ३४०१	− ७ · २२१०	=	३४३७ · ११९१
शनिः	८०८१ · ८७८१	− ३५ · ८६७०	=	८०४६ · ०१११
वरुणः	२९०९५ · १९११	·	=	२९०९५ · १९११
इन्द्रः	५९११२ · ७१११	·	=	५९११२ · ७१११

नवमकोष्ठकस्थानामाकर्षणसंस्कारामृणत्वपरिहारार्थं तेषु यावत्यः स्थिरकलाः प्रक्षिप्तास्ता दिनीकृताः किलात्रत्यौ गुरुशन्योः स्थिरराशी।

	केन्द्रभगणादिवसाः	अयुतवर्षेषु केन्द्रभगणाः
रविः	३६५ · २५९ ७१२ २४४ १००	९९९९ · ९७३ ८३३
बुधः	८७ · ९६९ ३५३ १७० ०६५	४१५२१ · १३७ ०००
शुक्रः	२२४ · ७०० ६०४ १४५ १५२	१६२५५ · ३५२ ६६६
भौमः	६८६ · ९९६ ४६९ ७९३ ०८६	५३१६ · ७४८ ६६६
गुरुः	४३३२ · ८५९ २२० ०१२ ६७७	८४२ · ९९७ ०५५
शनिः	१०७६२ · ९४६ १९२ ६५६ ६८७	३३९ · ३६६ ८८८
वरुणः	३०६८६ · ६१४ ४५८	
इन्द्रः	६०१८६ · ६३५ ६२०	

ग्रहस्याभीष्टवर्षेषु केन्द्रदिनगतिः = अभीष्टवर्षाणामहर्गणात् ग्रहस्य केन्द्रभगणदिवसैर्भक्ताल्लब्धाः शेषदिवसाः। यथा—

		दिवसाः
शतपरिमितानां वर्षाणां दिनसंख्या, पञ्चमाध्यायस्य कोष्ठ० १० रचनायां		३६५२५·६३७४४२
बुधकेन्द्रभगणदिनसंख्या	८७·९६९,३५३१७×४१५ =	३६५०७·२८१५७८
शतवार्षिकी बुधकेन्द्रदिनगतिः	...	१८·३५५८६४

कोष्ठकः ७। नीचानि।

	नीचं कक्षावृत्ते अं॰		कक्षा-परिणातिः अं.		स्थिर-राशिः अं.		नीचं कोष्ठगतं अं॰	नीचस्य वर्षगतिः अं॰
रविः	२५८·६९६		०·०००	+	·१३५	=	२५८ · ८३१	० · ००३ २८१२
बुधः	५३·४१७	−	०·१८०	+	·२००	=	५३ · ४३७	·००१ ७०८६
शुक्रः	१०७·७०१	−	०·०४७	−	·१०७	=	१०७ · ५४७	− ० · ००० ४१६३
भौमः	३११·६७५	−	०·००३	−	·१७४	=	३११ · ४९८	·००४ ६९४५
गुरुः	३५०·२२८	+	०·०००	+	·००१	=	३५० · २२९	·००१ ८४२०
शनिः	६८·५२५	+	०·०१७	−	·१६३	=	६८ · ३७९	·००४ ४३६२
वरुणः	१४६·५०१		·०	−	१४६ · ५०१	=	० · ०००	अज्ञाता
इन्द्रः	२१·५४४		·०	−	२१ · ५४४	=	० · ०००	अज्ञाता

विशेषः—शुक्रस्य नीचं राहुवत्पृष्ठतः सरति।

कोष्ठकः ८ । ग्रहाणां चक्रशुद्धपाताः ।

	चक्रशुद्धपाताः अं०	वर्षगतिः अं०	मध्यममन्दकर्णः	केन्द्रच्युतिः
विषुवम्	२२ · १४३	० · ०१३ ९४७६	१००० · ००	· ०१६ ७७११ (रवेः)
बुधः	३३५ · २५४	· ००१ ८८८७	३८७ · १०	· २०५ ६०४८
शुक्रः	३०६ · ५९९	· ००५ ३०५३	७२३ · ३३	· ००६ ८४३३
भौमः	३३३ · ५३१	· ००६ ३२५०	१५२३ · ६९	· ०९३ २६११
गुरुः	२८२ · ९६४	· ००४ ००००	५२०२ · ८०	· ०४८ २५१९
शनिः	२६९ · ५१३	· ००५ १५२८	९५३८ · ८५	· ०५५ ९४२८
वरुणः	३०८ · ७५९	· ००८ ८०२१	१९१८३ · ३८	· ०४६ ३५९२
इन्द्रः	२५१ · २४७	· ००२ ९२१०	३००५४ · ३७	· ००८ ९९०३

कोष्ठकः ९ । गुरुशन्योराकर्षणसंस्कारा दिनीकृताः ।

ग्रहसाधने उपकरणानि		ज्योतिर्गणिते उपकरणानि	गुरोः संस्काराणाम्			शनेः संस्काराणाम्		
गुरोः	शनेः		क्रमः	परमसं. क.	स्थिरः क.	क्रमः	परमसं. क.	स्थिरः क.
४ र्थं	·	प्रथमं	प्रथ.	१·५	३·०	·	·	·
५ मं		द्वितीयं	द्विती.	२·८	३·०	·	·	·
२ यं	४ र्थं	तृतीयं	तृती.	४·२	६·०	प्रथ.	०·८	१·५
३ यं	२ यं	चतुर्थं	चतु.	२·३	३·०	द्विती.	७·०	७·५
१ मं	१ मं	पञ्चमं	पञ्च.	२०·८	२१·०	तृती.	४८·६	५१·०
	३ यं	षष्ठं	·			चतु.	१०·९	१२·०
					३६·०			७२·०

दिनात्मकाकर्षणं = कलात्मकाकर्षणं ÷ मध्यमदिनगतिकलाः ।

कोष्ठकः १० । केन्द्रभगणदिवसाः ।

षष्ठकोष्ठकस्य रचनायां प्रदर्शिता भगणकाला एकद्वित्र्यादिभिर्गुणिताः ।

कोष्ठकः ११ । रविमध्यगणितम् ।

कक्षावृत्ते । मध्यममन्दकेन्द्र = ३६०° × इष्टकेन्द्रदिवसाः ÷ भगणकालः

स्पष्टमन्दकेन्द्रं = मध्यममन्दकेन्द्रं + मन्दफलम् ।

क्रान्तिवृत्ते स्पष्टमन्दकेन्द्रं = कक्षामन्दकेन्द्रं + ग्रहपरिणतिः − नीचपरिणतिः ।

अथ मन्दफलानयने मूलसरणी ।

$$\text{मन्दफलं} = \pm \text{र.} \left(२\ \text{च.} - \frac{\text{च.}^{३}}{४} + \frac{५}{९६}\ \text{च.}^{५} \right) \text{भु.क.}$$

$$+र.\left(\frac{५}{४}च.^{२}-\frac{११}{२४}च.^{४}+\frac{१७}{१९२}च.^{६}\right)भु. २ क.$$

$$+र\left(\frac{१३}{१२}च.^{३}-\frac{४३}{६४}च.^{५}\right)भु. ३ क.$$

$$+र.\left(\frac{१०३}{९६}च.^{४}-\frac{४५१}{४८०}च.^{६}\right)भु. ४ क.$$

$$+र.\left(\frac{१०९७}{९६०}च.^{५}\right)भु. ५ क.$$

अत्र र. = त्रिज्यापरिमिते चापे विकलाः = २०६२६५″

च. = दीर्घवर्तुलकेन्द्रच्युतिरष्टमकोष्ठकरचनायां पठिता।

क. = मध्यमकेन्द्रं नीचात्परिगणितम्।

अनया सरण्या ग्रहाणां स्वस्वकेन्द्रच्युतिवशादधस्तनानि मन्दफलसूत्राण्युत्पादितानि। रवेर्मन्दफलसूत्रं चन्द्रसूर्यरचनायां प्रदर्शितमेव।

मन्दफलसूत्राणि।

बुधस्य = २३° २६′·२ भु. क.
२ ५८·९ भु. २ क.
३१·५ भु. ३ क.
६·३ भु. ४ क.
१·४ भु. ५ क.
०·३ भु. ६ क.

शुक्रस्य = ० ४७′·२ भु. क.
०·२ भु. २ क.

भौमस्य = १० ४३·३ भु. क.
० ३७·५ भु. २ क.
३·० भु. ३ क.

गुरोः = ५° ३०·′४ भु. क.
० १०·० भु. २ क.
०·४ भु. ३ क.

शनेः = ६ २६·४ भु. क.
० १३·६ भु. २ क.
०·७ भु. ३ क.

वरुणस्य = ५ २१·२ भु. क.
० ९·४ भु. २ क.
०·४ भु. ३ क.

इन्द्रस्य = ० ५८·५ भु. क.
०·३ भु. २ क.

अथ ग्रहाणां कक्षावृत्तात्क्रान्तिवृत्ते परिणतिः।

$$परणतिभुजज्या = \frac{परमशरोत्क्रमज्या \times विपातग्रहभु० \times विपातग्रहको० ज्या}{इष्टकालिकशरकोटीज्या}$$

ग्रहणशराणामल्पत्वात्तत्कोटीज्या = त्रिज्या = १ इति कल्पितं चेत्

परिणतिभुजज्या = प. श. उत्क्रमज्या × वि. ग्र. भु. × वि. ग्र. को० ज्या

परं तु वि. ग्र. भु. × वि. ग्र. को. = ½ भु. २ विपातग्रहः।

तस्मात्—परिणतिभुजज्या = ½ परमशरोत्क्रमज्या × भु. २ वि. ग्रहः।

	बु.	शु.	भौ.	गु.	श.	व.	इं.
परमशरः	७°·०	३°·४	१°·९	१°·३	२°·५	०°·८	१°·८
उत्क्रमज्याकलाः	२५′·४	६′·०	१′·८	०′·९	३′·३	०′·०	१′·६
परिणातिगुणः	१२′·७	३′·०	०′·९	०′·४	१′·६	०·०	०′·८

परिणतिफलानि ।

− १२′·७ भु. २ विपातबुधः	− ०′·४५ भु. २ विपातगुरुः
− ३·० भु. २ विपातशुक्रः	− १·६ भु. २ विपातशनिः
− ०·९ भु. २ विपातभौमः	− ०·८ भु. २ विपातेन्द्रः

अथ ग्रहाणां मन्दकर्णानयने मूलसरणी ।

अधस्तन्यां सरण्यां अ. = मध्यममन्दकर्णः । च. = केन्द्रच्युतिः

$$\text{मन्दकर्णः} = \text{अ.}\left\{\left(१+\frac{१}{२}\text{च.}^{२}\right)-\text{च.}\left(१-\frac{३}{८}\text{च.}^{२}\right)\text{को. क.}\right.$$

$$\left.-\frac{१}{२}\text{च.}^{२}\left(१-\frac{२}{३}\text{च.}^{३}\right)\text{को. २ क.}-\frac{३}{८}\text{च.}^{३}\text{को. ३ क.}\right\}$$

अनया सरण्या ग्रहाणां मन्दकर्णसूत्राणि पृथक्पृथग्विगणय्याधः प्रदर्शितानि—

रवेः = १०००·१४ − १६·७७ को. क. − ०·१४ को. २ क.
बुधस्य = ३९५·२८ − ७८·३३ को. क. − ७·९५ को. २ क. − १·२१ को.३ क.
शुक्रस्य = ७२५·३५ − ४·९५ को. क.
भौमस्य = १५३०·३२ − १४१·६५ को. क. − ६·५९ को. २ क. − ·४६ को.३ क.
गुरोः = ५२०८·८६ − २५०·८३ को. क. − ६·०६ को. २ क. − ·२२ को.३ क.
शनेः = ९५५३·७८ − ५३३·०२ को. क. − १४·९२ को. २ क. − ·६२ को.३ क.
वरुणस्य १९२०३·९९ − ८८८·६१ को. क. − २०·६१ को. २ क. − ·६२ को.३ क.
इन्द्रस्य ३००५५·५८ − २७०·१९ को. क. − १·२१ को. २ क. − ·०१ को.३ क.

एवं लब्धान्मन्दकर्णास्तत्स्थानीयरविमध्यशरस्य कोटीज्यया संगुण्य जनिताः **क्रान्तिवृत्तीयमन्दकर्णा** अस्मिन्कोष्ठके पठिताः ।

$$\text{दिनगतिगुणः} = १ - \frac{\text{४ मन्दकर्णशेषं}}{\text{३ स्पष्टमन्दकर्णः}}$$

अथ ग्रहाणां मध्यमदिनगतिः ।

ग्रहाः	भगणकालः दिवसाः	मध्यमदिनगतिः विकलाः
रवेः	३६५ · २५६ ३७४	३५४८ · १९२ ८२४
बुधस्य	८७ · ९६९ २५८	१४७३२ · ४१९ २६४
शुक्रस्य	२२४ · ७०० ७८७	५७६७ · ६७० ०५५
भौमस्य	६८६ · ९७९ ६४६	१८८६ · ५१८ ७७५
गुरोः	४३३२ · ५८४ ८२१	२९९ · १२८ ५९३
शनेः	१०७५९ · २१९ ८१७	१२० · ४५४ ८३०
वरुणस्य	३०६८६ · ६१४ ४५८	४२ · २३३ ११४
इन्द्रस्य	६०१८६ · ६३५ ६२०	२१ · ५३३ ०१७
राहोः	६७९३ · ३९१ ०८०	− १९० · ७७३ ६४८

ग्रहाणां केन्द्रच्युतिः परममन्दफलं मन्दकर्णश्चान्योन्याकर्षणान्महता कालेन न्यूनाधिका भवन्ति । अतः सहस्रवर्षेषु जायमानं न्यूनाधिक्यमधः प्रदर्श्यते—

	मन्दफले कालान्तरम्	मन्दकर्ण कालान्तरम्
सूर्यः	− २·९ भु. क.	... ...
बुधः	+ १·४ भु. क.	... ...
शुक्रः	− ४·२ भु. क.	... ...
भौमः	+ ६·१ भु. क.	− १६·० को. क.
गुरुः	+ ९·२ भु. क.	− ७·० को. क.
शनिः	−१८·४ भु. क.	+ २५·३ को. क.

क्रान्तिवृत्तस्थमन्दकर्णः = कक्षामन्दकर्णः × विपातग्रहकोटीज्या

क्रान्तिवृत्तस्थमन्दकर्णशेषं = क्रा. वृ. मन्दकर्णः − मध्यममन्दकर्णः

कोष्ठकः १२ । ग्रहाणां रविमध्यशराः ।

इष्टकाले शरज्या = परमशरज्या × सपातग्रहज्या

परमशराः

बुधः	७°	०′	१०″	+ ६″·३ श.	शनिः	२°	२९′	३६″	−१४″·० श.
शुक्रः	३	२३	३५	+ ४ ·५ श.	वरुणः	०	४६	२२	+ २·५ श.
भौमः	१	५१	२	− २ ·४ श.	इन्द्रः	१	४६	५९	+ ०·० श.
गुरुः	१	१८	३५	− २०·५ श.	श. = वर्षगणः ÷ १००				

कोष्ठकः १३ । समान्तरम् = $\frac{\text{रविमन्दकर्णशेषं} \times \text{ग्रहमध्यममन्दकर्णः}}{\text{रविमध्यममन्दकर्णः}}$

कोष्ठकः १४ । भूमध्यगणितम् ।

अस्मिन्गणिते सरलरेषात्रिकोणमितिज्ञानमपेक्ष्यतेऽत एवाग्रे वक्ष्यमाणामुपपत्तिं जिज्ञासुभिः प्रथमं त्रिकोणमितौ प्रावीण्यं संपादनीयम् । इष्टकाले रविग्रहभुवां मध्यबिन्दुषु सरलरेखया संयोजितेष्वेकं त्र्यस्रमुत्पद्यते । तत्र सूर्याद्ग्रहपर्यन्तं यदन्तरं स ग्रहमन्दकर्णः, भूपर्यन्तं यदन्तरं स रविमन्दकर्णः, भूमेः सकाशाद्ग्रहपर्यन्तं यदन्तरं स शीघ्रकर्णः । अस्मिंस्त्र्यस्रे रविमध्यगणितात्—

ज्ञातावयवाः = रविमन्दकर्ण एको भुजः, ग्रहमन्दकर्णोऽन्यो भुजः, एतयोर्मध्यवर्ती कोणः = १८०° − शीघ्रकेन्द्रम ।

ज्ञेयावयवाः = ग्रहस्थानीयकोणः, भूस्थानीयकोणः भूग्रहयोरन्तरं, नाम शीघ्रकर्णः ।

अत्रोपयुज्यमानं त्रिकोणमितिसूत्रम्—" यदि ज्ञातभुजयोरैक्येन ज्ञेयकोणैक्यदलस्पर्शरेषा लभ्यते तर्हि ज्ञातभुजयोरन्तरेण ज्ञेयकोणान्तरदलस्पर्शरेषा लभ्या " इति ।

अत्र त्र्यस्रे भूग्रहस्थानीयौ कोणौ ज्ञेयौ । तयोर्योगः सर्वदा शीघ्रकेन्द्रसमः । अतः शीघ्रकेन्द्रार्धमेव भूग्रहस्थानीयकोणयोर्योगार्धम् । अतोऽधस्तनसूत्रावतारः—

यदि भूग्रहयोर्मन्दकर्णयोगेन शीघ्रकेन्द्रदलस्पर्शरेषा लभ्यते,

तर्हि भूग्रहयोर्मन्दकर्णयोरन्तरेण भूग्रहस्थानीयकोणयोरन्तरस्य स्पर्शरेषा लभ्या ।

अनया रीत्या भूग्रहस्थानीयकोणान्तरदलं ज्ञातं भवति । कोणयोगदलं तु शीघ्रकेन्द्रदलमेव । अतः " योगोऽन्तरेणोनयुतोऽर्धितस्तौ राशी स्मृतौ संक्रमणाख्यमेतत् " इति **भास्करीयसंक्रमणसूत्राद्भूग्रहस्थानीयौ** कोणौ ज्ञातौ भवतः । अथ शीघ्रकर्णानयने सूत्रम्—

यदि भूस्थानीयकोणभुजज्यया भूस्थानीयकोणसंमुखो ग्रहमन्दकर्णो लभ्यते,

तर्हि रविस्थानीयकोण (१८०°– शी. कें.) भुजज्यया रविस्थानीयकोणसंमुखः शीघ्रकर्णो लभ्यः ।

एवं जनितः शीघ्रकर्णः शरमूलीयो भवति । अतो भूमध्यदृश्यशरस्य कोटीज्ययैनं भक्त्वा ग्रहस्थानीयः कार्यः ।

अस्मिन्नध्याये- " **ग्रहार्कयोर्ये** " इतिपद्योक्ता (पृ. १०७ श्लो. १४।१५) शीघ्रकर्णानयनरीतिरीषत्स्थूलाऽस्ति । तथाऽपि गणितलाघवार्थमादरणीया **विदग्धगणकैः** । उक्तं च **श्रीभास्कराचार्यैः**—

" स्वल्पान्तरत्वाद्बहूपयोगात्प्रसिद्ध्यभावाच्च बहुप्रयासात् ।
ग्रन्थस्य तज्ज्ञैर्गुरुताभयेन यस्त्यज्यतेऽर्थो न स दूषणाय " इति ॥

अथ विवरणम्—इनान्तरं नाम सूर्याद्ग्रहपर्यन्तं भूमध्ये दृश्यं चापाकारमन्तरं न च सरलम् । सरलरेखारूपमन्तरं कर्ण इत्युच्यते ।

इनान्तरं = भूस्थानीयकोणः ।

$$\text{प्रथमगुणः} = \frac{\text{ग्रहस्थानकोणज्या} \times ५७^{\circ}.२९६}{\text{मध्यमशीघ्रकर्णः}} ।$$

द्वितीयगुणकः = ग्रहस्थानीयकोणकोटीज्या

तृतीयगुणकः = भूस्थानीयकोणकोटीज्या

गतिफलं = अद्यतनश्वस्तनयोरिनान्तरयोरन्तरम् ।

वरुणेन्द्रकोष्ठस्था दिनस्पष्टगतिः = ५९′.१ + गतिफलम् ।

$$\textbf{कोष्ठकः १५ ।}\ \text{ग्रहबिम्बम्} = \frac{\text{रविमध्यमन्दकर्णान्तरे दृश्यमानं बिम्बमानम्}}{\text{मध्यमशीघ्रकर्णः}}$$

रविमध्यमन्दकर्णान्तरे दृश्यानि बिम्बानि ।

बुधस्य	शुक्रस्य	पृथिव्याः	भौमस्य	गुरोः	शनेः
६″.६८,	१६″.६१,	१७″.६९,	११″.१,	१९६.″३८,	१६६.″८२.

$$\text{ग्रहस्य परमलम्बनं} = \frac{\text{भूबिम्बार्ध} \times १०००}{\text{मध्यमशीघ्रकर्णः}} = \frac{८८४८''}{\text{मध्यमशीघ्रकर्णः}}$$

$$\text{रवेः परमं लम्बनं} = \frac{८.८४८ \times १०००}{\text{रवेर्मन्दस्पष्टकर्णः}} = \frac{८८४८''}{\text{र. म. स्प. क.}}$$

शनेर्मध्यममन्दकर्णान्तरे दृश्यो वलयस्य बाह्यव्यासः ४०″.१, आन्तरः २६″.७ ।

$$\text{इष्टकाले व्यासदैर्घ्यम्} = \frac{\text{मध्यमव्यासः} \times \text{शनिमध्यममन्दकर्णः}}{\text{शनिशीघ्रकर्णः}}$$

कोष्ठकः १६। सितं = भूसूर्यस्थानीयकोणयोर्योगः।

कोष्ठकः १७। चाकचक्यं = $\frac{\text{मन्दकर्णः}^{२} \times \text{सितोत्क्रमज्या}}{\text{शीघ्रकर्ण}^{२}}$

कोष्ठकः १८। भुजगुणः = अयनवलनस्य स्पर्शरेषा
कर्णगुणः = अयनवलनस्य च्छेदकरेषा

कोष्ठकः १९। विषुवांशस्पर्शरेषा = सायनभोगस्पर्शरेषा × परमक्रान्तिको॰ ज्या।
विषुवकालघट्यः = विषुवांशाः ÷ ६

कोष्ठकः २०। अस्फुटक्रान्तिः = क्रान्तिवृत्तीयग्रहस्थानस्य क्रान्तिः।

अथ ग्रहगणितसंस्काराणां परस्परसंबन्ध उच्यते।

ग्रहकक्षाया उच्चासन्ननाभौ स्थितो द्रष्टा मध्यमतुल्यं ग्रहं पश्यति। सूर्यमध्यस्थितो मन्दस्पष्टतुल्यम्, भूमध्यस्थितः शीघ्रस्पष्टम्, भूपृष्ठस्थितो लम्बनस्पष्टम्। एवं द्रष्टुः स्थानभेदेभ्यो दर्शनभेदा नाम संस्कारा उत्पद्यन्ते। इति दिक्।

इति ज्योतिर्गणिते ग्रहगणिताध्यायकोष्ठकरचना समाप्ता ॥ १ ॥

अथ नक्षत्रकोष्ठकरचना।

कोष्ठकः १। अत्रत्या नक्षत्राणां विषुवकालाः क्रान्तयश्च नाविकपञ्चाङ्गात्संपादिताः।

कोष्ठकः २। अत्र सायनमध्यसूर्यस्य विषुवकालो नाम तस्यैव घट्यादिरूपान्तरम्। सायनवर्षमानं दि. ३६५·२४२२१६ तथा ३७१ तिथीनां सावनमानं दि. ३६५·१९४९३७। यदि सायनवर्षावधिना मध्यमसूर्यस्य ६० घटीमितो विषुवकालो लभ्यते तर्हि ३७१ तिथिनामवधिना कियानित्यनुपाताल्लब्धा मध्यमसूर्यस्य विषुवगतिः—

३७१ तिथिषु ... ... घ० ५९·९९२ २३३ २६४
१ तिथौ ... ... घ० ०·१६१ ७०४ १३३

कोष्ठकः ३। सायनभोगशरा वेधगणिते चित्रातारया उदाहरणे प्रदर्शितया रीत्या विगणिताः। सायनभोगानां प्रत्यब्दगतिरयनगतिरेव। शरेषु गत्यभावः।

कोष्ठकः ४। सायनभोगो अयनांशै रहितः सन्कदम्बसूत्रीयो भोगो भवति। नक्षत्राणां स्वकीयगतेरभावादल्पत्वाच्च तथा क्रान्तिवृत्तक्षेत्रस्यापि स्थिरप्रायत्वात् भोगशरा वर्षशतेष्वप्यविकृतास्तिष्ठन्ति।

ध्रुवसूत्रीयभोगो नाम याम्योत्तरलग्नम् । एतच्च त्रिप्रश्नाध्यायोक्तप्रथमकोष्ठकात्साधयितुं शक्यते । नक्षत्रक्रान्तिर्याम्योत्तरलग्नस्य क्रान्त्या रहिता **स्फुटशरो** भवति । ध्रुवस्थानस्य चलत्वाद्ध्रुवसूत्रीयौ भोगशरावपि चलतः । तयोः प्रत्यब्दं चलनमेव वर्षगतिः ।

इति ज्योतिर्गणिते नक्षत्राध्यायकोष्ठकरचना समाप्ता ॥ ४ ॥

अथ चन्द्रग्रहणकोष्ठकरचना ।

कोष्ठकः १ । पर्वान्तस्थानस्य ग्रहणमध्यस्थानस्य च विवरमेव **पर्वसंस्कारः** । स चास्मिन्कोष्ठके कलारूप उक्तः । चन्द्रसूर्ययोर्दिनगत्योः साहाय्येन स कालरूपः कार्यः । अत्यन्तसूक्ष्मताया अनपेक्षायां पर्वसंस्कारः कलारूपः पञ्चगुणः पलात्मको भवति । अत्रान्यश्चन्द्रशर आकर्षणसंस्कृतोऽस्ति ।

पर्वसंस्कार = चन्द्रशरः × चन्द्रविक्षेपवलनज्या

शरः = परमशरज्या × व्यगुविधुज्या

विक्षेपवलनज्या = परमशरज्या × क्रान्तिवृत्तपरिणामितचन्द्रस्य कोटीज्या

कोष्ठकः २ ।

$$\text{ग्रहणस्थितिः} = \frac{३६०० \text{ प०} \sqrt{(\text{मानैक्यखण्डं} + \text{शरः})(\text{मानैक्यखण्डं} - \text{शरः})}}{\text{चन्द्रसूर्यदिनस्पष्टगत्यन्तरम्}}$$

कोष्ठकः ३ ।

$$\text{मर्दस्थितिः} = \frac{३६०० \text{ प०} \sqrt{(\text{मानान्तरखण्डं} + \text{शरः})(\text{मानान्तरखण्डं} - \text{शरः})}}{\text{चन्द्रसूर्यदिनस्पष्टगत्यन्तरम्}}$$

कोष्ठकः ४ । अत्र स्थानांशा नाम बिम्बोत्तरबिन्दोः सकाशात्स्पर्शमोक्षबिन्दुपर्यन्तं चक्रांशाङ्किते बिम्बप्रान्ते मीयमाना अंशाः । ते च कोष्ठके यदुपकरणं तन्मिताया भुजज्याया ये चापांशास्तेषां नवत्यंशानां च योगवियोगात्साधिताः । बिम्बस्योत्तरबिन्दोः सकाशाद्बिम्बपूर्वबिन्दुपर्यन्तं − ९०°, बिम्बपश्चिमबिन्दुपर्यन्तं + ९०° अन्तरमिति सूर्यग्रहणगणिते वक्ष्यमाणस्य खमध्यवलनस्य सव्यापसव्यत्वनिर्णयसुखार्थं कल्पितम् ।

कोष्ठकः ५ । क्रान्तिवलनज्या = परमक्रान्तिज्या × विषुवांशकोटीज्या

$$= \frac{\text{परमक्रान्तिज्या} \times \text{सायनभोगकोटीज्या}}{\text{क्रान्तिकोटीज्या}}$$

अत्र भास्करीयसूत्रम्—द्युजीवा = क्रान्तिकोटीज्या

" युतायनांशोडुपकोटिशिञ्जिनी जिनांशमौर्व्या गुणिता विभाजिता ।

द्युजीवया लब्धफलस्य कार्मुकं भवेच्छशाङ्कायनदिक्कमायनम् " इति ।

कोष्ठकः ६ । अक्षवलनम् ।

भुजाः ।	कोणाः ।
यदि अ = अक्षांशाः = ध्रुवोन्नतिः,	आ = अक्षवलनम्
ब = क्रान्तिकोटी	बा = अ. क. भुजकृतकोणः
क = क्षितिजोत्तरबिन्दोः ग्रहस्य चान्तरम्	का = १८० − नतकालकोणः

ईदृशे गोलीयत्रिकोणे—

$$\text{स्प.}\ \tfrac{1}{2}(\text{आ}+\text{बा}) = \frac{\text{को. ज्या}\cdot\frac{1}{2}(\text{अ}-\text{ब})}{\text{को. ज्या}\cdot\frac{1}{2}(\text{अ}+\text{ब})}\times \text{को. स्प.}\ \tfrac{1}{2}\ \text{का}$$

$$\text{स्प.}\ \tfrac{1}{2}(\text{आ}-\text{बा}) = \frac{\text{भु}\cdot\text{ज्या}\cdot\frac{1}{2}(\text{अ}-\text{ब})}{\text{भु}\cdot\text{ज्या}\cdot\frac{1}{2}(\text{अ}+\text{ब})}\times \text{को. स्प.}\ \tfrac{1}{2}\ \text{का}$$

आभ्यां समीकरणाभ्यां संक्रमणगणितेन **आ**कोणो नामाक्ष**वलनं** वास्तवं लभ्यते । परं त्वियं रीतिः परमायासास्पदा । तथा च अस्यामक्षांशाः क्रान्तिः कालकोण इत्युपकरणत्रयस्य सद्भावात्कोष्ठकरचनाऽपि दुर्घटा । अत एव ग्रहः समवृत्ते भभ्रमगत्या भ्रमतीति प्रकल्प्याधस्तनेन स्थूलसूत्रेणायमक्षवलनकोष्ठको रचितः ।

$$\text{अक्षवलनज्या} = \text{अक्षांशज्या} \times \text{नतकालांशज्या}$$

एतत्संबन्धेन **श्रीमद्भास्कराचार्या गोलाध्याय** एवं वदन्ति— " अतः सममण्डलगतैर्नतांशैरक्षवलनं साधयितुं युज्यते । ते तु महायासेन ज्ञायन्ते । न तु सुखेन । अतस्तज्ज्ञानार्थं स्थूलोऽनुपातः सुखार्थं कृतः । ... ... । नतज्याया अक्षज्या गुणः, द्युज्या हरः, फलं स्थूलवलनज्या स्यात् " इति । **आचार्याणा**मियं रीतिर्मद्रीत्यपेक्षया न्यूनस्थूला । यतो दिनार्धनतकालयोः प्रमाणेन सममण्डलनतांशानयनं तैरुपदिष्टम् । मयाऽत्र लाघवार्थं केवलं नतकालादेवाक्षवलनं साधितम् । सूक्ष्मतापेक्षायामाचार्यपद्धत्याऽक्षवलनं साध्यमिति कथनं सुज्ञानामनवश्यम् । अक्षवलनानयन **आचार्याणां** सूत्रम्—

" खाङ्का ९० हतं स्वद्युदलेन भक्तं स्पर्शादिकालोत्थनतं लवाः स्युः ।
तेषां क्रमज्या पलशिञ्जिनीघ्नी भक्ता द्युमौर्व्या यदवाप्तचापम् ॥
प्रजायते प्रागपरे नते क्रमादुदग्यमाशं वलनं पलोद्भवम् " इति ।

अस्यार्थव्यक्तिः समीकरणेन—

$$\text{अक्षवलनज्या} = \frac{\text{भुजज्या}\left(\dfrac{90^\circ \times \text{नतकालः}}{\text{दिनार्धं निजं}}\right)\times \text{अक्षांशज्या}}{\text{क्रान्तिकोटीज्या}}$$

विशेषः— चन्द्रग्रहणे स्थानांशाः विक्षेपवृत्तसंबन्धिनो भवन्ति । तेषां क्रान्तिवृत्तीयत्वसिद्ध्यर्थं विक्षेपवलनमिष्टम् । नैवं सूर्यग्रहणे । तत्र नातिसंस्कृतशरस्य सर्वदा कदम्बोन्मुखत्वाद्विक्षेपवलनमप्रासङ्गिकम् ।

इति श्रीज्योतिर्गणिते चन्द्रग्रहणाध्यायकोष्ठकरचना समाप्ता ॥ १ ॥

अथ सूर्यग्रहणकोष्ठकरचना ।

प्रकरणम् १ — विवक्षितग्रामसंबन्धि गणितम् ।

कोष्टकः १। भूपृष्ठे दशघटीमिते नतकाले सति लम्बनं घटीचतुष्कमितमृणं भवति। अतो भूमध्ये घटीषट्कमिते नतकाले दर्शश्चेद्भूपृष्ठे दशघटीमिते नतकाले ग्रहणमध्यो गोचरः स्यात्। मध्यकालात्स्पर्शकालः परमावधौ घटीचतुष्केण पूर्वं घटते। तस्माद्यदि भूमध्ये घटीषट्कमिते नतकाले दर्शान्तस्तदा भूपृष्ठे चतुर्दशसु नतघटीषु ग्रहणस्पर्शः स्यादित्युपपन्नम्। परं पूर्वाह्णे पञ्चदश नाड्यो नतघटीरहिताः सूर्योदयादुद्गता नाड्यो भवन्ति। अतो भूमध्ये मध्यमसूर्योदयान्नवम्यां घट्यां यदि दर्शान्तस्तर्हि प्रथमायां घट्यां स्थूलः स्पर्शः स्यादिति सिद्धम्। एवमितरे स्पर्शकाला आनीताः।

कोष्टकः २, । ३ । इष्टस्थल इष्टकाल आकाशे यः खस्वस्तिकबिन्दुस्तस्य—

विषुवांशाः = याम्योत्तरलग्नविषुवांशाः	सायनभोगः = त्रिभोनलग्नम्
क्रान्तिः = तत्रत्या अक्षांशाः	शरः = त्रिभोनलग्ननतांशाः व्यस्तदिक्काः

मध्यमप्रातःकाले सायनमध्यमरविरेव क्षितिजलग्नविषुवांशाः। तानिष्टकालांशैः प्रचाल्येष्टकालिका विषुवांशाः साध्याः। अक्षांशाः सुस्थिराः। क्षितिजलग्नविषुवांशास्त्रिभोना **याम्योत्तरलग्नविषुवांशा** भवन्ति। एवमिष्टकालिकखस्वस्तिकबिन्दोर्विषुवांशक्रान्तिभ्यां त्रिप्रश्नोक्तरीत्या तस्य सायनभोगशरौ साधितौ। खस्वस्तिकं नाम खमध्यबिन्दुः।

कोष्टकः ४।

विश्लेषांशाः	=	सायनरविः	−	सायनत्रिभोनलग्नम्
अस्फुटलम्बनम्	=	क्षितिजलम्बनम्	×	विश्लेषांशज्या
स्फुटलम्बनम्	=	अस्फुटलम्बनम्	×	नतांशकोटीज्या
नतिः	=	क्षितिजलम्बनम्	×	नतांशज्या

अत्रास्फुटलम्बनं नामेष्टकाले त्रिभोनलग्नबिन्दुर्यस्मिन्स्थाने खमध्ये तिष्ठति तत्रत्यम् स्फुटं नामेष्टस्थलीयम्। अनयोर्गुणोत्तरं नतांशकोटीज्यासमम्। परमलम्बनं क्षितिजलम्बनस्यापरपर्यायः।

कोष्टकः ५। अत्र खमध्यवलनं नाम सूर्यमध्यात्कदंबखस्वतिके प्रति नीयमानयोर्महावृत्तयोर्मध्येजायमानः कोणः। अस्य गणितं गोलीयत्रिकोणमितिरीत्या कृतम्। तत्र सूर्यनतांशाः कर्णः, त्रिभोनलग्ननतांशा भुजः, विश्लेषांशाः कोटी भवति। अतोऽग्रिमसूत्रावतारः—

$$\text{खमध्यवलनकोटीस्पर्शरेखा} = \frac{\text{नतांशस्पर्शरेखा}}{\text{विश्लेषांशज्या}}$$

इति प्रथमप्रकरणकोष्ठकरचना।

प्रकरणं २ – निखिलभूमण्डलसंबान्धि गणितम्

इदं गणितमाश्चर्यकरमप्यातिश्रमावहम् । अतः स्वल्पान्तरमङ्गीकृत्य कोष्टका रचिताः । स्वल्पान्तरकारणमध उच्यते—

लम्बनं नाम चन्द्रमध्याद्दृश्यमानं **भूबिम्बदलम्** । लम्बनस्य चन्द्रबिम्बदलस्य च ह्रासवृद्ध्योः कारणसमत्वात्तयोर्मध्यममानाभ्यां कोष्ठकान्रचयितुं युज्यते । न तथा सूर्यबिम्बस्य विषये तद्ध्रासवृद्ध्योः कारणपरत्वात् । परं तत्र ह्रासवृद्धिः परमावधावर्धकलापेक्षयाऽधिका न भवति । अतो गणितेऽर्धकलान्तरमङ्गीकृतेन कोष्ठकरचना निर्वहति । अस्मात्कारणादक्षांशेषु रेखान्तरेषु च कदाचिदर्धांशमितमन्तरं स्यात् ।

अथान्यत्कारणमुच्यते— इदं गणितमनेकगणकानां साहाय्येन विना ममैकाकिनः केवलं दुष्करमभवत् । अस्यामापत्तौ छेयकरीतिरेवैक उपायो मया दृष्टः । छेयकरीत्या लब्धेष्वंशेषु दशमांशावधि सूक्ष्मता न सिध्यति । कष्टेन साधितायामपि कोष्ठकाः प्रसरन्ति । अत आसन्नपूर्णा अंशा एव कोष्ठकेषु लिखिताः । अस्मात्कारणादप्यक्षांशरेखांशेषु कदाचिदर्धांशमितमन्तरं स्यात् ।

चन्द्रबिम्बदलं + रविबिम्बदलं = चन्द्रच्छायाबिम्बदलम्
१५′·६ + १६′·०५ = ३१′·६५

इदं छायाबिम्बदलं भूबिम्बदले ५७′·१ मिते सति सत्यम् । भूबिम्बस्य पूर्वापरव्यासार्धे समदशभागान्कल्पयित्वा तेषां **स्थितिखण्ड** इति संज्ञा कृता । छायामार्गस्य सूक्ष्मत्वेन गणनार्थे भूबिम्बस्य याम्योत्तरव्यासार्धे समसहस्रं भागाः कल्पिताः । अतः सहस्रमिते भूव्यासार्धे चन्द्रच्छायाबिम्बदलं ३१६५० ÷ ५७·१ = ५५४ मितं भवति ।

एकं स्थितिखण्डं चन्द्रलम्बनदशमांशतुल्यम् । इदं चन्द्रछायां यावता कालेन पर्यटति स स्थितिकालगुणः । अस्मिन्काले यावन्तो विषुवांशा उदीयन्ते तावन्मितो विषुवांशगुणकः । **अत्र ज्ञापकम्**— यदा चान्द्री दिनगतिः ६८०′ तदा लम्बनं ५३′·१ । छायागतिः सूर्यचन्द्रयोर्गत्यन्तरमिता ६८०′–५९′ = ६२१′ । अतः (५′·३१ × ६० घट्यः ÷ ६२१′) = ०·५३१ घटीमितो जातः कालगुणः । अयं किंचिदधिकषड्गुणीकृतो जातो विषुवगुणः ३°·०९ ।

भूगोलीयं सूर्यग्रहणगणितं विवक्षितस्थानीयसूर्यग्रहणगणिताद्विलोमम् । आद्यं विवक्षिताग्रासात्स्थानानयनम् । द्वितीयं विवक्षितात्स्थानाद्ग्रासानयनम् । ३१·६५ कलामितंचन्द्रविरलच्छायाबिम्बदलस्य प्रमाणम् ५५४ । अत एककलाप्रमाणम् १७ । यत्र यत्र दशकलामितो ग्रासः स्यात्तादृशानि स्थानानि ज्ञातुमिष्टानि चेत् १७० भागान् ५५४ भागेभ्यो विशोध्य लब्धेन शेषेण च्छायाशरः संस्कार्यः । अनेन संस्कृतच्छायाशरेण द्वितीयकोष्ठाद्विश्लेषशरांशानानीयाऽऽसमाप्ति गणिते कृते दश दश कला ग्रासदर्शिका रेखा प्रजायते । ग्रासस्य दक्षिणोत्तरदिग्भेदाद्रेखाद्वयं प्रजायेत ।

अथोपपत्तिदिक् ।

सूर्यग्रहणावसरे द्रष्टाऽऽत्मानं सूर्यमध्ये स्थापयेत् । ततस्तावत्यन्तरे चन्द्रमदृष्ट्वा केवलं तद्विरलच्छायां तथा दैनंदिनगत्या भ्रमन्ति भूपृष्ठगतानि महाद्वीपानि सागरांश्च पश्यामीति कल्पयेत् । ततश्चन्द्रग्रहच्छेयके निर्दिष्टवद्दिगङ्कनं कृत्वा क्रान्तिवृत्तं विक्षेपवृत्तं च न्यसेत ।

ततश्चन्द्रग्रहणच्छेद्यके—

भूभार्धम् = १०००
चन्द्रबिम्बार्धम् = ५५४
शरः = छायाशरः

इति प्रकल्प्य च्छेद्यकसाहाय्येन स्पर्शमोक्षादिनिखिलगणितस्योपपत्तिरूह्या धीमद्भिः। रविमध्याद्विलोक्यमाना चन्द्रच्छाया शुक्ररवियुतिवद्वक्रगतिर्दृश्यतेऽतस्तां विलोमं चालयेदिति दिक्।

इति द्वितीयप्रकरणकोष्ठकरचना।

इति द्वितीयाध्याये भूमण्डलसूर्यग्रहणगणितं नाम द्वितीयं प्रकरणम् ॥ २ ॥

इति ज्योतिर्गणिते सूर्यग्रहणाध्यायकोष्ठकरचना समाप्ता ॥ २ ॥

अथ युत्यध्यायकोष्ठकरचना ताराचन्द्रयुतिः।

कोष्ठकः १। तत्राऽऽदौ युत्यनुकूलतारान्वेषणम्। चन्द्रस्य परमशरः ५ अंशाः। अतो यासां शरः पञ्चांशेभ्योऽल्पस्तास्तारा एव चन्द्रेण ग्रहीतुं शक्यन्ते। ईदृशानां याश्चन्द्रसांनिध्ये न लुप्यन्ति ता एवास्मिन्कोष्ठके पठिताः। तासां राहुसंबन्धिन्यौ युतिमर्यादा एवं निश्चिताः—युत्यनुकूलतारायाः शरं पञ्चदशकलाभिः पृथग्युतोनं कृत्वा यौ शरौ प्रजायेते तयोरुपकरणे पञ्चाङ्गगणितस्य १४ कोष्ठकान्निश्चित्य ताभ्यां ताराभोगे पृथग्विशोधिते सति यच्छेषद्वयं लभ्यते सैव मर्यादा स्यात्। परमेता मर्यादा नतिवशेन भिद्यन्ते।

कोष्ठकः २। अत्रत्या भोगशरा **नक्षत्राध्यायस्य** द्वितीयकोष्ठकादुद्धृताः। युतिस्थानं नाम समविभागात्मकनक्षत्रस्थानात्ताराशरमूलपर्यन्तं क्रान्तिवृत्ते प्रागपरमन्तरम्। वर्गो नाम चक्रास्तिवर्गः। यथा रोहिणीतारा प्रथमवर्गीय, अग्निर्द्वितीयवर्गीय इति।

कोष्ठकौ ३, ४। चन्द्रस्य विक्षेपवृत्तस्य त्रिभोनलग्नं नतांशाश्चैतेषां गणितं क्रान्तिवृत्तस्य त्रिभोनलग्ननतांशानां गणितवत्कृतम्। विशेषस्त्वत्र सायनराहुः क्रान्तिपातः कल्प्यः। चन्द्रपरमशरः परमक्रान्तिः सायनराहुणा रहितं क्रान्तिवृत्तत्रिभोलग्नं विषुवांशाः। व्यस्तदिक्कास्त्रिभोनलग्ननतांशाः क्रान्तिः। लाघवार्थं विवक्षितेऽक्षांशे क्रान्तिविक्षेपवृत्तयोर्ये त्रिभोनलग्ने नते चोत्पद्येते तयोरन्तरमेव कोष्ठकयोर्लिखितम्। तत्र तृतीये कोष्ठके संस्कारस्योभयतश्चिह्नमस्ति। अतस्तस्य यस्मिन्पार्श्वे ऊर्ध्वाधरमुपकरणं तिष्ठेत्तत्पार्श्वीयचिह्नयुतसंस्कारे ग्राह्यः। चतुर्थकोष्ठ उभयपार्श्वस्थयोरुपकरणयोः संस्कारचिह्नं समानमेव।

इति ज्योतिर्गणिते युत्यध्यायकोष्ठकरचना समाप्ता ॥ ३ ॥

अथ चतुर्थाध्यायस्थकोष्ठकरचना ।

चन्द्रदर्शनम् ।

कोष्ठकः १ । २ । प्रथमे कोष्ठे खमध्यशरो नाम त्रिभोनलग्नस्य व्यस्तदिक्का नतांशाः **द्वितीये कोष्ठे** प्रथमगुणः खमध्यशरस्य कोटीज्या । द्वितीयगुणस्तस्यैव भुजज्या ।

गुरुशुक्रयोर्लोपदर्शने ।

कोष्ठकः १ । अन्तर्युतिर्नाम रविशुक्रयोः **षड्भान्तरसमयः** । स चास्मिन्कोष्ठके मध्यमग्रहाभ्यां साधितः । युतिकाले तिथिगणो नाम मेषसंक्रमणाद्युतिकालपर्यन्तं गततिथयः । भाजकस्तु शीघ्रकेन्द्रभगणावधौ मध्यमतिथयः ।

		ति.	घ.
ध्रुवकाः । शके १८०० मेषसंक्रमणादूर्ध्वं शुक्रस्य	अन्तर्युतिकालः	५४०	२६·३
,,	बहिर्युतिकालः	२४३	५०·३
गुरोः	,,	३१३	१०·७

	दि.	ति.
शुक्रभाजकः	५८३ · ९२१२ ८६६	५९३ · २०३१ ६५०७
गुरुभाजकः	३९८ · ८८४० ८००	४०५ · २२४६ ५००५
रविवर्षम्	३६५ · २५६३ ७४४	३७१ · ०६२३ ९०८३
दिवसः	१ · ०००० ०००	१ · ०१५९

कोष्ठकः २ । ग्रहाणामुच्चानामल्पगतित्वान्नियते तिथिगणे तेषां नियतं मन्दफलं वर्तते । अत इष्टतिथिगणे रविग्रहयोर्मन्दफलयोरैक्यं बैजिकरीत्या कृत्वा तच्च तयोर्दिनमन्दस्पष्टगत्यन्तरेण विभज्य लब्धदिवसानां तिथय एवात्रत्यः संस्कारः । अनेन मध्यमयुतिगणो युतश्चेन्मन्दस्पष्टग्रहाणां युतिकालिकास्तिथिगणो भवति ।

कोष्ठकः ३ । त्रिभोनलग्नस्य व्यस्तक्रान्तिः ।

स्फुटयुतिसमये नियते युतितिथिगणे नियतं त्रिभोनलग्नं वर्तते । अतोऽस्तोदयसमयेऽपि नियतासन्नेन त्रिभोनलग्नेन भवितव्यम् । अतो गणितलाघवार्थमत्र त्रिभोनलग्नक्रान्तिरपि तिथिगणादेव साधिता । इयं क्रान्तिर्व्यस्तदिक्काऽस्ति । वर्षसमत्या सायननिरयनसंक्रमणयोरन्तरमेकतिथिसमं भवति । अतोऽस्य कोष्ठकस्योपकरणमनेन भेदेन संस्कार्यम् ।

कोष्ठकः ४ । संध्यारुणसंस्कारः ।

अयं संस्कार ऋतुपरत्वेन भिद्यते । ऋतावपि प्रत्यहं भिद्यते । अतोऽस्य सूक्ष्मत्वेन निश्चयोऽशक्य एव । अत्र स्वानुभवाच्छुक्रस्य लोपदर्शनसमये ६°·४ उन्नतांशा अङ्गीकृताः । गुरोस्तु ११° । एतानुन्नतांशान्सूर्यग्रहयोर्गत्यन्तरेण तिथिषु परिणमय्य ता अस्मिन्कोष्ठके लिखिताः ।

कोष्ठकः ५ । शरसंस्कारः ।

ग्रहशरकलाः सूर्यग्रहयोरेकतिथिगत्यन्तरेण विभज्य तिथिरूपः शरःसाधितः । उदयकालिकशरस्य चिह्नं यथास्थितमस्ति । परं त्वस्तकालिकशरस्य चिह्नं व्यत्यस्य कोष्ठे प्रदर्शितम् । यत उदयकालः शरचिह्नमनु भियते । अस्तकालस्तु तद्विपरीतम् ।

कोष्ठकः ६ । शनिवलयगणितम् ।

नामानि	भोगः		कोणः		कोष्ठः
शनेर्विक्षेपवलयवृत्तयोः संपाते	१५०°	१′·९	२६°	५०′	१
क्रान्तिवृत्तवलयवृत्तयोः संपाते	१४५	४५·२	२८	११	२।३
क्रान्तिवलनम् ...	...		२३	२७	४

अथ चन्द्रशृङ्गोन्नतिः ।

कोष्ठकः १ । चन्द्रसूर्ययोर्मध्येन प्रसारितं महावृत्तमपसारवृत्तम् । अपसारवृत्तस्य क्रान्तिवृत्तस्य च मध्ये जायमानः कोण एवात्रत्यः संस्कारः क्षितिजस्थे रवावनेन संस्कारेण युतास्त्रिभोनलग्ननतांशा अपसारवृत्तनतांशा भवन्ति । क्षितिजस्थे रवावुभयोर्वृत्तयोस्त्रिभोनलग्नं समानमेव । स्वल्पान्तरात्

$$\text{संस्कारज्या} = \frac{\text{चन्द्रशरज्या}}{\text{तिथिज्या}}$$

कोष्ठकः २ । सूर्यग्रहणस्य पञ्चमे कोष्ठे तिथिकोटीमिता विश्लेषांशास्तिर्यगुपकरणाद्, अपसारवृत्तनतांशा ऊर्ध्वाधरमुपकरणामिति मत्वाऽपसारवृत्तस्य खमध्यवलनं साधनीयम् । तस्य कोटिरेव शृङ्गोन्नतिः ।

अथागस्त्यलोपदर्शनसूत्रोपपत्तिः ।

यत्र देशे पलभा ३ अङ्गुलानि तत्र दृक्कर्मलवाः १९°·२ । परं यत्र पलभा ९ अङ्गुलानि तत्रागस्त्यदृक्कर्म ६८°·४ भवन्ति । दृक्कर्मलवेषु स्वस्वपलभाभ्यां भक्तेषु जातौ पलभयोर्गुणकौ क्रमेण ६°·४ । ७°·६ । अतः पलभाया एकैकाङ्गुलवृद्धौ गुणके ०°·२ प्रमिता वृद्धिर्जायत इति सिद्धम् । अतः पूर्वोक्तपलभयोर्मध्यगतपलभाया दृक्कर्मसाधनार्थमुपायो बीजगणितेनोच्यते ।

यद्यधस्तने समीकरणे क्ष = (पलभा − ३ अङ्गुलानि)

तदर्वान्तरे स्थले—

$$\text{अगस्त्यदृक्कर्म} = (\text{क्ष} + ३)\ (·२\,\text{क्ष} + ६^\circ·४)$$
$$= ·३\,\text{क्ष}^२ + ७\,\text{क्ष} + १९^\circ·२$$

$$\text{संध्यारुणसंस्कारः} = \frac{१३·८}{·२\,\text{क्ष}^२ + ७\,\text{क्ष} + ३३^\circ}$$

अत उपपन्नम्—" त्र्यूनाक्षभा सप्तगुणा " इति ।

इति ज्योतिर्गणिते लोपदर्शनाध्यायकोष्ठकरचना समाप्ता ॥ ४ ॥

अथ पातकोष्ठकरचना

कोष्ठक: १। अस्मात्सायनराहुस्थानसंबद्धा चन्द्रस्य परमक्रान्तिर्लभ्यते।

कोष्ठक: २। अस्मात्तेनैवोपकरणेनोद्गोलसंधिः सिध्यति।

कोष्ठक: ७। अस्मादुद्गोलसंधिस्थानीया विषुवांशा जायन्ते। एतेषां त्रयाणां गणितं गोलीयत्रिकोणमित्या साधितम्। अस्मिन्गोलीयत्र्यस्रे सायनराहुरेको भुजः। सूर्यपरमक्रान्तिश्चन्द्रपरमशरश्च भुजाग्रसक्तौ कोणौ। एभिः चन्द्रग्रहणकोष्ठकरचनायां षष्ठकोष्ठकस्थितयाऽक्षवलनसरण्या गोलीयत्र्यस्रस्य शेषावयवाः साध्याः। **विशेषस्तु**— अक्षवलनसरण्यां भुजकोणयोर्विपर्यासे कृतेऽत्रोपयोज्या सरणी सिध्यति। (चन्द्रग्रहण षष्ठकोष्ठकं ३९६ पृष्ठे)

एतत्कोष्ठकत्रितयं शके १८०० वर्षभवां क्रान्तिमुपयोज्य साधितम्। यदि रविक्रान्तिर्भिद्येत तदाऽस्मिन्नप्यन्तरं प्रजायेत। रविपरमक्रान्तिः संप्रति प्रत्यब्दं विकलार्धमिता ह्रसति। अस्मात्कारणाच्चन्द्रपरमक्रान्तिरपि सहस्रवर्षेष्वष्टौ कला ह्रसेत्। एतत्प्रयुक्तं संस्कारं चन्द्रपरमक्रान्तौ दत्त्वा भविष्यद्भिर्गणितकोविदैः पातगणितं कार्यम्।

कोष्ठकः ३। चन्द्रस्य परमक्रान्तौ सूर्याकर्षणम्। चन्द्रस्य गोलसंधितः प्रागग्रे त्रिभेऽन्तरे चन्द्रशरे यावत्प्रमाणं सूर्याकर्षणं तावत्प्रमाणं चन्द्रस्य परमक्रान्तावपि भवितुमर्हति। अत्र विक्षेपवलनजन्यभेदोऽत्यल्पत्वादुपेक्षणीयः।

कोष्ठकः ४। गोलसंधौ चन्द्रशरे यत्सूर्याकर्षणं तच्चन्द्रस्य परमक्रान्तिकोटेः स्पर्शरेषया गुणितं चेद्गोलसंधौ सूर्याकर्षणं भवति। छेदनरेषया गुणितं चेद्विषुवांशेषु सूर्याकर्षणं भवति।

कोष्ठकः ५। क्रान्तिवृत्ते चन्द्रविक्षेपवृत्ते च यावन्मिताभ्यां भुजाभ्यां विवक्षिता क्रान्तिर्लभ्यते तयोरन्तरमेव भुजान्तरम्। सूर्यक्रान्तिकोष्ठके सूर्यभुजः सिद्ध एव। चन्द्रस्य भुजस्त्वग्रिमसूत्रेण साधितः।

$$\text{चन्द्रभुजज्या} = \frac{\text{चन्द्रस्येष्टक्रान्तिज्या}}{\text{चन्द्रपरमक्रान्तिज्या}}$$

कोष्ठकः ६। सार्वर्क्षकाले चन्द्रस्य भोगः ८०० कला वर्धते। सूर्यस्य तु तस्मिन्नवधौ मध्यममानेन ६० कलाः। अत एतावति क्षेत्रे तयोः क्रान्त्योर्याबान्भेदस्तावती तयोः क्रान्त्योर्विशिष्टदिनगतिरिति कल्पितम्। वस्तुतः ८० कलामिते क्षेत्रे जायमानं भेदं गणितेन ज्ञात्वा गणितलाघवार्थं स भेदोऽत्र दशगुणीकृतः। पातकालः प्रायः कतिपयघटिका एव तिष्ठति। चन्द्रक्रान्तिगतिः प्रतिघटि भिन्ना। अत एव क्रान्तिचालनं यावदल्पकालिकं तावत्क्रान्तौ सौक्ष्म्याधिक्यम्। सूक्ष्मतासिध्यर्थं पातमध्यकालिकीं चन्द्रक्रान्तिमष्टकलाभिर्युतोनां कृत्वा लब्धेनोपकरणेन हरमानीय तेन पातस्थितिकालः साधितः।

इति ज्योतिर्गणिते पाताध्याय कोष्ठकरचना समाप्ता ॥ ५ ॥

अथ त्रिप्रश्नाध्यायकोष्ठकरचना ।

कोष्ठकः १ । भोगस्पर्शरेषा = विषुवांशज्या × रविपरमक्रान्तिच्छेदनरेषा ।

कोष्ठकः २ । अग्राज्या = क्रान्तिज्या × अक्षच्छेदनरेषा ।

कोष्ठकः ३ । सायनलग्नं = सूर्यग्रहणोक्तं त्रिभोनलग्नं + ९०° ।

कोष्ठकः ४ । सन्ध्याकालो दिनमानंच । अनयोरानयनं प्रागेवोक्तम् ।

कोष्ठकः ५ । किरणवक्रीभवनम् । एतदेकाग्रशीतिनतांशान्तमेककलानिम्ननतांशस्पर्शरेषा-प्रमाणं भवति । तत् ऊर्ध्वमनियतप्रमाणं वर्धते । अतः प्रत्यक्षवेधोपलब्धं ग्राह्यम् ।

कोष्ठकः ६ ।

$$\text{भुजज्या} = \text{चापः} - \frac{\text{चापः}^{३}}{२\cdot३} + \frac{\text{चापः}^{५}}{२\cdot३\cdot४\cdot५} - \frac{\text{चापः}^{७}}{२\cdot३\cdot४\cdot५\cdot६\cdot७} + \text{इत्यादि}$$

$$\text{कोटिज्या} = १ - \frac{\text{चापः}^{२}}{२} + \frac{\text{चापः}^{४}}{२\cdot३\cdot४} - \frac{\text{चापः}^{६}}{२\cdot३\cdot४\cdot५\cdot६} + \text{इत्यादि}$$

$$\text{अत्र चापः} = \frac{\text{चापांशाः} \times ३\cdot१४१५९२६५३५९}{१८०^{\circ}}$$

$$\text{स्पर्शरेषा} = \frac{\text{भुजज्या}}{\text{कोटिज्या}}\text{;} \quad \text{च्छेदनरेषा} = \frac{१}{\text{कोटिज्या}}$$

कोष्ठकः ७ । याताङ्काः । एतेषां साधनं तद्विषयकात्पुस्तकाज्ज्ञेयम् ।

अल्पचापस्य लाग्रतमिकभुजज्यास्पर्शज्यासाधनं २०१ पृष्ठे अधोभागे प्रदर्शितम् ।

कोष्ठकः ८, ९ । विषुवक्रान्तिभोगशरावेतयोर्विपरिणमनरीतिस्तु प्राग्गदितैव ।

इति ज्योतिर्गणिते त्रिप्रश्नाध्यायकोष्ठकरचना समाप्ता ।

। इति श्रीरामकृष्णसुतवेङ्कटेशविरचिते ज्योतिर्गणिते ।
। कोष्ठकरचनाध्यायः समाप्तः ।

अथ प्रसङ्गवशाच्छ्रीमद्भास्कराचार्याणां निवासस्थाननिर्णयः ।

श्रीभास्कराचार्यैरात्मनः पुरं विडनामकमासीदिति **गोलाध्यायसमाप्तौ** स्पष्टं कथितमपि **विडसंनिधौ सह्याग्रनुपलब्धेर्विड्जलशब्द**विषयकाज्ञानाच्च केचिदाधुनिका विद्वांसो विडेतरस्मिन्कस्मिंश्चिद्ग्रामे ते न्यूषुरिति मन्यन्ते । **भरतखण्ड**शिरोभूषणभूतानामाचार्याणां वासस्थानविषय ईदृशमज्ञानं भरतखण्डनिवासिनां दूषणमेव । अतः श्रीभास्कराचार्यपुर-निर्णयोऽवश्यं कार्यः ।

तत्राऽऽद्यावाचार्याणां वचनानि—

" **आसीत्सह्यकुलाचलाश्रितपुरे त्रैविद्यविद्वज्जने**
नानासज्जनधाम्नि बिज्जलविडे शाण्डिल्यगोत्रो द्विजः ।
श्रौतस्मार्तविचारसारचतुरो निःशेषविद्यानिधिः
साधूनामवधिर्महेश्वरकृती दैवज्ञचूडामणिः ॥
रसगुणपूर्णमही १०३६ समशकनृपसमयेऽभवन्ममोत्पत्तिः ।
रसगुण ३६ पूर्णेन * मया सिद्धान्तशिरोमणी रचितः " इति ।

एतद्विषये **मरीचिटीकाकारा** मुनीश्वराचार्या एवं वदन्ति—

" आसीदिति । बिज्जलबिडम् । बिडमितिनामैकदेशे प्रसिद्धम् । तत्कुत्रेति चेत्, सह्यनामककुलपर्वतान्तर्गतभूप्रदेशे महाराष्ट्रदेशान्तर्गतविदर्भापरपर्यायविराटदेशादपि निकटे । गोदावर्या नातिदूरे नाम समीपे यस्मात्पञ्चक्रोशान्तरे—" गणेशाय नमो नीलकमलामलकान्तये " इति लीलावत्यारम्भ उक्तगणेशस्य प्रतिमा प्रसिद्धाऽस्ति । सा तृतीयवर्णा नाम कृष्णवर्णाऽस्ति " **इति ।**

अस्याः **श्रीमुनीश्वराचार्याणामुक्तेः श्री**भास्कराचार्याणां ग्रामो **बिडमेव** नान्य इति कोऽपि **ज्ञास्यति । आचार्योपास्यदैवतं गणेशप्रतिमा बिडसमीपे लिम्बग्रामेऽद्यापि** प्रसिद्धास्ति । **मरी-चिटीकाकाले** शकवर्ष १५५७ आसीत्तथाऽपि पूर्वेतिहासस्याज्ञानाद्बिज्जलशब्दसंदर्भः **श्रीमुनीश्वराचार्यैर्नोक्तः** । अतोऽस्मिन्विषये यन्न्यूनं तदधस्तनैः पद्यैः संपूरयामः—

सह्याचलाज्जुम्बरसंनिधौ या सह्यस्य शाखेन्द्रदिशी प्रयाता ।
गोदावरीदक्षिणरोधसा सा समं चलित्वा बिडसंहिताऽभूत् ॥ १ ॥

सह्यस्य शाखासु महत्तमाऽपि नास्त्युद्गमोऽस्यां च महानदीनाम् ।
प्रसिद्ध्यभावात्किल भास्करार्यैः संज्ञापिता सह्यकुलाचलेति ॥ २ ॥

शिरोमणिग्रन्थसमाप्तिकाले विडान्निदिश्यभ्रकु १० योजनानि ।
कल्याणनाम्नी जिनराजधानी तन्मण्डले बिज्जल ईश आसीत् ॥ ३ ॥

कल्चूर्यवंश्यः परमादिपुत्रश्चालुक्यराण्माण्डलिकः प्रतापी ।
सेनेश इत्युल्लिखितं शिलायां विजापुरे त्र्यद्रिदिशो १०७३ न्मितेऽब्दे ॥

चालुक्यसाम्राज्यसुकर्णधारः सस्वामिनं हन्त तृतीयतैलम् ।
विजित्य लोभात्किल बिज्जलोऽयं कल्याणसिंहासनमारुरोह ॥ ५ ॥

पद्मावतीं रूपवतीं विलोक्य व्यामोहितस्तां महिषीं चकार ।
भ्रात्रेव तस्या बसवेन पश्चात्स घातितो मन्त्रिपदस्थितेन ॥ ६ ॥

संस्थापितं श्रीबसवेन शैवं मतं पुराणे बसवाभिधे च ।
जैनैस्तथा बिज्जलनाम्नि काव्ये संकीर्तितं बिज्जलभूपवृत्तम् ॥ ७ ॥

पुरं स्थितं बिज्जलराज्यमध्ये तस्माच्च तन्नामविशेषपूर्वम् ।
श्री भास्करार्यैः स्वपुरं यथार्थं संकीर्तितं बिज्जलबीडनाम्ना ॥ ८ ॥

इदानीं पूर्वसंप्रदायानुसारमात्मनः कुलस्थलकालादीनत्र ग्रन्थसमाप्तौ कथयामः—

अस्ति प्रतीच्यां दिशि कोङ्कणे च श्रीभार्गवक्षेत्रमतिप्रसिद्धम् ।
तत्संनिधौ तिष्ठति केतकीति ग्रामो निवासो मम पूर्वजानाम् ॥ १ ॥

---

* अत सिद्धान्तशिरोमणिसमाप्तिकालः शा. श. व. १०७२

तस्मात्पुरा केतकरोपनामा गार्ग्यः प्रतिष्ठानमियाय शम्भुः ।
नृसिंहगोपालनथुह्वयास्तत्पुत्रादयस्तत्र सुखेन तस्थुः ॥ २ ॥

नथोर्ज्येष्ठपुत्रः सखारामनामा सखारामजो मत्पिता रामकृष्णः ।
विहाय प्रतिष्ठानमायान्नगुन्दं गुणाङ्काब्धिचन्द्रो १७६३ न्मिते शाककाले ॥ ३ ॥

ततस्तत्र संस्थानविद्वत्समाजे बभूवाग्रणीर्ज्यौतिषे शब्दशास्त्रे ।
ततो द्वादशाब्दैरहं वेङ्कटेशोऽभवं तत्र कर्नाटकस्थे नृगुन्दे ॥ ४ ॥

ज्योतिर्गणितमिदमहं द्वादशवर्षाणि सततमायस्य ।
बागलकोटेऽरचयं तिथिवसुचन्द्रो १८१५ न्मिते शकनृपाब्दे ॥ ५ ॥

पितामहः पिता चाहं मत्तृतीयसुतस्तथा ।
समं चत्वारिंशताऽब्दैः क्रमेणान्तरिताः किल ॥ ६ ॥

नथोः कनिष्ठः पुत्र **एकनाथ**नामाऽऽसीत् । तस्य पौत्रा **भास्करादयः** संप्रति **ग्वाल्हेर-संस्थाने कोलारसग्रामे** निवसंति । **गोगटे**पाह्वो मातुलवंश **उज्जयिन्याम्** । मज्ज्येष्ठभ्राता ज्योतिर्विद्बालकृष्णशास्त्री पुत्रपौत्रान्वितः **सन्मलापहारिणी**तटस्थिते **रामदुर्गसंस्थाने** निवसति । ममाऽऽद्यो गुरुः "**त्र्यम्बक सदाशिव गोखले**" तथा परिपालनकर्ता "**विनायक दाजी बेहेरे**" इत्येतौ संप्रति **हुब्बळ्ळी**धारवाडग्रामयोर्निवसतः । इति संक्षेपत आत्मकुलवृत्तम् ।

इति ज्योतिर्गणिते आत्मकुलवृत्तान्तकथनम् ॥ ७ ॥

इति श्रीरामकृष्णसुतवेङ्कटेशविरचिते ज्योतिर्गणिते ज्योतिश्चमत्कारनामा द्वितीयः परिच्छेदः समाप्तः ॥ २ ॥

समाप्तोऽयं ग्रन्थः ।

श्रीयोगेश्वरी प्रसीदतु ।

OPINIONS

OF EMINENT PERSONS AND SCHOLARS.

The calculations of the positions of the sun, moon, and the planets by Hindoo astronomers of the day prove wrong as the rules followed by them are based on a duration of the year which is incorrect and on an amount of the precession of the Equinoxes slightly in excess of the true one. They themselves find, especially, in the cases of Eclipses that their calculations do not prove correct. But they are so conservative that no one has hitherto been able to induce them to get their rules corrected in the light of the more accurate calculations of European Astronomers. This is probably due to their having no treatise composed in the manner of those with which they are familiar. **Mr. Venkatesh Bapuji Ketkar** has composed two such treatises; in the smaller one, he gives rules in the manner of the old Hindoo astronomers, and in the larger he gives Tables to render the calculations easier. In the olden times the Hindoos recast their astronomy in accordance with the additional knowledge, they derived from the Greeks, but in modern times they have not yet availed themselves of the discoveries of Europeans and hence the positions of the heavenly bodies, given in their calendars are wrong. The attempt therefore made by **Mr. Ketkar** to recast the old rules in accordance with the correct knowledge we have attained deserves every encouragement. If his books are printed and published they will prepare the way for a most desirable improvement in the Hindoo Calendar. **And they can be printed only if the Educational Department and Princes and Chiefs promise to purchase a certain number of copies.**

POONA.
30th March 1898.

R. G. BHANDARKAR,
Professor of Oriental Languages, Deccan College.

Soon after the publication of Grahalāghava about the year 1520 A. D. the Sūrya Siddihānta, which requires a knowledge of Spherical Geometry and Trigonometry, must have fallen into comparative disuse. Ganesh Daivajnya's treatise sets forth metrical rules for astronomical calculations requiring only an acquaintance with the four simple rules of Arithmetic. The aim of Grahalāghava was to have supplied very simple rules and as a natural consequence accuracy was sacrificed to readiness and facility of calculation. The treatise became popular and has been in use as a text of Hindoo Practical Astronomy. The errors consequent on the adoption of such an elementary work for all practical purposes, are not the only errors to be found in the Hindoo Calendar. New instruments, and new mathematical methods have disclosed to us errors in the computed values of the motions of the planets, the length of the year, the total amount of precession and its annual value.

The Grahalāghava has only added its quota to the errors due to an imperfect knowledge of the heavens. It is important that all these errors should be expunged from the Hindoo Calendar. Shri Shankarāchārya of Sankeshwar is said to have made one or two attempts to invite a conference of notable Hindoo astronomers and pandits, but no good has yet resulted. Inability and conservatism are two great obstacles in the way of reform. Such attemptes at reform as they directly come in conflict with the established religious usage have very often proved failures. However there are directions in which reform may succeed and conservatism will not come in its way. Of all branches of knowledge, astronomy is perhaps the only one in which the spirit of conservatism is the weakest. Two centuries after the Grahalāghava, it was found that observation did not confirm the results of calculations of eclipses. Vishvanāth Daivajnya, therefore, proposed such changes as brought calculation to be in agreement with observation and these changes were quickly accepted.

Mr. Ketkar's work is written in Sanskrit and thus its circulation is likely to extend over the whole of India. In compiling his work Mr. Ketkar has taken the help of the Tables of Hansen, Leverrier, and Newcomb and it gives results closely agreeing with the Nautical Almanac. One interesting feature of his tables is that all corrections are rendered additive the advantage of which will be readily recognized by all who have to make astronomical computations.

When there are no tables available it is necessary that there should be a set of rules which will allow calculations to be made independently at any time. To render Mr. Ketkar's work acceptable and popular amongst Hindoo astronomers, I suggested the insertion of an appendix, on the lines of Grahalāghava so that by committing to memory a number of Metrical canons, a student can compute the planetary positions for himself without reference to the Tables. Now that this addition has been made, in the form of a separate book called *Ketaki* I believe, Mr. Ketkar's work is likely to supplant the Grahalāghava and I think Mr. Ketkar is to be congratulated on his having done all that seems necessary for the success of his work.

I hope Mr. Ketkar's work will receive from **Princes** and **Chiefs** from **learned men, educational authorities, all the encouragement** and patronage which it really deserves and without which such undertakings seldom thrive.

INDORE,
19th April 1898.

R. S. ATHAVALE, M. A.,
Professor of Mathematics Holkar College, Indore.

Mr. Venkatesh Bapuji Ketkar, Head Master Anglo-Vernacular School, Bagalkot, has written a book **in Sanskrit verse** similar to the ancient book called Grahalāghava on Astronomy. His aim is to eliminate all cumulative errors found in calculating the positions of the planets according to the Grahalāghava. When Prof. Chhatre published his ग्रहसाधन-कोष्टकें, viz., Tables for the calculations of the positions of planets the old Astronomers objected to follow the professor because his tables and explanations were in the vernacular and not expected to be learned by heart as is usual in studying Graha-

lāghava. **Mr. Ketkar has come forward to supply this want and has admirably succeeded** in placing before the public an exact substitute for Grahalāghava, with new rules based on the methods of Nautical Almanac. He has thus revived as if it were the popular work and has embodied in his new work all the accurate figures now obtainable with the best of the astronomical instruments and modern research. This book deserves patronage from all parties. After the late lamented Mr. Shankar B. Dixit, Mr. Ketkar is the only scholar in astronomy who is trying to improve our old system of Astronomy on this side of India.

It is hoped that the public and even Government will encourage Mr. Ketkar.

THANA,
17th May, 1898.

G. K. APTE,
Executive Engineer, Thana.

Mr. Venkatesh Bapuji Ketkar has written a new Sanskrit Karaṅa (a practical work) on Hindu Astronomy. **India has never seen such a work as yet.** In our Hindoo Panchānga (calendar) there are chiefly five angas such as the Tithis and others, and the positions of planets. Calculation of these is to be made by a Karana. It is true that old Hindoo works of such nature do exist. But the positions of planets, at a given time, derived from them are incorrect to some extent at least. Therefore the present Hindoo Calendar on which all our religious ceremonies depend is erroneous. **Mr. Ketkar has corrected this error.** Particularly he has adopted the true length of the sidered year and also the correct precession of the equinoxes. These things and the motions and the positions of planets are to be derived from observation carried on for many years, and from these the tables for calculations of them should be prepared. In Europe this has been done by Messrs. Leverrier and Hansen and chiefly from their works the Nautical Almanacs are prepared in Europe. If a Sanskrit astronomical work is based on the works of Leverrier and Hansen it will be correct. But these works are written in French, they are very large, and good knowledge of higher Mathematics is required to understand them. Besides, their system is different from ours. So after mastering them a new work should be written on the basis of our Hindoo system. Such a new work should be comprehensible to common Hindoo astronomers and astrologers who are ignorant of Logarithm and Trigonometry; and it would be better if recourse to this work should be thoroughly conversant with old Sanskrit astronomical works. For such and other difficulties a new work has not yet been published in India. The late Mr. Raghunāthāchāryā of Madras tried for such a work; but if it was written at all, it has not come to light. Mr. Ketkar has devoted his life to the writing of such a work and I am glad to say that surmounting all difficulties he has succeeded in his aim. If therefore his work be published, it will be most useful to our country. The work has four parts:—

The first part contains the motions and positions of the Sun and Moon and the calculation of Tithis &c. The second part treats of planets, their

mean and true longitude, right ascension, longitude of the chief stars of the Nakshatrās, the daily and heliacal risings of stars and planets &c. The third treats of the calculation of Phenomena such as eclipses, occultations, conjunctions, moon's horns &c.; while the fourth contains the subjects treated of in the Triprashna of the old Hindoo works such as lagna &c. Generally the author gives first the methods of calculation of a particular thing, secondly an example, thirdly the tables for these calculations and lastly their explanations. The old Hindoo Karana works do not give explanations of the methods. It is the sphere of Hindoo Siddhānta works (theoretical works); and thus **Mr. Ketkar's work is in this respect a Sidhānta work too** and Mr. Ketkar has succeeded in getting very accurate motions and positions of the planets at the same time without increasing the volume of this work. His tables are such that a common Hindoo Jyōtishi (astronomer and astrologer) ignorant of Logarithms and Trigonometry can make calculations with their help. The work is written in Sanskrit and also can be used all over India. The language being easy, it can be used by a common Hindoo Jyōtishi. Besides the old Hindoo system of calendar, two new systems are being introduced into India. Mr. Ketkar's work has the special advantage of being useful to either of these three. Taking into consideration all these things, I think, it is most desirable that Mr. Ketkar's work should get a publication.

POONA,
8th April, 1898.

SHANKAR B. DIKSHIT,
A teacher in the Poona Training College.

Mr. Ketkar's Jyotirganitam is the latest and best work in Sanskrit on practical astronomy. It enables any person of average intelligence and knowledge to calculate the places of Sun, Moon, and planets, eclipses and astronomical phenomena with accuracy for any time between 2000 B. C and 3000 A. D. The author's principal object is to enable Hindoo almanac-makers to arrive at results as correct as those of modern European astronomers without any knowledge of the methods of the latter. He has succeeded in achieving the object. For this very reason the book is useful to others besides almanac-makers. Students of History and Arehæology sometimes come across records of astronomical phenomena for the verification of which they have to seek the help of professional astronomers. The book will enable them to dispense with such help, as to use it a knowledge of only the first four rules of arithmetic is necessary. The result will be accurate as provision has been made in the tables for changes due to long periods of time. **Hence the book is worth translating into any European language with a few modifications.** One cannot help noticing the amount of patient thought and labour that must have been expended in the compilation of the work, and the ingenuity characteristic of the born calculator and mathematician by which facility of calculation has been combined with accuracy of result.

RATNAGIRI,
24th January 1899.

M. P. KHAREGHAT,
District Judge, Ratnagiri.

The almanac-makers of the present day have to depend chiefly on the Grahalāghava of Ganesh Daivajyna for astronomical computations. As some centuries have elapsed since the composition of that book, the necessity of a work giving more accurate result was long felt. Under such circumstance, the publication of Mr. V. B. Ketkar's ज्योतिर्गणितम् will certainly be hailed with delight. The principal feature of this book is that it embodies the astronomical discoveries made during the last four centuries with due regard to the principles of European astronomy. The tables employed in the book exhibit great ingenuity as they combine the Hindoo and European methods of calculation. As the book is written in the Sanskrit language, there is no doubt it will be readily accessible to every Pandit and Jyōtishi all over India

RATNAGIRI,
25th January 1899.

H. G. GODBOLE,
Head Master, Ratnagiri High School.

The aim of Mr. Ketkar's work is to correct the Hindu Calendar. He has gone through calculations such as do his industry the very greatest credit. Apart from that I consider that his labour has been as patriotic as it is scientific. Starting from the long gone past, when correct computations were regularly made, he has brought as I understand, the almanac down to the present day and proves that the old Hindu calculations bring about the same results, as are obtained by a different method by western Scientists. He enables the Hindu astronomer and theologian to give his marked days their real meaning, and so far substitutes truth for error. For these reasons I think Mr. Ketkar is deserving of every support, and must receive help to publish a work, which is costly. and cannot be attractive to the general public.

F. A. H. ELLIOT.

श्री.

महाशयकेतकरोपाह्वरामकृष्णसूनुवेङ्कटेशविरचितं ज्योतिर्गणिताख्यं ग्रन्थं पर्यालोच्य चिराभिलषितवस्तुप्राप्त्याऽतीव मुदितोऽहम् ॥ सर्वजनानुभूतमेतद्यदिनानीं प्रचलितचिन्तामणिग्रहलाघवादिग्रन्थागतकाले ग्रहणादीनि न दृश्यन्ते ॥ ग्रन्थनिश्चितकालात्प्राक्पश्चाद्वा भवन्ति ॥ तत्तत्कालविहितानि स्नानदानादिकर्माणि यथोक्तकाले कर्तुं दृढमतयोऽपि जनाः सूक्ष्मकालदर्शिग्रन्थाभावादगत्या ज्ञातगणितशैथिल्यानपि प्रचलितग्रन्थानेवानुसरन्ति ॥ अनुमितपूर्वमेतच्छैथिल्यं पूर्वग्रन्थकारैः खेटकर्मणो भूयोभूयोनिरीक्षणेन ॥ अत एव ते स्वस्वकाले पूर्वग्रन्थान्पर्यचालयन्नवान्वा व्यररचन् ॥ एवं गतेऽधुना दृक्प्रत्ययावहग्रन्थस्याऽऽवश्यकतामवलोक्य श्रीमद्भगवत्प्रेरणयाऽयं ग्रन्थो ग्रन्थकृता प्रणीतः ॥ अस्य ग्रन्थस्य साहाय्येन यथोक्तकाले जना धर्मकृत्यानि कर्तुं समर्था भवेयुः ॥ एवं जनानां कालातिक्रमप्रत्यवायपरिहारद्वारा पुण्यसंपादनेन मम्मटोक्तकाव्यप्रयोजनानां परमं शिवेतरक्षतिरूपं चतुर्थं प्रयोजनं ग्रन्थकृता संपादितं भवेत् ॥ अधुना नवनवोपलब्धयन्त्राणां शास्त्रान्तराणां च साहाय्येन खेचराणां वेधं

गृहीत्वा पाश्चात्यज्योतिःशास्त्रविशारदैः स्वस्वभाषासु दृक्प्रत्ययग्रहगणितग्रन्था विरचिताः सन्ति ॥ तैर्ग्रन्थैर्निश्चिता ग्रहणादिकालाः पलैक्यमपि न व्यभिचरन्ति ॥ तद्ग्रन्थेभ्यः केवलं मूलाङ्कषट्कमादायास्मद्देशीयकालगणनापद्धतिमनुसृत्य नवीनोऽयं ग्रन्थो ग्रन्थकृता निर्मितः ॥ अयं ग्रन्थोऽतः पूर्वं सहस्रत्रयावधिवर्षाणामतः परं सहस्रद्वयावधिवर्षाणां गणितकरण उपयुक्तः स्यात् ॥ असुरयवनप्रणीतग्रन्थेभ्यो ज्ञानग्रहणपद्धतिः पूर्वाचार्यसंप्रदायसिद्धैव ॥ येन पक्षेण दृक्तुल्यता स्यात्स पक्ष एव आदर्तव्य इत्यपि प्राचीनग्रन्थकारैः कण्ठरवेणोक्तम् ॥ तदुक्तं **ग्रहलाघवे**– " शौक्रं केन्द्रमजार्यमध्यगमितीमे यान्ति दृक्तुल्यतां सिद्धैस्तैरिह पर्वधर्मनयसत्कार्यादिकं त्वादिशेत् " ॥ इति । तथाचोक्तं **जातकपद्धत्यां केशवदैवज्ञैः**–" यन्त्रैः स्पष्टतरोऽत्र जन्मसमयो वेधोऽत्र खेटाः स्फुटाः यत्पक्षे हि घटन्ते " इति ॥

तथाऽस्मिन्ग्रन्थे **ग्रहलाघववच्छालिवाहनशकवर्षाण्युज्जयिन्या** मध्यरेषां चाऽऽश्रित्य कोष्ठका रचिताः ॥ अतो नेयमपूर्वा पद्धतिः ॥ किंतु परिचितैव ॥ अस्य ग्रन्थस्य सर्वेषां भारतवर्षीयाणामुपयोगो भूयादिति संस्कृतभाषाऽतीव सुलभा योजिता ॥ संकलनव्यवकलनगुणनभागहरेतिगणितकर्मचतुष्टयाभिज्ञा अपीमं ग्रन्थमभ्यस्य यथा गणितकरणे समर्था भवेयुस्तथाऽतीव सुलभा विस्तृताश्च कोष्ठका रचिताः ॥ प्राचीनग्रन्थापेक्षयाऽस्मिन्ग्रन्थे ये विशेषास्ते ज्योतिर्विदां चमत्कृतिजनकाः सन्ति ॥ कालविपरिणामाध्यायो व्यवहारज्ञानामतीवोपयुक्तः ॥ **सिद्धान्तशिरोमणिकर्तॄणां भास्कराचार्याणां** निवासस्थाननिर्णयस्तथा तद्विरचितदिग्देशकालविषयाणां केषांचिन्मुख्यप्रश्नानां भङ्गप्रकारोऽपि प्रदर्शितः ॥ एवमस्य ग्रन्थस्य प्रणयने ग्रन्थकर्तुरनुपमबुद्धिकौशलं सततपरिश्रमशीलत्वं फलाभिसंधिरहितकर्मपरता चेत्यादयो गुणाः स्फुटं दृश्यन्ते । परमभूषणास्पदमेतन्**महाराष्ट्रीयाणां** यदेतादृग्ग्रन्थकर्ता **महाराष्ट्रे** समुत्पन्न इति ॥ नवीनोऽयं ग्रन्थ इति कथं प्रामाण्यमर्हतीतिसंशयापनोदकं प्रत्यक्षान्नान्यत्प्रमाणमपेक्षितम् ॥ तदुक्तम् ' **प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ** ' इति ॥ एतद्ग्रन्थानुसारेण कृते गणिते यदि दृक्तुल्यता स्यात्तदाऽस्य स्वीकारो ' **बुद्धेः फलमनाग्रहः** ' इति न्यायेन बुद्धिमतामुचित एव ॥ अस्य ग्रन्थस्य लोकस्वीकारेण यदि ग्रन्थकर्ता सफलश्रमः स्यात्तदा " **क्लेशः फलेन हि पुनर्नवतां विधत्ते** " इति महाकवे**र्भारवे**रुक्तिमनुसृत्य पुनर्नवो भूत्वा विद्वज्जनाभिलषितमुपपत्तिग्रन्थमपि निर्मातुमयं ग्रन्थकर्ता समर्थो भूयात् ॥ एवं महता परिश्रमेण ग्रन्थकृता विरचितं ग्रन्थमभ्यस्य ततः स्वस्वपञ्चाङ्गानि निर्माय तदनुरोधात्तत्काले विहितकर्मणामनुष्ठाने जनानां मनांसि प्रवर्तयतामस्मद्धीवृत्तिप्रेरकः **परमेश्वर** इत्याशास्ते **केळकरोपनामकात्मारामतनूजश्चिन्तामणिशास्त्री रत्नागिरिप**त्तनस्थाङ्ग्लपाठशालायां विद्यमानः संस्कृताध्यापकः ॥

रत्नागिरिपत्तनम् । शकाब्दाः १८२१ । पौषशुद्धि चतुर्दश्याम्

रा० रा० व्यंकटेश बापूजी केतकर यांनीं **ज्योतिर्गणित** नांवाचा संस्कृतांत नवीन ग्रन्थ तयार केला आहे. या ग्रन्थासंबंधानें प्रोफेसर बाळ गंगाधर टिळक यांचा अभिप्राय (ता० २९ माहे मे सन १९०० इ० चे केसरीपत्रावरून उतारा)

*** " नवीन पद्धतीचीं पंचांगें तयार करण्यास केरोपंत आणि बापूदेवशास्त्री यांचीं कोष्टकें किंवा सारण्या आहेत, पण ग्रहलाघवसारख्या त्या सोप्या नसल्यामुळें तशा पद्धतींच्या ग्रंथांची उणीव होती. पण तीही रा. रा. व्यंकटेश बापूजी केतकर ह्यांनीं ज्योतिर्गणित व केतकी हे दोन ग्रन्थ करून नुकीच भरून काढली आहे. केतकरांस हे ग्रन्थ करण्यास किती परिश्रम पडले याची परीक्षा सामान्य मनुष्यास होणें कठीण आहे. कोणत्याही प्रकारच्या नवीन

माहितीचा पूर्वापार चालत आलेल्या जुन्या पद्धतीशीं बेमालूम सांधा जोडून पुन्हां पंचांग-ज्योतिष्यांकरितां जितकी सुलभ पाहिजे तितकी जुनी पद्धति कायम ठेवून ग्रन्थ करणें यास चांगली बुद्धी लागते. इतकेंच नव्हे, तर परिश्रमही पुष्कळ करावे लागतात. तसे परिश्रम रा. रा. केतकर ह्यांनीं घेऊन हे नवीन करणग्रन्थ त्यांनीं संस्कृतांत केले याबद्दल त्यांचे आभार मानावे तेवढे थोडेच आहेत. **अशा तऱ्हेचा हा संस्कृतांत पहिलाच ग्रन्थ आहे.**

॥ श्री ॥

विद्वन्मणि व्यंकटेश बापू केतकर यांणीं सांप्रत सर्वोपयोगी ज्योतिर्गणित नांवाचा पंचांग गणिताचा ग्रन्थ रचिलेला पाहून कोणाही तदभिज्ञांस आनंद झाल्यावांचून रहाणार नाहीं. कारण आपल्या देशांतील सिद्धांतशिरोणी, ग्रहलाघव वगैरे ग्रंथांवरून केलेल्या गणिताप्रमाणें ग्रहणें, ग्रहयुत्या वगैरेंचा अनुभव फार दिवसांपासून येत नाहीं; यामुळें गणित ग्रंथास चालन देण्याचा उद्योग श्रीमज्जगद्गुरु शंकराचार्यस्वामी मठ संकेश्वर यांच्या संस्थानांतून चालू करण्याचें चार पांच वर्षांपूर्वी प्रसिद्ध झालें होतें; परंतु त्याचा परिणाम काय झाला तें कळलें नाहीं. असो. या आपल्या देशांत गणितस्कंध ग्रंथाचें शैथिल्य पाहून इंग्रजी ज्योतिषी यांच्या ग्रंथांचा अभ्यास करून बहुतकाल त्यांचा अनुभव घेऊन केतकरानीं त्याच प्राविण्य संपादन केलें व तें ज्ञान आपल्या देशांत निरंतर रहावें व या कलिकालांत धार्मिक लोकांकडून होणारीं अल्प स्वल्प धर्मकृत्यें शास्त्रोक्त योग्यकाळीं व्हावीं म्हणून त्यांनीं मंदबुद्धि शिष्यांसही सुलभ व त्वरित पंचांगसिद्धि देणारा, अन्य विद्वानांचें अथवा द्रव्याचें सहाय नसतां स्वबुद्धिकौशल्यानेंच हा (**ज्योतिर्गणितम्**) ग्रन्थ केला. यांतील कोष्टकरचना बहुकालव्ययाशिवाय साध्य नाहीं. या ग्रंथावरून आम्हीं गणित करून पाहिलें तें आकाशांतील पदार्थांशींहि मिळतें. यास्तव एतद्देशीय विद्वानांनीं अनुभव घेऊन या ग्रन्थाप्रमाणें पंचांग कराण्याचा व पठनपाठनाचा क्रम सुरू करावा; म्हणजे आपलीं धर्मकृत्यें योग्यकालीं होतील व ग्रंथकर्त्याच्या यत्नाचें साफल्य होऊन त्यांची कीर्ति इहपरलोकीं अजरामर राहील. श्रीमद्भास्कराचार्य व गणेश दैवज्ञ यांच्या तुल्य असा ज्योतिषशास्त्राभिज्ञ पुरुष या देशांत अलीकडे जन्मला नाहीं यास्तव अशा अद्वितीय पुरुषास ईश्वरानें पूर्णायु करावें अशी ईश्वराजवळ आम्ही सप्रेम याचना करितों. शिवाय वेंकटेश यांनीं चिंतामणी व ग्रहलाघव या ग्रंथांवरून गणित करणारांच्या सोईकरितां वैजयंती व केतकी असे दोन ग्रंथ पूर्व ग्रंथ पद्धतीनें केले आहेत. त्या ग्रंथांवरून केलेलें पंचांगही वरील ग्रंथाप्रमाणेंच दृकुतुल्य होतें. ते ग्रंथही अध्ययन अध्यापन योग्य आहेत. त्या केतकी ग्रंथांत शनिवलय गणित, चंद्रग्रहणांत विरल छाया प्रवेश इत्यादि गोष्टी नाहींत. तथापि ज्योतिर्गणितम् ग्रंथाचा विस्तार फार असल्यामुळें त्याचा संग्रह प्रवासी लोकांस दुर्घट आहे, यामुळें त्यांनीं केतकी वैजयंती ग्रंथाचें पठनपाठन सुरू केलें तरीहि वेंकटेशांच्या श्रमाचें साफल्य होईलच. यास्तव दुराग्रह सोडून आपल्या सोईप्रमाणें वरील ग्रंथांवरून पंचांग करण्याचा प्रयत्न सर्व विद्वानांनीं करावा असा माझा पूर्ण अभिप्राय आहे.

फाल्गुन शुक्ल ५ इंदुवार
शके १८२१ विकारी संवत्सरः

कमलाकर नीलकंठ जोशी पालगडकर
मु० खेड

॥ श्रीः॥

केतकरोपाव्हश्रीरामकृष्णसूनुश्रीवेंकटेशेनविरचितं

॥ भारतभूमंडलीयं ॥

॥ सूर्यग्रहणगणितम् ॥

। ज्योतिर्गणित-केतकी-वैजयन्तयादीनां ।

। ज्योतिषग्रंथानां ।

। प्रणेता ।

सम्पादकः

श्रीवेंकटेशः

(जन्मशकः १७७५ पौषः)

॥ श्रीमद्वेंकटेशबापूशास्त्री केतकरः ॥

भारतीय बुक कार्पोरेशन

दिल्ली (भारत)

भूमिका

अथेदानीमिदमभूतपूर्व "भारतभूमंडलीयसूर्यग्रहणगणितं" विद्वज्जनानां पुरतः स्थाप्यमानं सुलभार्थं, गभीराशयं, सुव्यवस्थितरचनासुभगं गणितन्यासैरलंकृतं, उदाहरणद्वयसमुल्लसितं चतुरचित्तचमत्कृतिकरं रमणीयपरिलेखद्वयसमुद्भासितं कोष्टकैः सुलभीकृतं, गणकानां चित्तं संचोर्य गणितकर्मणि प्रयोजकं, दृष्टिं बध्वा परिलेखलेखनकर्मणि नियोजकं, संपूर्णे आलेख्ये कृते सति मुहुर्दर्शनलोलुपतां समुत्पादयति न वेत्यस्य परीक्षणं स्वानुभवेनैव परिलेखकैः ग्राहकैश्च कार्यमिति।

रामविनोदे–

"दैवज्ञानंतभट्टात्मजमखिलगुणं नीलकंठानुजातम्।

श्रीरामं **स्वर्णवृष्ट्या** शकगणितकृतौ स्वामिकार्ये न्ययुङ्क्त।।"

इत्यनेन येषु दिवसेषु ज्योतिःशास्त्रं राजाश्रितमासीत् ते हि नो दिवसा गताः इत्यलम्।

ग्रंथकर्ता,

श्रीवेंकटेशः

अनुक्रमणिका

भारतभूमंडलीयसूर्यग्रहणगणितम्

नाम

परिलेखपद्धतिः

(१) अथ चंद्रग्रहणगणितं यावत्प्रमाणेन सुलभतरं, अल्पकालसाध्यं, अल्पश्रमोत्पाद्यं तावत्प्रमाणेनैव सूक्ष्मसूर्यग्रहणगणितं बहुश्रमसाध्य संत्रासकरं चेत्यस्मद्रचितं**ज्योतिर्गणितादिसूक्ष्मकरणग्रंथ**पठनपराणां विदुषां स्फुटमेव। ग्रहलाघवोक्ता सूर्यग्रहणसाधनपद्धतिस्त्वितोऽपि जटिलतरा। एकं ग्राममधिकृत्य सूर्यग्रहणस्पर्शमोक्षकालानयनेन गणकाः संत्रस्यंते का नाम वार्ता दशपंचदश-ग्रामाण्यधिकृत्य कालानयनस्य। तत्तु कैमुतिकन्यायेनैवाशक्यमित्यर्थः।

(२) किंतु परिलेखपद्धतिरवलंब्यते चेत्सूर्यग्रहणगणितं चंद्रग्रहणगणितवदेव सुकरं भवति। अवच्छेदकानां (Coordinates) साहाय्येन विस्तृता प्रमादरहिता च सकृदेव ग्रहणसाधकालेख्यं परिलिख्यते चेत्सहस्त्रावधिग्रामानधिकृत्य स्पर्श-मोक्षकालानयने न श्रमलेशमप्यनुभवति गणकः। किंतु परिलेखकेनातीव नैपुण्यशालिना भाव्यमित्येव। संप्रति भूमितिगणितेन सहैव परिलेखन (Graph) पद्धतिरपि शालासु पाठ्यते। अत एव विद्यार्थिनामपीयं परिलेखपद्धतिः सुगमा भवति।

(३) अस्यां पद्धतौ द्रष्टा चंद्रलोकमधिष्ठाय भूगोलं प्रति पश्यतीति कल्पितमस्ति। एवमस्थिते सूर्यमध्य-भूगोलमध्य-संधायिकां रेखां कृत्वा तस्या लंबदिशि भूमध्यावगाहि यद्वर्तुलपटलं तत् **प्रधानपटलं** (Fundamental plane) भवति। इदं प्रधानपटलं (Plane), भूमध्यवृत्तपटलं यस्यां रेखायां च्छिनत्ति सा **प्रधानरेषा** भवतीति कल्पितमस्ति। इयं प्रधानरेषा भूमध्यावगाहिनी वर्तते। तस्मादेव अस्यां परिलेखपद्धत्यां भूमध्यबिंदुरेव **उद्गमः** (Origin) स्वीकृतः। एतद्बिंदोः पूर्वदिक्स्थः प्रधानरेषाभागो धन-क्ष-अवच्छेदकस्य प्रांगणं

भवति। अर्थात्पश्चिमदिक्स्थः प्रधानरेषाभागो ऋण–**क्ष**–अवच्छेदकस्य प्रांगणं भवति। अस्यां प्राधनरेषायां **य**–अवच्छेदकाः सर्वे लंवत्वेन तिष्ठंति। प्रधानरेषाया उत्तरप्रांतो दक्षिणप्रांतश्च यथासंख्यं धन–**य**, ऋण–**य**, अवच्छेदकस्य च प्रांगणं भवतीति स्फुटमेव।

(४) **परिलेखगणितस्य** चत्वारो भागाः कृताः। ते च यथा–**प्रथम १ भागः**–अस्मद्रचितज्योतिर्गणितावलंबनेन मराठी–**ग्रहगणिताव-लंबनेन** वा सूर्यचंद्रयोः समभोगकालो नाम **पर्वांतकालानयनम्**। तथा चाग्रिमगणितोप-युक्तानां केषांचित्परिमाणानां संसाधानम्।

द्वितीयो २ भागः–चंद्रस्य वर्तुलाकारच्छायाया मध्यबिंदुर्भूगोलोपरि येन मार्गेण गच्छति तन्मार्गनिष्ठास्तस्य प्रतिहोरासंभवस्थितिनिदर्शका ये (क्ष, य,) अवच्छेदकास्तेषां साधनम्।

तृतीयो ३ भागः–चंद्रनिष्ठः सन् भूगोलं प्रत्यवलोकयन् द्रष्टा, भूगोलस्याक्षभ्रमणहेतोः उज्ञयिनी तदितरनगराणि च दीर्घवर्तुलाकारमार्गेण भ्रमंतीति पश्यति। तस्मात् उज्जयिनीस्पष्टकालमानानुसाराः प्रतिहोरासंभवस्थिति-निदर्शका ये। (क्ष, य,) अवच्छेदकास्तेषां साधनम् ।

चतुर्थो ४ भागः–अवच्छेदकानां साहाय्येन परिलेखं लिखित्वा तस्मिन् चंदच्छायां इष्टग्रामं च संचाल्य तत्रस्थस्पर्शमोक्षादिकानां स्पष्टकालमानानुसारेण कालानयनम्।

सूचना– एतत्पुस्तके, ६० सेकंदाः = १ मिनीटः। ६० मिनीटाः = १ होरा। २४ होराः = १ दिवसः। २४ मिनीटाः = १ घटिका। २½ घटिकाः = १ होरा। एवं होराशब्दोपयोगः कृतः। मराठीभाषायां, तासः इति, हिंदीभाषायां कलाक इति होराशब्दार्थो ज्ञेय.। तथैव इंच, फूट, शब्दावपि समंजसत्वात्तथैवोपयुक्ताविति ध्येयम्।

प्रथमो १ भागः

उज्जयिनीरेखानुगुणं पर्वांतीयमध्यम कालानयनम्

इतरपरिमाणानयनं च।

(५) उदाहरणं १ प्रथम्—शके १८२८ वर्षे पौष ३० सोमवासरे नाम इ.स. १९०७ जानेवारी १४ तारिखायां जातस्य सूर्यग्रहणस्य गणितमस्म-द्रचितमराठीग्रहगणिताश्रयेणाग्रिम (पृ. अंतिम) न्यासे सविस्तरं कृतमस्ति। तस्य सारं यथा=उज्जयिनीमध्यमकालमानानुसारेण समकलपर्वांतसमयो मध्य-रात्रितः ११ होराः नाम मधयमसूर्योदयादनंतरं १२ घ. ३० पलानि भवति।

उपकरणानि

(उदाहरणं १ प्रथमम्)

	अं.	क.		अं.	क.
सायनसूर्यः	२९२,	५६.३	सायनचंद्रः	२९२,	५६.३
सूर्यदिनगतिः	१,	१	चंद्रदिनगतिः	१४,	५०.६
रविबिंबं	०,	३२.६	चंद्रबिंबं	०,	३३.२
रविक्रांतिः, द.,	−२१,	२९.९	चंद्रशरः उत्त.	+०,	५२.९
अयनांशाः	२२,	३२.५	चंद्रपरमलंबनं	०,	६०.८
अयनबलनं, उ.,	+ ९,	३७.०	विक्षेपवलनं द.	−४,	५५.०
वेलांतरं मिनीटाः,	−०,	९	पर्वांतसंस्कारः	+ ०,	८ मिनीटाः

उदाहरणं २ द्वितीयम्—शके १८९० वर्षे आश्विनकृष्ण ३० सोमवासरे नाम. इ. स. १९२८ नोव्हेंबर १२ तारीखायां जातस्य सूर्यग्रहणस्य परिलेखपद्धत्या गणितं क्रियते। तस्य मूलांका यथा उज्जयिनीमध्यमकालमानानुसारेण समकल-पर्वांतसमयो मध्यमसूर्योदयानंतरं २१ घ. ३६ पलकाले भवतीति।

उपकरणानि

(उदाहरणं २ द्वितीयम्)

	अं.	क.		अं.	क.
